त्वमेवमसि मध्यस्थो यदेवमसदृशे वस्तुनि देहिनः स्नेहयसि। मुधा च तवैवमतिदारुणकर्मणो धर्म इति प्रसिद्धिः। अहो, कथमिव लोकस्याहार्यगुणरमणीयताजुषि वपुषि शुनः स्वतालुक्षतलोहितपरिष्वक्ते शुष्के कीकस इव तर्षः। अताम्बूलमुखं हृमुपानत्करनिकेतनमिव करोति महोद्वेगं चित्तस्य। अनुपनीतं हि चक्षुः स्फुटितपिण्डगण्डमिव महतीं करोति विचिकित्सामन्तःकरणस्य। अविहितसंस्कारं हि शिरः क्षणादेव भवति गोगर्मुत्रिवारणादपि कष्टतरम्। मनागेवोपेक्षितसृष्टिः शरीरयष्टिश्चर्मकृद्वृतिरिव विदधाति पिधेयनासमासन्नचरम्। अरे, हतवृत्त चित्त, कथमिव त्वमत्र प्राप्तसंसारफलमिवाभिनिविशसे। प्रसरमलभमानं प्राणव्ययैरपि संगन्तुमिच्छसि, वियुज्यमानं परिमुषितसर्वस्वमिव ताम्यसि, अनुव्रजमानं ग्रहगृहीतमिवात्मानं विधमसि। अहो, किमिवमस्य जगतो महान्ध्यं यदनिशमस्यान्तःसारतामवबुद्ध्यमानमपि मण्डैरिव

आश्चर्य है मैं सोचता हूँ कि कहाँ यह पूर्व में होनेवाली कहने के लिए अशक्य मेरे मन की सन्ध्याकालीन मेघ-सरीखी रागकलुषता और कहाँ इस समय होनेवाली चित्त की वैसी निर्मलता जैसे श्वेत द्रव्य के जल से प्रक्षालित हुआ वस्त्र निर्मल (शुभ्र) होता है। कहाँ पूर्व में होनेवाली जाल में पड़े हुए पक्षी-सरीखी मेरी नेत्र-चपलता और कहाँ इस अवसर पर होनेवाली वज्र द्वारा कीलित हुई-सी मेरी चक्षु-निश्चलता। हे पापिष्ठ विधे! क्या तुझे दूसरा कोई भी घात करने का उपाय नहीं था, जिससे तुम अमृतमति देवी को इस प्रकार का लोभ दिखाकर वशीभूत करके मुझ-सरीखे प्राणियों का घात करते हो। निस्सन्देह आप कैसे मध्यस्थ हो? जिससे ऐसे अतुल्य पदार्थ में प्राणियों को स्नेह युक्त करते हो। ऐसा होनेपर विशेषरूप से हिंसा करनेवाले आपकी 'धर्म' ऐसी ख्याति झूठी है। आश्चर्य है किस प्रकार से विवेक-हीन लोक की सुगन्धित वस्त्रादि के संयोग से मनोज्ञता को पुष्ट करनेवाले शरीर में वैसी तृष्णा कैसे हो रही है? जैसे कुत्ते को अपनी तालु में हुए व्रण से उत्पन्न हुए रक्त से आर्द्र (गीली) हुई नीरस हड्डी में तृष्णा होती है। जैसे चमड़ा बेचनेवाले (चमार) का गृह चित्त को दुःखित करता है वैसे ही ताम्बूल से रहित हुआ मुख महान् दुःख उत्पन्न करता है। जैसे शरीर का व्रणस्फोट (पका हुआ फोड़ा) विशेष घृणा उत्पन्न करता है वैसे ही संस्कार (प्रक्षालन-क्रिया) हीन नेत्र चित्त में विशेष घृणा उत्पन्न करता है एवं निश्चय से संस्कार-हीन (तैलमर्दन-आदि क्रिया से हीन) हुआ मस्तक तत्काल ही डाँस-मच्छड़ को निवारण करनेवाले पंखा से भी निन्द्यतर प्रतीत होता है। यह शरीर-यष्टि थोड़ी-सी ही संस्कारों (स्नान-आदि क्रिया) से उपेक्षित हुई (हीन हुई) वैसी निकटवर्ती पुरुष को नाक बन्द करनेवाली कर देती है जैसे चमार की चमड़े की मशक निकटवर्ती पुरुषको नाक बन्द करनेवाली कर देती है।

अरे दुरात्मन् नष्ट आचरण-शील मन! तू इस स्त्रीजन में, प्राप्त हुए संसार फल-सरीखा क्यों अभिप्राय करता है? रे मन! तू अप्राप्त इष्ट वस्तु के संयोग को महान् कष्ट उठा करके भी प्राप्त करने की चेष्टा करता है। अरे चित्त! स्त्रियों से वियोग-प्राप्त किये जा रहे तुम उनकी प्राप्ति की वैसी आकाङ्क्षा करते हो जैसे नष्ट हुए समस्त धन की पुनः प्राप्त करने की आकाङ्क्षा की जाती है। अरे चित्त! तुम स्त्रीजन का संयोग प्राप्त करते हुए अपने को पिशाच से पकड़े हुए-सरीखे पीडित करते हो। आश्चर्य है कि इस लोक का यह अज्ञान क्या है? जिससे यह लोक इस शरीर व स्त्रीजन के आभ्यन्तर स्वरूप को निरन्तर जानता हुआ भी उनकी प्राप्ति के लिए वैसा [वञ्चनार्थ] प्रयत्नशील किया जाता है जैसे विदूषकों द्वारा राजाओं या नाटक-दर्शकों का

समक्ष जो जो वस्तु तूने मेरी ली है, वह मेरे लिए दे जा। उसने कहा—दे दी। ऐसा कहते ही वह तत्काल काल-कवलित हो गई। बाद में विद्वानों ने उस राजकुमार से पूछा—यह कैसी घटना है? तब उसने प्रस्तुत श्लोक पढ़ा। अर्थात्—मैंने इसके लिए राज्यादि छोड़ा—तथापि कठोर हृदयवाली यह मुझे छोड़कर देवकेशी के साथ जा रही है।

वाह्यते। न वेत्ति बहिश्छायाप्रतारितमुदुम्बरफलस्येवास्य कलेवरस्यान्तर्बीभत्सताम्। न चैतदथवा शोच्यं, किं नु खल्वयं वराकः करोतु जन्तुः! कर्मैव तावत्प्रथममनुकूलं न भवति जीवलोकस्य। यतः क्व निसर्गतः पर्वदिवसानीव पुराकृतपुण्यलव-विपाकदुर्लभानि प्राणिषु स्त्रीविलसितानि, क्व च तदुच्छेदनकरागमः कृतान्तपञ्चकुलसमः स्वच्छन्दवृत्तेर्गुणविद्वेषणस्याधर्म-रुचेरज्ञानतिमिरस्यैश्वर्यमहाग्रहस्य च समवायः। यथाजनाभिप्रायमुपदर्शितविषयस्ते च ते चागमाः प्रमाणम्। उपतर्पित-देवपित्रतिथिचेतसि हि पुंसि किमप्यशुभं कर्म न भवति दोषायेति, तैस्तैर्निदर्शनैरभ्युपगमयितारः प्रायेण समीपवर्तिनः पुरुषाः। यौवनाविर्भावः पुनः कादम्बरीयोग इव परं मुमुक्षूणामपि नाविकार्यं मनांसि विश्राम्यति।

श्रीमदः सर्वेन्द्रियाणां जनुषान्धत्वमिवाप्रतीकारमुपघातकरणम्। अनङ्गसिद्धान्तः खलोपदेश इवानर्थभुजङ्ग-मानामुत्थापनदण्डः। कवयः पुनः पिशाचा इव विषयेषु विभ्रमयन्ति निसर्गादजिह्मान्यपि चित्तानि। डिण्डिमध्वनिरिव व्यसनव्यालप्रबोधनकरः कलानामभ्यासः। नियोगलाभ इवापातसुन्दरः प्रसह्योन्मादयति सुविबुधोऽपि पुरुषान्। प्रणयिजन-विलासो हृदयमुपनिपत्य दर्पयति च। याचितकमण्डनमिव छन्दानुवर्ती परिजनः। तदेतेष्वेकमप्यलमुपहन्तुं प्राणिनः, किं पुनरमीषां न समवायः। तदहमेवमनुसंभावयेयम्, स्वयमुचितं कर्मानुष्ठातुमशक्तैः स्वव्यसनतर्पणाय कामचारक्रियासु प्रवर्त्यन्ते विवेकविकलाः। न खलु जात्यपेक्षया पापमपापं धर्मो वा भवत्यधर्मः। स्यादपि यदि कर्मविपाकस्तथैव दृश्येत, न

समूह हँसी मँजाक के लिए प्रयत्नशील किया जाता है। यह लोक इस शरीर के बाहिरी वर्णन से धोखा खाया हुआ उदुम्बर फल-सरीखे इस शरीर की भीतरी ग्लानि नहीं जानता। अथवा इस विषय में शोक नहीं करना चाहिए। निस्सन्देह यह विचारा प्राणी क्या करे? अनुक्रम से पूर्व में इस प्राणी-समूह का पूर्वजन्म में किया हुआ कर्म अनुकूल (सुखजनक) नहीं होता, क्योंकि कहाँ तो प्राणियों में वर्तमान स्त्रियों के बिलसित (प्रेमो-द्योतक हाव-भाव-आदि), जो कि स्वभाव से दीपोत्सव-आदि पर्व दिनों-सरीखे प्रमुदित करनेवाले हैं और जो पूर्वोपार्जित पुण्य-लेश के उदय से दुर्लभ हैं, और कहाँ वह पुण्य का नाश करनेवाला मिथ्याशास्त्र, जो कि सिद्धान्त में कहे हुए पञ्चकुल बढ़ई व लुहार-आदि-सरीखा आचार-विचार को नष्ट करता है। जो (मिथ्या-शास्त्र), स्वच्छन्दवृत्ति, गुण-विद्वेषण, अधर्मरुचि, अज्ञानरूप अन्धकार तथा ऐश्वर्य महाग्रह उक्त पाँचों का समुदाय है। प्रस्तुत मिथ्या शास्त्र लोक के मानसिक अभिप्रायानुसार कर्तव्य प्रकट करने वाले हैं। अर्थात्—जैसे जन साधारण चाहता है वैसा ही शास्त्र मिथ्या दृष्टि पढ़ते हैं। वे आगम जगत्प्रसिद्ध सिद्धान्त (वेद व स्मृतियाँ) प्रमाण माने जाते हैं।

प्रायः करके समीपवर्ती पुरुष, 'देवता, पिता व अतिथियों को चित्त से तृप्त करनेवाले पुरुष से किया हुआ कोई भी अशुभ (पाप) कर्म निश्चय से दोषजनक नहीं होता' ऐसे खोटे दृष्टान्तों द्वारा अशुभ कर्म कराने-वाले होते हैं। जवानी की उत्पत्ति मदिरापान-सरीखी निश्चयसे मोक्षाभिलाषी पुरुषोंके चित्तों को भी बिना विकार प्राप्त किये विश्राम नहीं लेती। लक्ष्मी का मद पाँचों इन्द्रियों के विनाश का कारण है, जो जन्मान्ध-सरीखा चिकित्सा के अयोग्य है। कामशास्त्र दुष्टोपदेश-सरीखा धन, धान्य व जीवन का क्षयरूपी सर्पों को जगानेवाली यष्टि है। फिर कवि लोग व्यन्तरों-सरीखे स्वभावसे सरल चित्तों को भी इन्द्रियों के विषयों में भ्रान्ति उत्पन्न कराते हैं। संगीत-आदि कलाओं का अभ्यास डमरू की ध्वनि-सरीखा दुःखरूपी कालसर्प को जगानेवाला है। सचिव आदि उत्तम पदों की प्राप्ति-सरीखा स्त्रीजनों का भोग प्रथमारम्भ में मनोहर प्रतीत होता हुआ हठात्कार से विशिष्ट विद्वान् पुरुषों को भी उन्मत्त बना देता है। यह केवल उन्मत्त ही नहीं करता अपितु चित्त में प्राप्त हुआ दर्प कराता है। इच्छानुसारी परिवार याचना की हुई वस्तु को सुसज्जित करने-सरीखा केवल शोभा के लिए है। अतः इनमें से एक भी पदार्थ जब प्राणियों का विशेष रूप से पतन करने में

दैवम् । तथाहि—वाच्यमानं पुस्तकमिव प्रतिक्षणमवहीयन्ते सकलजनसाधारणानामीश्वराणामप्यायूंषि । मुनिशिरसिजेषु वृद्धिरिव न चिरस्थायिनी भवति देहकान्तिः । स्त्रीमनसोऽप्यस्थिरतरमिदं यौवनमाजवंजवीभावोपनीते विनिपाते च पतति । न भवत्यल्प इव महानगोचरः । कीनाशस्तु यः परं बीभत्सुमपि शरीरिणमतिस्पृहयालुतया गिलति, स कथं स्वभावसुभगं परिहरेत् । लघ्वेव मे वृत्तिच्छेदो मा भूदिति स यदि कदाचित्कानिचिद्दिनानि दन्तान्तर इवास्ते, तदावश्यं विषयविजय-प्रासादविनिर्माणादिव भवितव्यं शिरसि पलितवल्लरीपताकारोहणेन, हितोपदेशनिषेधपरिपाकादिव बाढमुत्कम्पितव्यमुत्त-

---

समर्थ है तब इन सब का समुदाय क्या प्राणियों का अनर्थ नहीं करेगा ? इससे मैं (यशोधर) निम्न प्रकार विचार करता हूँ ।

स्वयं पुण्य कर्म करनेमें असमर्थ पुरुषोंसे अपने व्यसन-पोषण के लिए अज्ञानी पुरुष स्वेच्छारों में प्रवृत्त किये जाते हैं । निस्सन्देह जाति (ब्राह्मणत्वादि) की अपेक्षा से पाप, पुण्य नहीं होता और धर्म अधर्म नहीं होता । हो सकता है यदि कर्म का उदय विपरीत रूप से देखा जावे । अर्थात्—अधर्म से सुख और धर्म से दुःख होता हुआ देखा जाय तब कहीं अधर्म, धर्म हो सकता है किन्तु वैसा नहीं देखा जाता, किन्तु पाप से दुःख और पुण्य से सुख होता हुआ देखा जाता है ।

अब उसी का निरूपण करते हैं—समस्त लोक-सरीखे धनाढ्यों या राजाओं की भी आयु पढ़ी जाने-वाली पुस्तक-सी क्षण-क्षण में क्षीण हो रही है । जैसे मुनियों की केश-वृद्धि चिरस्थायिनी नहीं होती वैसे शरीर-कान्ति भी चिरस्थायिनी नहीं होती । यह जवानी स्त्री-चित्त से भी विशेष चञ्चल है । यह प्राणी संसार स्वभाव से आए हुए मरण के अवसर पर मरता ही है । महापुरुष भी साधारण लोक-सरीखा मृत्यु का विषय होता है । निस्सन्देह जो यमराज कुरूप प्राणी को भी विशेष चाहनेवाला होने से खा लेता है वह स्वभाव से सुन्दर राजा को कैसे छोड़ेगा ? 'मुझ यमराज की शीघ्र ही जीविका (लोक को अपने मुखका ग्रास बनानेरूप वृत्ति) का उच्छेद (नाश) नहीं होना चाहिए' इससे यदि वह कुछ दिनों तक अपने दाँतों के मध्य में स्थापित करनेवाला-सा स्थित रहता है । अर्थात्—यदि किसी को तत्काल नहीं निगलता तो उस कालमें निश्चय से वृद्ध के शिर पर सफेद बालों की लतारूपी ध्वजा का आरोहण होना चाहिए । जिससे ऐसा मालूम पड़ता है—मानों—विषय-विजय-प्रासाद के निर्माण से ही ऐसा हुआ है । अर्थात्—जैसे जब राजा किसी विषय (देश) पर विजयश्री प्राप्त कर लेता है, जिससे वह उस देश को ग्रहण करता हुआ वहाँ पर प्रासाद (महल) का निर्माण करके उसके ऊपर ऊँची ध्वजा स्थापित करता है, वैसे ही यमराज भी जब वृद्ध पुरुष इन्द्रिय-भोगों पर विजय प्राप्त कर लेता है तब वह (यमराज) प्रासाद (प्रसन्नता) का निर्माण करता है इससे वृद्ध के मस्तक पर श्वेत बालरूपी ध्वजा स्थापित करता है । इससे ही मानों—उसके मस्तक पर श्वेतकेशरूपी ध्वजा का आरोहण होता है । वृद्ध का शिर विशेष रूप से कम्पित होता है मानों—हितोपदेश के निषेध की परिपूर्णता से ही अतिशयरूप से कम्पित हो रहा है । एवं उसके नेत्र अन्धकार-पटल से सदा आच्छादित होते हैं—मानों—मानसिक स्फूर्ति के नष्ट हो जाने से ही ऐसे हुए हैं । वृद्ध पुरुष की मुखरूपी गुफा से लार बहती है, इससे ऐसा मालूम पड़ता है—मानों—शारीरिक सन्धि-बन्धनों के टूट जाने से ही ऐसा हुआ है । तथा वृद्ध पुरुष की दन्त-पंक्ति चारों ओर से गिरने-योग्य होती हैं—इससे मानों—रति शक्ति के विधवा होने से ही ऐसा हुआ है तथा वृद्ध-शरीर प्रचुररूप से त्वचाओं की संकोचरूपी लहरों से व्याप्त होता है । इससे मानों—मोहरूपी वायु के प्रसार से ही ऐसा हुआ है । उसकी पीठ झुक जाती है—मानों—सरसता के विनाश से ही टेढ़ी हुई है । उसका स्नसानल-जाल (शरीररूपी महान् वृक्ष के लता-समूह-सरीखी नसों व हड्डियों की श्रेणी) विशेषरूप से प्रकट होती है—मानों—लावण्यरूपी समुद्र के जल के विनाश होने से ही ऐसा हुआ

माक्रमेण, मनःस्फुरितविभ्रमाविव नितरामावरीतव्यं चक्षुस्तिमिरपटलेन, संधिबन्धविघटनाद्विभ्यतीव स्थगितव्यं श्रवणकन्धरेण, रतिशक्तिवैवध्यादिव समन्ततः पतितव्यं दन्तवलयेन, मोहानिलविजृम्भणादिव अनतरं तरङ्गायितव्यमधघनेन, सरसत्वक्षयादिव नितान्तमवनमनीयं पृष्ठवंशेन, लावण्यजलविगलनाद्विवात्यर्थं प्रकटितव्यं स्नसानलजालेन, आसन्नतरमरणभयादिव प्रकामं वेपितव्यमङ्गेन। यस्यां पुनर्लक्ष्म्यामयं महानाग्रहो लोकस्य सा दैवात्करमुपागतापि सूतककणिकेव न भवति स्थिरा, खलमैत्रीव संगच्छमानापि जनयत्यवश्यं कांचिद्विपदम्, अपामार्गयवागूरिव लब्धापि न शक्यते परिणमयितुम्, प्रयत्नपरिपालितापि कुलटेव करोत्युपपतावभिलाषम्, अनुभूयमानापि मदिरेव मोहयत्यन्तःकरणम्, ग्रहोपरागलेखेव गताप्यसंतापयन्ती न व्यवतिष्ठते, साहसैरुपस्थितापि राक्षसीव छलयति केवलं महापुरुषेषु प्रतिष्ठां प्रत्यवसादयितुम्, दुर्जनेषु क्षणमात्रं सखीभावमुपयाति। अलमतिविस्तरेण।

अहं तावत्परवशेनैव गलितमोहपाश इवाभूवम्। किंतु सकलजनविदितमप्रियं न मे किमप्यस्ति प्रव्रजतः। पाणिपरिगृहीता भुजङ्गीव सकृदेव मोक्तुमशक्या चेयं राज्यलक्ष्मीः। कष्टश्च खलु महत्यैश्वर्ये देहिनामात्मलाभः, यत्र आयसमपि कर्माचरितुं न लभ्यते स्वातन्त्र्येण। मन्ये च मद्दर्शनावलम्बनजीविता कुलदेवतेव न मामनुमंस्यते तपस्यायामम्बादेवी। नवे च वयसि मयि संजातनिर्वेदे विधास्यन्त्यशुभकर्मपरिणामा इव संहत्य मन्त्रिणो मनीषितस्यान्तरायम्। इयतोऽ-

---

है। विशेष निकटवर्ती मरण के भय से ही मानों—वृद्ध का शरीर अधिक कम्पित होता है।

जिस धनादि सम्पत्ति में लोक का महान् आदर है वह भाग्योदय से हस्त में प्राप्त होती हुई भी पारद रस की कणिका-सरीखी स्थिर नहीं रहती। वह (लक्ष्मी) प्राप्त होती हुई भी निश्चय से चुगलखोर की मैत्री-सरीखी कोई भी आपत्ति उत्पन्न कर देती है तथा प्राप्त हुई भी लक्ष्मी अपामार्ग के बीज की तरह पचाने (भोगने) को शक्य नहीं होती। वह लक्ष्मी प्रयत्न पूर्वक रक्षा की गई भी व्यभिचारिणी स्त्री-सी उपपति—दूसरे पुरुष—की अभिलाषा करती है। जिस प्रकार मद्य भोगी जा रही भी मन को मूर्छित करती है उसी प्रकार लक्ष्मी भोगी जा रही भी मनको मोहित—अज्ञानी—करती है। यह लक्ष्मी नष्ट होती हुई चन्द्र-ग्रहण व सूर्य-ग्रहण की रेखा-सी अवश्य क्लेशित करती है। यह लक्ष्मी राक्षसी-सी साहसों से प्राप्त हुई भी केवल महानुभावों को प्रतिष्ठा (शोभा) को नष्ट करने के लिए उन्हें धोखा देती है। वह लक्ष्मी क्षण भर में दुष्टों की सखी हो जाती है। विशेष विस्तार पूर्वक कथन करना पर्याप्त है।

में (यशोधर) अनुक्रम से पराधीनता से ही मोहजाल को नष्ट करनेवाला-सरीखा हुआ हूँ, किन्तु दीक्षा-ग्रहण करते हुए मेरे पूर्वोक्त वैराग्य का कारण छोड़कर दूसरा कोई भी सर्वलोक विख्यात वैराग्य का कारण नहीं है। हस्त से धारण की हुई सर्पिणी-सरीखी यह राज्यलक्ष्मी एकवार में ही छोड़ने के लिए अशक्य है। महान् धनादि ऐश्वर्य में प्राणियों की उत्पत्ति कष्टदायक है; क्योंकि जिसके होने पर धनाढ्य पुरुष कल्याण-कारक आचरण भी स्वाधीनतापूर्वक करने के लिए समर्थ नहीं होता। मैं जानता हूँ कि मेरे दर्शनाधार से जीवित रहनेवाली व कुलदेवता-सी चन्द्रमती महादेवी (मेरी माता) मुझे दीक्षा ग्रहण करने की अनुज्ञा नहीं देगी। जब मुझे इस युवावस्था में संसार, शरीर व भोगों से वैराग्य उत्पन्न होगा तब मन्त्रीगण एकत्रित होकर मेरे मनोवाञ्छित कार्य में वैसे विघ्न करेंगे जैसे पापकर्म के उदय मनोवाञ्छित कार्य में विघ्न करते हैं। जो अमृतमति महादेवी इतने वैराग्य का कारण है, वह अपने ऊपर लोगोंको प्रसन्न करने के लिऐ मेरे तपोवन में गमन करने का निषेध करनेवाली वैसी होगी जैसे सप्तमकरण गमन करने का निषेध करता है। मेरी आज्ञा-नुसार चलनेवाला नृप-समूह पिशाचवृन्द-सा मोक्षसाधन-कार्य में मेरे अनुकूल होगा यह बात असम्भव है। स्वभाव से स्नेह करनेवाला युवराज (यशोमति कुमार) चरणों को ग्रहण करता हुआ तपश्चरणार्थ प्रस्थान-

यस्यास्तस्य हेतुर्लोकरञ्जनेनापि भविष्यति मे विष्टिरिव प्रस्थानविघातकारिण्यमृतमतिमहादेवी । दुष्करमसमप्रहसंदोह इव श्रेयसि मामनुलोमयिष्यति सामन्तनिवहः । प्रार्थिते वस्तुनि पाश इव करिष्यति गतिभङ्गं पादयोः पतन्निसर्गप्रणयी युवराजः । किमेकविषलतादोषादेव सकलमपि वनमुपहन्तुं युक्तमिति विलपदन्तःपुरं शिवाकुलमिव विघ्नयिष्यत्यभिलषितयात्रासमयम् । तिर्यग्गमिष्यन्ति च पतत्रिण इव पुरवृद्धाः कामितस्य प्रतिलोमनाय । यतः ।

अप्रार्थितोऽपि जायेत पापायाग्रेसरो जनः । धर्मानुष्ठानवेलायां निसर्गात्प्रतिलोमनः ॥२५॥

तदहमत्र कं नु खलूपायमारचयामि । अथवा रचित एवोपायः । तथाहि—यदीयं विभावरी कुशलेन विभास्यति, तदा सर्वावसरं सभामण्डपमास्यायाहूय चाम्बादेवीमखिलं चानुचरलोकमिदमेकमशिक्षितमननुभूतपूर्वमनुचितमप्युपस्थितधर्मकूलनिस्तरणोपायं निकटकूटकपटमनुष्ठास्यामि । भवति हि मृषोद्यमपि प्रायेण श्रेयोद्यकर्मणे, यत्रात्मनो नैहिकामुष्मिकफलविलोपः । मायापि खलु परं निःश्रेयसमेवारभते, या न भवति परेषां परमार्थतः प्रतारणकरी ।

बहिरतिपरुषापि क्रिया सुकृतमेवातनोति, यदि न मनस्तमोबहुलम् । अवसानेष्वन्यथावृत्तिरपि व्यापारो न करोति काम्प्यर्थक्षतिम्, यदि न विनेयानां जनयति व्यसनानि ।

तथा च प्रवचनम्—वासुपूज्यभगवतो वन्दनामिषेण गतो मिथिलानगरीनाथः पद्मरथो बभूव गणधरदेवः । मातुः कानिचिद्दिनानि वस्तान्तरोऽपि पञ्चशतयुवतिरतिमारः सुकुमारश्च साधयामासाभिमतम् ।

करने में वैसा विघ्न करेगा जैसा चरणोंपर पड़ा हुआ जाल गमन करने में विघ्न करता है। 'क्या एक जहरीली लता के दोष से समस्त वन का उच्छेद (काटना) उचित है ?' ऐसा सार्थक विलाप करती हुई मेरी पत्नी-समूह शृगाली-समूह-सी तपोवन के प्रति प्रस्थान करने में विघ्न करेगी। जैसे आड़े आए हुए पक्षी गमन करनेमें अपशकुन करते हैं वैसे नगर के सम्पत्तिशाली पुरुष तपोवन के प्रति प्रस्थान करने में विरोध करने के लिए आड़े आ जाएँगे; क्योंकि—लोक विना याचना किया हुआ भी पाप-निमित्त अग्रेसर होता है परन्तु पुण्यकर्म करने के अवसर पर वह स्वभाव से प्रतिकूल हो जाता है ॥२५॥

अतः मैं निस्सन्देह तपोवन के प्रति प्रस्थान करने के लिए कौन-सा उपाय रचूँ ? अथवा मैंने उपाय प्राप्त कर लिया। उसी उपाय को दिखाते हैं—

यदि यह आज की रात्रि निर्विघ्न व्यतीत हो जायगी उस समय में 'सर्वावसर' नामके सभामण्डप में बैठकर अपनी माता चन्द्रमती देवी व समस्त सेवक-समूह को बुलाकर ऐसा समीपवर्ती कूटकपट (मायाचार) करूँगा, जो कि अद्वितीय, किसीके द्वारा उपदेश नहीं दिया हुआ, पूर्व में अनुभव में नहीं आया हुआ एवं जो अनुचित होनेपर भी समस्त आए हुए विघ्नों को निवारण करनेका उपाय है, क्योंकि वह असत्य वचन भी बहुलता से कल्याण-निमित्त होता है, जिसमें अपनी आत्माका इसलोक व परलोक संबंधी सुख का विनाश नहीं होता। जो मायाचार निश्चय से दूसरों को धोखा देनेवाला नहीं है, वह भी निस्सन्देह उत्कृष्ट पुण्य को ही उत्पन्न करता है। बाह्यरूप में अत्यन्त कठोर भी क्रिया (आचार—केशलुञ्चन व उपवासादि) पुण्य को ही उत्पन्न करती है यदि उसमें मन अज्ञान-बहुल न हो। समाप्ति में असत्य व्यापार भी कोई पुण्य-विनाश नहीं करता, यदि वह शिष्यों को दुःख उत्पन्न नहीं करता।

उक्त बात के समर्थक सिद्धान्त-वचन हैं—मिथिलानगरी का स्वामी पद्मरथ नामका राजा बारह में तीर्थङ्कर श्री वासुपूज्य भगवान् की वन्दना के बहाने से चम्पा नगरी में प्राप्त हुआ। वहाँ दीक्षा धारण करके गणधर देव हो गया। इसी प्रकार सुकुमाल स्वामी, जो कि पाँच सौ युवतिरूपी रतियों के लिए कामदेव-सरीखे

तदविलम्बम् अम्ब मन्मनोरथानां कल्पलतिके, निशमय ममैकां विज्ञप्तिम्। अयमामुक्तस्तत्रभवत्याः प्रणामाञ्जलिः। निसर्गैकस्वभाव समस्तकार्यप्रारम्भनिर्विघ्नमन्त्रप्रभाव सचिवलोक, त्वमपि मनागवधानं कर्तुमर्हसि। उदितोदितकुलशीलादिगुणधरणे दुरापफलसंपादनचिन्तामणे पुरोहित, सपादपतनं याचितोऽसि। प्रयच्छेतः प्रियशिष्याय कर्णम्। वीरश्रीविलासकमलाकर सकलदिग्वलयप्रसाधनकर सेनापते, भव व्यासङ्गमपहाय प्रयतचेताः। कीर्तिसुधाधवलिताशेषराजनिवास महाहवभरारम्भनिर्व्यूढमहासाहस सामन्तसमाज, समाकर्णय सम्यगिममुदन्तव्यतिकरम्। राज्यलक्ष्मीरक्षाक्षमप्रतापप्रसर निखिलमण्डलेश्वरप्रणामकर्कशकर दौवारिक, निषीदावधारयितुमेनं वृत्तान्तम्। एवमन्योऽपि यः कश्चिन्मत्प्रणयी परिजनः स क्षणमेकमनन्यमनाः शृणोतु। अद्य विभातशेषायां निशि स्वप्नमहमेवमदर्शम्—आत्मनः किलापनीय राज्यभारं यशोमतिकुमार इव निहितवान्। विहाय राजधानीमाश्रमावन्यामिव प्राविशम्। उत्सृज्य कनकासनमुपलगहन इवोपविष्टवान्। अवमत्य राजमन्दिरमद्रिकन्दरमिवाशिश्रियम्। अवधूय वसुधाधिपत्यचिह्नानि तपःश्रीलिङ्गानीव गृहीतवान्। परिहृत्य विषयरसमनुष्ठानमानस इवाभूवम्। विमुच्य भवादृशं परिजनं मुमुक्षुजनैरिव संगतोऽस्मि। परित्यज्य विलासिनीजनमरण्यलतावनमिवोपागूहिषम्। अवगणय्य बान्धवेषु परिचितस्वमटवीसत्त्वेष्विव प्रीतिं गतवान्। एवमन्या-

---

थे, और जिन्होंने अपनी माता से कुछ दिनों तक दीक्षा ग्रहण न करने की प्रतिज्ञा की थी और जिन्हें माता द्वारा कुछ दिनों तक दीक्षा ग्रहण में विघ्न बाधाएँ उपस्थित की गईं थीं, दीक्षा ग्रहण को सिद्ध किया।

उस कारण से मेरे मनोरथों की पूर्ति के लिए कल्प लता-सरीखी हे माता चन्द्रमती ! मैं पूजनीय आपके लिए यह प्रणामाञ्जलि अर्पित करता हूँ। मेरा एक विज्ञापन सुनिए। निर्दोष प्रकृतिशाली व समस्त सन्धि व विग्रह-आदि कार्यों के प्रारम्भ में निर्विघ्न मन्त्र-प्रभावशाली हे मन्त्री-मण्डल ! आप भी थोड़ी एकाग्रता धारण के योग्य हैं। विशेष उदयवाले पवित्र वंश और परस्त्री के प्रति मातृ भगिनी-भाव-आदि गुणों की पृथिवी (आधार) एवं दुर्लभ अपूर्व लाभों की प्राप्ति करने में चिन्तामणि-सरीखे हे पुरोहित ! मैं चरणों में नमस्कार पूर्वक आप से प्रार्थना करता हूँ कि प्रिय शिष्य मेरा विज्ञापन ध्यान पूर्वक सुनिए। वीर लक्ष्मी की क्रीड़ा करने के लिए कमल-वन-सरीखे व समस्त दिशा समूह को वश करनेवाले हे सेनापति। आप चित्त की अस्थिरता छोड़कर सावधान चित्त-युक्त होवें। कीर्तिरूप सुधा द्वारा समस्त राजमहलों को उज्वल करनेवाले और महासंग्राम-भार के प्रारम्भों में महान् अद्‌भुत कर्मों को वृद्धिगत करनेवाले हे मेरे अधीनस्थ राजसमूह ! प्रत्यक्ष किये हुए इस वृत्तान्त प्रघट्टक को सावधानी पूर्वक श्रवण कीजिए। जिसके प्रताप का विस्तार, राज्य-लक्ष्मी की रक्षा करने में समर्थ है और जिसका हाथ, समस्त मण्डलेश्वर राजाओं को नम्रीभूत करने में विशेष कठिन है, ऐसे हे द्वारपाल। तुम मेरी बातको यथार्थ निश्चय करने के लिए बैठो। इसी तरह दूसरा भी मुझसे स्नेह करनेवाला कोई कुटुम्ब वर्ग है, वह सब क्षणभर सावधान चित्त होकर सुने—मैंने आज इसी पश्चिम रात्रि में निम्न प्रकार स्वप्न देखा। अर्थात्—मैंने स्वप्न में अपने को निम्नप्रकार देखा—

मैंने निश्चय से अपना राज्यभार छोड़कर युवराज (यशोमति कुमार) में स्थापित करते हुए सरीखा अपने को देखा और इस राजधानी (उज्जयिनी नगरी) को छोड़कर तपोवन में प्रविष्ट होता हुआ-सा जाना। मैंने सुवर्ण-सिंहासन को छोड़कर स्वयं को पाषाण पर्वत पर स्थित हुआ-जैसा देखा और राजमहल को अनादृत करके पर्वत गुफा का आश्रय किये हुए-सरीखा तथा छत्र-चँवर-आदि राजचिह्नों का परित्याग करके तपोलक्ष्मी के चिह्न (पीछी व कमण्डलु-आदि) ग्रहण करते हुए सरीखा देखा। मैं विषय-स्वाद को छोड़कर क्रिया सरोवर में लीन हुआ-सा हो गया और आप सरीखे कुटुम्बी जनों को छोड़कर मोक्षाभिलाषी महामुनियों के साथ संगत हुआ-जैसा हो गया।

मैंने स्त्री-समूह को छोड़कर स्वयं को वनलताओं के वन का आलिङ्गन करते हुए-सरीखा देखा एवं

न्यन्यनेकशः संसारसुखविमुखानि मत्पुराकृतपुण्यावसानसूचनोल्लेखानि चतुर्थपुरुषार्थसमर्थनोचितानि स्वप्नजातान्यद्राक्षम् । अवबुद्धश्च तदैवाहं वदतापि केनचिद्विबोधित इव । सत्यफलाश्च भवन्ति प्रायेण निशावसानेऽवलोकिताः स्वप्नाः । नापि मे तामसगुणमयी दोषमयी वा प्रकृतिः, येनान्यथापि संभाव्येरन् । न चामीष्विहामुत्र च विरोधाश्रितं किंचिन्निरीक्षितम् । अपि च ।

> श्रुतान्यधीतानि, मही प्रसाधिता दत्तानि वित्तानि यथार्थमर्थिने ।
> पुत्रोऽप्ययं वर्महरः प्रवर्तते, सर्वत्र सम्पूर्णमनोरथागमः ॥२६॥

विषयजोऽपि सुखतर्षो न मे मनः प्रायेण प्रत्यवसादयितुमीश्वरः । यतः ।

> सकृद्विज्ञातसारेषु विषयेषु मुहुर्मुहुः । कथं कुर्वन्न लज्जेत जन्तुश्चर्वितचर्वणम् ॥२७॥
> न श्रमान्तकसंपर्कात्सुखमन्यद्भुवो ध्रुवम् । तेन सन्तः प्रतार्यन्ते यदि तत्त्वज्ञता हता ॥२८॥

बाल्ये विद्याग्रहणादीनर्थान् कुर्यात्, कामं यौवने, स्थविरे धर्मं मोक्षं चेत्यपि, नायमेकान्ततोऽनित्यत्वादायुषो यथोपपदं वा सेवेतेत्यपि श्रुतेः । अपि च ।

बन्धु-आदि वर्गों में परिचय को छोड़कर अटवी के हरिण-आदि प्राणियों में अनुराग को प्राप्त हुआ सरीखा अपने को देखा।

इसीप्रकार मैंने दूसरे भी अनेकप्रकार के स्वप्न-समूह देखे, जो कि संसार-सुख छुड़ानेवाले हैं और जिनका उद्देश्य मेरे पूर्वजन्मोपार्जित पुण्य कर्म के विनाश को सूचित करता है एवं जो मोक्ष पुरुषार्थ के समर्थन में उचित हैं। जैसे मैंने स्वप्न-समूह देखे वैसे जाग गया—मानों—बोलते हुए किसी से जगाया गया हूँ।

पश्चिम रात्रि में देखे हुए स्वप्नों का फल प्रायः करके सत्य होता है। मेरी प्रकृति तामसी नहीं है तथा दोषमयी भी नहीं है, जिससे मेरे स्वप्न मिथ्याफलवाले संभावना किये जावें। इन स्वप्नों के मध्य में मैंने इस जन्म व भविष्य जन्म को विनाश करनेवाला कुछ नहीं देखा। विशेष यह है—

मैंने शास्त्र पढ़ लिए। पृथ्वी को अपने अधीन कर ली। याचकों अथवा सेवकों के लिए यथोक्त धन दे दिए और यह यशोमतिकुमार पुत्र भी कवचधारी वीर है, अतः मैं, समस्त कार्य में अपने मनोरथ की पूर्ण प्राप्ति करनेवाला हो गया हूँ[1] ॥२६॥

पञ्चेन्द्रियों के स्पर्श-आदि विषयों से उत्पन्न हुई सुख-तृष्णा भी प्रायः मेरे मन को भक्षण करने में समर्थ नहीं है। क्योंकि—इन्द्रिय-विषयों (भोगोपभोग पदार्थों) में, जिनकी श्रेष्ठता या शक्ति एकबार परीक्षा की गई है, बार-बार खाये हुए को खाता हुआ यह प्राणी किसप्रकार लज्जित नहीं होता ?[2] ॥२७॥ मैथुन क्रीडा के अखीर में होनेवाले सुखानुमान को छोड़कर दूसरा कोई भी सांसारिक सुख नहीं है, उस सुख द्वारा यदि विद्वान् पुरुष ठगाए जाते हैं, तो उनका तत्वज्ञान नष्ट ही है[3] ॥२८॥ 'मानव को बाल्य अवस्था में विद्याभ्यास-गुणादि कर्तव्य करना चाहिए और जवानी में कामसेवन करना चाहिए एवं वृद्धावस्था में धर्म व मोक्ष पुरुषार्थ का अनुष्ठान करना चाहिए। अथवा अवसर के अनुसार काम-आदि सेवन करना चाहिए।' यह भी वैदिक वचन है।' परन्तु उक्तप्रकार की मान्यता सर्वथा नहीं है, क्योंकि आयुकर्म अस्थिर है। अभिप्राय यह है कि उक्त प्रकार की वैदिक मान्यता आदि उचित नहीं है, क्योंकि जीवन क्षणभङ्गुर है, अतः मृत्यु द्वारा गृहीत-केश-सरीखा होते हुए धर्मपुरुषार्थ का अनुष्ठान विद्याभ्यास-सा बाल्यावस्था से ही करना चाहिए। तथा च—

---

१. समुच्चयालंकारः । २. आक्षेपालंकारः । ३. जातिरलंकारः ।

ध्यानानुष्ठानशक्तात्मा युवा यो न तपस्यति । स जराजर्जरोऽन्येषां तपोविघ्नकरः परम् ॥२९॥

तदहमेतत्स्वप्नदर्शनमशून्यपरामर्शनं कर्तुमीहे, यदि तत्रभवन्तो न मे भवन्त्युत्सर्गाणामपवादा इव प्रतिबन्धोपायाः । प्रत्युपपन्नं चैतत् । पुरा हि युष्माकमेकैकशः परिगणनातीतानि परमुखेनाप्यभ्यर्थितान्यहं संपादितवान् । भवद्भिः पुनरशेषैः किमेकमपि स्वयमभ्यर्थितं न मे संपाद्यत इति । तथाप्यमी परमार्थेन प्रतिस्वप्नव्याजेन वा तपस्यायां यदि न मामनुमंस्यन्ते, निरस्याप्येतानात्महितमनुष्ठास्यामि । को नु खलु विघटितं चेतः स्फटिकवलयमिव मुधापि संधातुमर्हति । निसर्गादस्निग्धे हि मनसि मरुभूम्यामिव वृथा भवन्ति परजनस्य रसानयनक्लेशाः । अन्यत्र कृतनिश्चये हि चेतसि मरणोपदेश इव विफलो भवति निकटवर्तिनां प्रतिकूलतया मनःसमागमनविनियोगः । स्वभावनिष्ठुरं हि मनः शिलाशकलमिव न देवोऽपि शक्नोति पल्लवयितुम् । अभिनिवेशकर्कशे हि हृदये कुलिश इव न प्रवेशं लभन्ते गुणवत्योऽपि वधूनां प्रार्थनाः । किं च ।

देवस्यापि वचः प्रायः पुंसि जाताग्रहग्रहे । ऊषरे वर्षवन्न स्याद् गुणकारि मनागपि ॥३०॥

धर्मध्यान व चारित्र के पालन में समर्थ आत्मावाला जो पुरुष जवान होकर तपश्चर्या नहीं करता, वह पुरुष वृद्धावस्था में भग्न शरीर-युक्त होकर तपश्चर्या करता हुआ, केवल दूसरे साधुओं की तपश्चर्या में विघ्न उपस्थित करनेवाला होगा ॥२९॥ अतः मैं (यशोधर) इस स्वप्न-दर्शन को सफल विचारवाला करने की इच्छा करता हूँ। यदि आप लोग मुझे निषेध करने के उपाय उसप्रकार न होवें जिसप्रकार विशेष कहीं हुई विधियाँ, सामान्य कही हुई विधियों के निषेध करने के उपाय होती हैं। आपके द्वारा यह मेरी प्रार्थना पालन की हुई होगी, क्योंकि जब मैंने पूर्व में आप लोगों में से एक एक की अगणित प्रार्थनाएँ दूसरों के संदेश-वचन मात्र से भी पालन की हैं तब आप समस्त सज्जन मेरी स्वयं की हुई एक भी प्रार्थना को क्या पालन नहीं करोगे? तथापि—यदि आप मेरी प्रार्थना सम्पादन नहीं करेंगे—और आप लोग यदि मुझे तपश्चर्या करने की अनुमति नहीं देंगे तो मैं परमार्थ रूप से अथवा स्वप्न-प्रतीकार के बहाने से इन स्वप्नों का निषेध करके आत्महित करूँगा, अर्थात्—तपोवन के प्रति गमन करूँगा। क्योंकि निश्चय से स्फटिक मणि के कङ्कण-सरीखे विघटित हुए (विरक्त हुए) चित्त को कौन पुरुष निरर्थक भी संधान (जोड़ना पक्षान्तर में अनुराग-युक्त) करने के योग्य है। स्वभावतः स्नेह-हीन चित्त में निश्चय से दूसरे लोगों के रसानयन क्लेश वृथा होते हैं। अर्थात्—शृङ्गाररस का प्रदर्शन मरुभूमि की तरह नेत्रों के संताप के लिए होता है। भावार्थ—जैसे मरुभूमि में स्वयं प्यासे होने पर रसानयन क्लेश—दूसरे के हाथ में रस (जल) देखकर नेत्रों को क्लेश होते हैं, वैसे वैराग्य-युक्त पुरुष को तपश्चर्या की प्यास होने पर दूसरे मनुष्यों द्वारा शृङ्गाररस का दिखाना नेत्रों के संताप के लिए होता है। दीक्षा-आदि धारण करने का निश्चय किये हुए चित्त को निश्चय से निकटवर्ती पुरुषों की प्रतिकूलता द्वारा वापिस लाने का अधिकार वैसा निष्फल होता है जैसे मरणोपदेश निष्फल होता है। अर्थात्—'तू मरजा' इसप्रकार का उपदेश सुननेवाला क्या कोई मरता है? अर्थात्—जिसतरह दिया हुआ मरणोपदेश निष्फल होता है उसीतरह वैराग्यशील चित्तको सरागी बनाने का प्रयत्न भी निष्फल होता है। पाषाणखण्ड-सरीखे स्वभाव से कर्कश मन को निस्सन्देह देवता भी उल्लासित—रागयुक्त करने समर्थ नहीं होता। जैसे वज्र में गुण (तन्तु) प्रवेश नहीं होता वैसे निश्चय से अभिप्राय से कठिन हृदय में स्त्रियों की याचनाएँ गुणकारिणी होती हुईं भी प्रवेश (संक्रमण) नहीं करतीं।

थोड़ा-सा कहता हूँ—उस पुरुष में, जिसमें प्रायः करके आग्रह रूप पिशाच उत्पन्न हुआ है, देवता

इति संकल्प्य अवश्यमिह जन्मनि न मे शयनतलमारोहन्ति महिला इति च पर्यालोच्य लोकालोकाचल इव *प्रकाशान्धकारावृत्तिमन्थरितमनःप्रसरे विद्युदाभोगभङ्गुरे नभसीव निमेषोन्मेषाकुलितनयनपर्यन्ते स्वापप्रबोधव्यतिरिक्तामपरामिव कांचिद्रसालामिव संकीर्णरसासरालां निद्रावशामनुभवति मयि सति। अहो धर्मावलोक, अवमिमतसाधुकारवादेनेव ध्वनितं शङ्खेन, मत्प्रव्रजनमङ्गलरवेणेव समुच्छलितं संगीतकनिनादेन, मत्कार्यपरिच्छेदेनेव स्फुटितं पूर्वदिग्भागेन, मद्राज्याभिलाषेणेव विरलीभूतं तारकनिकरेण, मन्मनसिजविलासेनेव विच्छायितमिन्दुबिम्बेन, मद्वैराग्यमनसेव विकसितमरविन्दवृन्देन, मद्विषयसुखतर्षेणेव विघटितं तमःपटलेन, मन्मोहपाशेनेव विगलितं संध्यारागेण, मद्वपुषेव लोकलोचनगोचरतामुपगतमरुणकिरणेन, मद्भवनविन्यासैरिव पर्याकुलितं नगनिगमगोपुरसरित्प्रवेशैर्जनसमाजेन। तदन्वहमनवाप्तनिशानिद्रोऽपि वातायनविवरलब्धप्रसरेण रविणा प्रणयिनेव करस्पर्शात्

के भी वचन उसतरह थोड़े भी उपकारक नहीं होते जिसतरह ऊषर भूमि में मेघों की वृष्टि जरा-सी भी उपकारक नहीं होती ॥३०॥

प्रसङ्गानुवाद—हे मारिदत्त महाराज ! मैं पूर्व में क्या-क्या करके 'अखिलजनावसर' नामके सभामण्डप में प्राप्त हुआ ?

पूर्वोक्त विषय को मन में धारण करके और 'निश्चय से इस भव में मेरी शय्या पर स्त्रियाँ आरोहण नहीं कर सकतीं' इसप्रकार पूर्व में विचार करके मैं उक्त सभामण्डप में प्राप्त हुआ।

हे राजन् ! क्या होनेपर मैं उक्त सभामण्डप में प्राप्त हुआ ? जब मैं, जिसकी चित्तप्रवृत्ति वैसी वसी प्रकाश व अन्धकार के आवरण से मन्थरित (व्याप्त या भरी हुई) हुई है, अर्थात्—जो वैराग्य व उद्वेग दोनों से व्याप्त है, जैसे उदयाचल व अस्ताचल प्रकाश व अन्धकार दोनों से युक्त होते हैं। जिसके नेत्रप्रान्त निमेष (नेत्रों का मींचना) व उन्मेष (नेत्रों का खोलना) से संयुक्त हैं, अतः जो विजली के विस्तार से विनाशशील आकाश-सरीखा था। अर्थात्—जिसप्रकार विजली मेघों के मध्य में प्रवेश करती हुई अन्धकार उत्पन्न करती है और प्रकट होती हुई प्रकाश करती है उसीप्रकार मेरे नेत्रप्रान्तों में निमेष व उन्मेष उत्पन्न हुए। मैं कैसी निद्रावस्था का अनुभव कर रहा था ? जो शयन व जागरण-युक्त थी ; अतः जो अपूर्व, अनिर्वचनीय तथा संमिश्र रसों से अधिक हुई रसाला (शक्कर व मसाला पड़ा हुआ दही—शिखरन) सरीखी थी। अर्थात्—जिसप्रकार रसाला संमिश्र (मिले हुए) रसों से व्याप्त होती है।

धर्म का अनुसन्धान करनेवाले हे मारिदत्त महाराज ! इसके बाद शङ्ख की ध्वनि हुई, उससमय ऐसा मालूम पड़ता था—मानों—मेरे मनचाहे दीक्षाग्रहण का समर्थक साधुकारवचन ही है। हे राजन् ! उससमय गीत, नृत्य व वादित्रों की ध्वनि प्रकट हुई, जो—मानों—मेरे दीक्षाग्रहण की माङ्गलिक ध्वनि ही है। पूर्वदिशा का प्रदेश विकसित हुआ, जो मानों—मेरी दीक्षा-ग्रहण का निश्चय ही है। उससमय ताराओं की श्रेणी मेरी राज्याभिलाषा-सी विरलीभूत हुई। उस समय चन्द्रमण्डल मेरे कामभोग-जैसा कान्ति-हीन हो गया। हे राजन्। उस समय कमल-समूह वैसा विकसित हुआ जैसे मेरा वैराग्य, चित्त से विकसित—उल्लासित—हुआ। हे राजन् ! उससमय अन्धकार-पटल मेरी विषय सुख की अभिलाषा-सरीखा नष्ट हुआ। उससमय सायंकालीन संध्या की लाली मेरे मोहजाल-सरीखी नष्ट हुई। हे मारिदत्त महाराज ! उससमय सूर्य की किरणें मेरे शरीर-सीं लोगों को दृष्टिगोचर हुईं। हे राजन् ! जनसमाज (लोक-समूह), पर्वत-मार्ग, नगरद्वार व नदी स्थानों से आकर उसप्रकार व्याप्त हुआ जिसप्रकार जनसमाज (सेवक-समूह) मेरी महल-रचनाओं में व्याप्त होता है। हे राजन् ! इसके बाद मैं, रात्रि में निद्रा को प्राप्त न करता हुआ भी गवाक्षजालों (झरोखों) से प्रविष्ट होने-

प्रबोधितः । सिन्धुर इव शय्यामुत्सृज्य, उत्तानवेदिनो हि नरस्य सुखसाध्यमपि कार्यमुदके विशीर्णं चूर्णमिव न भवति यत्न-शतैरपि कर्तव्यं प्रतिविधेयमित्यवधार्य, तस्याः दुष्कर्मणो महादेव्याः शरीरसंगमादिव विहितोषस्यमज्जनो निर्वर्त्य च गोसर्ग-समयसंभविमुपासनविधिम्, अपगतमोहबन्धे हि मनसि न खलु परोपनीतः परिग्रहासङ्गो भवति कर्मपरिष्वङ्गायेत्यनुध्याय गृहीतोद्गमनीयमङ्गलदुकूलः, समाचर्य तपश्चर्यानुरागेणेव [1]'हरिरोहणेनाङ्गरागम्, आवृत्य हितोपदेशमिव कर्णाभरणम्, 'अहो गुणवतां वर हार, खरं सुरतविनोदेषु खेदितोऽसि । तदस्य प्रणयिनः सर्वं क्षम्यताम्' इत्यनुनयेनेव कण्ठे गृहीत्वा मुक्ताफलभूषणानि, ईषत्प्राग्भारश्रीपरिणयोत्कण्ठयेव निधाय करे कङ्कणालंकारम्, माजनि मम तपस्यायाः कोऽप्यन्तराय इति सिद्धशेषामिव शिरसि विनिवेश्य कुसुमानि, हस्तेकृत्य ·वेतिकर्तव्यतासारमिव ताम्बूलमखिलजनावसरं सभामण्डपमुपा-गतोऽस्मि । मिलिते यथाभागमवस्थिते च सर्वस्मिन्ननुजीविलोके प्रवृत्ते च पुस्तकवाचनके चन्द्रमतिम्बादेवीं प्रति मूलं प्रहेतुमिच्छया यावन्मनोरथसारथेः मन्त्रिणो मुखमवलोकयामि, तावत्स्वयमेव मय्येकपुत्रे परमवत्सलतया रात्रिकृतमन्तरं वर्षशतमिव गणयन्तीमतियातयामवयोभिराप्तपुरुषैरधिष्ठिता

वाले सूर्य द्वारा उसप्रकार कर-स्पर्श (किरणों के स्पर्श व पक्षान्तर में हस्तस्पर्श) से जगाया गया जिसप्रकार स्नेही पुरुष द्वारा कर स्पर्श से मित्र जगाया जाता है। फिर हाथी-सरीखे मैंने शय्या (पलङ्ग) को छोड़कर निम्नप्रकार भलीभाँति विचार किया। निश्चय से अस्थिर चित्तवाले पुरुष का बिना प्रयत्न सिद्ध होने योग्य कार्य, पानी में फेंके हुए चूने-सरीखा सैकड़ों प्रयत्नों से भी चिकित्सा करने योग्य नहीं होता। अभिप्राय यह है कि उक्त नैतिक सिद्धान्त को स्मरण करते हुए मैंने उक्त घटना किसी के सामने प्रकट नहीं की। इसके बाद हे मारिदत्त महाराज ! उस दुराचारिणी महादेवी (अमृतमति) के अस्पृश्य शरीर के स्पर्श से ही मानों—प्रातःकालीन स्नान करनेवाले मैंने प्रभातकालीन उपासना विधि पूर्ण की। 'मोह-बन्ध से रहित चित्त में दूसरे पुरुष द्वारा समीप में लाए हुए वस्त्रादि-परिग्रह का स्वीकार करना, निश्चय से कर्मबन्ध के निमित्त नहीं होता' ऐसा चिन्तवन करके मैंने धुले हुए वस्त्र का धोती जोड़ा व माङ्गलिक दुपट्टा धारण किया। पश्चात् मैंने गोशीर्ष चन्दन द्रव से विलेपन किया, जो—मानों—तपश्चर्या करने में उत्पन्न हुआ अकृत्रिम स्नेह ही है, फिर मैंने हितोपदेश-सरीखे दोनों कर्ण-कुण्डल धारण किए।

'हे गुणवानों में श्रेष्ठ हार ! तुम संभोग-क्रीड़ा में विशेष रूप से खेदखिन्न किये गए हो, अतः इस स्नेही का समस्त अपराध क्षमा करो' इसप्रकार अनुनय से ही मानों—मैंने मोतियों का हार कण्ठ में धारण किया। थोड़ी-सी पूर्व की राज्य पालन रूपी भार की लक्ष्मी के विवाह की उत्कण्ठा से ही मानों—मैंने हस्ता-भूषण (कङ्कण-अलङ्कार) हस्त में धारण किए। फिर मैंने पुष्प मस्तक पर धारण किए, जो ऐसे प्रतीत होते थे—मानों—'मेरी तपश्चर्या में कोई विघ्न न होवे' इसकारण से सिद्धचक्र-पूजा संबंधी पुष्पमाला ही है। और मैंने ताम्बूल हस्त में ग्रहण किया, जो—मानों—मेरी दीक्षाग्रहण का निश्चय ही है।

उपसंहार—तदनन्तर मैं 'अखिल जनावसर' नाम के सभामण्डप में प्राप्त हुआ।

हे राजन् ! जब समस्त सेवकजन एकत्रित हो चुका था व यथास्थान पर स्थिति कर चुका था एवं शास्त्र वाचनेवाला (पुरोहित) प्रवृत्त हो चुका था। इसीप्रकार जब तक मैं चन्द्रमति माता के प्रति लेख भेजने की इच्छा से 'मनोरथ सारथि' नाम के मन्त्री का मुख देख रहा था तब तक अत्यन्त उत्कण्ठा पूर्वक स्वयं आती हुई ऐसी चन्द्रमति माता को मैंने देखा। जो, मुझ एकलौते पुत्र में उत्कृष्ट स्नेह के कारण रात्रि-संबंधी विरह को सौवर्ष-समान जान रही थी। जो अत्यन्त वृद्ध उम्रवाले मन्त्री-आदि हितैषी पुरुषों से अधिष्ठित थी।

---

१. 'हरितरोहिणेन' इति ह. लि. (क) प्रतौ पाठः ।

गुरुसुकोत्सुकमागच्छन्तीममरसरितमिव हंसकुलपरिवृतामुत्फुल्लसितसरोजवनविहारिणीमिव सरस्वतीमखिलगुणानुगतामिव मत्पितुः कीर्तिमनेककक्षान्तरविनियुक्तविनतमहासामन्तारुणमणिमौलिमयूखोन्मुखराजिरञ्जितोपसंव्यानां संध्यारागोत्स-रोधवसनामुदयमानचन्द्राकृतिमिवाप्ययम्, अभिमुखमुपचलं च। उदयाचलसानुचरच्चन्द्रप्रतिमोदयविजृम्भितजलः सकल्लोलः सिन्धुरिव पुनस्तच्चरणनखकरोत्सार्यमाणोत्तंसकुसुमसौरभासक्तभृङ्गवर्जितोत्तमाङ्गः

पातालमूलं स भुजङ्गपालो दिवं स देवाधिपतिर्यथा च। मज्जीवनेनापि तथा त्वमेनामाचन्द्रतारं वसुधां प्रशाधि ॥३१॥

इति विहिताशीर्वादोच्चारः शिरःसमाघ्राणपरिकल्पितबालकालोचितोपचारः सुखशयनसंकथाभिर्मुहुर्मुहुर्माभा-लापयन्तीमर्पितहस्तावलम्बनः पुरः परिसरन्नमृतमरीचिमूर्त्यनुगतस्तबालोक इव तं सभामण्डपमुपनीय महासिंहासनपीठिका-याममुपावीविशम्, उपाविशं च तदादेशान्निजासने। प्रवृत्तासु च तासु तासु किंवदन्तीषु वाचकः संसारस्वरूपनिरूपणप्रस्ता-वायातमिदमध्यगीष्ट।

जरैव धन्या वनिताजनानां यस्याः समालिङ्गनभाजि पुंसि। अन्याङ्गनावीक्षणविभ्रमाणां न जातु जायेत समागमश्रीः ॥३२॥

जो उसप्रकार हँसकुल (गुरुजनों या निर्दोष पुरुष-समूह) से वेष्टित थी जिसप्रकार गङ्गानदी हंस-श्रेणी-से वेष्टित होती है। जो उसप्रकार विकसित हुए उज्वल कमलवनों में विहार करनेवाली थी जिसप्रकार सरस्वती विकसित हुए उज्वल कमल खण्डों में विहार करती है। जो मेरे पिता यशोर्घमहाराज की कीर्ति-सरीखी सर्वगुण-सम्पन्न थी। जिसकी साड़ी बहुत से गृह प्रकोष्ठकों में नियुक्त हुए नम्रीभूत महान् सेवक राजाओं के अरुण (लाल) मणियों से व्याप्त (जड़ित) मुकुटों की किरणोन्मुख श्रेणी द्वारा रञ्जित की गई है। जिसका दुपट्टा, संध्याकालीन लालिमा-सरीखा है और जिसकी आकृति उदित हुए चन्द्र की आकृति-जैसी थी। फिर मैं उसके सन्मुख गया और मैंने उस सभामण्डप में उसे लाकर महान् सिंहासन पीठ पर बैठाया एवं मैं भी उसकी (माता की) आज्ञा से अपने सिंहासन पर बैठा। हे राजन् ! मैं उससमय ऐसे समुद्र-सरीखा था, जिसके जल उदयाचल के शिखर पर संचार करती हुई चन्द्र प्रतिमा के उदय से वृद्धिगत हो रहे थे और जो विशाल तरङ्गों से व्याप्त था। जिसने (मुझ यशोधर ने) ऐसा मस्तक स्वीकार किया था, जिसपर उस चन्द्रमती माता के चरणनखों की किरणों से तिरस्कार किये जा रहे मुकुट के पुष्पों की सुगन्धि में लम्पट हुए भौरे वर्तमान थे। एवं जिसे माता ने निम्नप्रकार आशीर्वाद का उच्चारण किया था। हे पुत्र ! 'जैसे वह जगत्प्रसिद्ध शेषनाग पाताल-लोक का प्रतिपालन करता है एवं जैसे वह देवेन्द्र स्वर्ग का शासन करता है वैसे ही तुम मेरी आयु से भी (विशेष समय तक) चन्द्र व ताराओं पर्यन्त इस पृथिवी का शासन करो'[1] ॥३१॥ एवं जिसका मस्तक-सूँघने से बाल्यकालोचित व्यवहार किया गया है। हे राजन् ! मैंने कैसी मेरी माता को सिंहासन पर बैठाया ? जो सुखपूर्वक निद्रा की कथाओं से मुझ से बार-बार एकान्त में भाषण कर रही थी। हे राजन् ! हस्तावलम्बन देनेवाला व माता के आगे गमन करता हुआ मैं चन्द्र-मूर्ति से अनुगत चन्द्रोद्योत-सरीखा था। हे राजन् ! जब वे वे जगत्प्रसिद्ध किंवदन्तियाँ—प्रवृत्त हो रहीं थीं तब कथावाचक विद्वान् ने संसार स्वभाव के कथनावसर पर प्राप्त हुए निम्नप्रकार सुभाषित श्लोक पढ़े—

स्त्रीजनों में वृद्धावस्था ही पुण्यवती है, क्योंकि जिस वृद्धावस्था रूपी स्त्री का आलिङ्गन करने-वाले मानव में (वृद्ध पुरुष में) परस्त्रियों के देखने की शोभा-प्राप्तिरूपी लक्ष्मी कभी भी उत्पन्न नहीं होती[2] ॥३२॥ उस कारण से हे आत्मन् ! जब तक वृद्धावस्था, शारीरिक शक्ति को नष्ट नहीं करती एवं इन्द्रिय-समूह में अन्धकार का विस्तार नहीं करती तब तक आप इस समय उस अनिर्वचनीय कर्त्तव्य को

---

१. उपमालंकारः। २. अप्रस्तुतप्रशंसालंकारः।

ततश्च । यावज्जरा जरयते न शरीरशक्तिं यावत्समश्च न तनोति हृषीकवर्गे ।
तावत्त्वमाचर विचार्य तदत्र किंचिज्जन्माङ्कुरः पुनरयं रमते न यत्र ॥ ३३ ॥

त्वं मन्दिरद्रविणदारतनूरुहाद्यैस्तृष्णातमोभिरनुबन्धिभिरस्तबुद्धिः ।
क्लिश्नास्यहर्निशमिमं न तु चित्त वेत्सि दण्डं यमस्य निपतन्तमकाण्ड एव ॥ ३४ ॥

राजा—(स्वगतम् ।) साधु भो वाचक, साधु । यतः, कथमिव त्वमद्य मच्चेतःप्रविष्ट इव ब्रूषे । पुनरपि वाचको मामतीव संसारसुखासनाथासु कथासु दत्तावधानमुपलक्ष्य

को नाम न जगति जनः कुशलैः स्वस्य क्रियेत वशवर्ती । स्त्रीषु खलेष्विव विधिरपि मूढः खलु वश्यतोपाये ॥ ३५ ॥

इतीदं च । राजा—(सविस्मयः । स्वगतम् ।) अहो रात्रिप्रवृत्तवृत्तान्तवेदिन इवास्याद्य सरस्वती प्रेरयति वचांसि । बाढमानन्दितश्चाहमनेन । न च स्वामिप्रसादः सेवकेषु प्रसिद्धश्चिन्तामणिरिव फलमसंपाद्य विश्राम्यतीति । (प्रकाशम् ।) अहो वसुवर्ष, वितीर्यतामस्मै सुभाषितवर्षाय पारितोषिकम् ।

वसुवर्षः—यथाज्ञापयति देव इति । तथा कृतवति वसुवर्षे माता—(स्वगतम् ।) अहो, कुतोऽद्य मे पुत्रस्य भवभोगनिर्भर्त्सनपरासु कामिनीजनसंभावनभङ्गुरारम्भनिर्भरासु च गोष्ठीष्विदं परं मनः । किं नु खलु न महादेवीगेहं

विचार करके उसका आचरण करो, जिस कर्त्तव्य के करने पर यह प्रत्यक्ष दिखाई देनेवाला संसाररूपी अङ्कुर (संसार-प्रादुर्भाव) फिर से क्रीड़ा नहीं करता[1] ॥३३॥ हे आत्मन् ! तुम पापास्रव को उत्पन्न करनेवाले व महल, धन, कलत्र व पुत्रादि की आकाङ्क्षा रूपी अन्धकारों द्वारा नष्ट बुद्धिवाले होते हुए निरन्तर क्लेशित हो रहे हो। हे चित्त ! तुम विना अवसर के गिरनेवाले यमराज के प्रत्यक्ष दिखाई देनेवाले मरणलक्षण-वाले दण्ड को नहीं जानते हो[2] ॥३४॥ उक्त सुभाषित श्रवण कर यशोधर महाराज अपने मन में निम्नप्रकार चिन्तवन करते हैं—हे सुभाषित वाचनेवाले ! तुमने विशेष प्रशस्त निरूपण किया। क्योंकि आज तुम मेरे मन में प्रविष्ट हुए सरीखे स्पष्ट बोलते हो। हे मारिदत्त महाराज ! कथावाचक विद्वान् ने मुझे संसार-सुख से विमुख करनेवाली कथाओं में विशेष रूप से ध्यान देनेवाले देखकर फिर से निम्नप्रकार सुभाषित श्लोक पढ़ा— विद्वानों से संसार में कौन पुरुष अपने वशवर्ती नहीं किया जाता ? परन्तु दुष्टों या चुगलखोरों की तरह स्त्रियों के वशीकरण के उपाय में विधि भी मूढ़ है। अर्थात्—वशीभूत करना नहीं जानता[3] ॥३५॥ यशोधर महाराज आश्चर्यान्वित होते हुए अपने मन में निम्नप्रकार चिन्तवन करते हैं—आश्चर्य है कि आज दिन रात्रि में उत्पन्न हुए वृत्तान्त को जाननेवाले-सरीखी इस कथावाचक की सरस्वती (वाग्देवता) वचनों को प्रेरित कर रही है। इसने मुझे विशेष आनन्दित किया। सेवकों में प्रसिद्धि-प्राप्त किया हुआ स्वामी का प्रसाद (प्रसन्नता) चिन्तामणि-सरीखा कुछ लाभ उत्पन्न किये विना विश्राम नहीं लेता। इसप्रकार विचार कर यशोधर महाराज ने स्पष्ट कहा—हे 'वसुवर्ष' नामके खजानची ! तुम सुभाषित की वृष्टि करनेवाले इस कथा-वाचक के लिए पारितोषिक दो।

वसुवर्ष नामका कोषाध्यक्ष—स्वामी की जैसी आज्ञा है। जब उक्त कोषाध्यक्ष ने उस कथावाचक विद्वान् के लिए पारितोषिक वितरण कर दिया तब चन्द्रमती माता अपने मन में निम्न प्रकार विचार करती है—'आश्चर्य है, आज के दिन ऐसी वार्ताओं में, जो सांसारिक भोगों का तिरस्कार करने में तत्पर हैं, एवं

---

१. रूपकालंकारः । २. रूपकालंकारः । ३. रूपकोपमालंकारः ।

वतस्यास्य किमपि वैराग्यकारणमभूत्। ममानिच्छन्त्या एव हि पुत्रेणेयं महति स्वातन्त्र्ये स्थापिता। अतिप्रसक्तं च स्त्रीषु स्वातन्त्र्यं करपत्रमिव पत्युर्नाविदार्य हृदयं विरमति। कथितं च मे लाड्डोपायनविनियुक्तया रसायनसिद्धेर्माहानसिकस्य सुतया प्रियंवदया यथा—अम्बादेवि, तव स्नुषायाः प्रणयपर इव दृश्यते तस्मिन् कुब्जे दृष्टिविनिपातः।' (प्रकाशम्।) वत्स, कथमिव लक्ष्मीविलासहंसाभिनवसमागमसरस्यपि वयसि चतुर्थपुरुषार्थप्रार्थनोत्थासु कथासु गततृष्णमपि सतृष्णमिवाद्य ते प्रतिभाति चेतः। वदनच्छायाप्यन्यथैव ते दृश्यते। वपुरपि मलिनं कमलमिवातीव ते विच्छायम्। श्वासा अपि होमधूमोद्गमा इव तवाधरदलं मलिनयन्तो दीर्घतरमायच्छन्ते। लोचने अपि सान्द्रनिद्रोद्रेकदुर्दिने शत्रुकुलमिव ते मन्दस्पन्दे। मदारम्भे सामज इव मुहुर्मुहुरायासमायासि जृम्भितेषु। कर्मणि विनियुक्तस्तुरग इव न स्थिरस्तिष्ठसि चासने। राजा—(स्वगतम्।) अहो, प्रारम्भे दैवस्य महती खलु कार्यघटनासु तत्परता, मातुश्च मयि संप्रश्नेषु। (प्रकाशम्।) अम्ब, विज्ञापयामि स्वोपज्ञपथमुत्थितं कथयामास। मातापि निशम्यैनम्

> यातु द्विषत्पक्षमदः समीक्षितुं प्रतीक्ष्यलक्ष्मीस्त्वमिहोदितान्चिरम्।
> महीं च रत्नाकरवारिमेखलां समं स्नुषानप्तृजनेन रक्षतात्॥ ३६॥

जो स्त्रीजनों की अनुकूलता की स्वयं विनश्वरता के आरम्भ से गाढ़ हैं, मेरे पुत्र का यह मन विशेष संलग्न कैसे हो गया? मैं ऐसा सोचती हूँ कि महादेवी के गृह में प्राप्त हुए मेरे पुत्र को निश्चय से क्या कोई वैराग्य-कारण नहीं हुआ? अपि तु अवश्य हुआ है। क्योंकि न चाहती हुई ही मेरे पुत्र (यशोधर) ने इसे विशेष स्वाधीनता में स्थापित कर दिया है। क्योंकि विशेष मात्रा में प्राप्त हुई स्त्रियों की स्वाधीनता, तलवार की धार-सरीखी पति-हृदय को विना विदीर्ण किए विश्राम नहीं लेती। 'रसायनसिद्धि' नाम के रसोईये की प्रियंवदा नाम की पुत्री ने, जो कि मुझे लाडू-आदि भेंट लाने के अधिकार में नियुक्त की गई है, मुझसे कहा था—यथा—'हे माता! आपकी पुत्रवधू (अमृतमति महादेवी) की दृष्टि उस प्रसिद्ध 'अष्टवङ्क' नामके निकृष्ट महावत में स्नेह करने में तत्पर हुई-सरीखी देखी जाती है।' फिर चन्द्रमती माता ने मुझसे स्पष्ट कहा—हे पुत्र! इस युवावस्था में, जो कि लक्ष्मी-भोग रूपी हंस के नवीन समागम में सरोवर-सी भी है, मोक्ष पुरुषार्थ की आकाङ्क्षा का उत्थान करनेवाली धर्म-कथाओं में, अभिलाषा-रहित हुआ भी तेरा मन, इस समय तृष्णा-युक्त-सरीखा किस प्रकार प्रतिभासित हो रहा है? हे पुत्र! तेरी मुख-कान्ति भी दूसरी-सरीखी (म्लान) दिखाई देती है। तेरा शरीर भी मलिन कमल-जैसा विशेष कान्ति-हीन दृष्टिगोचर हो रहा है। तेरे श्वाँस भी होम संबंधी धुएँ की उत्पत्ति-सरीखे तेरे ओष्ठदलों को मलिन करते हुए विस्तृत रूप से निकल रहे हैं। हे पुत्र! तेरे दोनों नेत्र भी विशेष निद्रा की अधिकता से आच्छादित हुए शत्रुसमूह-सरीखे मन्द स्पन्द (ईषच्चलन) युक्त हैं। अर्थात्—जिसप्रकार तेरा शत्रु समूह मन्दस्पन्द (अल्पव्यापार) युक्त है। हे पुत्र! तुम बार-बार जँभाई लेने में मद के आरम्भ में हाथी-जैसे कष्ट प्राप्त कर रहे हो। हे पुत्र! तुम गमनादि क्रिया में अधिकृत होते हुए सिंहासन पर घोड़े-सरीखे निश्चल होकर नहीं बैठते। फिर यशोधर महाराज अपने मन में निम्न प्रकार विचार करते हैं—'आश्चर्य है देव (पुराकृत कर्म) की निस्सन्देह प्रारम्भ में कार्य करने में विशेष एकाग्रता है और माता की मेरे विषय में शिष्टतापूर्ण अनुसन्धान करने में विशेष एकाग्रता है।' इसके बाद यशोधर महाराज ने स्पष्ट निवेदन किया—हे माता! 'विज्ञापित करता हूँ'। ऐसा कहते हुए उसने अपने द्वारा कल्पना किये हुए मार्गवाला स्वप्न में प्राप्त हुआ वृत्तान्त कहा। माता ने भी स्वप्न में प्राप्त हुए वृत्तान्त को सुनकर सर्वरूप से रक्षा करने के लिए निष्ठीवन (थूंक) सम्बन्धी विन्दुओं को भय-सहित व कम्पित हृदय पूर्वक एवं दयालुता के उदय-सहित नाना प्रकार से क्षरण करके निम्नप्रकार मुझे समझाया।

हे पुत्र! यह दुःस्वप्न शत्रुपक्ष पर गिरे। पूज्य राज्यलक्ष्मीवाले आप, इस भूमण्डल पर दीर्घकाल

इति सभयं सोद्वेगहृदयं सानुकम्पोदयं च समन्ताद्बाष्पविप्रुषो विकिरन्ती मामेवमब्रुवत्—पुत्र, सर्वशास्त्रेषु बुधसङ्गविदग्धोऽपि कथं त्वमद्याचारान्ध इवावभाससे। को हि नाम सचेतनः स्वप्नेषु भक्तमुपलभ्य गोणिं प्रसारयति। यदि च नियमेन सत्फला भवन्ति स्वप्नास्तर्हि हतमेतदाचार्यकस्य त्रियामायां मोदकमग्नमठिकावलोकनादामन्त्रितमहीपतेः पाख्यानम्। प्राणिनो ह्यनिलानलपीनसान्तरिताः स्वप्नावस्थायामर्थजातं भूतपूर्वमभूतपूर्वं वा निरीक्षन्ते। कथितवती चाद्युनैव मे पथि सहागच्छन्तीयं तव धात्री दुहिता वसन्तिका, यथा—आर्याणि, प्रभातशेषायां निशि स्वप्ने किलाहं यवागूरिव संवृत्तास्मि। भुक्ता च मन्मातुः श्राद्धामन्त्रितैर्भूदेवैरिति।

निष्कण्टकं राज्यमिदं प्रवृद्धमिमे निदेशावहिताश्च भूपाः।
दिशो वशंतास्तव कामितानि यच्छन्ति चिन्तामणिभिः समानाः ॥ ३७ ॥

अमूनि पूर्वैर्भवतार्जितानि त्यागाय भोगाय वसूनि सन्ति। इच्छाविधेयश्च विलासिनीनामयं गणस्तेऽप्सरसां सदृक्षः ॥ ३८ ॥
निष्कारणं सर्वमिदं विहाय त्वं केन कामेन तपो हि कुर्याः। स्वर्गापवर्गार्थमिदं न सम्यग्दृष्टाददृष्टं खलु किंगरीयः ॥ ३९ ॥

अथाज्ञया कोऽपि न वर्तते ते तत्रोत्सृज कोपविषं न दोषः।
भयेन किं मन्दविसर्पिणीनां कन्थां त्यजन्कोऽपि निरीक्षितोऽस्ति ॥ ४० ॥

पर्यन्त उदय प्राप्त करें और बधू व पोते वर्ग के साथ समुद्रजल मर्यादावाली इस पृथिवी का प्रतिपालन करें।' ॥ ३६ ॥

हे पुत्र ! समस्त शास्त्रों में विद्वानों की सङ्गति से विचक्षण होते हुए भी तुम इस समय मूर्ख या क्रियामूढ़-सरीखे किस प्रकार प्रतीत होते हो ? निश्चय से कौन चतुर पुरुष स्वनमें धान्य प्राप्त करके [उसे भरने-हेतु] गोणी (बोरा या थैला) धारण करता है ? अपि तु कोई नहीं करता। यदि स्वप्न नियम से सत्य फलवाले होते हैं तो आचार्य की, जिसने रात्रि में स्वप्न में लड्डुओं से भरी हुई छात्रशाला को देखने से राजा को परिवार-सहित निमन्त्रित किया था, यह जगत्प्रसिद्ध नष्ट दृष्टान्त कथा [सच्ची] समझनी चाहिए। अतः प्राणी वात पित्त व कफ-सहित होते हुए स्वप्नावसर में पूर्व मे उत्पन्न हुए या पूर्व में नहीं उत्पन्न हुए वस्तु समूह को देखते हैं। इस समय में ही मेरे मार्ग में साथ आती हुई इस तुम्हारी धाय की पुत्री वसन्तिका नामवाली ने मुझ से निम्न प्रकार कहा था—यथा—'हे स्वामिनि ! पश्चिम रात्रि के प्रान्तभाग में निश्चय से मैं स्वप्न में यवागू-सरीखी हुई। अर्थात्—मैंने स्वप्न में विशेष मात्रा में यवागू (पतले भात) देखे। और जिन्हें, मेरी माता के श्राद्ध में निमन्त्रित किये हुए ब्राह्मणों ने भक्षण किये।

हे पुत्र। यह राज्य, क्षुद्र शत्रुओं से रहित होता हुआ वृद्धिगत हुआ है व यह सामन्त वर्ग (अधीनस्थ नृप-समूह) आपका आज्ञावर्ती हुआ सावधान है। ये दश दिशाएँ चिन्तामणि-सरीखीं आपके लिए अभिलषित वस्तु देती हैं ॥३७॥ ये धनादि लक्ष्मियाँ, जिन्हें आपने पूर्वजों (यशोवन्धु व यशोर्घ राजा) से उपार्जित की हैं, दान तथा भोग निमित्त वर्तमान हैं एवं रम्भा, तिलोत्तमा, मेनका और उर्वशी-आदि अप्सराओं-सरीखी यह कामिनियों की श्रेणी आपकी इच्छानुसार प्रवृत्ति करती हुई विनयशील है ॥३८॥ हे पुत्र ! तुम इस समस्त पूर्वोक्त राज्यादि वैभव को निष्प्रयोजन छोड़कर निश्चय से किस अभिलाषा से तपश्चरण करते हो ? यह तपश्चरण स्वर्ग व मोक्ष निमित्त नहीं है। हे पुत्र ! क्या प्रत्यक्ष फल से परोक्ष फल निश्चय से विशेष महान् होता है ? अपि तु नहीं होता[2] ॥३९॥ हे राजन् ! यदि कोई पुरुष तुम्हारी आज्ञानुसार प्रवृत्ति नहीं करता तो

---

१. समुच्चयालंकारः। २. वृत्तत्रयेण समुच्चयालंकारः आक्षेपश्च।

दुःस्वप्नशङ्का तव चेदथास्ति सत्त्वैः समस्तैः कुलदेवतायै ।
कृत्वा बलिं शान्तिकपौष्टिकार्थं पश्चात्प्रतिस्वप्नविधिं विधेहि ॥ ४१ ॥

न चेदमनागमिकमलौकिकं वा । तथाहि—

मधुपर्के च यज्ञे च पितृदैवतकर्मणि । अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः ॥ ४२ ॥

एष्वर्थेषु पशून्हिंसन्वेदवेदार्थविद्द्विजः । आत्मानं च पशूंश्चैव गमयत्युत्तमां गतिम् ॥ ४३ ॥

तथा वेदेऽप्यात्मश्रेयोर्थमशेषविघ्नोपशमनार्थं च राजसूयपुण्डरीकाश्वमेधगोसववाजपेयादिषु वर्षिकामेष्टिकारीरित्यादिषु च यज्ञेषु प्रवृत्तोऽयं प्राणिवधः स च वधो न भवति । यतः ।

यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयंभुवा । यज्ञो हि भूत्यै सर्वेषां तस्माद्यज्ञे वधोऽवधः ॥ ४४ ॥

इति । राजा—(कर्णौ पिधाय निःश्वस्य च :) किं नु खलु न करोति देहिनामयं मोहबन्धः, तस्य प्रसव-

---

उस पर क्रोधरूपी जहर छोड़ो, क्योंकि ऐसा करने में कोई दोष नहीं है। हे राजन् ! क्या खटमलों के भय से कन्था (शीत-निवारण वस्त्र—गोदड़ी) को छोड़ता हुआ कोई भी पुरुष देखा गया है ? अपि तु नहीं देखा गया ॥४०॥[1] हे पुत्र ! यदि आपको दुष्ट स्वप्न का भय है तो कुलदेवता के लिए समस्त प्राणिवर्गों की बलि (घात) करके बाद में दुष्ट स्वप्न का ऐसा शमन विधान करो, जिसमें शान्ति देनेवाला कर्म और शारीरिक पुष्टि निमित्त कर्म इन दोनों का प्रयोजन वर्तमान है[2] ॥४१॥

हे पुत्र ! यह कुलदेवता के लिए प्राणियों का बलि विधान सदा से प्रचलित हुआ चला आ रहा है और लोक-प्रसिद्ध है। तथाहि—[यशोधर की माता निम्न प्रकार से उक्त बात का समर्थन करती है—मनु नाम के ऋषि ने कहा है कि निम्नलिखित चार स्थानों में ही पशु-बध करने योग्य हैं, अन्यत्र अर्थात्—भक्षण, व शारीरिक पुष्टि-आदि के निमित्त पशु-बध करने योग्य नहीं हैं। मधुपर्क (अतिथि सत्कार के अवसर पर अर्थात्—ब्राह्मण के गृहपर यदि ब्राह्मण अतिथि आता है, उस समय उसके चरण प्रक्षालित करके उनपर दही, मधु व घी छोड़े जाते हैं एवं बड़ा बैल व बड़ा बकरा मारकर उसे व अन्य ब्राह्मणों को खिलाया जाता है एवं चन्दन व पुष्प माला से उस अतिथि की पूजा की जाती है, इसे 'मधुपर्क' कहते हैं) २—यागकर्म (अश्व-मेध-आदि यज्ञ), ३—पितृकर्म (श्राद्ध कर्म) एवं ४—रुद्र-आदि की पूजा विधान के अवसर पर[3] ॥४२॥ वेद-पाठ व वेद के अर्थ को जाननेवाला इन पूर्वोक्त चार कार्यों में पशुओं का घात करता हुआ अपनी आत्मा व पशुओं को उत्तमगति (स्वर्ग-आदि) में प्राप्त कराता है[4] ॥४३॥

शास्त्र में आत्मा के पुण्य-निमित्त व समस्त विघ्नों के विनाशार्थ निम्न प्रकार के यज्ञों में किया हुआ प्राणि-बध, प्राणि-बध (जीव हिंसा) नहीं है। राजसूय, पुण्डरीक, अश्वमेध, गोसव व वाजपेय-इत्यादि अन्य भी यज्ञों के भेद हैं। एवं वार्षिकामेष्टि (यज्ञ विशेष) व कारी। क्योंकि ब्रह्मा ने स्वयं ही यज्ञ-निमित्त पशुओं की सृष्टि की है। निश्चय से यज्ञ समस्त याचक, आचार्य व यजमानादिकों के ऐश्वर्य-हेतु है, इसलिए यज्ञ-निमित्त की हुई प्राणि हिंसा हिंसा नहीं है ॥४४॥ उक्त बात को सुनकर यशोधर महाराज ने श्रोत्रों को बन्द करके व श्वांस-ग्रहण करके निम्न प्रकार कहा—'प्राणियों का यह मोहबन्ध (रागादि) व उसका उत्पत्ति स्थान अज्ञान-सम्बन्ध भी क्या-क्या अनर्थ नहीं करता ? कैसे हैं यशोधर महाराज ? जिसका मन निर्दय

---

१. दृष्टान्ताक्षेपालंकारः ।　२. जातिमात्रालंकारः ।　३. जातिरलंकारः ।　४. समुच्चयालंकारः ।

धूमिरशानसंबन्धश्चेति, कर्कशोदर्कवितर्ककर्करसंपातस्तिमितचेताः क्षणमात्रमितिकर्तव्यताविमूढमनःस्रोता इव भूत्वैवमवादीत्—प्रसीदाम्ब । वदामि किंचिदहम्, यदि तत्र भवती मयि कुपुत्रापवादपरागं न विकिरति । माता—पुत्र, मैवं मयि शङ्किष्ठाः । प्रतिष्ठस्व न्यायनिष्ठुरतया गोष्ठीसौष्ठवेषु । न खलु केवलमहं प्रसवधर्मिणी, किं तु भवत्पितुः प्रसादात्सकलव्यवहारवेदिनी च । यद्येवं युक्त एव पूर्वपक्षः । यस्मात् 'न धर्मं चरेत्, एष्यत्फलत्वात्संशयितत्वाच्च । को ह्यबालिशो हस्तगतं पादगतं कुर्यात् । वरमद्य कपोतः श्वो मयूरात् । वरं सांशयिकान्निष्कादसांशयिकः कार्षापणः' इति महान्खलु लोके लौकायतिकलोककोलाहलः । स चात्मनो गर्भादिमरणपर्यन्ततायां सुघट एव । राजा—

सत्यं न धर्मः क्रियते यदि स्याद्गर्भावसानान्तर एव जीवः ।
न चैवम् । जातिस्मराणामथ रक्षसां च दृष्टेः परं किं न समस्ति लोके (लोकः[1]) ॥ ४५ ॥

उत्तर फल के विचाररूपी पाषाण के पतन से निश्चल है और जिसकी चित्त-संगति अल्पकाल तक कर्त्तव्य-निश्चय में विमूढ़-सी है।

हे माता ! प्रसन्न होइए। मैं कुछ कहता हूँ, यदि उस वचन के कहने पर आप मेरे ऊपर कुपुत्र संबंधी निन्दारूप धूलि नहीं फेंकतीं। इसके बाद यशोधर की माता ने कहा—हे पुत्र ! तुम मुझ से इस प्रकार का भय मत करो। हे पुत्र ! मेरी वार्ता-प्रारम्भ की प्रतिभा-शीलता में न्याय-निष्ठुरता पूर्वक पूर्वपक्ष करो। हे पुत्र ! निश्चय से मैं केवल तुम्हें जन्म देनेवाली ही नहीं हूँ किन्तु आपके पिता की करुणा से समस्त व्यवहार को जाननेवाली हूँ। अतः हे पुत्र। मेरा पूर्वपक्ष करना उचित ही है, अतः यशोधर की माता उसी वार्ता का प्रारम्भ करती है—जिस कारण हे पुत्र ! लोक में निश्चय से निम्न प्रकार नास्तिक दर्शन विशेषरूप से है—यथा 'धर्मों का आचरण नहीं करना चाहिए, क्योंकि धर्माचरण में भविष्यकालीन फल है। वर्तमान काल में धर्माचरण का फल दृष्टि गोचर नहीं होता। इतना ही नहीं, अपि तु—धर्माचरण नहीं करना चाहिए, क्योंकि संशयित्वात्। अर्थात्—यह नहीं जाना जाता कि धर्माचरण से फल मिलेगा ? अथवा नहीं मिलेगा ? इस प्रकार का सन्देह होने के कारण भी धर्माचरण नहीं करना चाहिए अब उक्त विषय को दृष्टान्त से दृढ़ करते हैं।

निश्चय से कौन विद्वान् पुरुष हस्तगत सुवर्ण-आदि वस्तु को पादगत करेगा ? अर्थात्—दोनों पैरों से ग्रहण करेगा ? अभिप्राय यह है कि हाथ निकटवर्ती हैं और पैर तो दूरवर्ती हैं, अतः जिस प्रकार निकटवर्ती हाथों में प्राप्त हुई सुवर्ण-आदि वस्तु को विद्वान् दूरवर्ती पैरों से धारण नहीं करता उसीप्रकार प्रत्यक्ष फलवाले कामिनी-आदि भोग ही ग्रहण करना चाहिए और अदृष्ट—परोक्ष—फलवाले धर्म का आचरण छोड़ देना चाहिए। कल प्रातःकाल प्राप्त होनेवाले मयूर की अपेक्षा आज प्राप्त होनेवाला कबूतर श्रेष्ठ है। यद्यपि मयूर में मांस अधिक है और कबूतर में अल्प है तथापि भविष्य में प्राप्त होनेवाले विशेष मांसशाली मयूर की अपेक्षा आज वर्तमान में प्राप्त होनेवाला अल्प मांस-युक्त कबूतर ही श्रेष्ठ है। अर्थात्—उसी प्रकार भविष्य में स्वर्गादि विशेष फलशाली धर्म की अपेक्षा वर्तमान में अल्प फलवाली जवानी व कमनीय कामिनी-आदि उपभोग वस्तुएँ ही श्रेष्ठ हैं। सन्देह-युक्त २१६ तोला परिमाणवाले सुवर्ण सिक्के या सुवर्णमयी हृदय-भूषण (हार) की अपेक्षा रत्तीभर तोल का निश्चित सुवर्ण श्रेष्ठ है। जब आत्मा गर्भ से लेकर मरण पर्यन्त ही है तब वह नास्तिक दर्शन युक्ति-युक्त ही है। फिर यशोधर महाराज ने कहा—

हे माता ! तेरा वचन सत्य है परन्तु यदि जीव (आत्मा) गर्भ व मरण के मध्यवर्ती ही होता

---

१. 'परः किं न समस्ति लोकः' ह. लि. (क) प्रतौ पाठः।

वही शास्त्र, जो कि अविसंवादि होने से स्वीकृत व्यवहारवाला है एवं प्रत्यक्ष व अनुमान-आदि समस्त प्रमाणों द्वारा परीक्षित है, प्रत्यक्ष देखे हुए शास्त्रों में सत्यार्थ है । इसके विपरीत जो शास्त्र, प्रत्यक्ष व अनुमानादि प्रमाणों द्वारा परीक्षा किया हुआ नहीं है व स्वर्ग-आदि परोक्ष (बिना देखे हुए) विषयों का निरूपण करनेवाला विसंवादी है, यदि वह पूर्वापर के विरोध से रहित है तो प्रमाण होता हुआ विद्वानों की प्रवृत्ति-हेतु है ॥१३२॥ देव-समीक्षा—वह (जगत्प्रसिद्ध) रुद्र (श्री महादेव), जो कि उमा—पार्वती-का पति व कार्तिकेय का पिता होने से ब्रह्मचर्य का भङ्ग करनेवाला है । जो त्रिशूल-धारक होने से शत्रुओं से द्वेष करनेवाला है, जो प्रभात, मध्याह्न व सायंकाल में नृत्य करता हुआ मृगचर्म को धारण करनेवाला है, अर्थात् मोह-युक्त है । एवं जो भिक्षा-भोजन करने के कारण क्षुधा दोष-युक्त है तथा होम व जप करता है । उक्त बातों के कारण वह रास्तागीर-सरीखा होने से देव (ईश्वर) किसप्रकार हो सकता है ? ॥१३३॥ जो (ऋषभादि तीर्थङ्कर) देवों व

देवेषु चान्येषु विचारचक्षुर्यथार्थवक्ता किमु निन्दकः स्यात् ।
एवं न चेत्तर्हि यथार्थकर्ता भानुः प्रदीपोऽपि च निन्दकः स्यात् ॥ १३४ ॥

यो भाषते दोषमविद्यमानं सतां गुणानां ग्रहणे च मूकः ।
स पापभाक्स्यात्स विनिन्दकश्च यशोवधः प्राणिवधाद् गरीयान् ॥ १३५ ॥

अथायमाप्तः पर एव न स्यादेवंविधो रुद्रगणोऽपरस्तु । परः पुनः किंगुण एव देवः संसारदोषानुगतो न यो हि ॥ १३६ ॥

गुणाः कुतस्तस्य भवन्ति गम्याः शास्त्रात्प्रणीतात्स्वयमेव तेन ।
वने परोक्षेऽपि पतत्त्रिसार्थे वृष्टो ध्वनेस्तत्र विनिश्चयो हि ॥ १३७ ॥

सर्गस्थितिप्रत्यवहारवृत्तेर्हिमातपाम्भःसमयस्थितेर्वा । आद्यन्तभावोऽस्ति यथा न लोके तथैव मुक्तागममालिकायाः ॥१३८॥

श्रुतात्स देवः श्रुतमेतदस्मादिमौ हि बीजाङ्कुरवत्प्रवृत्तौ । हिताहितज्ञे स्वयमेव दैवात्कि पुंसि जातिस्मरवत्परेण ॥१३९॥

दूसरे गुरु-आदि के विषय में विचार चक्षु (ज्ञाननेत्रवाला) है और दिगम्बर होकर यथार्थवक्ता (सत्यवादी) है, हे माता ! क्या वह निंदा का पात्र हो सकता है ? यदि वह निन्दा का पात्र है तब तो यथार्थ वस्तु को प्रकाशित करनेवाला सूर्य व दीपक भी निन्दा का पात्र हो जायगा ॥१३४॥ जो पुरुष दूसरे के गैरमौजूद दोष कहता है व साधुओं के ज्ञानादि गुणों में मूक रहता है, वह पुरुष पापी व निन्दा का पात्र है, क्योंकि किसी की कीर्ति का घात करना उसकी हिंसा करने से भी महान् होता है ॥१३५॥ यदि 'रुद्र लक्षणवाला देव ही आप्त (ईश्वर) है और निश्चय से अर्हन्त ईश्वर नहीं है' ऐसा आप कहते हैं तो आपके द्वारा माने हुए ग्यारह रुद्रों में तो ईश्वर होने योग्य वीतरागता व सर्वज्ञता-आदि गुण नहीं हैं, इसलिए ईश्वर होनेलायक गुणों से युक्त दूसरा रुद्रगण होना चाहिए। यदि आप पूँछें कि फिर यह ईश्वर होने योग्य दूसरा रुद्रगण किन गुणों से युक्त होना चाहिए ? तो उसका उत्तर यह है, कि जो सांसारिक क्षुधा व तृषा-आदि अठारह दोषों से व्याप्त नहीं है—वीतराग है—वही देव (ईश्वर) है। अभिप्राय यह है कि आपके द्वारा कहे हुए ग्यारह रुद्रों में ईश्वर होने योग्य गुण नहीं हैं, अतः राग, द्वेष रहित जिनेन्द्र ही देव है ॥१३६॥

जैनों द्वारा माने हुए ईश्वर के गुण किससे जानने योग्य हैं ? उस आप्त गुरु द्वारा स्वयं कहे हुए शास्त्र से वे गुण जानने योग्य हैं। उस शास्त्र का निश्चय किसप्रकार होगा ? इसका समाधान यह है कि शास्त्र की ध्वनि (शब्दों का वाचन) से शास्त्र का निश्चय होगा। जिसप्रकार वन के परोक्ष (दृष्टि द्वारा अगम्य) होनेपर भी पक्षी-समूह का निश्चय उसकी ध्वनि—शब्द-से होता है। जिस पक्षी की ऐसी ध्वनि है, वह पक्षी अमुक होगा, उस ध्वनि से ही पक्षी जाना जाता है, उसीप्रकार जिस देव ने यह शास्त्र कहा है उस शास्त्र से ही उसके दोषवान् व निर्दोष होने का निश्चय होता है ॥१३७॥ जिसप्रकार लोक के मध्य में सृष्टि (उत्पत्ति), स्थिति व संहार (विनाश) की प्रवृत्ति का आदि (शुरू) व अन्त—अखीर-नहीं है, अर्थात्—सृष्टि-आदि अनादि काल से चले आ रहे हैं व अनन्त काल तक चले जावेंगे। एवं जिसप्रकार शीत ऋतु उष्ण ऋतु व वर्षा ऋतु की प्रवृत्ति अनादि काल से चली आ रही है व अनन्त काल तक चली जायगी। उदाहरणार्थ—उत्पत्ति के बाद विनाश होता है व विनाश के बाद उत्पत्ति होती है एवं शीत ऋतु के बाद ग्रीष्म ऋतु होती है और ग्रीष्म ऋतु के बाद वर्षा ऋतु होती है, उसके बाद शीत काल होता है। अर्थात्—एक से एक सदा होता है उसीप्रकार मुक्त परम्परा व श्रुतपरम्परा की शुरू व अखीर नहीं है। अर्थात्—ईश्वर व श्रुत भी अनादि हैं। उदाहरणार्थ—मुक्त (ईश्वर) से आगम (द्वादशाङ्ग श्रुत) होता है और आगम (शास्त्र) से मुक्त होता है ॥१३८॥ उसी का निरूपण—आगम (शास्त्र) से वह जगत्प्रसिद्ध तीर्थङ्कर अर्हन्त

असंशयं हेतुविशेषभावाद्यथोपलः स्यात्कनकं तथैव । अन्तर्बहिर्व्यस्तसमस्तदोषो ज्योतिः परं स्यादयमेव जीवः ॥१४०॥

अङ्गारवत्तद्धि न जातु शुद्धयेद्रूपान्तरं वस्तुनि यत्र नास्ति । दृष्टो मणीनां मलसंक्षयेण तेजःप्रभावः पटुभिः कृतेन ॥१४१॥

भूता भविष्यन्ति भवन्ति चान्ये लोकत्रयज्ञाः क्रमशः क्षितीशाः ।
यथा तथाप्ता यदि को विरोधो बहुत्वमन्यत्र च बाढमस्ति ॥ १४२ ॥

हरिः पुनः क्षत्रिय एव कश्चिज्ज्योतिर्मणंस्तुल्यगुणोरविश्च ।
देवौ स्त एतौ यदि मुक्तिमार्गौ पृथुश्च सोमश्च कुतस्तथा न ॥ १४३ ॥

अशेषमेतद्वपुषा बिभर्ति दशावतारेण स वर्तते च । शिला प्लवादप्यतिविस्मयाहं मातः कथं संगतिमङ्गतीदम् ॥१४४॥

देव होता है और उस तीर्थङ्कर देव से आगम की उत्पत्ति होती है, निश्चय से दोनों श्रुत व देव, बीज व अङ्कुर की तरह प्रवृत्त होते हैं। अर्थात्—जिसप्रकार बीज से अङ्कुर होता है और अङ्कुर से वीज होता है। हित (सुख व सुख के कारण) व अहित (दुःख व दुःख के कारण) को जानने की शक्ति जन्म से स्मरणवाले पुरुष की तरह पूर्व जन्म में किये हुए पुण्य व पाप से होती है। दूसरे पुरुष से क्या प्रयोजन है ? अपि तु कोई प्रयोजन नहीं। अर्थात्—जिसप्रकार जन्म से स्मरणवाला पुरुष दूसरे से नहीं पूँछता किन्तु स्वयं ही जान लेता है उसीप्रकार यह आत्मा, जो कि तीर्थङ्कर होनेवाला है, पूर्वजन्म-कृत पुण्योदय से उत्पन्न हुए ज्ञान द्वारा स्वयं हिताहित को जानता है उसे दूसरे पुरुष (गुरु-आदि) की अपेक्षा से कोई प्रयोजन नहीं रहता ॥१३९॥

जिसप्रकार भिन्न भिन्न कारणों (अग्नि में तपाना व छेदन-आदि साधनों) से सुवर्ण पाषाण, निस्सन्देह सुवर्ण हो जाता है उसीप्रकार यही संसारी जीव (मानव), अन्तरङ्ग कारण (कर्मों का क्षय-आदि) वहिरङ्ग (गुरु-आदि का उपदेश-आदि) कारणों से कर्ममल कलङ्क को क्षीण करनेवाला होकर मुक्त (ईश्वर) हो जाता है ॥१४०॥ अभव्य पुरुष में रूपान्तर नहीं है, अर्थात्—वह मिथ्यात्व को छोड़कर कभी भी सम्यग्दर्शन प्राप्त नहीं कर सकता—कभी शुद्ध नहीं हो सकता। वह अभव्य लक्षणवाला पुरुष, उसप्रकार कदापि शुद्ध नहीं होता जिसप्रकार अङ्गार (कोयला) कदापि जलादि द्वारा शुद्ध नहीं हो सकता एवं जिसप्रकार विचक्षण पुरुषों द्वारा किये हुए मल-विनाश से मणियों—रत्नों—में कान्ति का प्रभाव देखा गया है, अर्थात्—उसीप्रकार यह संसारी भव्य मानव, अन्तरङ्ग (सम्यग्दर्शन-आदि) व वहिरङ्ग (गुरु-उपदेश-आदि) कारणों द्वारा कर्म-मल कलङ्क का क्षय करता हुआ शुद्ध—मुक्त—हो जाता है[1] ॥१४१॥ जिसप्रकार भूतकालीन, भविष्यत्कालीन व वर्तमानकालीन दूसरे लोकत्रय के जाननेवाले राजा लोग क्रमशः हुए होवेंगे व हो रहे हैं उसीप्रकार यदि अतीत, अनागत व वर्तमानकालीन तीर्थङ्कर परमदेव हुए, होंगे व हो रहे हैं तो इसमें क्या विरोध है ? अपि तु कोई विरोध नहीं। इसीप्रकार तीर्थङ्करों की अधिकता के विषय में भी कोई विरोध नहीं, क्योंकि परमत में भी देवताओं की प्रचुरता अतिशय रूप से है। अर्थात्—जिसप्रकार ब्रह्मा, विष्णु, महेश, नवग्रह, तिथि, देवता व बारह सूर्य इनमें संख्या की अधिकता पाई जाती है उसीप्रकार तीर्थङ्कर परम देवों में भी प्रचुरता समझनी चाहिए ॥१४२॥ फिर श्रीनारायण कोई क्षत्रिय ही हैं और सूर्य भी शुक्र व शनैश्चर-आदि-सरीखा है। जब ये दोनों (श्री नारायण व सूर्य) मुक्ति का उपाय बतानेवाले देवता हैं तो आदि क्षत्रिय पृथुराजा व चन्द्रमा ये दोनों मुक्ति का उपाय बतानेवाले देवता क्यों नहीं हैं ? अपितु होने चाहिए ॥१४३॥

---

१. तथा चोक्तं समन्तभद्रेण महर्षिणा—
'दोषावरणयोर्हानिर्निःशेषास्त्यतिशायनात् । क्वचिद्यथा स्वहेतुभ्योबहिरन्तर्मलक्षयः ॥१॥' देवागमस्तोत्र से—

स्वयं स कुष्ठी पदयोः किलार्कः परेषु रोगार्तिहरश्च चित्रम् ।
अजा परेषां विनिहन्ति वातं स्वयं तु वातेन हि सा म्रियेत ॥ १४५ ॥

माता—(स्वगतम् ।)

गतः स कालः खलु यत्र पुत्रः स्वतन्त्रवृत्त्या हृदयेप्सितानि । कार्याणि कार्येत हठान्नयेन भयेन वा कर्णचपेटया वा ॥१४६॥

युवा निजादेशनिवेशितश्रीः स्वयंप्रभुः प्राप्तपदप्रतिष्ठः । शिष्यः सुतो वात्महितैर्बलाद्धि न शिक्षणीयो न निवारणीयः ॥१४७॥

(प्रकाशम् ।)

तवोपदेशः खलु किं नु कुर्याद्विनीतचित्तस्य बहुश्रुतस्य । को नाम धीमाँल्लवणाम्बुराशेरुपायनार्थं लवणं नयेत ॥१४८॥

विचक्षणः किं तु परोपदेशे न स्वस्य कार्ये सकलोऽपि लोकः । नेत्रं हि दूरेऽपि निरीक्षमाणमात्मावलोके त्वसमर्थमेव ॥१४९॥

निघ्नन्ति निःसंशयमेव भूपाः पुत्रं च मित्रं पितरं च बन्धुम् ।
स्वस्य श्रिये जीवितरक्षणाय राज्यं कुतः क्षान्तिपरायणानाम् ॥१५०॥

तदस्य दुःस्वप्नविधेः शमार्थं संरक्षणार्थं निजजीवितस्य । दुर्वासनां वत्स विहाय जीवैर्विधेहि यज्ञं कुलदेवतायाः ॥१५१॥

किमङ्ग, महामुनिर्गौतमः प्राणत्राणार्थमात्मोपकारिणमपि नाडीजङ्घं न जघान । विश्वामित्रः सारमेयम् ।

हे माता ! जब वह विष्णु इस समस्त संसार को अपने उदर के मध्य में धारण करता है तब शूकर, कच्छप-आदि दश अवतार कैसे धारण करता है ? अर्थात्—जो समस्त तीन लोक को उदर के मध्य धारण करता है, वह दश अवतार कहाँ ठहरकर ग्रहण करता है ? यह बात 'शिला पानी में तैरती है' इससे भी विशेष आश्चर्यजनक है, अतः किसप्रकार युक्तिसङ्गत हो सकती है ? अपितु नहीं हो सकती ॥१४४॥ वह सूर्य स्वयं तो निश्चय से पादों में कुष्ठ रोगवाला है और भक्तों की रोग-पीड़ा-विध्वंसक है, यह उसप्रकार आश्चर्यजनक है जिसप्रकार बकरी दूसरे लोगों को दूषित वायु नष्ट करती है और स्वयं वात रोग से मृत्यु प्राप्त करती है ॥१४५॥ अब उक्त बात को सुनकर माता चन्द्रमति अपने मन में निम्नप्रकार चिन्तवन करती है—निश्चय से वह अवसर निकल गया, जिसमें यशोधर पुत्र, मेरी स्वतन्त्र वृत्ति से मनचाहे कार्य कराने के लिए हठ, नीति व भय से अथवा कान उमेठ कर प्रेरित किया जाता था । अर्थात्—अब हठादि से कर्तव्य कराने के लिए समर्थ नहीं रहा ॥१४६॥ इस समय यह जवान है, शिशु नहीं है, जिसने अपनी आज्ञा में लक्ष्मी आरोपित—स्थापित—की है एवं स्वयं सब का स्वामी है तथा जिसने राज्य पद में प्रतिष्ठा प्राप्त की है, अतः यह स्पष्ट है कि अपना कल्याण चाहनेवाले पुरुषों द्वारा विद्यार्थी अथवा पुत्र बलात्कार से न शिक्षा देने योग्य है और न रोकने योग्य है ॥१४७॥ हे पुत्र ! तुम सब विषयों में प्रवीण हो, इसलिए निश्चय से विनय में तत्पर चित्तवाले और अनेक शास्त्रों में निपुणता-प्राप्त किये हुए तुम्हें मेरा उपदेश क्या करेगा ? उदाहरणार्थ—कौन बुद्धिमान् पुरुष लवण समुद्र को भेंट देने के लिए नमक लाता है ॥१४८॥ हे पुत्र ! तुम बुद्धिमान् हो, परन्तु सभी लोग दूसरों को उपदेश देने में प्रवीण होते हैं, परन्तु अपने कर्तव्य-पालन में प्रवीण नहीं होते । जैसे चक्षु दूरवर्ती वस्तु को देखनेवाली होती है परन्तु स्वयं अपने को देखने में असमर्थ ही होती है ॥१४९॥ हे पुत्र ! राजा लोग अपनी लक्ष्मी व जीवन-रक्षा के लिए निस्सन्देह पुत्र, मित्र पिता व भाई को मार डालते हैं । क्योंकि क्षमाशील राजाओं का राज्य किस प्रकार सुरक्षित रह सकता है ? ॥१५०॥ अतः हे पुत्र ! इस दुष्ट स्वप्न की शान्ति के लिए व अपनी आयु के संरक्षण के लिए दिगम्बरों का उपदेश छोड़कर पशुओं से कुलदेवता की पूजा करो ॥१५१॥

एवमन्येऽपि शिबिदधीचिबलिबाणासुरप्रभृतीनामवनिपतीनां सुरभितनयादीनामितरेषां च सत्त्वानामालम्भनेनात्मनः शान्तिकर्माणि सम्यगारेभिरे ।

यथा जलैः पङ्कजिनीदलानां पङ्केन लेपो नभसो यथा च । राज्ञस्तथा शुद्धमतेर्न पापैः संबन्धगन्धोऽस्ति कथंचनापि ॥१५२॥

विषं विषस्यौषधमग्निरग्नेरिदं प्रसिद्धिर्महती यथैव । पुण्याय हिंसापि भवेत्तथैव सर्वत्र हे पुत्र न षड्हलानि ॥१५३॥

गोब्राह्मणस्त्रीमुनिदेवतानां विचारयेत्कश्चरितं विपश्चित् ।
श्रुतिस्मृतीतिहासपुराणवाचस्त्यज आत्मना चेन्न तवास्ति कार्यम् ॥१५४॥

न कापि पुंसः पुरुषार्थसिद्धिः सूक्ष्मेक्षयातीवपरीक्षकस्य । जगत्प्रवाहेण तु वर्तितव्यं महाजनो येन गतः स पन्थाः ॥१५५॥

विलासिनीविभ्रमदर्पणानि कंदर्पसंतर्पणकारणानि । क्रियाश्रमच्छेदकराणि हातुं मधूनि को नाम सुधीर्यतेत ॥१५६॥

मताः समा मन्मथतत्त्वविद्भिर्मृताः स्त्रियो मद्यविवर्जिताश्च ।
ये भुञ्जते मांसरसेन हीनं ते भुञ्जते किं नु न गोमयेन ॥१५७॥

अहो पुत्र ! गौतम नाम के महामुनि ने प्राण रक्षा के लिए अपना उपकार करनेवाले वन्दर को क्या नहीं मारा[1] ? इसीप्रकार हे पुत्र ! विश्वामित्र नाम के महामुनि ने अपना उपकार करनेवाले कुत्ते को क्या नहीं मारा ? इसीप्रकार दूसरे राजाओं ने भी शिबि, दधीचि, बलि व बाणासुर आदि नामवाले राजाओं के घात द्वारा और गाय वगैरह पशुओं के एवं दूसरे प्राणियों के घात द्वारा अपने शान्ति कर्म भली प्रकार आरम्भ किए । हे पुत्र ! जिसप्रकार कमलिनियों के पत्ते जलों से लिप्त नहीं होते एवं जिसप्रकार कीचड़ से आकाश लिप्त नहीं होता उसीप्रकार शुद्ध बुद्धिवाले राजा का पापों से बन्धलेश भी किसी प्रकार नहीं होता ॥१५२॥ हे पुत्र ! जिसप्रकार विष की औषधि विष व अग्नि की औषधि अग्नि है' यह विशेष प्रसिद्धि है उसी प्रकार जीव बध भी कल्याण हेतु होता है । हे पुत्र ! सभी खेतों में छह हल ही नहीं होते, अर्थात्—किसी खेत में कम और किसी में ज्यादा भी हल होते हैं एवं किसी में छह ही हल होते हैं ॥१५३॥ कौन विद्वान् पुरुष गायों, ब्राह्मणों, स्त्रियों, गौतम-आदि महामुनियों एवं देवताओं के आचार का विचार करता है ? यदि तुम्हें अपनी आत्म-रक्षा से प्रयोजन नहीं है तो वेद, स्मृति (धर्म शास्त्र), इतिहास और रामायण-महाभारत-आदि पुराणों के वचन छोड़ो । अर्थात्—यदि तुम आत्म रक्षार्थी हो तो वेद-आदि के वचन मत छोड़ो ॥१५४॥ हे पुत्र ! सूक्ष्म दृष्टि से विशेष परीक्षा करनेवाले मानव की कोई पुरुषार्थ (धर्म, अर्थ, काम व मोक्ष) सिद्धि नहीं होती । अतः मनुष्य को लोक मार्ग से प्रवृत्ति करनी चाहिए, क्योंकि जिस मार्ग से सज्जन प्रवृत्त होता है, वही कर्तव्य मार्ग है ॥१५५॥ हे पुत्र ! कौन विद्वान् पुरुष ऐसे मधु व मद्य-आदि के छोड़ने का यत्न करेगा ? जो (मधु-आदि), कमनीय कामिनियों के विलासों (हाव-भाव-आदि) के देखने में दर्पण-सरीखे हैं और कामोद्रेक के उद्दीपन के कारण हैं एवं कर्तव्य करने से उत्पन्न हुए परिश्रम को नष्ट करनेवाले हैं ॥१५६॥ हे पुत्र ! कामशास्त्र के रहस्य में प्रवीण-पुरुषों ने मरी हुई स्त्रियाँ और मद्य न पीनेवाली स्त्रियाँ समान मानी हैं । हे पुत्र ! जो मांस रस-रहित भोजन करते हैं वे लोग क्या गोबर-सहित भोजन नहीं करते ? ॥१५७॥

---

१. गौतम नाम के महामुनि की कथा—एक समय गौतम नाम के महामुनि तीर्थयात्रार्थ गए परन्तु मार्ग भूल जाने के कारण महान् वन में प्रविष्ट हुए । प्यास से व्याकुलित हुए एवं भूँख की अग्नि द्वारा जलती हुई कुक्षिवाले उन्हें स्वच्छन्द विहार करनेवाला बन्दर तालाव-आदि जलस्थान पर ले गया । बाद में उस मुनि ने बन्दर द्वारा दिखाया हुआ पानी पीकर उस बन्दर को मार कर उसके मांस का भोजन करके वन को पार किया ।

यदि च मधुमांसनिषेवणे महादोषस्तदा कथमेतन्महर्षिभिरुदाहृतम्—

'न मांसभक्षणे दोषो न मद्ये न च मैथुने । प्रवृत्तिरेष भूतानां निवृत्तिस्तु महत्फलम् ॥' इति १५८॥

कथं च हव्यकव्यविधिषु प्रबन्धेन तद्ग्रहणम् । तथाह—

'तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन च । दत्तेन मांसं प्रीयन्ते विधिवत्पितरो नृणाम् ॥१५९॥
द्वौ मासौ मत्स्यमांसेन त्रीन्मासान् हारिणेन च । औरभ्रेणाथ चतुरः शाकुनेनैव पञ्च वै ॥१६०॥
षण्मासांश्छागमांसेन पार्षतेन हि सप्त वै । अष्टावेणस्य मांसेन रौरवेण नवैव तु ॥१६१॥
दश मासास्तु तृप्यन्ति वराहमहिषामिषैः । शशकूर्मस्य मांसेन मासानेकादशैव तु ॥१६२॥
संवत्सरं तु गव्येन पयसा पायसेन वा । वार्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ॥१६३॥' इति ।

राजा—(स्वगतम् ।)

ऐश्वर्यमेकं तिमिरं नराणामेवंविधो बन्धुगणो द्वितीयम् । किं नाम पापं न करोतु जन्तुर्मदेन मोहेन च निर्विचारः ॥१६४॥
श्रियां मनोदर्पकरैर्विलासैरापातरम्यैश्च विलासिनीनाम् । प्रतारितान्तःकरणो दुरन्तां भवाटवीमेष विशत्यवश्यम् ॥१६५॥
बलादमीभिर्विषयैर्वराकः प्रायेण जानन्नपि मोहितात्मा । मृत्योः पुरीवारिविहारभाजां वन्यः करीवास्पदमापदां स्यात् ॥१६६॥

॥१५७॥ हे पुत्र ! यदि मद्यपान व मांस-भक्षण में महान् दोष है तब महर्षियों ने निम्न प्रकार वचन कैसे कहा ? 'मांस-भक्षण में पाप नहीं है एवं मद्य-पान व कामसेवन में भी पाप नहीं है, क्योंकि प्राणियों की मद्यपान आदि में प्रवृत्ति ही होती है। परन्तु मद्यपान व मांस-भक्षण के त्याग करने से महान् फल होता है' ॥१५८॥ हे पुत्र ! और किस प्रकार से देवकार्य व पितृकार्य विधानों में शास्त्र प्रमाण से मांस-ग्रहण वर्तमान है। उक्त बात का निरूपण—'तिली, धान्य, जौ, उड़द, पानी और मूलीके साथ मांस को विधिपूर्वक देनेसे मानवों के पूर्वज सन्तुष्ट होते हैं ॥ १५९ ॥ मछली के मांस से दो महीनों तक हरिण-मांस से तीन महीनों तक और भेड़ के मांस से चार महीने तक एवं शकुनि (पक्षीविशेष) के मांस से पाँच महीने तक पिता-आदि पूर्वज तृप्त होते हैं ॥१६०॥ निश्चय से बकरे के मांस से छह माह तक पार्षत (मृगविशेष) के मांस से सात माह तक और कस्तूरो मृग के मांस से आठ महीनों तक तथा रुरुमृग के मांस से नौ महीने तक पितरगण (पूर्वज) तृप्त होते हैं ॥ १६१ ॥ शूकर व भैंसा के मांस से तो दश महीनों तक एवं खरगोस व कछुए के मांस से ग्यारह महीनों तक पितृगण तृप्त होते हैं ॥ १६२ ॥ गाय के दूध अथवा उसकी खीर से एक वर्ष तक पितृगण तृप्त होते हैं एवं गण्डक-मांस से पूर्वजों की बारह वर्ष तक होने वाली तृप्ति होती है ॥ १६३ ॥'

उक्त बात को सुनकर यशोधर महाराज अपने मन में निम्नप्रकार सोचते हैं—ऐश्वर्य (राज्यादि वैभव), मानवों का पहिला अन्धकार है। इसीप्रकार माता-पिता-आदि लक्षणवाला बन्धुवर्ग दूसरा अन्धकार है। अतः ऐश्वर्य के गर्व से व इसप्रकार के बन्धुवर्ग के मोह से विवेकशून्य हुआ प्राणी कौन सा पाप नहीं करता[1] ? ॥१६४॥ लक्ष्मी के होने पर हृदय में मद उत्पन्न करनेवाले प्रथम प्रारम्भ में रमणीक प्रतीत हुए कमनीय कामिनियों के विलासों (नेत्र शोभाओं) द्वारा वञ्चित मनवाला यह प्राणी निश्चय से दुष्ट स्वभाव-वाली संसाररूपी अटवी में प्रवेश करता है[2] ॥१६५॥ इन इष्ट विषयों के कारण अज्ञान-युक्त आत्मावाला विचारा यह प्राणी प्रायः करके जानता हुआ भी हठ से उसप्रकार मृत्यु नगरी में विहार करनेवाली आपत्तियों का स्थान होता है, जिसप्रकार जंगली हाथी मृत्यु-नगरी रूपी गज-बन्धनी[3] (हाथी पकड़ने के लिए बनाया हुआ गड्ढा) में विहार करनेवाली आपत्तियों का स्थान होता है[4] ॥१६६॥

---

१. यथासंख्याक्षेपालंकारः । २. रूपकालंकारः । ३. 'वारी तु गजबन्धनी' इत्यमरः । ४. रूपकदृष्टान्तालंकारः ।

(प्रकाशम् ।) नान्येषु पापं मनसा विचिन्त्यं साक्षात्कथं तत्क्रियते मयाद्य ।
त्वया श्रुता किं नु कथा न लोके सशालिशिक्थस्य वसोः प्रसिद्धा ॥१६७॥

पिबेद्विषं यद्यमृतं विचिन्त्य जिजीविषुः कोऽपि नरो वराकः। किं तस्य तन्नैव करोति मृत्युमिच्छावशान्नैव मनीषितानि ॥१६८॥
रजस्तमोभ्यां बहुलस्य पुंसः पापं सतां नैव निदर्शनाय । नाप्येनसामासजतामपेक्षा जातौ कुले वा रजसामिवास्ति ॥१६९॥
जातिर्जरामृत्युरथामयाद्या नृपेषु चान्येषु समं भवन्ति । पुण्यैर्जनेभ्योऽभ्यधिकाः क्षितीशा मनुष्यभावे त्वविशेष एव ॥१७०॥
यथा मम प्राणिवधे भवत्या महान्ति दुःखानि भवन्ति मातः। तथा परेषामपि जीवहानौ भवन्ति दुःखानि तदम्बिकानाम् ॥१७१॥
परस्य जीवेन यदि स्वरक्षा पूर्वे क्षितीशाः कुत एव भग्नाः। शास्त्रं तु सर्वत्र यदि प्रमाणं श्वकाकमांसेऽपि भवेत्प्रवृत्तिः ॥१७२॥
भवसकृत्यावहितो हि लोकः कदापि नैवं जगदेकमार्गम् । यद्धर्मबुद्ध्या विदधाति पापं तन्मे मनोऽतीव दुनोति मातः ॥१७३॥
लोके विनिन्द्यं परदारकर्म मात्रा सहैतत्किमु कोऽपि कुर्यात् । मांसं जिघत्सेद्यदि कोऽपि लोलः किमागमस्तत्र निदर्शनीयः ॥१७४॥

अब यशोधर महाराज ने अपनी माता (चन्द्रमति) से निम्नप्रकार स्पष्ट कहा—हे माता ! जो पाप दूसरे प्राणियों के प्रति मन से चिन्तवन करने योग्य नहीं है, वह पाप इस समय मेरे द्वारा प्रत्यक्ष से किस प्रकार किया जा सकता है ? हे माता ! तूने वसुराजा व शालिसिक्थ नाम के मच्छ की लोक प्रसिद्ध कथा क्या नहीं सुनी[1] ? ॥१६७॥ यदि कोई भी विचारा मानव जीने का इच्छुक होता हुआ जहर को अमृत समझकर पी लेवे तो क्या वह जहर उस मनुष्य की मृत्यु नहीं करता ? क्योंकि चाही हुईं वस्तुएँ केवल मनोरथ से प्राप्त नहीं होतीं । अर्थात्—उसी प्रकार धर्म बुद्धि से पाप करता हुआ प्राणी क्या पुण्य प्राप्त कर सकता है[2] ? ॥१६८॥ पाप और अज्ञान से अधिकता प्राप्त किये हुए पुरुषों (गौतम व विश्वामित्र-आदि) का पाप विद्वज्जनों के दृष्टान्त के लिए नहीं होता । अर्थात्—जिस प्रकार उन पापियों ने प्राणियों का मांस भक्षणरूप पाप किया उसप्रकार हेयोपादेय का ज्ञान रखनेवाले सज्जन पुरुष नहीं कर सकते । सम्बन्ध प्राप्त करते हुए पापों को उसप्रकार जाति (मातृपक्ष) व कुल विषयक वाञ्छा नहीं होती जिसप्रकार धूलियों को जाति व कुल विषयक अपेक्षा (इच्छा) नहीं होती । अर्थात्—जिसप्रकार उड़ती हुईं धूलियाँ सभी के ऊपर गिरती हैं, किसी को नहीं छोड़तीं उसी प्रकार बँधने वाले पाप भी किसी को नहीं छोड़ते[3] ॥१६९॥ जन्म, जरा, मृत्यु, और रोग वगैरह दुःख राजाओं व दूसरे प्राणियों में समानरूप से होते हैं। उनमें राजा लोग पुण्यों के कारण मनुष्यों से अधिक होते हैं, राजा लोगों व पुरुषों में मनुष्यता की अपेक्षा कोई भेद नहीं है[4] ॥१७०॥ हे माता ! जिसप्रकार मुझ प्राणी के वध होने पर आपको महान् दुःख होते हैं उसीप्रकार दूसरे प्राणियों के वध होनेपर भी उनकी माताओं को विशेष दुःख होते हैं[5] ॥१७१॥ हे माता ! यदि दूसरे जीवों के जीव से अपनी रक्षा होती है तो पूर्व में उत्पन्न हुए राजा लोग क्यों मर गए ? यदि शास्त्र सर्वत्र प्रमाण है तो कुत्ता व कौए के मांस के भक्षण में भी प्रवृत्ति होनी चाहिए[6] ॥१७२॥ हे माता ! [संसार में] मनुष्य-समूह पाप कर्म में सावधान होकर विद्यमान है । यह संसार किसी भी अवसर पर एकमत में आश्रित नहीं होता । निश्चय से मानवगण जिस कारण धर्म बुद्धि से पाप करता है उस कारण मेरा मन विशेषरूप से सन्तप्त होता है[7] ॥१७३॥ जब परस्त्री-भोग संसार में विशेषरूप से निन्दनीय है तब यह परस्त्री-भोग क्या कोई भी माता के साथ करेगा ? अपि तु नहीं करेगा । इसीप्रकार यदि कोई भी पुरुष जिह्वालम्पट हुआ मांस भक्षण की इच्छा करता है तो उस मांस भक्षण के समर्थन में क्या वेद शास्त्र उदाहरण देने योग्य है ?[8] ॥१७४॥ इन्द्रिय-लम्पट और लोगों की

---

१. आक्षेपालंकारः । २. आक्षेपालंकारः । ३. उपमालंकारः । ४. जातिः अतिशयालंकारश्च । ५. दृष्टान्तालंकारः । ६. जातिरलंकारः । ७. जातिरियम् । ८. आक्षेपालंकारः ।

लोलेन्द्रियैर्लोकमनोनुकूलैः स्वाजीवनायागम एष सृष्टः।
स्वर्गो यदि स्यात्पशुहिंसकानां सूनाकृतां तर्हि भवत्स कामम् ॥१७५॥

मन्त्रेण शस्त्रैर्गलपीडनाद्वा वेद्यां बहिश्चापि वधः समानः।
स्वर्गो यदि स्यान्मखहिंसितानां स्वबान्धवैर्यज्ञविधिर्न किं तु ॥१७६॥

मातः, आकर्णयात्रोपाख्यानम्, यन्मयापरेद्युरेव विद्यानवद्यनामकादुपासकादुपश्रुतम्। तथाहि—किलाखण्डलसभायां ब्राह्मणाचरणं प्रति विवदमानमनसौ द्वौ दिवौकसावेतत्परीक्षार्थमेकश्छागलच्छलेनापरस्तदाजीवनव्याजेन पाटलिपुत्रपुरबाहिरिकायामवतेरतुः। तस्मिन्नेवावसरे सपञ्चाशतं पञ्चशतीं छात्राणामध्यापयन्नुपाध्यायः सकलवेदवेदाङ्गोपाङ्गोपदेशावधेयः काङ्कायननामधेयः षष्टितमीवारं प्राग्वंशं विधित्सुस्तत्रैवाजगाम। ईक्षांचक्रे च पुरुषेणाधिष्ठितमतीव महादेहमजम्। 'अहो, साधु भवत्ययमजास्तनंधयः खलु यज्ञकर्मणे' इत्यनुध्याय तं गोपमेवमभ्यधात्—'अरे मनुष्य, समानीयतामित इतोऽयं छागस्तव चेदस्ति विक्रेतुमिच्छा' इति। पुरुषः—'भट्ट, विविक्रीषुरेवैनं यदि भवानिदं मे प्रसादीकरोत्यङ्गुलीयकम्।' उपाध्यायस्तथा विधायापवर्त्य च तं पुरुषमात्मदेशीयं शिष्यमादिशति—'अहो कुशिक वत्स, बलीयानयमजास्तनंधयः। तदतियत्नमुपसंव्यानेन बद्ध्वानीयतामुदवसितम्। अहमप्येष तवानुपदमेवागच्छामि।' तथाचरति तच्छिष्ये स वसुधायां कुलिशकीलित इव निषण्णः संभूय सर्वैरपि तदन्तेवासिभिरुत्थापयितुमशक्यः 'प्रीयन्तामत्रैवास्य

चित्तवृत्ति के अनुकूल चलनेवाले पुरुषों ने अपने विषयों के पोषणार्थ यह वेद सिद्धान्त रचा है। यदि अश्वमेध-आदि यज्ञकर्म में पशु-वध करनेवालों को स्वर्ग प्राप्त होता है तो वह स्वर्ग कसाईयों को विशेषरूप से प्राप्त होना चाहिए[1] ॥१७५॥ अथर्वणमन्त्र व संहिता-वाक्य अथवा शस्त्र व कण्ठ-मरोड़ना इनसे यज्ञ-वेदी (आलम्भन कुण्ड) पर अथवा याग मण्डप के बाह्य स्थानपर जीव घात करना एक सरीखा पाप है। यदि यज्ञ में मन्त्रोच्चारण पूर्वक होमे गए पशुओं को स्वर्ग होता है? तो अपने पुत्र-आदि कुटुम्ब वर्गों से यज्ञ-विधि क्यों नहीं होती[2] ? ॥१७६॥ हे माता! इस जीव-घात संबंधी दृष्टान्त कथा सुनिए, जिसे मैंने परसों 'विद्यानवद्य' नाम के श्रावक से सुनी थी।

सौधर्मेन्द्र की सभा में ब्राह्मणों के आचरण के प्रति विवाद करते हुए दो देवता उनके आचार की परीक्षा के लिए एक बकरा के बहाने से (बकरा बनकर) और दूसरा बकरे की जीविका करनेवाले के बहाने से (बकरा ले जानेवाला शूद्र बनकर) पटना नगर के समीपवर्ती वन में अवतीर्ण हुए। उसी अवसर पर 'काङ्कायन' नाम का उपाध्याय (पाठक), जो कि साढ़े पाँच सौ छात्रों को अध्यापन करनेवाला था एवं जिसकी मर्यादा चारों वेद व छह वेदाङ्गों (शिक्षा व कल्प-आदि) व उपाङ्गों के उपदेश देने में है, तथा जो साठवीं वार यज्ञ करने का इच्छुक था, वहीं आया। उसने महाशूद्र-सहित व विशाल कायवाले बैल-सरीखे बकरे को देखा। फिर यह विचारकर कि 'आश्चर्य है कि यह बकरी का बच्चा निश्चय से यज्ञ कर्म में अच्छा है' उस बोझा ढोनेवाले पुरुष से निम्न प्रकार कहा—अरे मनुष्य! उस स्थान से इस स्थान पर इस बकरे को लाओ यदि तुम्हारी इसे बेंचने की इच्छा है।' फिर बकरा ले जानेवाले मानव ने कहा—'भट्ट! मैं तो इस बकरे को बेंचने का इच्छुक हूँ यदि आप यह मुद्रिका मेरे लिए प्रसन्न होकर अर्पण करें।' फिर उपाध्याय ने मुद्रिका देकर उसे वापिस भेजा और शिष्य को आज्ञा दी। 'अहो 'कुशिक' नामवाले बच्चे! यह बकरी का बच्चा विशेष बलिष्ठ है, अतः इसे विशेष यत्न पूर्वक दुपट्टे से बाँधकर मेरे गृहपर ले जाओ। मैं भी आपके पीछे ही आऊँगा।

---

१. आक्षेपालंकारः। २. उपमालंकारः।

वेदस्य मांसेन विधिपूर्वकं देवाः पितरो ब्राह्मणाश्च' इत्यलापोल्बणरवममर्षविषोन्मेषकलुषचक्षुषमाशु स्वयमेव वधायो-द्धृतपर्वताकारपाषाणपरुषं स छागलस्तमुपाध्यायं मनुष्यवद्बभाषे—'ननु भट्टस्य किमर्थो महानेष प्रयासः' इति। भट्टः सभयः सविस्मयश्च प्रत्याचष्टे—'महापुरुष, तव स्वर्गगमनाय' इति। छागः—'अन्ये खलु ते वराकतनवः पशवो ये मखमिषेण भवता भक्षिताः। अत्र तु प्रस्तरप्रतिमाकवलन इव केवलं दन्तभङ्गस्तव' इति विचिन्त्य किंचिद्विहस्य च स स्तमस्तं पुनरेवमवोचत्—

'माहं स्वर्गफलोपभोगतृषितो नाभ्यर्थितस्त्वं मया सन्तुष्टस्तृणभक्षणन सततं हन्तुं न युक्तं तव।
स्वर्गं यान्ति यदि त्वया विनिहता यज्ञे ध्रुवं प्राणिनो यज्ञं किं न करोषि मातृपितृभिः पुत्रैस्तथा बान्धवैः ॥१७७॥'

तदनु भो महाराज, सा मदीयाम्बिका ममोक्तिषु निरुत्तरा सती परमुपायान्तरमपश्यन्ती 'लब्धप्रतिष्ठातन्त्रेषु हि राजपुत्रेषु स्वभावेन भवन्ति ज्ञातिविषये शाठ्यनिष्ठुराः समाचाराः। तदेते कुशलमतिभिः शान्तिकर्मणैव कर्तव्याः कार्येष्वभ्यन्तराः' इति, तथा 'महत्यपि हि पुत्रे सवित्रीणां बालकाल इव चाटुकारस्नेहला एवालापाः श्लाघ्यन्ते, न पुनः कर्णकटुकाः' इति च विचिन्त्य, 'मातः, अलमलमनेन ममाश्रेयस्करेणोपचारेण' इति मया सहबहुमानं विनिवार्यमाणापि

जब शिष्य वैसा ही कर रहा था अर्थात् जब वह बकरे को बाँधकर ले जा रहा था तब वह बकरा पृथिवीपर वज्र से कीलित हुआ सरीखा बैठ गया और प्रस्तुत उपाध्याय के साढ़े पाँच सौ शिष्य मिलकर भी उसे उठा न सके। 'इस बकरे के मांस द्वारा वेदोक्त विधि से सवित्रादि देवता, पिता-आदि पूर्वज एवं ब्राह्मण-आदि तृप्ति प्राप्त करें' इस प्रकार के भाषण से उत्कट क्रोध करनेवाले व जिसके नेत्र क्रोधरूप विष की उत्पत्ति से लाल हुए हैं एवं जो शीघ्र स्वयं ही वध करने के लिए उठाए हुए पर्वताकार सरीखे पाषाणों से कर्कश हो रहा था ऐसे उपाध्याय से वह बकरा मनुष्य-सरीखा (मनुष्य की वाणी से) निम्न प्रकार बोला—'भट्ट का यह महान् प्रयास किस कारण से हो रहा है?' उपाध्याय भयभीत व आश्चर्यान्वित होता हुआ निम्न प्रकार बोला—'हे महापुरुष! आपके स्वर्गगमन के लिए मेरा प्रयास है।' उक्त बात को सुनकर बकरे ने मन में विचार किया। 'दूसरे पशु, जो कि यज्ञ के बहाने से आपके द्वारा भक्षण किये गए हैं, वे अकिञ्चित्कर (अल्प) शरीरधारी थे, परन्तु विशाल शरीर-धारक मेरे विषय में चट्टान की मूर्ति को चबाने समान केवल तुम्हारे दाँत टूटेंगे।' फिर उस बकरे ने कुछ हँसकर उपाध्याय से कहा—'हे भट्ट! मैं (बकरा) स्वर्ग के भोग नहीं चाहता। 'मुझे स्वर्ग पहुँचाओ' इसप्रकार मैंने तुमसे प्रार्थना नहीं की। मैं तो बेरी आदि के पत्तों को चबाने से ही निरन्तर सन्तुष्ट हूँ। श्रेष्ठ वर्णवाले तुम्हें कर्म चाण्डाल-सरीखे होकर मेरा वध करना उचित नहीं है। यदि तुम्हारे द्वारा यज्ञ में मारे हुए प्राणी निश्चय से स्वर्ग जाते हैं, तो तुम माता-पिताओं तथा अपने पुत्रों व बन्धुवर्गों से यज्ञ क्यों नहीं करते?' ॥१७७॥

फिर हे मारिदत्त महाराज! जब वह मेरी माता (चन्द्रमति), जो कि मेरे उक्तप्रकार के वचनों में उत्तरहीन है व जिसने दूसरा उपाय नहीं देखा और जो 'हे माता! मेरे इन पैरों पर पड़ने रूप अकल्याणकारक विनय से पर्याप्त है' इसप्रकार विशेष मान-सहित मेरे द्वारा निवारण भी की जा रही है, मेरे पैरों पर विशेष प्रकट की हुई करुणापूर्वक व प्रकट हुई विशेष विनय सहित गिरी और उसने मुझसे निम्नप्रकार प्रार्थना की। मेरी माता ने क्या विचार कर? मुझसे निम्नप्रकार प्रार्थना की? 'निस्सन्देह समस्त संसार में सम्मान-समूह प्राप्त करने-वाले राजपुत्रों के कर्त्तव्य स्वभाव से कुटुम्बवर्ग के प्रति धूर्तता के कारण निर्दय होते हैं, अतः निपुणबुद्धि-शाली पुरुषों को इन राजपुत्रों के लिए सामनीति से ही कर्त्तव्यों में अपने अधीन करना चाहिए।' और निश्चय से महान् पुत्र के प्रति माताओं के शिशुकालसरीखे मिथ्यास्तुतिवाले व स्नेहपूर्ण मीठे वचन ही प्रशंसनीय होते

सप्रणयमतिप्रकटितकरुणामयमाविर्भूतबहुप्रश्रयं च पादयोर्निपत्य मामेवमभ्यर्थितवती—'पुत्र, अहमनाथेत्यनुकम्पया वा, मातेति वत्सलतया वा, मद्दर्शनायत्तजीवितेत्युपरोधेन वा, वृद्धेति दयालुतया वा, गुरुवचनमनुल्लङ्घनीयमित्याशयेन वा, भविष्यत्यवश्यमनेनाभ्यर्थितभङ्गेन पूर्वमाचरितस्यापि सुकृतस्य हानिरिति परामर्शेन वा, किमपरः कोऽपि नास्ति तव पण्डितंमन्यभावस्यास्पदं येन मयि जरत्यामेवमतीव विहितविचारचपलोऽसीत्युपालम्भनभयेन वा, युक्तमयुक्तं वा गुरुरेव जानातीति मार्गानुसारणेन वा, न भवति शुभं चेदनुष्ठानमहमेव स्यामेनसां भागीति मनीषया वा, चिरमियं महीयसि पदे स्थिता मयापमानिता सती न जीविष्यतीति संभावनेन वा, पुरा हि तस्या एव मम प्रभवन्ति वचांसि कुतो नाद्येति स्नेहानुगमनेन वा, नो चेदात्मानमेव करिष्यामि देवतोपहाराय त्वमेव तावदनुभवोभयकुलविशुद्धः श्रियोऽस्याः फलमित्यपवादबीभत्सया वा, यदि परलोकदोषाशङ्कनेनान्येन वा केनचित्कारणेन प्राणिघाते न व्याप्रियसे, मा प्रावर्तिष्ठाः। किं तु विनिवेदितदक्षिणोत्सवैर्वेदविद्भिर्द्विजैः परिश्रावितसकलसत्त्वोपहारफलोत्कटेन पिष्टकुक्कुटेन कुलदेवतायै बलिमुपकल्प्य तदवशिष्टं पिष्टं मांसमिति च परिकल्प्य मया सहावश्यं प्राशनीयम्' इति।

राजा—(स्वगतम्।) 'अहो, महिलानां दुराग्रहनिरवग्रहाणि परोपघाताग्रहाणि च भवन्ति प्रायेण चेष्टितानि। स्त्रियो हि नाम भवन्तु भर्तृषु शय्याविषये पुत्रेषु च प्रतिपालनसमये प्रकामं निसृष्टार्था निरङ्कुशाचरणसमर्थाश्च, न

हैं न कि कानों को कटु प्रतीत होनेवाले।' उसने मुझसे कैसी प्रार्थना की?—'हे पुत्र! यदि तुम दुर्गति-गमन की आशङ्का से अथवा किसी दूसरे कारण से जीवबध में प्रवृत्त नहीं होते तो मत प्रवृत्त होओ, किन्तु आटे के मुर्गे से, जिसमें ऐसे ब्राह्मणों द्वारा, जिनका उत्साह विशेष रूप से निवेदन की हुई दक्षिणा के लिए है और जो त्रयीवेदविद्या में निपुण हैं, समस्त प्राणियों की बलि का फल विविध ग्रन्थों के प्रमाणपूर्वक ज्ञापित किये जाने से महान् है, कुलदेवता के निमित्त बलि (पूजा) समर्पण करके तथा उससे बचे हुए आटे में मांस का संकल्प करके निम्न प्रकार कारणों से तुम्हें मेरे साथ अवश्य भक्षण करना चाहिए।

हे पुत्र! तुम्हें किन कारणों से उक्त कार्य करना चाहिए? 'हे पुत्र! मैं अनाथ हूँ, इसप्रकारकी दयालुता से अथवा 'यह मेरी माता है' ऐसी अनुरागता से, अथवा 'यह मेरे दर्शनाधीन जीवनवाली है' इसप्रकार के आग्रह से, अथवा, 'यह वृद्ध है' इसप्रकार की दयालुता से, अथवा 'माता-पिता-आदि गुरुजनों का वचन उल्लङ्घन करने लायक नहीं है' ऐसे नैतिक अभिप्राय से, अथवा 'इसका मनोरथ पूर्ण न होने से पूर्वकाल में विधिपूर्वक किये हुए पुण्य का नाश अवश्य ही होगा' इसप्रकार के विचार से अथवा हे पुत्र! तुम्हारी मूर्खता का स्थान क्या कोई दूसरा गुण या स्वभाव नहीं है? जिससे तुम मुझ वृद्धा के विषय में भी उक्तप्रकार किये हुए विचार से विशेष अस्थिर प्रकृतिवाले हो रहे हो' इसप्रकार की उलाहना के भय से, अथवा 'योग्य-अयोग्य को माता पिता ही जानते हैं' इसप्रकार के मार्ग का अनुसरण (स्वीकार) करने से, अथवा 'यदि यह शुभ अनुष्ठान नहीं है तो मैं ही पाप-भागिनी होऊँगी' ऐसी बुद्धि से अथवा 'विशेष पूज्य स्थान पर अधिष्ठित हुई भी, मेरे द्वारा तिरस्कृत होने के कारण यह चिरकाल तक जीवित नहीं रहेगी' इसप्रचार के विचार से अथवा 'जब उसके परोक्षकाल (पीठ पीछे) में ही मेरे वचन उसको आज्ञापालन में समर्थ होते हैं तब इससमय उसके समक्ष क्यों नहीं आज्ञापालन में समर्थ होंगे?' इसप्रकार के प्रेमका अनुसरण करने से अथवा 'यदि मेरा वचन स्वीकार नहीं करते तो मैं ही अपने को देवता की बलि निमित्त कर दूँगी, फिर मातृ-पितृवंश में शुद्ध हुए तुमही इस राज्य की लक्ष्मी का फल भोगो' इसप्रकार के अपवाद के भय से।

उक्त बात को सुनकर यशोधर महराज ने अपने मन में निम्नप्रकार विचार किया 'आश्चर्य है कि स्त्रियों के कार्य, बहुलता से दुराग्रह से रुकावट-हीन और दूसरों का बध करने में दृढ़प्रतिज्ञा-युक्त होते हैं। क्योंकि

पुनः पौरुषेयेषु कर्मसु। यस्मात्कमलिनीदलेषु जलकणस्येव नारीणां मनसश्चञ्चलत्वादतीव निःसारत्वाच्च। पुरुषोऽपि गृहकार्यादन्यत्र स्त्रियं प्रमाणयन्नदीप्रवाहपतितः पादप इव न चिरं नन्दति। स्त्री तु पुरुषमुष्टिस्थिता खड्गयष्टिरिव साधयत्यभिमतमर्थम्। अभिनिवेशं च पुनः पापपुण्यक्रियासु प्रधानं निधानमामनन्ति मनीषिणः। बाह्यानीन्द्रियाणि तपनतेजांसीव शुभेष्वशुभेषु च वस्तुषु समं विनिपतन्ति। न चैतावता भवति तदधिष्ठातुः कुशलेन चाकुशलेन संबन्धः। संकल्पोपपन्नप्रतिष्ठानि च देवसायुज्यभाञ्जि शिलाशकलानि किमत्यासादयन् पुरुषो न भवति लोके महापञ्चपातकी। सकृदेव चाशुभसंकल्पमलिने मनसि दुरपवादकलुषिते सत्पुरुषचेतसीव दुर्लभाः खलु पुनस्तत्प्रसन्नतायामुपायाः। चिरेणापि च कालेन कृतः कल्याणकर्मणां प्रचयः प्रमादवशेन सकृदपि संजातविविदुरभिसंधिः पावकनिक्षेपात्प्रासाद इव क्षणेन विनश्यत्यामूलतः। संकल्पेन च भवन्ति गृहमेधिनोऽपि मुनयः। यथा—उत्तरमथुरायां निशाप्रतिमास्थितस्त्रिदिवसृत्रित-कलत्रपुत्रमित्रोपद्रवोऽप्येकत्वभावनमानसोऽर्हद्दासः। मुनयश्च गृहस्थाः। यथा—कुसुमपुरे चिरादाकर्णितसुतसमर-स्थितिरातापनयोगयुतोऽपि पुरुहूतदेवर्षिः।

स्त्रियाँ, पति के साथ सुरत (मैथुन—भोग) समय में और पुत्रों के पालनपोषण के अवसर पर यथेष्ट गृह कार्यों में छोड़ी हुई व सासु-आदि से निर्भय—स्वाधीनता पूर्वक—कार्यसम्पादन में समर्थ होवें न कि पुरुषों द्वारा किये जानेवाले कार्यों में। क्योंकि स्त्रियों का मन कमलिनी-पत्तों पर पड़े हुए जलबिन्दुसरीखा विशेष चञ्चल व अत्यन्त निर्बल होता है। पुरुष भी गृहकार्य (भोजन बनाना आदि) को छोड़कर दूसरे कार्यों में स्त्री को प्रमाण मानता हुआ नदीप्रवाह में पड़े हुए वृक्ष-सरीखा चिरकाल तक स्थिर नहीं रहता एवं स्त्री तो पुरुष की मुट्ठी में स्थित हुई—पुरुष से परतन्त्र हुई—उसप्रकार अभिलषित प्रयोजन सिद्ध करती है जिसप्रकार उत्तम खड्गयष्टि (तलवार) योग्य पुरुष की मुष्टि में स्थित हुई अभिलषित प्रयोजन (विजयश्री) सिद्ध करती है। विद्वान् लोग चित्त की आसक्ति को ही पाप-पुण्य क्रियाओं का मुख्य स्थान कहते है। क्योंकि यद्यपि चक्षु-आदि इन्द्रियाँ पुण्यजनक व पापजनक कार्यों में सूर्य-प्रकाश-सरीखों एककाल में ही प्रवृत्त होती हैं, परन्तु इतने मात्र से—केवल दर्शनमात्र से ही—दर्शन व स्पर्शन करनेवाले मानव को पुण्य व पाप से संबंध नहीं होता। उदाहरणार्थ—मानसिक संकल्प द्वारा प्रतिष्ठा प्राप्त करनेवाले व देव (ईश्वर) की समानता को प्राप्त हुए पाषाण-खण्डों (पाषाणमयी देवमूर्तियों) की आसादना (तिरस्कार) करता हुआ मानव क्या लोक में महापञ्च पातकी[१] (स्वामी-द्रोह व स्त्री-वध-आदि का करनेवाला) नहीं होता? जब मन एकबार भी पापपरिणाम से दूषित (मलिन) हो जाता है तब निश्चय से उसे निर्मल करने के उपाय वैसे दुर्लभ होते हैं जैसे निन्दा से मलिन हुए सत्पुरुष के चित्त को निर्मल बनाने के उपाय दुर्लभ होते हैं। जैसे अग्नि डालने से गृह नष्ट—भस्म हो जाता है वैसे ही चिरकाल से संचय किया हुआ पुण्यकर्म-समूह भी, जिसमें असावधानी से एक बार भी नष्ट अभिप्राय उत्पन्न हुआ है, क्षणभर में समूल नष्ट हो जाता है। पुण्यपरिणाम से गृहस्थ भी मुनि-सरीखी मान्यता प्राप्त करते हैं। जैसे उत्तर मथुरा में रात्रि में ध्यानस्थ हुआ अर्हद्दासनामका सेठ, देवविशेष द्वारा किया गया है स्त्री, पुत्र व मित्र का उपद्रव जिसका, ऐसा होनेपर भी एकत्वभावना के चिन्तवन में मग्नचित्त हुआ मुनिसदृश मान्यता को प्राप्त हुआ।[२] एवं मुनि भी पापपरिणाम से गृहस्थसरीखे हो जाते हैं। उदाहरणार्थ—जिसप्रकार

१. उक्तं च—'स्वामिद्रोहः स्त्रीवधो बालहिंसा विश्वस्तानां घातनं लिङ्गभेदः। प्रायेणैतत्पञ्चकं पातकानां कुर्यात्सद्यः प्राणिनः प्राप्तदुःखान् ॥ १ ॥'

२. अर्हद्दास की कथा—उत्तर मथुरा में जब अर्हद्दास नाम का सेठ चतुर्दशी का उपवास किये हुए रात्रि में श्मशान भूमिपर ध्यानस्थ होकर एकत्व भावना में लीन था तब उसके व्रत को नष्ट करने में तत्पर हुए वनदेवताओं ने अनेक उपद्रव किये, तथापि उसे जरा भी मानसिक क्षोभ नहीं हुआ, जिससे उसे मुनिसदृश मान्यता प्राप्त हुई।

अस्ति च जगत्प्रसिद्धमिदमुदाहरणम्—एकस्मिन्नेव किल कामिनीकलेवरे मुनिकामिकुणपाशिनामभिनिवेशनिमित्तो विविधनिर्बन्धः कर्मविपाक इति। किं च।

नरेषु संकल्पवशेन मन्मथो यथा प्रवर्तेत पयश्च धेनुषु।
तथैव कर्माण्युभयानि मानसाद्दधाति बोधाधिपतिर्विजृम्भितात् ॥१७८॥

इयमिज्या च मे मोहविह्वला कालरात्रिरिव दुष्परिहारा जानुभञ्जिनीव मे गतिभङ्गाय प्रत्यवस्थिता। तदत्राहम् 'इतस्तटमितो व्याघ्रः केनास्तु प्राणिनो गतिः' इतीमं न्यायमापतितो यद्यवगणयेयमस्याः प्रतिश्रुतम्, तदेत एव समीपवर्तिनो 'देव, वृद्धेः फलमनाग्रहः' इत्युपविशन्तो भविष्यन्त्युपाध्यायाः। सकलजनसमक्षं परमपमानिता चेयं जरती न जाने किं करिष्यति। स्वस्य च मनसि योक्षापि क्रियोत्प्रेक्षा सा न भवति पुंसः श्रेयस्करी, या न रञ्जयति परेषां चेतांसि।

पटना नगर में 'पुरुहूत' नामका देवर्षि (दिगम्बर मुनि), आतपन योग में स्थित हुआ भी, जिसने गुप्तचर द्वारा अपने पुत्र की युद्धस्थिति सुनी थी गृहस्थसरीखा हो गया[1]। [2]सर्वलोक में विख्यात निम्नप्रकार दृष्टान्त वचन है—केवल मरी हुई वेश्या के शरीर को देखकर दिगम्बर मुनि व वेश्यासक्त विट् तथा कुत्ते के अभिप्राय में कारण नानाप्रकार के आस्रववाला कर्मविपाक (उदय) है।[3]

जैसे कामवासना के अभिप्राय से मनुष्य में काम (मैथुनेच्छा) उत्पन्न होता है और जैसे मरे हुए बछड़े का करङ्क (ढाँचा) देखने से गायों के थनों से दूध झरता है वैसे ही यह जीव मानसिक शुभ-अशुभ अभिप्राय से क्रमशः पुण्य-पाप कर्मों का बंध करता है ॥ १७८ ॥

मोह (अज्ञान) से विह्वल—व्याकलित हुई मेरी माता (चन्द्रमति) और मोह (प्राणि-हिंसा) से विह्वल (भयानक) यह यज्ञ, वैसा मेरे लिए दुःख से भी त्यागने के लिए अशक्य है जैसे मोह (मूर्छा) से विह्वल—व्याकुलित करनेवाली—कालरात्रि दुःख से भी त्यागने के लिए अशक्य होती है। एवं जैसे यन्त्र विशेष गतिभङ्ग (गमन-रोकने) के लिए स्थित होता है वैसे यह मेरी माता व यज्ञ गतिभङ्ग (ज्ञान नष्ट करने) के लिए स्थित है। उससे मैं यहांपर 'इस ओर जाने से नदी का तट है और उस ओर जाने से व्याघ्र

---

१. 'यथा कुसुमपुरे कृतोदन्ताल्लेखवाहकादाकर्णितसुतसमरस्थितिरातपनयोगयुतः पुरुहूतो देवर्षिः' नागौर की ह० लि० (क) से समुद्धृत पाठान्तर—

नोट:—यद्यपि इसका अर्थ भी उपर्युक्त सरीखा है तथापि यह पाठ मु० प्रति के पाठ की अपेक्षा विशेष उत्तम है।

२. पुरुहूत देवर्षि की कथा—पाटलिपुत्र नगर के 'पुरुहूत' नाम के राजा ने पुत्र के लिए राज्यभार समर्पण करके जिन-दीक्षा धारण कर 'देवर्षि' नाम प्राप्त किया। एवं पर्वत-मेखलापर आतपन योग में स्थित हुआ। उसने पत्रवाहक गुप्तचर से, जिसने प्रस्तुत विद्याधर की उपासना के लिए आए हुए श्रावक के साथ बातचीत की थी, शत्रुओं के साथ अपने पुत्र का युद्ध सुना। फिर कुपित हुए उसने युद्ध करने का उद्यम किया और पहाड़ी से चढ़े हुए सरीखा हो गया। बाद में अवधिज्ञानी चारणऋद्धिधारी मुनि ने उसे समझाया—कि ऐसे त्रिलोक पूज्य दिगम्बर वेष को धारण करके इसप्रकार चिन्तवन करना योग्य नहीं है।

३. श्मशान भूमि पर पड़ी हुई मृत वेश्या को देखकर दिगम्बर मुनि ने विचार किया—इसने तपश्चरण क्यों नहीं किया? वृथा ही मर गई। जिससे मुनि को स्वर्ग का कारण पुण्य बन्ध हुआ। फिर उसे देखकर वेश्यासक्त विट् ने विचार किया कि यदि यह जीवित रहती तो मैं इसके साथ भोग करता अतः उसे पाप का कारण दुर्गति का बन्ध हुआ। कुत्ते ने उसे देखकर उसके मांस-भक्षण की इच्छा की, इससे उसे पाप का कारण नरक बन्ध हुआ।

तथा च लौकिकी श्रुतिः—किल बृहस्पतिः सद्वृत्तोऽपि चुञ्चारनगरे लोचनाञ्जनहरेण कितवेन मिथ्यापवाददूषितः शतक्रतुसभायां प्रवेशं न लेभे। अलब्धाशनांशेन तु षजकनाम्ना वाग्जीवनेन 'अयं भिक्षाभ्रमणव्याजेनार्भकान्भक्षयति' इत्युपहतश्चक्रपाणिः परिव्राड्वाराणस्याम्। मधुपेषु मध्ये पीतपयाश्च मार्कण्डतापसस्तापसाश्रमेषु। ज्ञानं च प्रतिकूलदैवोपनिपातमौषधमिव न भवति विहितोपयोगमप्यर्थक्रियाकारि। किं नु खल्वज्ञो द्वैपायनो येन स तादृशं कर्म समाचचार। पौलस्त्यो नीतिशास्त्रेषु नाश्रौषीद्दाण्डक्योपाख्यानम्, येन स परदारानपाहरत्। नहुषेन न सम्यगुपासितं गुरुकुलं येन सप्तर्षीन्सयुग्यानकार्षीत्। प्रजापतिर्जड एव एडो वा, येनात्मदुहितरि मनश्चकार। वररुचिश्च वृषलीनिमित्तमासवनिपोद्वहनमिति।

(प्रकाशम्।) अम्ब, न बालकेलिष्वपि मे कदाचित्प्रतिलोमतां गतासि। न विद्म कथमद्यैव ते चन्द्रमतेर्व्यस्थाने दुराग्रहमलीमसा मतिः समजनीति। तत्पर्याप्तमत्रालापपरम्परा। भवतु। भवत्येवात्र प्रमाणम्। उत्तिष्ठ। ननु तवैव पूर्यन्तामत्र कामितानि। आहूय त्वमेवादिश कृकवाकुविनिर्माणे शिल्पिनः। साधु समाज्ञापय त्वमेव भगवतीभवनशोभारम्भाय देवभोगिनम्। अनुशाधि त्वमेव यशोमतिकुमारस्य राज्याभिषेकदिवसगणनाय मौहूर्तिकान्।

है, अतः किस मार्ग से प्राणी का गमन हो?' इसप्रकार की न्याय में पड़ा हुआ मैं यदि इस माता द्वारा प्रतिज्ञा की हुई बात (आटे के मुर्गे की बलि) तिरस्कृत करता हूँ तो ये समीपवर्ती लोग 'हे राजन्! बुद्धि का फल आग्रह न करना है' इसप्रकार उपदेश देते हुए मेरे उपाध्याय हो जाँयगे एवं समस्त पुरुषों के समक्ष तिरस्कृत की हुई यह वृद्ध माता न मालूम क्या करेगी? अपने मन में वर्तमान शुद्ध भी कर्तव्य करने की इच्छा यदि दूसरों के चित्त को प्रमुदित नहीं करती तो वह पुरुष को कल्याण करनेवाली नहीं होती। उक्त बात की समर्थक लौकिक कथाएँ—निस्सन्देह 'बृहस्पति' सदाचारी होनेपर भी जब चुञ्चार नाम के नगर में 'लोचनाञ्जनहर' नामक जुआरी द्वारा मिथ्या-अपवाद से दूषित हुआ तब इन्द्र-सभा में प्रविष्ट न हो सका। दूसरी कथा—'चक्रपाणि' नामका सन्यासी 'षजक' नाम के स्तुतिपाठक से, जिसे प्रस्तुत संन्यासी से भोजन का भाग नहीं मिला था, 'यह भिक्षार्थ घूमने के बहाने से बच्चों को खाता है' ऐसी निन्दा से दूषित होने के कारण काशीनगर में प्रवेश न कर सका। 'मार्कण्ड' नामका तपस्वी, जिसने शराबियों के बीच में उनके स्नेह से केवल दूध ही पिया था, 'इसने शराब पी ली' इसप्रकार की लोक-निन्दा के कारण तपस्वियों के आश्रम में प्रवेश न कर सका। प्रतिकूल भाग्य के उदय से व्याप्त हुआ ज्ञान, उपयोग किया हुआ भी सेवन की हुई औषधि की तरह सफल नहीं होता।

निस्सन्देह क्या 'द्वैपायन' नाम के मुनि मूर्ख थे, जिससे उन्होंने द्वारिका नगरी को भस्म किया। क्या लङ्काधिपति रावण ने नीतिशास्त्रों में 'दाण्डक्य' राजा का उदाहरण नहीं सुना था? जिससे उसने परस्त्री (सती सीता) का अपहरण किया। क्या 'नहुष' राजा ने भली प्रकार गुरुकुल की उपासना नहीं की? जिससे उसने सप्तर्षियों को बैलों-सरीखे वाहन बनाए। क्या ब्रह्मा विवेक-हीन या बहिरे थे? जिससे उन्होंने अपनी पुत्री के भोगने की इच्छा की। कात्यायन नाम के तपस्वी ने दासी के निमित्त शराब से भरा हुआ घड़ा उठाया।

अब यशोधर महाराज ने स्पष्ट कहा—हे माता! जब बाल-क्रीड़ाओं में भी किसी भी अवसरपर तुमने मेरी प्रतिकूलता प्राप्त नहीं की, अर्थात्—सदा मेरे अनुकूल रही—तब न जाने आज चन्द्रमति (निर्मल बुद्धि-युक्त) तेरी बुद्धि अयोग्य आचरण में दुष्ट आग्रह से विशेष मलिन किस प्रकार हुई? अतः इस कार्य में विशेष वार्तालाप करने से कोई प्रयोजन नहीं। अस्तु इस कार्य (आटे के मुर्गे का मारण व उसको मांस समझकर भक्षणरूप कार्य) में आप ही प्रमाण हैं। हे माता! उठो। निस्सन्देह प्रस्तुत कार्य में आपके ही मनोरथ पूर्ण हों। तुम्हीं शिल्पियों को बुलाकर मुर्गा बनाने की आज्ञा दो व तुम्हीं कुलदेवता-गृह की शोभा करने के

एवमन्यान्यपि विधापय त्वमेव देवद्विजपरिजनपूजापुरःसराणि गृहकार्याणि । अहो वैरिकुलकमलाकरनीहार प्रतीहार, विसृज्यतामयमशेषोऽपि यथायथमनुजीविनिवहः । अहमप्येष चिरप्रवृत्तवार्तासंजातश्रमो मनागप्यस्माद्वसुमतीतिलकास्सभामण्डपाददूरदेशवर्तिनि तस्मिन्मदनविलासनामनिवासभवने स्वैरविहाराय गच्छामि । तदनु तस्मिन्मयि शय्यातलमलंकृतवत्यहो विक्रमालंकार, सा मदीयामृतमतिमहादेवी दिवसादोयमादातुमागत्य गतात्कुसुमशेखरकात्पुण्यवटोर्मदनदमयन्तिकायाः प्रसाधिकाया दुहितुर्विनोदकलहंसिकायाश्च सध्रीच्याः संजातसकलसेवावसरायां संसदि प्रवृत्तमुदन्तमाकर्ण्य, 'न खलु मे यामिनीसमाचरितसाहसादस्य वसुमतीपतेरपरमेवंविधकूटकपटानुष्ठानमस्ति । मन्ये च दुष्करमेवमस्यास्थिरचित्तस्य चिरकालभावीनि भविष्यन्त्यायूंषि । कुलवधूनां ह्ययमन्यश्च देवद्विजाग्निसमक्षं मातापितृविक्रीतस्य कायस्यैव भवतीश्वरः, न मनसः । तस्य पुनः स एव स्वामी यत्रायमसाधारणः प्रवर्तते परं विश्रम्भविश्रमाश्रयः प्रणयः । तथाहि—

पुरापि किं न रेमे गङ्गा सह महेश्वरेण, राधा नारायणेन, बृहस्पतिपत्नी द्विजराजेन, तारा च बालिना । महासत्त्वेषु हि जगति न किंचिद्दुष्करमस्ति । अन्यत्र विरक्ते चेतसि रागप्रत्यानयनात् । को हि नामायःपिण्ड इव तप्तातप्ते मनसी संधातुमर्हति । किं च परमकुहन इव पुरंध्रीषु बुद्धिमानवाप्नोति स्वश्रेयसम् । अन्यथा कृत्याराधक इव ध्रुवं पञ्चजनः

लिए देवता-पूजक पुजारी ब्राह्मण को भली प्रकार आज्ञा दो। एवं यशोमति कुमार के राज्याभिषेक करने की लग्न के शोधन के लिए तुम्हीं ज्योतिषियों को आदेश दो। देवपूजा, द्विजपूजा व परिजन (कुटुम्ब) पूजा-आदि दूसरे भी गृहकार्य तुम्हीं कराओ। शत्रु समूहरूपी कमल वन के शोषण के लिए हिम-सरीखे हे द्वारपाल! तुम इस समस्त किंकर-समूह को भी उपयुक्त स्थानपर भेज दो एवं यह मैं भी, जिसे लम्बी वेला पर्यन्त उत्पन्न हुए वार्तालाप से खेद उत्पन्न हुआ है, इस 'वसुमतीतिलक' नाम के सभा मण्डप से कुछ निकटवर्ती उस 'मदन-विलास' नाम के निवास भवन में स्वच्छन्द विहार-निमित्त जाता हूँ। इसके बाद जब मैं प्रस्तुत 'मदनविलास' नाम के निवास भवन में स्थिति हुए पलँग को अलङ्कृत कर चुका था तब अहो! पराक्रम-पञ्चानन मारिदत्त महाराज! उस मेरी अमृतमति महादेवी ने दिन सम्बन्धी भोजन-ग्रहण करने के निमित्त आकर वापस गये हुए 'कुसुम शेखर' नाम के विद्यार्थी से एवं 'विनोद कलहंसिका' नाम की सखी से, जो कि 'मदनदमयन्तिका' नाम की शृङ्गार कारिणी की पुत्री थी, सभा में, जिसमें समस्त पुरुषों की सेवा का अवसर उत्पन्न हुआ है, उत्पन्न हुए वृत्तान्त को सुनकर निम्न प्रकार विचार किया—'इस राजा के ऐसे कूट कपट का कारण निश्चय से मेरे द्वारा रात्रि में किये हुए दुर्विलास को छोड़कर दूसरा नहीं है। ऐसे अस्थिर चित्तवाले इस यशोधर महाराज की आयु (जीवन) दीर्घ होगी, इसे मैं असम्भव मानती हूँ। अर्थात्—यह निकट मृत्यु है। निश्चय से यह यशोधर अथवा इससे भिन्न दूसरा कोई भी मानव देव, ब्राह्मण व अग्नि के समक्ष माता-पिता द्वारा दिये गए कुलवधुओं के शरीर का ही स्वामी होता है, न कि उनके चित्त का। उन कुलवधुओं के चित्त का वही स्वामी होता है, जिस पुरुष में ऐसा प्रेम पाया जाता है, जो कि अनोखा और विश्वास एवं दुःख-निवारण का स्थान होता है। अब अमृतमति उक्त बात को दृष्टान्त-माला द्वारा समर्थन करती है—

पूर्वकाल में भी शन्तनु राजा की पत्नी गङ्गा ने क्या महेश्वर के साथ रतिविलास नहीं किया? राधा नाम की गोपी ने क्या श्रीनारायण (श्रीकृष्ण) के साथ रतिविलास नहीं किया? और बृहस्पति की पत्नी ने क्या चन्द्रमा के साथ रमण नहीं किया? एवं सुग्रीव की पत्नी तारा ने बालि के साथ क्या रतिविलास नहीं किया? निश्चय से महासाहसियों को संसार में कोई भी कार्य असम्भव नहीं है, परन्तु विरक्तचित्त को अनुरक्त बनाना शक्य नहीं। निश्चय से कौन पुरुष लोहे के गोलों-सरीखे तप्त और अतप्त चित्तों को जोड़ने में समर्थ होता है? विशेषता यह है कि केवल स्त्रियों से ईर्ष्या न करनेवाला बुद्धिमान पुरुष ही अपना कल्याण प्राप्त करता है,

पञ्चतामञ्चेत् । भवेद्वावश्यमक्षिगतः । तदेव यावन्न मयि रोषविषं वर्षति तावदहमेवास्य तद्वर्षामि । यथा चेयं ममात्मजस्य राज्याभिषेकवार्ता प्रतिस्वप्नविधि किंवदन्ती च बाढमुच्छलिता । सा यदि दैवात्तथैव परमार्थसती तदाचिरात्प्रकामं मे मनोरथाः फलिताः । सिद्धं च मे समीहितम् । न चैतदाश्चर्यम् । अनुकूलं हि दैवं करोति कुरङ्गमपि कण्ठीरवातिवर्तनम् । अचलानपि च विदारयति नलदण्डेन । केवलमत्रौत्सुक्यत्वं परिहर्तव्यम् । उत्तापकस्य हि पुरुषस्य हस्तायातमपि कार्यं निधानमिव न सुखेन जीर्यति । भवति च जीवितव्यसंदेहाय । किं च न खलु बुभुक्षितवशादुदुम्बराणि पच्यन्ते । नाप्युद्बुवच्छक्यते पातुम्' इति च वितर्क्य, तथा—

अनुनयत वदत मधुरं यत्कार्यं तदपि मानसे कुरुत । रौति कलं हि मयूरः सविषं च भुजङ्गमं वशति ॥१७ ॥

मूर्ध्ना वहति लोकोऽयं यथा वग्धुमिहेन्धनम् । अनुशील्य क्षयं नेयस्तथारातिर्महात्मना ॥ १८० ॥

पुंसामसारसत्त्वानां किं कुर्याद्विक्रमक्रमः । भस्मीभवन्ति काष्ठानि तेजसानुगतान्यपि ॥ १८१ ॥

ज्ञानवानपि कार्येषु जनः प्रायेण मुह्यति । हस्तन्यस्तप्रदीपस्य किं न स्खलति शेमुषी ॥ १८२ ॥

प्रायः सरलचित्तानां जायते विपदागमः । ऋजुर्याति यथा छेदं न वक्रः पादपस्तथा ॥ १८३ ॥

अर्थात् ईर्ष्यालु तो मर जाता है। अन्यथा—स्त्रियों से ईर्ष्या करनेवाला पुरुष निश्चय से वैसा मरण प्राप्त करता है जैसे कृत्या (देवी विशेष) की आराधना करनेवाला पुरुष मरण प्राप्त करता है। अथवा यह निश्चय से स्त्रियों से द्वेष करने योग्य होता है! अतः यह राजा जब तक मेरे ऊपर क्रोधरूपी विष का क्षरण नहीं करता तब तक मैं ही इसके ऊपर क्रोधरूपी विष का क्षरण करती हूँ। जिसप्रकार से यह मेरे पुत्र (यशोमतिकुमार) की राज्याभिषेक-वार्ता, दुष्ट स्वप्न का शमन-विधान और राजा के दीक्षा-ग्रहण की लोक-वार्ता विशेषरूप से उठी है, वह दीक्षाग्रहण-वार्ता यदि पुण्ययोग से वास्तविक सत्य होगी तब तो इस समय ही मेरे मनोरथ विशेष रूप से पूर्ण हुए! मेरा मनोरथ अवश्य सिद्ध होगा ही। यह मनोरथ-सिद्धि लक्षणवाला कार्य आश्चर्य-जनक नहीं है। क्योंकि निश्चय से जब दैव अनुकूल होता है तब वह (हितकारक पुण्य) हिरण को भी सिंह का घातक कर देता है और पर्वत को भी नलदण्ड से विदीर्ण कर देता है, परन्तु इस कार्य में उत्सुकता—अस्थिरता छोड़ देनी चाहिए। क्योंकि अस्थिर चित्तवाले पुरुषका हस्त में आया हुआ भी कार्य निधि-सरीखा अनायास से परिणमन नहीं करता—सिद्ध नहीं होता एवं अस्थिर चित्तता जीवन को संदिग्ध कर देती है। अर्थात्—अस्थिरता में मरण भी उत्पन्न हो जाता है। निश्चय से भूँखे पुरुष की इच्छामात्र से उदम्बर फल नहीं पकते किन्तु प्रयत्न द्वारा पकाये जाते हैं। इसीप्रकार उबलता हुआ जलादि पीने के लिए शक्य नहीं होता।

'तुम लोग मनुष्यों का सन्मान करो व कानों को अमृत सरीखे मिष्ट वचन बोलो तथा जो कर्त्तव्य चित्तमें वर्तमान है, उसे करो। जैसे मयूर मधुर शब्द करता हुआ विषैले साँप को खा लेता है'[1] ॥१७९॥ जैसे यह लोक ईंधन को जलाने के लिए मस्तक पर धारण करता है वैसे नीतिशास्त्र में प्रवीण पुरुष को भी शत्रु को शान्त करके क्षय करना चाहिए'[2] ॥१८०॥ स्वाभाविक शक्तिहीन पुरुषों की पराक्रम-परिपाटी क्या कर सकती है? जैसे ईंधन अग्नि से सहित होते हुए भी भस्म हो जाते हैं[3] ॥१८१॥ ज्ञानवान् पुरुष भी प्रायः करके कर्त्तव्यों में अज्ञान-युक्त हो जाता है। जैसे अपने हाथ पर दीपक स्थापित करनेवाले पुरुष की बुद्धि क्या स्खलित नहीं होती?[4] ॥१८२॥ सरल (निष्कपट) चित्तशाली पुरुषों का प्रायः करके मरण होता है। जैसे सरल—सीधा-वृक्ष काटा जाता है वैसे वक्र (टेढ़ा) वृक्ष नहीं काटा जाता। अभिप्राय यह है कि इससे मनुष्य को कुटिल ही होना

१-२. दृष्टान्तालंकारः । ३. दृष्टान्तालंकारः । ४. आक्षेपालंकारः ।

रक्तभावं समस्तानां प्रदर्श्योदेति यः पुमान् । आदित्यवत्स किं न स्यात्पादाक्रान्तजगत्त्रयः ॥ १८४ ॥

बहिर्मृदुर्लघूत्थानः पूर्वं यः स्यात्प्ररोहवत् । किमसौ न भिनत्त्येव प्राप्य कालं महीभृतः ॥ १८५ ॥

शूरोऽपि सत्त्वयुक्तोऽपि नीतिं वेत्ति न यो नरः । तत्र संनिहिता नित्यमापदः शरभोपमे ॥ १८६ ॥

अपि च ।

धूर्तेषु मायाविषु दुर्जनेषु स्वार्थैकनिष्ठेषु विमानितेषु । वर्तेत यः साधुतया स लोके प्रतार्यते मुग्धमतिर्न केन ॥ १८७ ॥

इति च विमृश्य, शठप्रतिशठन्यायेन किमपि निःशलाके शिक्षयित्वा कुमारवयस्येनालकभञ्जनेनाधिष्ठितं गविष्ठिरममात्यं प्रहितवती । स तथैवागत्य प्रविश्य च निवेदितावसरो मामुन्मूलितमगमिवातीव परिम्लानम्, आलिख्यपरामृष्टं चित्रमिव मलिनच्छायम्, अग्निलङ्घितं रत्नमिव नष्टतेजसम्, उत्पाटितपक्षं तार्क्ष्यमिव गलितप्रभावमवलोक्य 'महान्खल्वस्य महीपतेर्नवग्रहस्येव गजस्य दौर्मनस्याभिनिवेशः । कुतोऽन्यथाद्यैवायं गौलिकोपदेहदूषितदेहस्त्रिपथगाप्रवाह इव नितरां मलीमसच्छविः समपादि' इति परामर्शविस्मितान्तरङ्गः कृतागमनपर्यनुयोगश्चैवं मां व्यजिज्ञपत्—'देव, देवी

चाहिए[1] ॥१८३॥ जो पुरुष समस्त प्राणियों में रक्तभाव (अनुराग) प्रदर्शित करके उदित होता है, वह, क्या वैसा पादाक्रान्तजगत्त्रय—चरणों द्वारा तीन लोक को व्याप्त करनेवाला (तीन लोक का स्वामी) नहीं होता ? जैसे सूर्य, पूर्व में रक्तभाव (अरुणता-लालिमा) प्रदर्शित करके उदित होता हुआ बाद में पादाक्रान्त जगत्त्रय (किरणों द्वारा तीन लोक को व्याप्त करनेवाला) होता है[2] ॥१८४॥ जो पुरुष पीपल के अङ्कुर सरीखा पूर्व में बाह्य में मृदु (कोमल) होता हुआ लघु रूप से उत्पत्ति-युक्त होता है, वह समय पाकर क्या वैसा महीभृतों (राजाओं) को विदीर्ण नहीं करता ? जैसे पीपल का अङ्कुर समय पाकर महीभृतों (पर्वतों) को विदीर्ण करता है[3] ॥१८५॥ जो पुरुष बहादुर व शक्तिशाली होता हुआ भी नीतिशास्त्र को नहीं जानता, अष्टापद-सरीखे उस पुरुष के पास सदा आपत्तियाँ (मृत्युएँ) निकटवर्ती होती हैं । अर्थात्—जिसप्रकार अष्टापद मेघ की गर्जना से ही मर जाता है[4] ॥१८६॥ तथा जो पुरुष, धोखेबाजों, कपटियों, शत्रुओं, स्वार्थ-साधन में तत्पर रहनेवालों एवं मानभङ्ग में प्राप्त कराये गए पुरुषों के साथ हितरूप से प्रवृत्ति करता है, वह विवेकहीन पुरुष संसार में किस पुरुष द्वारा नहीं ठगाया जाता ?[5] ॥१८७॥

हे मारिदत्त महाराज ! उस अमृतमति देवी ने उक्त विचार करने के बाद शठ-प्रतिशठ न्याय (तोते के पंखों का लुञ्चन व स्त्री के शिर का मूडना रूप प्रकार) से कुछ भी (सत्य-असत्य) एकान्त में शिक्षा देकर 'अलकभञ्जन' नाम के कुमारकाल के मित्र से युक्त 'गविष्ठिर' नाम का अपना मन्त्री मेरे पास भेजा । उसने उसी तरह से आकर द्वारपाल द्वारा सूचित अवसर-वाला होकर मेरे 'तिलक-भवन विलास' नाम के महल में प्रविष्ट होकर मुझे निम्न प्रकार का देखा । जैसे उखाड़ा हुआ वृक्ष कान्तिहीन होता है वैसे मैं भी विशेष कान्तिहीन था । जैसे लिखकर मिटाया हुआ चित्र मलिन कान्ति-वाला होता है वैसे मैं भी मलिन कान्ति-युक्त था । जिसप्रकार अग्नि से व्याप्त हुआ माणिक्य कान्ति-हीन होता है उसी प्रकार मैं भी कान्ति-हीन था और जिस तरह लौंचे हुए पंखोवाला गरुड पक्षी नष्ट हुए माहात्म्यवाला होता है उसी प्रकार मैं भी नष्ट हुए माहात्म्यवाला था । फिर उस मन्त्री ने 'निश्चय से तत्काल में पकड़े हुए हाथी-सरीखे इस राजा की उद्विग्न-उदास चित्तता का अभिप्राय अत्यधिक है, अन्यथा—यदि यह उदास चित्त नहीं है—तो इस समय ही यह वैसा विशेष मलिनता से दूषित कान्तियुक्त कैसे हुआ ? जैसे गुलिका-मिश्रण से दूषित देहवाला गङ्गा नदी का

---

१. दृष्टान्तालंकारः । २. श्लेष व दृष्टान्तालंकारः । ३. आक्षेपालंकारः । ४. उपमालंकारः । ५. आक्षेपालंकारः ।

मन्मुखेनैवमाह—अद्य देवः किलाद्य दुःस्वप्नोपशमनार्थं भगवत्याः कात्यायन्याः पिष्टकुक्कुटेन बलिमुपहर्तुमादृत इति कर्णपरम्परया श्रुतम्, तद्यदि सत्यं तदास्तामसौ ताम्रचूडस्तावत्। अहमेवात्मना परिकल्पिततदुपहारवर्त्मना परितोषयामि भगवतीम्। प्रशाम्यन्तु देवस्य सर्वेऽपि प्रत्यूहव्यूहाः। प्रवर्धतां च देवस्येदमाचन्द्रार्कमसमश्रीप्राज्यं राज्यम्। न च मया विना भवति देवस्य कोऽप्यूनः प्रदेशः। मद्विधानां हि देवस्य किंकरीणामतीव सुलभत्वात्। नीतिरपि तथास्ति—

'आत्मानं सततं रक्षेद्दारैरपि धनैरपि।' इति।

अथ ममैवंविधे प्रेषणावरोधे देवो न करोति करुणां तदा मिथुनचरस्य पक्षिणश्चक्रवाकीव देवस्याहं सहचर्यत एव रात्रौ वियुक्तासि, सरसः कमलिनीवात एव जडरतासि, जलनिधेर्वेलेवात एव चपलासि, नभसः शशिप्रतिमेवातएव सकलङ्कासि, विटपिनश्छायेवात एवान्योपभोग्यासि, कुलशैलस्य मेखलेवात एव क्षुद्राधिष्ठतासि, तपनस्य प्रभेवात एव संतापिकासि,

---

पूर विशेष मलिनता से दूषित कान्ति-युक्त होता है।' इस प्रकार के विचार से जिसका मन आश्चर्यान्वित हुआ है और जिससे आने का प्रश्न (आप किस प्रयोजन से आए हैं?) किया गया है, मुझ से निम्न प्रकार विज्ञापन किया—

संतुष्ट होने पर शुभफल व रुष्ट होने पर अशुभ फल उत्पन्न किये विना, तत्काल में ही—शाप देने के अवसर में ही नहीं लोटती। अर्थात्—जैसे देवता भक्तों पर सन्तुष्ट हुए शुभ फल देते हैं व रुष्ट हुए अशुभ फल देते हैं वैसे ही राजा लोग भी सेवकों पर सन्तुष्ट हुए शुभ फल व रुष्ट हुए अशुभ फल देते हैं। अतः जो मैं रुष्ट हुआ तुझे शाप दे चुका हूँ उसके अनुसार तुझे अशुभ फल अवश्य भोगना पड़ेगा। अतः तू सुन, पुनः विद्याधर-लोक की प्राप्ति का कारण दूसरा ही तुझे कहता हूँ, उसी बात को निरूपण करता है—

समस्त सांसारिक सुखों की आधार-भूत रत्न-खानियों की भूमि के संगम वाले कलिङ्ग देशों में 'महेन्द्र' नाम के पर्वत का, स्वामी ऐसा सुदत्त नाम का राजा है। जिसकी नितम्बभूमि ऐसी भ्रमर श्रेणीरूपी नीलमणिमयी मेखला (कटिनी) से चिह्नित है, जो कि हस्तियों के मद (दानजल) को सुगन्धि से आर्द्र हुई गुफाओं के मध्य भागों पर चारों ओर संचार करती हुई वायु के आस्वाद में लम्पट है। जो संजातमेदिनीरति चित्त (म्लेच्छ स्त्रियों के साथ भोगविलास के मनवाला) हो करके भी द्विजातिस्तूयमान वृत्त (ब्राह्मणों से स्तुत्य आचार वाला) है। यहाँ पर विरोध प्रतीत होता है, क्योंकि जो म्लेच्छ-भार्याओं में अनुरक्तचित्त होगा, वह ब्राह्मणों से स्तुत्य आचार वाला कैसे हो सकता है? इसका समाधान यह है कि 'जो मेदिनीरतिचित्त (आसमुद्रान्त पृथिवी के पालने के मनवाला) है और अपि (निश्चय से) जो द्विजातियों (तपस्वी ब्राह्मणों से प्रशंसनीय चरित्रवाला) है और जो अकारणरोषप्रमत्त (निष्कारण क्रोध करनेवाला) होकर के भी निःशेष-शिष्टाचार प्रवृत्त (समस्त शिष्टाचारों में प्रवृत्त) है यह भी विरुद्ध है, क्योंकि जो निष्कारण क्रोध करनेवाला होगा, वह समस्त शिष्टाचारों में प्रवृत्त हुआ कैसे हो सकता है? इसका परिहार यह है कि जो अक-आ-रणरोष-प्र-मत्त है। अर्थात्—जो अकुत्सित व चारों ओर से किये हुए संग्राम-कोप के कारण प्रकर्षरूप से हर्ष को प्राप्त हुआ है, जिससे जो समस्त शिष्टाचारों में प्रवृत्त है।[1]

जिस सुदत्त राजा की धनवृद्धि याचकजनों को भली प्रकार संतुष्ट करने के लिए है। जिसकी शास्त्र-चतुरता विद्वज्जनों की पूजा-निमित्त है। जिसकी शूरता का अनुक्रम शरणागतों के प्रतिपालन-निमित्त है। जिसका राज्य का उपार्जन स्वीकार प्रजालोक की रक्षा के लिए है। जिसके सामर्थ्य (शक्ति) का आश्रयण सेवक लोगों के पोषण के लिए है। जिसका क्षतत्राण लक्षण-वाला क्षात्र (क्षत्रियधर्म) एवं उसके आचार की प्रवृत्ति दूसरों के प्रयोजनों के पोषण के लिए है। जिसका देवों को प्रसन्न करना सत्पुरुषों के लिए वर (अभि-

---

१. विरोधाभासालंकारः ।

यस्य च जनन्यः परकलत्राण्येव, बन्धुवर्गः समाश्रितलोक एव, कुटुम्बकं सप्तसमुद्रावधि वसुधैव, जीवितं सत्यप्रतिपालनमेव, महाव्यसनं परोपकारनिघ्नतैव, व्रताचरणं क्षितिरक्षणमेव, योग्योद्योगः प्रजाकार्यानुशासनमेव, दक्षिणावत्वं जगत्त्रयव्यवहारव्यवस्थापनमेव; अवभृथस्नानं परत्रेह च हितवृत्तिप्रवृत्तिषु स्वातन्त्र्यमेव, वीरत्वमरिषड्वर्गविजय एव, असिधाराव्रतमन्यायखण्डनमेव, ऐश्वर्यमाज्ञानुल्लङ्घनमेव ।

यस्य चासंतोषः श्रुतेषु, तर्षः सत्पुरुषसंग्रहेषु, मूकभावः स्वकीयगुणस्तवनेषु, बधिरत्वं दुर्जनोपदेशेषु, दर्शनपरावृत्तिरनर्थसंगमेषु, कामः पुण्यार्जनेषु, अक्षमा परोपतापेषु, विद्वेषो व्यसनेषु, असंतृप्तिः सुभाषितश्रवणेषु, आसक्तिः पुनः सद्गोष्ठीषु ।

यस्य च परिमितत्वं वाचि, कालहरणं कलासु, आशादर्शनं दिग्विजययात्रायाम्, श्रवणगतत्वं पूर्वपुरुषचरितेषु, अवधीरणमात्मसुखानाम्, अनवसरः कलिकालविजृम्भितस्य, महासात्त्विकं सकलजगदभ्युद्धरणेषु, ऐश्वर्यं विश्वम्भरतायाम्, न पुनरमीषां द्वन्द्वानि तस्य वदान्यतायां प्रत्युपकृतिषु मान्यजनसंभावनायां स्वच्छन्दवृत्तिषु च विषयभावमाजग्मुः ।

लषित वस्तु) देने के निमित्त है। जिसका अद्भुत कर्म संबंधी उद्यम विधान मुनियों के उपसर्ग-निवारणार्थ है। जिसका जयकुमार-आदि वीरों सरीखा पराक्रम साधकों (विद्या देवता को वश करनेवाले महात्माओं) के भय को नष्ट करने के लिए है और जिसका प्रसाद (प्रसन्नता) भगवान् ऋषभदेव से धारण किये हुए धर्म के निर्वाहनिमित्त है। दूसरों की स्त्रियाँ ही जिसकी माताएँ हैं। सेवक-गण ही जिसका भ्रातृवर्ग है। सातसमुद्र पर्यन्त पृथिवी पर स्थित हुआ लोक ही जिसका परिवार वर्ग है। सत्यधर्म का प्रतिपालन ही जिसका जीवन है। परोपकार करने की अधीनता ही जिसका महाव्यसन है। पृथिवी का परिपालन ही जिसका व्रताचरण है। प्रजाजनों के कर्तव्य की शिक्षा देना ही जिसका उचित उद्यम है। पृथिवी मंडल पर स्थित हुए तीन लोक की सदाचार प्रवृत्ति को निश्चल करना ही जिसका दानचातुर्य है। परलोक व इस लोक में सुख उत्पन्न करनेवाले पुण्य कर्मों की प्रवृत्तियों में स्वाधीनता ही जिसका यज्ञान्त स्नान है। अरिषड्वर्गों (काम, क्रोधादि छह शत्रु-समूहों) पर विजयश्री प्राप्त करना ही जिसकी वीरता है। अन्याय का खण्डन करना ही जिसका असिधाराव्रत (तलवार की धार सरीखा कठोर नियम) है एवं आदेश का प्रतिपालन ही जिसका ऐश्वर्य है।

जिसे तृष्णा शास्त्रों के अभ्यास में है व लोभ महापुरुषों के स्वीकार में है। और जो अपने गुणों की प्रशंसा करने में मौन रखता है। जो चुगलखोरों के वचनों के श्रवण करने में बहिरा है। अलाभ-संगतियों में जो नेत्र बन्द करता है। जो पुण्य-संचयों में अभिलाषा करता है। जिसका क्रोध परोपतापों के अवसर पर होता है। अर्थात्—दूसरों से सन्ताप दिये जानेपर जो क्षमा नहीं करता है। जिसे अप्रीति जुआ खेलना-आदि सातव्यसनों में है एवं असन्तोष सुभाषितों के श्रवण में है तथा आसक्ति विद्वानों की गोष्ठी में है। जो वचन में परिमित (अल्पभाषी) है किन्तु दान करने में परिमित (थोड़ा देनेवाला) नहीं है। जो समय-यापन लेखन व पठन-आदि कलाओं में करता है परन्तु दान करने में समय-यापन (विलम्ब) नहीं करता, अर्थात्—तत्काल देता है। जिसका आशादर्शन (दिशाओं का देखना) दिग्विजय के लिए प्रस्थान करने में है परन्तु दान में जो आशादर्शन (याचकों की आकाङ्क्षा का यापन) नहीं करता, (तत्काल देता है)। जो पुराणपुरुषों की कथाओं के श्रवण में श्रुतिदान (ध्यान पूर्वक सुनना) करता है परन्तु प्रजाजनों की प्रार्थनाओं में श्रुतिदान—श्रवण-खण्डन (नहीं सुनना) नहीं करता। अर्थात् उनकी प्रार्थनाएँ अवश्य सुनता है। जो अपने सुखों का अनादर करता है परन्तु याचकों का अवधीरण—अनादर नहीं करता। जिसको दुष्ट कलिकाल के प्रसार का अनवसर (अप्रस्ताव) है, परन्तु जिसे याचकजनों के लिए अनवसर नहीं है। अर्थात्—जिसे दान करने का सदा अवसर है। जो समस्त लोक की रक्षा करने में प्रसन्न है एवं जिसका ऐश्वर्य सकल लोक के भरण-पोषण में है। इनके

यस्य चात्मसंधानविनीतवृत्तयः परविग्रहप्रशमनकुशलाः स्वभावगुणप्रणयिनः परिप्राप्तश्रवणा बाणा एवासाध्यसाधनोत्सवाः सचिवाः, परे तु केवलं सभाशोभार्थमस्थावराण्यलंकरणानि। स्वपरप्रजानां संपत्त्यापत्तिकरमसहायं साहसमेव पुरोहितः, परस्तु पर्वदिवसेषु वसुवितरणस्थानम्। अशेषशात्रवबलस्खलनहेतुरव्याजवर्यं शौर्यमेव सेनापतिः, परस्तु भृत्यभरणीयसमयसूचनं चेतनमुपकरणम्। अखिलसमुद्रावधिवसुधातले दुर्वारप्रसरपर्यैश्वर्यमेव द्विषद्दण्डधरः प्रतीहारः, परस्तु सेवकानामुपासनावसरनिवेदनस्तीर्थपुरुषः। समराङ्गणेषु परहृदयंगमप्रवणानि शस्त्रसंप्रेषणान्येव दूतप्रणिधयः, परे तु राजनीतिप्रपञ्चाः। त्रिदशैरप्यप्रतिहताटोपाः प्रतापा एव दुर्गभूमयः, परास्तु विभवविनियोगद्वाराणि। देवसाध्य-

---

जोड़े अर्थात्-परिमितत्व (थोड़ा दान करना) व कालहरण (दान में विलम्ब करना) यह पहला जोड़ा। आशादर्शन (याचकों की आकांक्षा का भङ्ग करना) श्रवणगतत्व (प्रार्थनाओं का न सुनना) यह दूसरा जोड़ा। अवधीरण (याचकों का तिरस्कार) व अनवसर (मौका न होना) यह तीसरा जोड़ा और महासात्विकत्व (प्रसन्न रहना) व ऐश्वर्य यह चौथा जोड़ा। उक्त चारों जोड़े क्रमशः जिसकी प्रेमपूर्वक त्यागशीलता में और प्रत्युपकारों के करने में एवं पूज्य पुरुषों के सत्कार करने में तथा स्वेच्छाचारों (अनैतिक प्रवृत्तियों) में विषय भाव को प्राप्त नहीं हुए। अर्थात्—जिसकी प्रेमपूर्वक की हुई दानशीलता में थोड़ा दान करना व विलम्ब से दान करना नहीं है। जो प्रत्युपकारों के करने में याचकों की आकाङ्क्षाओं का भङ्ग न करता हुआ तत्काल दान देता है तथा उनकी प्रार्थनाओं को सुनता है। एवं जो पूज्य पुरुषों के सत्कार करने के अवसर पर उनका तिरस्कार नहीं करता एवं अवसर नहीं चूकता। अर्थात्—आज मेरा कुटुम्बीजन मर गया है; अतः अभी दान देने का अवसर नहीं है इत्यादि नहीं करता। जो अपनी प्रसन्नता व ऐश्वर्य का उपयोग स्वेच्छाचारों में नहीं करता।[1]

जिसके ऐसे वाण ही मन्त्री हैं, जो कि अपने सन्धान (योजन) में नम्रवृत्ति-युक्त हैं और मंत्री भी सन्धि कार्य करते हैं। जो, शत्रुओं के युद्ध को शान्त करने में दक्ष हैं और मन्त्री भी युद्ध को शान्त करते हैं। जो स्वभावगुणप्रणयी (प्रकृति से धनुष की डोरी पर स्थायी) हैं और मन्त्री भी स्वभावगुणप्रणयी (सन्धि व विग्रह-आदि में स्नेह करनेवाले) होते हैं तथा जो परिप्राप्तश्रवण (आकर्षण-वेला में खींचनेवाले के श्रवण (कान) प्राप्त करनेवाले) हैं और मन्त्री भी परिप्राप्त श्रवण (गुप्तमन्त्र के कथन के लिए कानों के समीप जानेवाले) होते हैं एवं जो असाध्य साधनोत्सव (शत्रु को मृत्यु-प्रापण में उद्यम करने वाले) हैं और मन्त्री भी असाध्य कार्य को सिद्ध करते हैं दूसरे मंत्री तो केवल राजसभा की शोभा के लिए जङ्गम आभरण मात्र हैं। अपनी प्रजाओं में लक्ष्मी उत्पन्न करने वाला और शत्रुओं की प्रजाओं में आपत्ति उत्पन्न करने वाला अद्वितीय साहस (अद्भुत कर्म) ही जिसका पुरोहित (राजगुरु) है दूसरा पुरोहित तो अमावस्या-आदि पर्वदिनों में धन देने का स्थानमात्र है। समस्त शत्रु समूह की शक्ति को नष्ट करने में कारणीभूत व स्वभाव से मुख्य जिसकी वीरता ही सेनापति है, दूसरा सेनापति तो सेवकों के भरणपोषण संबंधी समय का कथन करने वाला सजीव उपकरण है। चार समुद्रों की मर्यादावाले पृथिवीमण्डल पर दुःख से भी निवारण करने के लिए अशक्य प्रवृत्ति वाला जिसका ऐश्वर्य (प्रभुत्व) ही शत्रुओं के ऊपर दण्ड-निपातन करने वाला प्रतीहार (द्वारपाल) है, दूसरा द्वारपाल तो सेवकों को सेवा का अवसर निवेदन करनेवाला यात्राभूत पुरुषमात्र है। युद्धाङ्गणों पर शत्रुओं के हृदय विदीर्ण करने में चतुर जिसके शस्त्र-मोचन ही दूत (राजा का संदेश व शासन (लेख) को ले जानेवाले) व प्रणिधि (गुप्तचर) हैं, दूसरे दूत व गुप्तचर तो अर्थशास्त्र के विस्तारमात्र हैं। देवों द्वारा भी नष्ट करने के लिए अशक्य विस्तारवाले जिसके प्रताप ही दुर्गभूमियाँ (जलदुर्ग, वनदुर्ग व शत्रुदुर्ग-भूमियाँ)

---

१. यथासंख्यालंकारः।

तुलितं बाहुबलविजृम्भितमेव वप्रः,परस्तु विनोदरवनिनामपाश्रयभूमिः। वनमृगैरप्यनुल्लङ्घनीयप्रभावाज्ञैव प्राकारः, परस्तु पुरस्य पांसुस्पर्शविनिवारणपरिच्छदः। सकलसपत्नव्याप्तिकदर्थनसमर्थनावतारः सव्येतरः कर एव परिघा, परं तु दौवारिकाणां विश्रामविष्टराणि। दुर्वृत्तारातिकुलनिमज्जनजलाधारा खड्गधारैव परिखा, परास्तु नगराङ्गनानां जलक्रीडाधिकरणानि। समस्तक्षितिरक्षणक्षमः पराक्रम एव परिवारः परस्तु श्रीविलासाडम्बरः। निजकीर्तिसुधाधवलितापघनं[1] त्रिभुवनमेव विहारहर्म्याणि, पराणि तु राज्यलक्ष्मीचिह्नानि। चतुरुदधिमेखला वनमनोहरा वसुंधरैव प्रियकलत्राणि, पराणि तु वंशाभिवृद्धिनिबन्धनानि धर्मक्षेत्राणि।

यस्य चाहवाङ्गणरङ्गेष्वनवरतमुक्तशरासारवर्षविकर्तरितमुखमण्डलानामहितकबन्धानां नर्तनक्रियासु परमेकान्तरसिकता, न पुनरितरास्वर्थदूषणपरासु। असमसमरावसरेष्वाश्चर्यशौर्यपरितोषितानाममरवृन्दारकाणामानन्दातोद्यवादनेषु प्रकर्षतृष्णालुता, न पुनरितरेषु शरीरायासकरेषु। त्रिविष्टपकुटीकोटरविहारिणा नरनिलिम्पाम्बरचरलोकेन निजविजयनामाङ्कसुभगस्य गीतस्य गायने नितरां स्पृहयालुता, न पुनरितरस्य हृदयहरिणहरस्य। कदनमेदिनीषु दुर्वार-

---

हैं। दूसरी जलदुर्गादि भूमियाँ तो केवल लक्ष्मियों के विशेष रूप से अधिकार द्वार हैं। जिसकी भुजाओं का सामर्थ्य-प्रसार ही, जिसकी तुलना श्रीब्रह्मा के साथ भी नहीं की जा सकती, वप्र (दुर्ग की आधारभूत भित्ति) है और दूसरा वप्र तो क्रीड़ागजों का आश्रयस्थान मात्र है। जंगली मृगों द्वारा भी उल्लंघन करने के अयोग्य माहात्म्य वाली जिसकी आज्ञा ही प्राकार (कोट) है, दूसरा दुर्ग तो नगर संबंधी धूलियों के स्पर्श-निवारण के लिये उपकरणमात्र है। जिसका दक्षिण हस्त ही, जिसका जन्म समस्त शत्रुओं के विस्तार को नष्ट करने के निश्चय वाला है, अर्गला (वेंड़ा) है और इसके सिवाय दूसरी अर्गलाएँ तो द्वारपालों के खेद को दूर करने के आसनमात्र हैं। दुराचारी शत्रु-वंशों के डूबने में जल की आधारभूत जिसकी खड्गधारा ही परिखा (खाई) है दूसरी परिखाएँ तो केवल नागरिक कामिनियों की जलक्रीड़ा के स्थानमात्र हैं। जिसका समस्त पृथिवी के परिपालन करने में समर्थ पराक्रम ही परिवार (कुटुम्ब) है और दूसरा परिवार तो लक्ष्मी के विलास का विस्तारमात्र है। अपनी कीर्तिरूपी सुधा से उज्वलीकृत शरीरवाला तीन लोक ही जिसका क्रीडागृह है। और दूसरे क्रीडागृह तो राज्यलक्ष्मी के चिह्नमात्र हैं। जिसकी चार समुद्ररूपी मेखला (करधोनी) वाली व वनोंसे मनोज्ञ ऐसी पृथिवी ही प्यारी स्त्रियाँ हैं और दूसरी प्यारी स्त्रियाँ तो वंश (कुल व पक्षान्तर में बांस) की चारों ओर से वृद्धि में कारणीभूत धर्मक्षेत्र (दान आदि पुण्य कर्मों का स्थान) हैं, अर्थात्—जैसे खेतों में वंशों—बाँसों की वृद्धि होती है !

जो सुदत्त महाराज शत्रु-कबन्धों (शिर-रहित शरीर-धड़ों) की, जिनके मुखमण्डल संग्रामाङ्गणरूपी नाट्यशालाओं में निरन्तर फेंके हुए बाणों की मूसलधार वेगशाली वृष्टि से विशेषरूप से खण्डित किये गये हैं, नृत्यचेष्टाओं में ही केवल विशेषरूप से रसिक (अनुरक्त हृदय) हैं और दूसरी कामिनियों की नृत्यक्रियाओं में, जो कि धन संबंधी दोष (विनाश) उत्पन्न करने में तत्पर हैं, रसिक—आसक्त नहीं हैं। जो विषम संग्रामकालों में आश्चर्यजनक वीरता से आनन्दित किये गए देवों के मध्य प्रधान देवों के आनन्दजनक बाजों की ध्वनि के सुनने में विशेषरूप से तृष्णालु है किन्तु शरीर को कष्ट करनेवाले दूसरे तत, वितत, धन व सुषिररूप बाजों के बादन में तृष्णाशील नहीं है। जो सुदत्त महाराज तीन लोकरूपी गृह के मध्य विहार करनेवाले भूमिगोचरी मानव, देवता व विद्याधरों के समूह से अपनी विजयश्री के कारण जीते हुए राजाओं के नामाङ्कण से प्रीति-

---

१. 'निजकीर्तिसुधाधवलितं त्रिभुवनमेव' इति (क) प्रतौ पाठः।

वैरिकरिशिरोविदारणेषु महती मृगयाव्यसनपरवशता, न पुनरितरेषु निरपराधेषु वनमृगेषु। नृपयशाजिराष्टापदभूमिकायां चरगमगतिबन्धैरराति चतुरङ्गेषु प्रकामं द्यूतदुर्ललितता, न पुनरितरेषु नरपालकुलकलङ्कृकरेषु। सकलरत्नाकरमणिमेखलायां वसुमतीयोषायां नितान्तं सक्तता, न पुनरितरेषु वपुर्धर्मधनविध्वंसनेषु विलासिनीजनेषु। अनन्यसामान्यसन्योपार्जितजयानिलविजृम्भितेन सुभटकुटजाटवीविलुण्ठनपटुनावलेपानलेन दुर्धर्षाणां विद्विषामशेषयशःपानेष्वतीवशौण्डता, न पुनरितरेष्वैहिकामुष्मिकफलविलोपनोद्भवेष्वासवेषु। अकाण्डजगदुपद्रवदानवेषु मानवेषु दण्डपारुष्ये बाढं मनोमनीषितानि, न पुनर्भ्रूलतोल्लासवशवर्तनेषु परिजनेषु। रणकेलिकण्डूलानामरीणामायोधनवसुधायामभिमुखीभावकरणेषु वचःकर्कशव्यवहारे परमं नैपुण्यम्, न पुनरवलोकनमात्रविनयपरिष्वजासु प्रजासु। अखण्डब्रह्माण्डडिम्बडमरकरालैः प्रतिपक्षव्यालैः संचितस्य कीर्तिकुलधनस्यापहारे गाढं गृध्नुता, न पुनरात्माभ्युदयप्रणयिभिरुपार्जितस्य द्रविणोर्जितस्य, संपरायधरावारिषु शत्रुशल्लकीनगभङ्गप्रलोभनेन गजग्रहणेषु महान्ति कुतूहलानि, न पुनरितरेण चौरचारपाशाविमोपायव्यतिकरेण।

आसंसारमवैनश्वर्यसुरभिषु यशश्चन्दनवन्दनेषु साभिलाषं मनः, न पुनरितरेषु क्षणमात्रपरिमलमनोहरानुबन्धेषु गन्धेषु।

जनक हुए गीत के गाने में विशेष उत्कण्ठित है, न कि मनरूप मृग के मोहक दूसरे शृङ्गार-आदि गीतों के गाने में उत्कण्ठित है। जो सुदत्त महाराज युद्ध भूमियों में दुःख से भी जीतने के लिए अशक्य शत्रु संबंधी हाथियों के गण्डस्थलों के छेदने में विशेषरूप से शिकार व्यसन के पराधीन है किन्तु दूसरे निरपराधी जंगली मृगों की शिकार करने रूपी व्यसन के पराधीन नहीं है। जो सुदत्त महाराज युद्धाङ्गणरूपी (शतरञ्ज खेलने की भूमि) पर चरगम (गुप्तचरों का भेजना), व गतिबन्धों (शत्रु-शिविर के चारों ओर घेरा डालना) से शत्रुओं की चतुरङ्ग सेनाओं (हाथी व घोड़े-आदि) के विषय में विशेषरूप से द्यूत-दुर्ललित (विजयश्री प्राप्त करने की इच्छा के कारण विचार-हीन) है परन्तु राजवंश को कलङ्कित करनेवाले दूसरे चतुरङ्गों (शतरञ्ज व पांसों की क्रीड़ाओं) में चर (दूसरे स्थानों में घोड़े आदि का प्रवेश) व गम (दूसरे स्थान में घुसना एवं गतिबन्ध (दूसरे शतरञ्ज संबंधी घोड़े आदि को चारों ओर से घेरना) से विशेषरूप से द्यूतदुर्ललित (जुआ खेलने का अनिवारक) नहीं है (जुआ खेलने का त्यागी) है। जो सुदत्त महाराज चार समुद्ररूपी मणिमेखला-शालिनी पृथिवी रूपी स्त्री में विशेपरूप से आसक्त हैं परन्तु दूसरी वेश्याओं में, जो कि शरीर धर्म व धन को नष्ट करनेवाली हैं, आसक्त नहीं हैं।

जो सुदत्त महाराज ऐसी गर्वरूपी अग्नि से भयङ्कर शत्रुओं के, जो कि अनोखे संग्राम में स्वीकार की हुई विजयरूपी वायु से वृद्धिगत हुई है और जो वीर योद्धारूपी कुटजों (शक्रतरुओं) के वन को भस्म करने में दक्ष है, समस्त यशों के पान करने में ही मद्यपी (नशेबाज) हैं परन्तु इसलोक व परलोक संबंधी सुख को नष्ट करने में गर्विष्ठ दूसरे मद्यों—शराबों—से मद्यपी नहीं हैं। जिस सुदत्त महाराज के सहसा जगत के ऊपर उपद्रव करने में दैत्यप्राय मनुष्यों के लिए कठोर दण्ठ देने के चित्त-मनोरथ विशेषरूप से है, परन्तु भ्रकुटिलता के क्षेप-मात्र से अपने अधीन हुए सेवकों के लिए कठोर दण्ड देने के चित्त-मनोरथ नहीं है। जो संग्राम-क्रीड़ा में विशेष उत्कण्ठित हुए शत्रुओं के प्रति संग्राम के लिए युद्धभूमि पर आने के अवसरों पर अति कठोर भाषण करने में विशेष निपुण है परन्तु सामने देखने मात्र से विनययुक्त हुई प्रजाओं के प्रति अति कठोर भाषण करने के व्यवहार में निपुण नहीं है। जिसे समस्त पृथ्वीमण्डल का विनाश करने से उत्पन्न हुए भय से भयङ्कर शत्रुरूपी कालसर्पों से रक्षा किये हुए कीर्तिरूपी कुलधन के अपहार की विशेष लुब्धता है, परन्तु अपनी उन्नति में स्नेह करनेवाले हितैषियों से संचय किये हुए प्रशस्त धन का अपहरण करने में लुब्धता नहीं है। युद्धभूमि, हाथियों के पकड़ने की भूमि व हाथियों के पकड़ने की खाई, इनमें शत्रुरूप शल्लकी वृक्षों के भङ्ग का लोभ दिखाकर, जिस सुदत्त महाराज

अपरजनासाधारणेषु गुणमणिविभूषणेषु महानाग्रहः, न पुनरितरेषु देहखेदावहेषूपलशकलनिवहेषु । निखिलजगन्मङ्गलविधानाऽमत्रेषु[1] [2]सच्चरित्रेष्वभीक्ष्णं रक्षणप्रयत्नः, न पुनः सर्वजनसाधारणाधिकरणेषु[3] प्राणेषु ।

यस्य च सप्तसमुद्रमेखलावनिविलोकनजातकौतुकस्याभूदभिमुखीभावः शत्रूणां प्राभृतेषु, न शस्त्राणाम् । विग्रहः[4] प्रणतिषु, नापकारमनीषायाम् । द्विधाभावः[5] सेवाकर्वटेषु[6], नोपचारकार्याणाम् । पतनं भृत्यभावेषु, न चामराणाम् । प्रसरणं सर्वस्वार्पणेषु, नातपत्राणाम् । प्रबन्धः[7] कण्ठकुठारेषु, न मदविजृम्भितानाम् । [8]प्रतापावलम्बनमसहायसाहसावेशविधिषु, नैश्वर्यसंभावनायाम् । आरोपणं शिरसि प्रणामाञ्जलिषु, न धनुषि मौर्वीणाम् ।[9]

के हाथियों के पकड़ने के महान् कौतूहल हैं, परन्तु चौर, गुप्तचर, पाश-समूह हैं आदि में जिसके ऐसे दूसरे उपाय प्रघट्टक द्वारा जिसे हाथियों के पकड़ने से महान् कौतूहल नहीं है।

जिस सुदत्त महाराज का चित्त संसार पर्यन्त स्थिरतारूपी सुगन्धिवाले यशरूपी चन्दन के विलेपनों में अभिलाषा-युक्त है किन्तु विनश्वर सुगन्धि से मनोज्ञ संबंधवाले दूसरे सुगन्धि पदार्थों (चन्दनादि) में अभिलाषा-युक्त नहीं है। दूसरे मनुष्यों में न पाये जानेवाले ज्ञानादि गुणरूपी मणियों के आभूषणों में जिसे प्रगाढ अनुराग है किन्तु शरीर में खेद-जनक दूसरे पाषाण-खण्डों (रत्नादि) के समूहों में प्रगाढ अनुराग नहीं है। समस्त लोक को आनन्दित करने के पात्र सदाचारों की निरन्तर रक्षा के लिए जिसकी चेष्टा है किन्तु समस्त प्राणियों में साधारण रूप से पाये जानेवाले प्राणों की रक्षार्थ जिसकी निरन्तर चेष्टा नहीं है। सातसमुद्र रूपी करधोनी वाली पृथिवी को देखने के उत्पन्न हुए कुतूहलवाले जिस सुदत्त महाराज की शत्रुभूत राजाओं के उपहारों के ग्रहण करने में सन्मुखता थी, न कि शस्त्रों के ग्रहण करने में। जो नमस्कारों के करने में विग्रह (अभिमुखीभूत) था, परन्तु अपकार करने की बुद्धि का विग्रह (विस्तार) नहीं करता था। जो सेवा करने में कुटिल शत्रुओं के साथ द्विधाभाव (शत्रुता) करता था, परन्तु उपचार (प्रजापालन-आदि व्यवहार) कार्यों में द्विधाभाव (चित्तवृत्ति के दो खण्ड करना—अस्थिरता) नहीं करता था अथवा उपचार (सेवनीय) शरणागतों का द्विधाभाव (विनाश) नहीं करता था। जिसके यहाँपर भृत्यभावों (भृत्यरूपी पदार्थों—सेवकों) में पतन (नम्रता) था परन्तु चमरों का पतन (विनाश) नहीं होता था। अर्थात्—निरन्तर चँवर ढोरे जाते थे। जिसका प्रसारण (विस्तार गुण) समस्त धनादि के अर्पण में था परन्तु जिसके छत्रों का प्रसारण (निर्गमन—हटना) नहीं था अर्थात्—सदा छत्रधारी था। जो अभिमानी शत्रुओं के गलों पर [उनका मद चूर-चूर करने के लिए] कुठार का प्रबन्ध (प्रकृष्ट बन्धन) करता था परन्तु अहङ्कार के विस्तारों का प्रबन्ध (संबंध) नहीं करता

---

१. 'निखिलजगन्मङ्गलविधायिषु' इति ह. लि. (क) प्रतौ पाठः ।

२. अमत्राणि भाजनानि इति पञ्जिकाकारः ।

३. 'सर्वजनसाधारणेषु' इति ह. लि. (क) प्रतौ पाठः ।

४. विग्रहोऽभिमुखीभूतः 'विग्रहो युधि विस्तारे प्रविभागशरीरयोः' ।

५. शत्रूणामिति भावः पक्षे द्विखंडकरणं ।

६. सेवायां कुटिलेषु । उपचारस्तु लञ्चायां व्यवहारोपचर्ययोः ।

७. प्रकृष्टबन्धनं शत्रूणां मानत्यजने गले कुठारस्य नाहंकारस्य बंधनं ।

८. असमर्थानां साहाय्यकरणे ।

९. परिसंख्यालंकारः । अस्य लक्षणं तु एकत्र निषिध्यान्यत्र वस्तुस्थापनं परिसंख्या ।

यस्य च निजप्रतापसंपादितोत्सवभरायां विश्वंभरायामनन्यसामान्यमात्मैश्वर्यमवलोकमानस्य रथचक्रचक्रचर्याचूर्णितनिःशेषशैलमूलेषु हयानीकोग्रैकखरखुरोद्भूतधूलीपटलपूरितसकलपातालमूलेषु करटिघटाकराटोपविलुण्ठितसमस्तमहाटवीगहनेषु सुभटसैन्यदोर्दण्डदलितनिखिलसालवलनेषु द्विषद्विषयेषु परं कात्यायनीप्रतिमास्वेव दुर्गत्वमवतस्थे।

एवं तस्य कलिङ्गाधिपतेः सप्तवापयोराशिरत्नालंकारपात्रं कुलकलत्रमिवावनिवलयं निहालयतः[1] स्वभावादेव दयार्द्रहृदयस्य धर्मामृतरसास्वाददोहदविदूरितसंसारसुखोदयस्य 'समलकलश इवायं कायो बहिष्कृतयत्ननिर्णेजनोऽपि न जहाति निजां प्रकृतिम्, अत्याधानकाष्ठमिव देहिनां भवदुःखपरशुपाताय विषयोपसेवनमाधुर्यमिति विदन्तोऽपि कथमनया बहिःप्रदर्शितापातसुन्दराडम्बरयावसानविरसया पांसुलयेव श्रिया प्रतार्यन्ते मुग्धबुद्धयः क्षोणीश्वराः'

इति परामर्शश्लथसाम्राज्यग्रहाभिनिवेशस्य पूतिपुष्पमिव केवलं त्वचि मनोहरं वर्णिनीजनम् वितर्कयतः 'को नु खलु विश्वंभरे

था। जो असमर्थों की साहसादेशविधि (सहायता करने) में प्रताप (सैनिक व कोशशक्ति) का अवलम्बन (आश्रय-सहारा) करता था, परन्तु अपने ऐश्वर्य (राज्य विभूति) की संभावना (प्रसिद्धि) में प्रताप (प्रकृष्ट सन्ताप का प्रकाशन) नहीं करता था। अर्थात्—किसी को सन्तापित नहीं करता था। जो मस्तक पर नमस्कार अञ्जलियों को आरोपण (धारण) करता था परन्तु धनुष पर डोरियों का आरोपण—स्थापन (चढ़ाना) नहीं करता था। जिस सुदत्त महाराज के, जो कि अपने प्रताप से प्राप्त किये हुए उत्सवों की अधिकतावाली पृथिवी पर अपनी अनोखी राज्यविभूति को देख रहा था, ऐसे शत्रुदेशों में, केवल कात्यायनी (पार्वती—दुर्गा) की मूर्तियों में ही दुर्गत्व (दुर्गापन-पार्वतीपन) स्थित था, परन्तु शत्रुदेशों में दुर्ग (किले) नहीं थे।

जिनमें (शत्रुदेशों में) रथ-सेना के पहियों के संचार से समस्त पर्वतों के मूल (नीचे के भाग) चूर-चूर किये गए हैं। जिनमें घोड़ों की सेनाओं की अत्यन्त तीक्ष्ण टापों से उड़ी हुई धूली-समूह द्वारा समस्त पातालमूल (अधोलोक के नीचे भाग) पूरित (व्याप्त) किये गए हैं। जिनमें हाथियों के समूह की सूँडों के विस्तार से समस्त विशाल अटवियों के वृक्ष-समूह उखाड़े गए हैं और जिनमें वीर सैनिकों के भुजारूपी दण्डों से समस्त प्राकारों (कोटों) के घुमाव तोड़े गए है। प्रसङ्गानुवाद—अथानन्तर 'रत्नशिखण्ड' ने कहा—हे नवीन अपराधों के पात्र 'कन्दलविलास' विद्याधर! एक समय राजदरबार में स्थित हुए उस ऐसे कलिङ्ग देशाधिपति सुदत्त महाराज के समक्ष, जो सात समुद्ररूपी रत्नमयी करधोनी के पात्र पृथिवीमण्डल का वैसा प्रतिपालन कर रहा था जैसे रत्नाभरण-विभूषित कुलवधू प्रतिपालन की जाती है। स्वाभाविक दया से सरस हृदयवाले जिसने धर्मरूपी अमृत के रसास्वादन की उत्कट अभिलाषा के कारण सांसारिक सुखों का उदय दूर कर दिया है। जिसका साम्राज्यरूपी ग्रहाभिनिवेश (भूतपिशाच की लीनता) निम्नप्रकार के उत्कृष्ट विचार से शिथिल हो गया है। 'यह शरीर गूथ (मल) से भरे हुए घटसरीखा है, जो कि बाह्य स्नानादि प्रयत्नों द्वारा प्रक्षालन किया हुआ भी, अपना स्वभाव (अपवित्रता) नहीं छोड़ता। विषयों के भोग की मधुरता प्राणियों के ऊपर वैसी सांसारिक दुःखरूपी परशु के पातन (गिराने) के निमित्त है जैसे अधस्तनकाष्ठ (लकड़ी के ऊपर रखी हुई लकड़ी) परशु के पातन के निमित्त होता है। इस प्रकार जानते हुए भी मूढबुद्धिवाले राजा लोग व्यभिचारिणी स्त्री-सरीखी इस राज्यलक्ष्मी द्वारा, जिसने अनुभव काल में बाह्य मनोज्ञ आडम्बर प्रकट किये हैं और जो परिणाम (उत्तरकाल) में विरस (दुःख देनेवाली) है, किस प्रकार ठगाए जाते हैं?

इसी प्रकार जो 'स्त्रीजन को सड़े हुए कूष्माण्डफल-सरीखा केवल त्वचा से मनोज्ञ प्रतीत होनेवाला' विचार रहा है एवं निम्नप्रकार के निर्दोष उपदेश से जिसका मोहरूपी जाल छिन्न भिन्न किया जा रहा है—'समस्त विश्व का भरण-पोषण करनेवाले राजाओं में निश्चय से कौन ऐसा राजा है? जो यमराज के नगर में

१. निहलन्ति लिलंडति ? मन्थादयः कर्षकाः खेटयन्ति ताम् राजा प्रयुङ्क्ते—'प्रतिपालयतः' इत्यर्थः।

परेषु विशांपतिर्यो न विवेश कीनाशनगरम्, यं चेयं निसर्गचपला न तत्याज लक्ष्मीः, येन समं जगामेयं भूमिः, यस्मै न दुद्रोह प्रयत्नपरिपालितोऽपि स्त्रीलोकः, यस्मादवरुरुहे न जन्मजरामरणवर्गेण, यस्य न बभूवुराधिराक्षस्यः, यस्मिन्न लेभिरे गोचरतां संसारारणिसमुत्थानोल्लोलाः प्रायेण दुःखानलज्वालाः' इत्यनादीनवोपदेशविशीर्यमाणमोहपाशस्य विततमप्यात्मनो विभवं परलोकावलोकनप्रतिसरमिवाकलयतः 'हंहो सरसापराधगोचरखेचर, एकदा प्रणामोन्मुखलेखवैखानसीमुखमण्डन-घनघुसृणरसलोहितकरे विकचनिचुलमञ्जरीजालशेखरितशैलशिरोदृषदि सिन्दूरपरागपिञ्ज[1]रितसुरवारणकुम्भस्थले हरि-रोहिण[2]ार्चितगगनगमनाङ्गनाकपोलशालिनि प्रवालाङ्कुरोत्करनिकीर्णदिक्चक्रवाले रविकान्तशिलासंचारितदहनवर्ति[3]नि तमिस्ररजस्वलतया पुरस्तादपसरन्तीषु नक्षत्रपङ्क्तिषु रक्ताम्बरशोभामिव बिभ्राणे अनवरतखचरसहचरीकरविकीर्यमाण-रक्तचन्दनप्रवहद्विगुणशोणिम्नि सति सवितृबिम्बे, नृपतिजनोदाहरणकथास्विव विशालतां गतासु दिक्षु, निर्मुक्तनीलनिचोलेष्विव

प्रविष्ट नहीं हुआ ? कौन ऐसा नरेश है ? जिसे इस स्वभाव-चञ्चला लक्ष्मी ने नहीं छोड़ा ? कौन ऐसा पृथिवीपति है ? जिसके साथ इस पृथिवी ने प्रस्थान किया ? कौन ऐसा राजा है ? जिससे प्रयत्नपूर्वक भरण पोषण किये हुए भी स्त्री-समूह ने द्रोह नहीं किया ? कौन ऐसा नरेश्वर है ? जिससे जन्म, वृद्धावस्था व मरण लक्षणवाला दुःख-समूह उत्तीर्ण हो गया (दूर हो गया) ? कौन ऐसा भूमिपति है ? जिसको मानसिक व्यथाएँ रूपी राक्षसियाँ उत्पन्न नहीं हुईं ? कौन ऐसा भूपति है ? जिसके ऊपर प्रायः करके दुःखरूपी अग्नि की ज्वालाओं ने, जो कि संसाररूपी अरणि (शमी काष्ठ) से उत्पत्ति के कारण विशेष लपटोंवाली हैं, अधिकार नहीं जमाया ? जो अपनी विस्तृत राज्य सम्पत्ति को भी परलोक (स्वर्गादि) दर्शन के लिए यवनिका (नाटक का परदा) सरीखी निश्चय कर रहा है', कोट्टपाल ने प्रविष्ट होकर एक चोर को, जिसने नगर के भाई के प्राण लेकर उसका समस्त धन अपहरण किया था, लाकर दिखाया।

किस वेला में कोट्टपाल ने चोर दिखाया ? एक समय जब प्रभात-वेला में सूर्यबिम्ब निम्नप्रकार का हो रहा था। जिसकी किरणें नमस्कार करने में उद्यत हुईं देव-तापसियों (अरुन्धती-आदि) के मुखों को (अलङ्कृत—सुशोभित) करनेवाले घने कुङ्कुमरस-सरीखीं लालिमायुक्त हैं। जिसने पर्वत संबंधी शिखर के विस्तृत पाषाण विकसित कदम्बमञ्जरी के रक्त पुष्प-समूह-सरीखे मुकुट-युक्त किये हैं। जिसने ऐरावत हाथी के गण्डस्थल सिन्दूर के चूर्ण-सरीखे पिञ्जरित (पीतरक्त) किये है। जो हरिरोहिण[3] (लालचन्दन) से लाल किये हुए विद्याधरियों के गालोंसरीखा शोभायमान हो रहा है। जिसने दिशा-समूह, प्रवाल की अङ्कुर-श्रेणियों से व्याप्त किये हैं। जिसके द्वारा सूर्यकान्तमणियों को शिलाओं पर अग्नि-वर्ति[4] (बत्ती) संचारित की गई है। जब नक्षत्र-श्रेणियाँ (जिनमें अलङ्कार से स्त्रियों का आरोप किया गया है) अन्धकार से रजस्वला (अन्धकाररूपी धूलि-युक्त व पक्षान्तर में पुष्पवती) होने से सामने से भाग रही थी—अस्त हो रहीं थीं तब जो (सूर्यबिम्ब) उनकी रक्ताम्बर (लाल आकाश व पक्षान्तर में लाल साड़ी) सरीखी कान्ति धारण कर रहा है। जिसकी लालिमा निरन्तर विद्याधरियों के हस्तों द्वारा फेंके हुए तरल रक्तचन्दन से दुगुनी हो गई है। इसी प्रकार जब दिशाएँ वैसी विशालता (मृग, पक्षी, या वृक्ष विशेषों से युक्तता) को प्राप्त हो रहीं थीं जैसे राजाओं की यशोगान कथाएँ विशाल (विस्तृत या प्रसिद्ध) होती हैं। जब प्रकट आकारवाले महलों के शिखर ऐसे मालूम पड़ते थे, मानों—उनका अन्धकाररूपी अँगरखा हट गया है।

---

१. 'पिञ्जरस्तु पीतरक्तेऽश्वभिद्यपि पिञ्जरं शातकुम्भे।'

२. 'हरिरोहण' इति ह. लि. (क) प्रतौ पाठः। 'हरिचन्दनं'।

३. वर्तिर्गात्रानुलेपिन्यां दशायां दीपकस्य च। अपि भेषजनिर्माणनयनाञ्जनलेखयोः॥ १॥

प्रकटाकृतिषु प्रासादशिखरेषु, क्षितीश्वरेष्विव राजहंसोपसेव्यमानकोशेषु पौष्करेयकाननेषु, प्रफुल्लकमलकाननमधुपानमत्त इव मन्दमन्दसंचारिणि प्रवाति वैभातिके मरुति, प्रत्यावृत्तेषु च दत्तदक्षिणेषु द्विजेष्विव राजकुलानां सेवावसरेषु कृतान्तस्यास्य प्रविश्य तलवरः परिमुषितनगरनापितप्राणद्रविणसर्वस्वमेकमैकागारिकमानीयादर्शयत् । स राजा तमवलोक्य धर्मस्थीयानां मुखानि व्यलोकिष्ट । धर्मस्थीयाः—देव, अनेन मलिनात्मना मलिम्लुचेनाद्वितीयं साहसमनुष्ठितमेकं तावद्रात्रिर्मुषितान्यच्च सुसुप्तमनुष्यहिंसा कृता । तदस्य पाटच्चरस्य चक्रीवदारोहणोच्छिष्टशालाजिरराजिबन्धविडम्बनपूर्वकश्चित्रो वधः कर्तव्यो यथायं च नक्षत्रवाणिज्यो दशभिर्द्वादशभिर्वा दिवसैरसून्विसृजति' ।

राजा स्वगतम् 'अहो कष्टं खलु प्राणिनां क्षत्रगोत्रेष्वयमाविर्भावः, यतो यदि न्यायनिष्ठुरतया क्षोणीश्वराः क्षितिरक्षासु दक्षन्ते तदावश्यं पापोपनिपातः परलोकक्षतिसंपातश्च । तदुक्तम्—'नरकान्तं राज्यं बन्धनान्तो नियोगः' इति ।

अथ न दक्षन्ते वर्णाश्रमव्यवस्थाविलोपः कापुरुषतोल्लापश्च ।

तथाहि । क्षीयेतायं क्षणाल्लोकः क्षतरक्षः क्षितीश्वरैः । लक्ष्मीक्षयः क्षये तस्य किं राजत्वं च जायते ॥५२॥

जब कमल-वन वैसे हंस पक्षियों द्वारा सेवन किये जा रहे कोश (मध्य भाग) वाले थे जैसे राजालोग राजहंसों (सामन्तराजाओं) द्वारा सेवन किये जा रहे कोश (धन-संपत्ति या राजखजाना) वाले होते हैं और जब प्रातः कालीन वायु मन्द मन्द संचार कर रही थी, इससे ऐसी प्रतीत होती थी—मानों—प्रफुल्लित कमलवनों का मधुपान (पुष्परस या मद्यपान) करने से मत्त—उन्मत्त हुई है। जब सामन्त राज-समूह की सेवाओं के अवसर वैसे प्रत्यावृत्त (व्यतीत) हो रहे थे जैसे जिन्हें दक्षिणा (दान) दी गई है, ऐसे ब्राह्मण [सन्तुष्ट हुए] प्रत्यावृत्त (वापिस जानेवाले) होते हैं। तदनन्तर प्रस्तुत सुदत्त महाराज ने उस चोर को देखकर [समुचित न्याय करने के हेतु] धर्मस्थीयों[1] (अपराधानुकूल दंडव्यवस्था करनेवाले धर्माधिकारियों) के मुखों की ओर दृष्टिपात किया। तब धर्माधिकारियों ने कहा—हे राजन्! इस पापी चोर ने अनोखा या बेजोड़ साहस (लूटमार, हत्या व बलात्कार-आदि कुकृत्य) किया है। क्योंकि एक तो इसने रात्रि भर चोरी की और दूसरे सोये हुए मनुष्य की हत्या कर डाली। अतः इस पाटच्चर[2] (चोर) का गधे पर चढ़ाना व जूँठे सकोरों की श्रेणी बाँधने की विडम्बना (दुःख) पूर्वक ऐसा चित्र वध करना चाहिए, जिससे यह, दश या बारह दिनों में प्राण-त्याग कर देवे।

अथानन्तर प्रस्तुत सुदत्त महाराज ने अपने मन में निम्नप्रकार विचार करते हुए निश्चय किया। 'आश्चर्य है निस्सन्देह प्राणियों की क्षत्रियवंशों में यह उत्पत्ति कष्टप्रद है' क्योंकि यदि राजालोग न्याय की उग्रता से पृथिवी की रक्षार्थ हिंसा करते हैं तो निश्चय से उन्हें पाप का आगमन व परलोक (स्वर्गादि) की हानि का प्रसङ्ग होता है। क्योंकि नीतिकारों ने कहा है—'राज्य अन्त में नरक का कष्ट देता है और राज्याधिकार अन्त में बन्धन का कष्ट देता है।' और यदि राजा लोग न्याय की उग्रता से पृथिवी की रक्षार्थ हिंसा नहीं करते (अन्यायियों को दण्डित नहीं करते) तो वर्णों (ब्राह्मण-आदि) व आश्रमों (ब्रह्मचारी-आदि) की मर्यादा (सदाचार) नष्ट होती है। एवं उनके ऊपर कायरता का आक्षेप होता है। उक्त बात को कहते हैं—यह लोक (पृथ्वीमण्डल) राजाओं द्वारा की हुई रक्षा से रहित होने से क्षण भर में नष्ट हो जाता है और लोक के नष्ट हो जाने पर सम्पत्ति नष्ट हो जाती है और सम्पत्ति नष्ट हो जाने पर राजापन कैसे रह सकता है ? ॥ ५२ ॥

---

१. तदुक्तं—सर्ववर्णाश्रमाचारविचारोचितचेतसः ।
दण्डदायो यथा दोषं धर्मस्थीयाः प्रकीर्तिताः ॥ १ ॥

२. एकागारिक-मलिम्लुच-पाटच्चर-नक्षत्रवाणिजकाः चौरपर्यायाः—

तदसाध्यव्याधिपरिगृहीतदेहवदस्य राज्यस्य परित्याग एव स्वास्थ्यं नान्यथा' इत्यवधार्य ।

एषोऽहं मम कर्म शर्म हरते तद्बन्धमान्यास्रवैस्ते क्रोधादिवशाः प्रमादजनिताः क्रोधादयस्तेऽव्रतात् ।
मिथ्यात्वोपचितास्ततोऽस्मि सततं सम्यक्त्ववान्संयमी दक्षः क्षीणकषाययोगतपसां कर्तेति मुक्तो यतिः ॥५३॥

इति च सुभाषितमात्ममनिसे निधाय, गतेषु कतिपयेषु गणरात्रेष्वनुजस्य राज्यश्रियं समर्प्य, प्रतिपन्नजिनरूपोचिताचरणश्चतुर्थमाश्रममशिश्रियत् ।

अस्तीदानीं तस्यामेवैकानस्याममरमिथुनमान्यमानमणिमयकूटं सहस्रकूटं नाम निजमहिमावधीरितामरावतीवसतिर्वसतिः, या नयनीतिरिव नवभूमिका, योगस्थितिरिव विहितवृषभेश्वरावतारा, सांख्यजनतेव कपिललतालयशालिनी,

---

अतः इस राज्य का त्याग ही वैसा श्रेयस्कर है जैसे असाध्य व्याधियों से चारों ओर से ग्रहण किये गये शरीर का त्याग श्रेयस्कर होता है। अन्यथा (यदि राज्यश्री का त्याग नहीं किया जाता) तो यथार्थ सुख प्राप्त नहीं हो सकता।

तदनन्तर प्रस्तुत सुदत्त महाराज ने अपने मन में निम्न प्रकार का सुभाषित श्लोक धारण किया। कर्म (ज्ञानावरण-आदि) मेरा आत्मिक सुख नष्ट करते हैं और कर्मबन्धन आस्रवों (कषायादि कर्मों के आगमन द्वारों) के कारण होते हैं। एवं आस्रव, क्रोध, मान, माया व लोभरूप कषायों के अधीन हैं, और क्रोधादि कषाय, प्रमादों से उत्पन्न होते हैं तथा प्रमादों द्वारा उत्पन्न हुए क्रोधादि, मिथ्यात्व से वृद्धिगत हुए अव्रत (हिंसा, झूठ, चोरी, कुशील व परिग्रह) से होते हैं। इसलिए प्रत्यक्ष प्रतीत हुआ मैं [उन कर्मबन्धनों के नष्ट करने के लिये) सम्यग्दृष्टि, संयमी, प्रमादरहित, कषायों का क्षय करनेवाला, धर्मध्यान व तपश्चर्या करनेवाला एवं मोक्षमार्गी ऐसा दिगम्बर तपस्वी होता हूँ ॥५३॥

तत्पश्चात् उसने कुछ रात्रि-समूह के व्यतीत हो जाने पर अपने छोटे भाई के लिए राज्यलक्ष्मी समर्पण करके दिगम्बर मुद्रा के योग्य आचरण स्वीकार करते हुए मुनि-आश्रम में प्रवेश किया। [हे 'कन्दल-विलास' नाम के विद्याधर !]

उसी उज्जयिनी नगरी में देव-देवियों द्वारा पूजने योग्य मणियों के शिखरों वाली और अपनी महिमा से अमरावती (स्वर्गपुरी) के प्रासादों को तिरस्कृत करनेवाली सहस्रकूट नाम की वसति (प्रासाद या जिनमन्दिर) है। जो वैसी नवभूमिका या पाठान्तर में नवभूका[1] (नवीन भूमि वाली) है जैसे नयों की नीति नवभूमिका[2] या नवभूका (नौ भेद वाली) होती है। जो वैसी विहित वृषभेश्वरावतारा[3] (वृषभ जिन के अवतरण वाली) है जैसे योगस्थिति[4] (नैयायिक व वैशेषिक के दर्शन) विहित वृषभेश्वरावतारा (शंभु के अवतार वाली) होती है। जो वैसी कपि-लतालय-शालिनी[5] (वन्दरों व लतागृहों से सुशोभित) है, जैसे

---

१. 'नवभूका' इति ह. लि. सटि. (ख) प्रतौ पाठः।

२. नयनीतिर्नवविधा—नैगमस्त्रिविधो द्रव्यपर्यायोभयभेदेन, संग्रहव्यवहारादयश्च षड्भेदाः।

ह. लि. स. टि. प्रति (घ) से संकलित—

३. वृषभेश्वरः शंभुरादितीर्थंकरश्च।

४. नैयायिक वैशेषिकप्रयोगाः।

५. कपिलदेवतालयेन शालते इत्येवं शीला, पक्षे मर्कटैः लतागृहैः शालिनी शोभमाना।

अमरगुरुभारतीव निवारितपरलोकदर्शना, मीमांसेव निरूप्यमाणनियोगभावनादिप्रपञ्चा, पिटकत्रयपद्धतिरिव योगाचार-गोचरा, महापुरुषमैत्रीव स्थिराधिष्ठाना, सत्सचिवप्रयुक्तिरिव सुघटितसन्धिः, अभिनवविलासिनीव सुकुतूहलविलोकना, कुचुमारविद्येव बहुविस्मयावहा, विजयसेनेव बाहुबलिविदिता, रूपगुणनिकेव सुपार्श्वागता, कुबेरपुरीव यक्षमिथुनसमाया, मन्मथवनलक्ष्मीरिवाशोकरोहिणीपेशला, शंभुसमाधिविध्वंसवेलेव प्रकटरतिजीवितेशा, सुकविकृतिरिव चित्रबहुला, मुनि-

---

सांख्यजनता कपिलता-लय-शालिनी (कपिल मुनि में लय से होने वाली स्वरूप प्राप्ति से सुशोभित) होती है। जो वैसी निवारित परलोकदर्शना[1] (मिथ्यादृष्टियों के मतों को निवारण करने वाली) है जैसे अमरगुरुभारती (बृहस्पति का दर्शन) निवारितपरलोकदर्शना (परलोक (स्वर्गादि) की मान्यता को निराकरण करने वाली) होती है। जो वैसी निरूप्यमाणनियोगभावनादिप्रपञ्चा (नियोग—चरणानुयोगादिप्रश्न व दर्शन-विशुद्धि-आदि षोडश कारण भावनाओं के विस्तार को निरूपण करने वाली) है, जैसे मीमांसा[2] (मीमांसक-दर्शन), निरूप्यमाणनियोगभावनादिप्रपञ्चा (नियोग व भावनारूप वाक्यार्थ के विस्तार को निरूपण करने वाली) होती है। जो वैसी योग-आचार-गोचरा[3] (योग (आप्त, आगम व पदार्थों के यथार्थ ज्ञान से व्याप्त हलन-चलनरूप आत्मप्रदेश) व आचार (संचित कर्मों के क्षय का कारण व भविष्यत् कर्मों के आगमन को रोकने में कारण संयमधर्म) की पद्धति है, अथवा योग (धर्मध्यान व शुक्लध्यान) तथा आचार (सम्यग्चारित्र की पद्धति है। अर्थात्—जो धर्मध्यानी, शुक्लध्यानी व चारित्रनिष्ठ महर्षियों से व्याप्त है, जैसे पिटकत्रय[4]-पद्धति (धर्म, संघ या संज्ञा तथा ज्ञान ये बौद्ध-दर्शन में पिटकत्रय हैं) योगाचार गोचरा (ज्ञानाद्वैतवादी बौद्धों से माननीय) होती है। जो वैसी स्थिर-अधिष्ठाना (निश्चल आचार वाली या स्थान वाली) है, जैसे महापुरुषों की मित्रता स्थिराधिष्ठाना (चिरस्थायिनी) होती है। जो वैसी सुघटितसन्धि[5] (अच्छी तरह रची हुई मिलापवाली) है, जैसे प्रशस्त सचिव[6] (मन्त्री) की सन्धि-प्रयुक्ति (सामनीति का उपयोग) सुघटित सन्धि (अच्छी तरह से तैयार किये हुए मैत्री के विधानवाली) होती है। जो वैसी सुकुतूहल विलोकना (कौतुक-जनक दर्शनवाली) है जैसे नवीन वेश्या सुकुतूहलविलोकना (उत्तम नेत्रोवाली या कामी पुरुषों के लिए श्लाघनीय दर्शनवाली) होती है। जो वैसी बहुविस्मयावहा (विशेष आश्चर्य जनक पदार्थों (चित्रादि) को धारण करनेवाली) है, जैसे कुचुमार[7] विद्या (इन्द्रजालिया की कला) बहुविस्मयावहा (दर्शकों के चित्त में विशेष आश्चर्य उत्पन्न करनेवाली) होती है।

जो वैसी बाहुवलिविदिता[8] (जहाँ पर बाहुवलिस्वामी केवली चित्र-लिखित) हैं, जैसे विजयसेना

---

१. बृहस्पति मते परलोको नास्ति, पक्षे परेषां मिथ्यादृष्टीनां मतानि यत्र वार्यन्ते।

२. मीमांसकमते नियोगभावनावाक्यार्थः, स्वपक्षे चरणानुयोगादिप्रश्नः दर्शनविशुद्धयादिकाः भावनाः।

३. योगः आप्तागमपदार्थयाथात्म्यज्ञानानुविद्धसपरिस्पन्दात्मप्रदेशः, उपात्तागामिककर्मक्षयप्रतिबन्धहेतुराचारः। अथवा—योगे ध्याने द्वे, आचारः तयोः पद्धतिः, पक्षान्तरे तु योगाचारः ज्ञानाद्वैतवादी।

४. धर्मः संघः ज्ञानमिति पिटकत्रयं। अथवा धर्म संज्ञाज्ञानानि इति पिटकत्रयं।

५. सन्धिर्योनौ सुरंगायां नद्यांगे श्लेषभेदयोः। 'सन्धिश्लेषे' 'सन्धिर्नाविग्रहो यानमित्यमरः'।

६. तदुक्तं—संपत्तौः स्वामिनः स्वस्य विपत्तौस्तदरातिषु यः साधयति बुद्धयैव तं विदुः सचिवं बुधाः॥ १॥

७. कुचुमारः अथवा पाठान्तर में कचुमारः कुहकविद्योपाध्यायः। ह० लि० सटिप्पण प्रतियों से संकलित—सम्पादक

८. बाहुबलीश्वरः केवली च।

९. विजयो जये पार्थे विमाने विजयोभातस्तस्योस्तिथावपि।

मतगतिरिव चरणकरणानन्दिनी, भरतपदवीव विविधलयनाटयाडम्बरा, पुरंदरपुरीव संनिहितैरावता, हरपरिषदिवासीनसौरभेया, शिशिरगिरिदरीव निलीनोपकण्ठकण्ठीरवा, मन्थानाचलतटीव रमोपशोभिता, सकृत्पण्यसंस्थेव प्रलम्बितकुसुमशरा, सुरशैलाटनिरिव सविधविधुव्रध्नमण्डला, पाण्डयमुद्रेव शकुलियुगलाङ्किता, सच्छकुनसंपत्तिरिव पूर्णकुम्भाभिरामा, कंटभारातितनुरिव कमलाकरसेविता, समवसरणसभेव प्रसाधितसिंहासना, अजडाशयानुगतापि जडनिधिमती,

(गौरी-पार्वती की सेना) बाहुवलिविदिता (श्रीमहादेव ईश्वर से अधिष्ठित) होती है। जो वैसी सुपार्श्वागता[1] (पार्श्वनाथ तीर्थङ्कर से सुशोभित) है, जैसी रूपगुणनिका[2] (चित्रकर्म) सुपार्श्वागता (समीप में वृत्तविशेष वाली या चित्रलिखित चन्द्रसूर्य विम्ववाली) होती है। जो वैसी यक्षमिथुनसनाथा (चित्र-लिखित कुवेरों के जोड़ों से सहित) है जैसी कुवेरपुरी यक्षमिथुनसनाथा (यक्षजाति के देवों के जोड़ों (यक्ष-यक्षिणियों) से सहित) होती है। जो वैसी अशोकरोहिणी[3] पेशला (चित्र-लिखित अशोक राजा व रोहिणी रानी से मनोज्ञ) है, जैसे नन्दनवन-लक्ष्मी अशोक रोहिणी पेशला (अशोक वृक्ष व रोहिणी वृक्षों से मनोज्ञ) होती है। जो वैसी प्रकटरतिजीवितेशा[4] (जहाँपर प्रद्युम्नस्वामी चित्र-लिखित हैं) है जैसे [5]शंभुसमाधिविध्वंसबेला (रुद्र के ध्यान को विध्वंस करने का समय) प्रकटरतिजीवितेशा (कामदेव को प्रकट करने वाली) होती है। जो वैसी चित्रबहुला[6] (चित्र-सृष्टिवाली) है, जैसे उत्तम कवि की काव्य-रचना चित्रबहुला (छत्र, मुरजवन्धादि की वहुलता-युक्त) होती है। जो वैसी चरणकरणानन्दिनी[7] (चरणानुयोग व करणानुयोग संबंधी शास्त्रों से आनन्द देनेवाली) है जैसे मुर्निमतगति[8] (नास्तिक-मत व कामसूत्र) चरण-करण-आनन्दिनी (चरण (भक्षण) व कर्ण (उत्फुल्ल विजृम्भादि) से आनन्ददायिनी) होती है। जो वैसी विविधलय-नाटयाडम्बरा (नाना भाँति के संगीत-लय के साथ नृत्य के विस्तार वाली) है, जैसे भरतमुनिपदवी (भरतमुनि का नाटयशास्त्र) विविधलयनाटयाडम्बरा नानाप्रकार की लयों के साथ नृत्य का विस्तार वर्णन करनेवाली) होती है।

अब शास्त्रकार पुरन्दर[9] इत्यादि विशेषणों से प्रस्तुत वसतिका की चित्रलिखित स्वप्नावलि (१६ स्वप्नों) का वर्णन करते हैं—जो वैसी सन्निहितैरावत्ता (चित्र-लिखित ऐरावत हाथीवाली) है जैसे इन्द्र-नगरी सन्निहितैरावता (निकटवर्ती ऐरावत हाथी-युक्त) होती है। जो वैसी आसीन सौरभेया (चित्र-लिखित शुभ्र वृषभ वाली) है जैसे हरपरिषद (श्री शिव की सभा) आसीन सौरभेया[10] (वृषभ-नंदिया की) स्थिति वाली होती है। जो वैसी निलीनोपकण्ठकण्ठीरवा (समीप में चित्रलिखित सिंहवाली) है जैसे हिमालय की गुफा निलीनोपकण्ठ-

१. पार्श्वागतं चित्रकर्मणि वृत्तविशेषाः, तीर्थङ्करविशेषागतं च।
२. चित्रकर्मणि समीपे चन्द्रसूर्यविम्बादिचित्रलिखिताः।
३. अशोकतरुः, रोहिणीवृक्षः पक्षे अशोकरोहिणी यत्र चित्ररूपं।
,, अशोकवृक्षः, राजा च रोहिणीवृक्षः राज्ञी च।
४. प्रकटः कामो यत्र, पक्षे प्रद्युम्नस्वामी चित्रलिखितो यत्र।
५. रुद्रः।
६. चित्रसर्गः, पक्षे छत्रमुरजबन्धादिः।
७. चरणं भक्षणं करणं उत्फुल्लविजृम्भादिकं, चरणकरणे आगमविशेषौ।
८. चार्वाकमतं कामशास्त्रं वा।
९. पुरन्दर इत्यादिना चित्रलिखितां स्वप्नावलीं वर्णयति।
१०. वृषभः।

उन्मीलिताहिलोकापि सकलजनोपभोग्या, अहोमशालापि प्रत्यक्षहुतहुताशना, निःस्पृहोपभोग्यापि समणिनिचया, विहित-मर्त्यावतारापि प्रदर्शितदेवालया।

कण्ठीरवा (समीपवर्ती सिंहवाली) होती है। जो वैसी [1]रमोपशोभिता (चित्रलिखित लक्ष्मी से सुशोभित) है जैसे सुमेरु पर्वत की तटी[2] रमोपशोभिता (स्त्रियों से मण्डित) होती है। जो वैसी प्रलम्बितकुसुमशरा (चित्र-लिखित लटकी हुईं पुष्पमालाओं वाली) है जैसे स्रक्पण्यसंस्था (फूलमालाओं के बेंचने का स्थान) प्रलम्बित कुसुमशरा (लटकी हुई फूल-मालाओं से युक्त) होती है। जो वैसी सविधविधुब्रघ्नमण्डला (समीप में चित्र-लिखित चन्द्र व सूर्य मण्डलवाली) है जैसे सुमेरुपर्वत की तटी सविधविधुब्रघ्नमण्डला (समीपवर्ती चन्द्र व सूर्य मण्डलवाली) होती है। जो वैसी शकुलियुगल-अङ्किता (चित्र-लिखित मछलियों के जोड़ा वाली) है जैसे पाण्डुराजा की मुद्रिका (अँगूठी) शकुलियुगल-अङ्किता[3] (मत्स्य चिह्नवाली) होती है। जैसे प्रशस्त शकुन-सम्पत्ति (लक्ष्मी) जल-पूर्ण घट के दर्शन से मनोज्ञ होती है वैसे ही जो चित्र-लिखित जल-पूर्ण घट के दर्शन से मनोज्ञ है। जैसे श्री विष्णु की शरीर-सम्पत्ति [4]कमलाकर-सेविता (लक्ष्मी के करकमलों से सेवा की हुई) होती है वैसे जो कमलाकर-सेविता (चित्र-लिखित सरोवर वाली) है। जैसे समवसरणसभा प्रसाधित सिंहासना (सिंहासन से अलङ्कृत) होती है वैसे जो प्रसाधित सिंहासना (चित्र-लिखित सिंहासन से मण्डित) है[5]।

अब विरोधाभास अलङ्कार से शेष स्वप्नावली का निरूपण करते हैं—जो अजड़ाशय-अनुगता[6] (चतुर अभिप्रायवाली) होकर के भी जड़ निधिमती (मूर्खता की निधि) है। यहाँ पर विरोध प्रतीत होता है, क्योंकि जो चतुर अभिप्राय से युक्त होगी, वह मूर्खता की निधि कैसे हो सकती है? इसका समाधान यह है कि श्लेषालंकार में ड और ल एक समझे जाते हैं, अतः जो अजलाशय-अनुगता (तालावरूप नहीं) है और अपि (निश्चय से) जलनिधिमती (चित्र-लिखित समुद्र-युक्त) है। जो उन्मीलिताहिलोका[7] (प्रकट हुए सर्प-समूहवाली) होकर के भी सकलजनोपभोग्या (समस्तजनों द्वारा सेवन करने योग्य) है। यह भी विरुद्ध है, क्योंकि जहाँ पर साँपों का समूह प्रकट होगा वहाँ पर समस्त जन कैसे निवास कर सकते हैं? इसका परिहार यह है कि जो उन्मीलित अहिलोका (प्रकट हुए चित्र-लिखित नागेन्द्र-भवन वाली) है एवं जो निश्चय से समस्त मानवों द्वारा सेवन करने योग्य है। जो अहोमशाला (होमशाला न) होकर के भी प्रत्यक्षहुत[8] हुताशना (जहाँ पर प्रत्यक्ष में अग्नि में हवन किया गया है, ऐसी) है। यह भी विरुद्ध है, क्योंकि जो होमशाला नहीं है, वहाँ पर प्रत्यक्ष में अग्नि में हवन करना कैसे संभव हो सकता है? इसका समाधान यह है कि जो सहस्रकूट मन्दिर होने के कारण होमशाला नहीं है एवं निश्चय से जो प्रत्यक्ष हुतहुताशना (प्रत्यक्ष प्रतीत हुई चित्र-लिखित अग्नि-ज्वाला वाली) है। जो निःस्पृह-उपभोग्या (कामना-शून्य या सांसारिक बन्धन-मुक्त साधु-पुरुषों द्वारा सेवन करने योग्य) होकर के भी समणिनिचया[9] (रत्नराशियों से युक्त) है। यह भी विरुद्ध है, क्योंकि जो निःस्पृह साधुपुरुषों द्वारा सेवन योग्य होगी, वह रत्नराशि से युक्त कैसे हो सकती है? इसका समाधान यह है कि जो

---

१. रमा लक्ष्मीः स्त्री च। २. तटी—कटणी।
३. पाण्डुराज्ञः मुद्रिकायां मत्स्यचिह्नं भवति।
४. लक्ष्मीहस्त, पक्षे सरोवरं चित्रे लिखितं।
५. श्लेषोपमालंकारः।
६. दक्षाशयप्राप्ता। समुद्र।
७. प्रकटितनागालया। ८. दत्ता लिखिता अग्निज्वाला।
९. लिखितरत्नसमूहा—रत्नराशिः लिखिता।

यत्र चाभिषेकसलिलेषु कलुषता, मलयजेषु जडघर्षणम्, अक्षतेषु मुशलाभिघातः, स्रक्पुष्पेषु गुणविमुखता, चरुषु रससंकरः, प्रदीपेषु मलिनोद्गारः, धूपधूमेष्ववसानवैरस्यम्, फलस्तवकेषु पलाशोपरोधः, कुसुमाञ्जलिषु विनिपातः, स्तुतिषु परलोकप्रार्थनम्, जपेषु गूढमन्त्रप्रयोगः, प्रसंख्यानेषु वेहसक्षता, अगुरुदहनशालाजिरेषु मलीमसमुखत्वम्, मुनिषु धर्मगुणविजृम्भणम्,

---

निःस्पृहों (कामना-शून्य महापुरुषों) द्वारा सेवनीय है और निश्चय से जो समणिनिचया (चित्र-लिखित रत्न-राशि-युक्त) है और जो विहित-मर्त्य-अवतारा (मनुष्यों के आगमन वाली) होकर के भी प्रदर्शित देवालया (देवों का स्थान प्रदर्शित करनेवाली) है। यह भी विरुद्ध है, क्योंकि जो मनुष्यों का आगमन स्थान होगा वह देवों का स्थान कैसे हो सकता है ? इसका समाधान यह है कि जो विहितमर्त्यावतारा (मनुष्यों के आगमन वाली) है और निश्चय से जो प्रदर्शितदेवालया[1] (चित्र-लिखित स्वर्ग-विमान को प्रदर्शित करनेवाली) है[2]।'

जहाँ पर कलुषता[3] (कपूर-आदि की मिश्रता) अभिषेक संबंधी जलों में थी परन्तु मनुष्यों के हृदयों में कलुषता (राग) नहीं थी। जहाँ पर मलयागिर चन्दनों में जडघर्षण (श्लेष में ड और ल का अभेद है; अतः जल-घर्षण—जल में पीसना) था परन्तु मनुष्यों में जड-घर्षण (जड़ता--मूर्खता से कूटे जाने का कष्ट) नहीं था। जहाँपर मुशलाभिघात (मूसलों से कूटना) चाँवलों में था परन्तु मनुष्यों में मुशलाभिघात (अनैतिक प्रवृत्ति से मूसलों द्वारा दण्डित किया जाना) नहीं था। जहाँ पर पुष्पमाला के पुष्पों में गुणविमुखता (तन्तु-गुम्फिता) थी परन्तु मनुष्यों में गुण-विमुखता (ज्ञानादि गुणों से विमुखता--पराङ्मुखता) नहीं थी। जहाँ पर रससंकरता[4] (माधुर्य-आदि रसों की मिश्रता) चरुद्रव्यों (मोदकादि नैवेद्य पदार्थों) में थी परन्तु मनुष्यों के हृदयों में रससंकरता (राग) नहीं थी। जहाँ पर मलिनोद्गार[5] (कृष्ण कज्जल का वमन) दीपकों में था, परन्तु मनुष्यों के हृदयों में मलिनोद्गार (दोषों का उदय) नहीं था। जहाँ पर अवसान वैरस्य (अन्त में विरसता) धूप के धूमों में था परन्तु मानवों में अवसान वैरस्य (मृत्यु के अवसर पर पीड़ा) नहीं था अथवा अकाल मृत्यु का कष्ट नहीं था। जहाँपर [6]पलाशोपरोध (पलाशों—पल्लवों से सहित) फलों के गुच्छों में था। अर्थात्—जहाँपर फलों के गुच्छे कोमल पत्रों से मण्डित थे एवं जहाँपर मानवों में भी पलाशोपरोध (राक्षसों का निवारण) था। अर्थात्—जहाँ पर मनुष्यों में कोई भी मांसभक्षी नहीं था।

जहाँ पर विनिपात[7] (अवपात—नीचे भूमि पर गिरना) पुष्पाञ्जलियों में था परन्तु मनुष्यों में विनिपात (दैवत-व्यसन—कुभाग्योदय से उत्पन्न होनेवाला आकस्मिक कष्ट) नहीं था। जहाँ पर परलोक-प्रार्थन (स्वर्गलोक की इच्छा) स्तुतियों में था परन्तु मनुष्यों के हृदयों में परलोक-प्रार्थन (शत्रुता की भावना) नहीं था। जहाँ पर गूढ़मन्त्र[8]-प्रयोग (एकान्त में मन्त्रों का उच्चारण) जपों में था परन्तु मनुष्यों

---

१. स्वर्गविमाना।

२. विरोधाभासालंकारः—ह० लि० सटि० (ख) प्रति से संकलित—सम्पादक

३. कर्पूरादिमिश्रितत्वात् मिश्रता, न तु हृदयेषु रागः।

४. मिश्रता, न तु हृदयेषु रागः।

५. 'मलिनं कृष्णदोषयोर्मलिनो रजःस्वलायाम्'।

६. राक्षसनिवारणं, मांसभक्षी कश्चिन्नास्ति पक्षे पत्रसहिताः फलगुच्छाः वर्तन्ते। ह० लि० (ख) प्रति से संकलित—
,, 'पलाशो राक्षसः पल्लवश्च' यश०-पञ्जिका से—संकलित

७. विनिपातस्तु दैवतं व्यसनमवपातश्च।

८. गूढं रहः संवृतयोः देवादिसाधने वदांगे गुप्तवादे च।

प्रसूनोपहारेषु शिलीमुखसंपातः, पटहेषु कराहतिः, नमसितेषु पदबन्धः, रङ्गवल्लिषु परभागकल्पनम्, यतिचरित्रेषु विग्रहदण्डश्रुतिः, सोपानेषु विषमता, देहलीषु लङ्घनापराधः, सुपाठीषु करग्रहणम्, अररेषु द्विधाभावः, शास्त्रेषु परदूषणोपश्रवणम्, उपन्यासयोग्यासु विगृह्यवादः, पर्वक्रियासु वर्णसंकीर्णता, विनेयविनयनेषु भ्रुकुटिकरणम्, वातायनेषु बहुमार्गता, केतुकाण्डेषु स्वभावस्तब्धत्वम्, वैजयन्तीषु परप्रणेयता, मणिवितानेषु गुणनिगूहनम्, रजनिमुखेषु नलग्रहोपदेशः, शकुनावासेषु विलयविलसितम्, लिपिकरेषु वाञ्छनोपार्जनम् ।

में गूढ़मन्त्र प्रयोग[1] (गुप्तमन्त्रों से प्रयोग—उच्चाटन-आदि कर्म करना) नहीं था। जहाँ पर धर्मध्यानों में देह-सन्नता (शारीरिक कष्ट) थी परन्तु मनुष्यों में देहसन्नता[2] (शारीरिक पीड़ा) नहीं थी। जहाँ पर मलीमसमुखता (कृष्णता—मलिनता) अगर, अग्नि व गृहाङ्गणों में थी परन्तु मानवों के हृदयों में मलीमसमुखता (दुष्टता) नहीं थी। जहाँ पर धर्मगुण-विजृम्भण[3] (धर्म—प्राणिरक्षा-आदि व गुण-विजृम्भण—ज्ञानादि प्रशस्त गुणों का विस्तार) मुनियों में था परन्तु योद्धाओं में धर्मगुणविजृम्भण (धनुष पर डोरी का आरोपण) नहीं था। जहाँ पर शिलीमुखसंपात[4] (भौंरों का पतन) पुष्पोपहारों में था, परन्तु संग्राम में शिलीमुख-संपात (वाणों का प्रक्षेप) नहीं था। जहाँ पर कराहति (हस्तों से ताड़न) मृदङ्गों या नगाड़ों में थी, परन्तु मनुष्यों में कराहति (विशेष राज्य टेक्स से पीड़न) नहीं थी।

जहाँ पर पदबन्ध (श्लोकों के चरणों का गुम्फन) नमसितों[5] (नमस्कारों) में था परन्तु मनुष्यों में पदबन्ध (अन्याय करने से पैरों का बन्धन) नहीं था। जहाँ पर परभाग[6]कल्पन (शोभा करना) रङ्गवल्लियों (नाट्य-भूमियों या चित्र-रचनाओं) में था, परन्तु जहाँपर पर-भागकल्पन (शत्रुओं को धन की प्राप्ति या शत्रुओं का उदय) नहीं था। जहाँ पर विग्रहदण्डश्रुति (शारीरिक कष्ट-सहन की प्रतिज्ञा) मुनियों के चरित्र-पालन में थी परन्तु मानवों में विग्रहदण्डश्रुति (युद्ध और तीक्ष्ण दण्ड विधान का श्रवण) नहीं था। जहाँ पर विषमता (असमानता) सीढ़ियों में थी; परन्तु मनुष्यों में विषमता नहीं थी। जहाँ पर लङ्घनापराध (लाँघने का दोष) देहलियों में था परन्तु मनुष्यों में लङ्घनापराध (कड़ाका करने या तिरस्कार करने का दोष) नहीं था। जहाँ पर कर-ग्रहण (हाथों से उठाना व धरना) पुस्तकों में था परन्तु मनुष्यों में कर-ग्रहण (दान-ग्रहण) नहीं था। जहाँ पर द्विधाभाव (खोलना) अररों[7] (किवाड़ों) में था, परन्तु जनता में द्विधाभाव (वैमनस्य) नहीं था। जहाँ पर दूषणोपश्रवण (श्रुतिकटु व अश्लील-आदि काव्य दोषों) का श्रवण काव्य-शास्त्रों में था परन्तु मनुष्यों में परदूषणोपश्रवण (दूसरों की अपकीर्ति या अपवाद की प्रतिज्ञा) नहीं था। जहाँ पर विगृह्यवाद (समासपूर्वक कथन) उपन्यास-योग्या[8] में था। अर्थात्—नीतिशास्त्रों या वाक्यों का अभ्यास समास पूर्वक होता था परन्तु मनुष्यों में विगृह्यवाद—संग्रामवाद नहीं था। जहाँ पर वर्णसंकीर्णता[9] (स्तुतियों की मिश्रता) पर्वक्रियाओं (उत्सव-दिनों) में थी परन्तु मानवों में वर्णसंकरता नहीं थी। जहाँ पर भ्रुकुटि-करण (भौंहों का चढ़ाना) शिष्यों की शिक्षाओं में था परन्तु मनुष्यों में युद्ध-निमित्त भ्रुकुटि चढ़ाना

---

१. 'प्रयोगः कार्मणे पुंसि प्रयुक्तौ च निदर्शने' इति विश्वः। ,, 'गूढं रहसि गुप्ते च' इति विश्वः।
२. पीड़ा। २. न तु सुभटेषु।
३. धर्मः स्याद्स्त्रियां पुण्ये धर्मो न्यायस्वभावयोः। उपमायां यमाचारवेदान्तेऽपि धनुष्यपि ॥१॥ इति विश्वः।
गुणो रूपादिसत्त्वादिविवादिहरितादिषु। सूदेऽप्रधाने सन्ध्यादौ रज्जौ मौर्व्यां वृकोदरे इति विश्वः।
४. भ्रमर न तु संग्रामे वाणाः। ५. नमस्कारेषु।
६. शोभा, न तु परेषां शत्रूणां द्रव्यभागः। ,, परभागः शोभा, परोदयं च। ७. कपाटेषु।
८. योग्यार्कयोषिति, अभ्यासे अभ्यासविषये समासपूर्ववादः न तु संग्रामवादः ,, योग्या अभ्यासः।
९. 'वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु वाक्षरे' इत्यमरः।

यस्यास्च प्रतिदिवसं दिविजसभाजनैः पौरजनैरुपाहितानि भगवतः स्वकीयपादमुद्रितजगत्त्रयपतेर्जिनपतेर्मज्जनमङ्गलानि विम्बमानायाः सकृत्प्रकान्ताभिषेकमहोत्सवलज्जित इव आतखर्वतरभावः पुरो निवसति मन्दरः। अपि च।

आर्याभेदः—

यामेवं प्राबुष्यदनल्पसंकल्पनो विनेयजनः। [दृष्ट्वा] विदूरभावादुत्प्रेक्षापक्षतां नयति ॥५४॥

श्रीरेषा स्वर्गसिन्धोः किमु पवनबलोल्लोलकल्लोलवारेः स्वर्णच्छायाप्रतानस्तदनु विसरति व्योम्नि कोऽयं प्रकारः।
कुम्भद्योतावदाता दिशि दिशि च तताः कान्तयो भान्ति मन्ये स्थानेऽस्मिञ्जनसौधावलिरुपरिलसत्केतुसौवर्णकुम्भाः ॥५५॥

नहीं था। जहाँ पर बहुमार्गता (वायु-प्रवेश व उसके निस्सरण-हेतु अनेक मार्ग) वातायनों (खिड़कियों-आदि) में थी परन्तु वहाँ पर बहुमार्गता (अनेक मार्गशिर—अगहन मासों—की स्थिति) नहीं थी। जहाँ पर स्वभावस्तब्धत्व[1] (स्वाभाविक कठिनता) केतुकाण्डों (ध्वजादंडों) में था परन्तु मनुष्यों में स्वभावस्तब्धत्व (स्वाभाविक निर्दयता) नहीं था। जहाँ पर परप्रणेयता[2] (दूसरों के द्वारा ले जाना) वैजयन्तियों[3]—ध्वजाओं—में थी परन्तु वैजयन्ती—सेना—में प्रेरणता नहीं थी। जहाँ पर गुणनिगूहन[4] (तन्तुओं का प्रेरण) मणि-वितानों—चँदेवों—में था परन्तु वहाँ की जनता में गुणनिगूहन (दूसरों के ज्ञानादि गुणों का आच्छादन) नहीं था। जहाँ पर गलग्रहोपदेश[5] (गाय-वगैरह पशुओं का बन्धन) रजनीमुख (संध्या) में था परन्तु मनुष्यों में गलग्रहोपदेश—अप्रत्युपकार (कृतघ्नता अथवा आकस्मिक कष्ट) नहीं था।

जहाँ पर वि-लय विलसित[6] (पक्षियों के निवास का विलास) शकुनावासों[7] (घोंसलों) में था, परन्तु मनुष्यों में विलय-विलसित (विनाश का विस्तार-अपमृत्यु) नहीं था। जहाँ पर [8]अञ्जनोपार्जन (अञ्जन—स्याही द्वारा धनोपार्जन) लिपिकरों[9] (लेखकों) में था। परन्तु मनुष्यों में अञ्जनोपार्जन (कलङ्क का उपार्जन) नहीं था[10]।

जिस वसतिका के सामने, जो कि प्रत्येक दिन देवों-सरीखे नागरिक मनुष्यों से किये गए ऐसे भगवान् जिनेन्द्र के अभिषेक मङ्गल प्राप्त कर रही है, जो कि अपने चरण कमलों द्वारा तीनलोकके स्वामियों (इन्द्र-आदि) को अधःकृत करने वाले हैं, शोभा के लिए कृत्रिम सुमेरु पर्वत स्थित है। जो ऐसा मालूम पड़ता है—मानों—अभिषेक मेरु [देवों से] केवल एक वार किये हुए मनोज्ञ अभिषेक महोत्सव से लज्जित हुआ ही लघु हो गया है।❀

विशेषता यह है प्रचुर कल्पनाएँ प्रकट करने वाला शिष्यजन जिस वसतिका को दूर से देखकर उसे निम्न प्रकार कीं उत्प्रेक्षाओं के पक्ष में ले जाता है ॥ ५४ ॥

जो (वसतिका) ऐसी मालूम पड़ती थी—मानों—वायु की शक्ति से चञ्चल हुईं तरङ्गों के जलवाली स्वर्गगंगा की यह लक्ष्मी ही है। अथवा—मानों—कलश-सहित सुवर्ण की कान्ति का समूह ही है। अथवा—मानों—कोई यह प्राकार (कोट) ही आकाश में विस्तृत हो रहा है। अथवा उसकी प्रत्येक दिशा में विस्तृत

---

१. दंडेषु कठिनत्वं। २. प्रेरणता। ३. पताका वैजयन्ती स्यात्केतनं ध्वजमस्त्रियामित्यमरः।
४. गोपनं प्रेरणं आच्छादनं। ५. गवादीनां बन्धनं, न तु अप्रत्युपकारः।
६. वीनां लयः तस्य विलसितं पक्षे न पुनर्विनाशः। विलयो विनाशः पक्षिसंश्रयश्च।
„ लयस्तूर्यत्रयीसाम्ये संश्लेषणविनाशयोः। ७. शकुनः शकुनिश्च पक्षी।
८. अञ्जनेनार्थोपार्जनं, न तु कलङ्कः 'अञ्जनं मषी रसाञ्जने उक्तौ सौवीरे'।
९. लेखकेषु। १०. परिसंख्यालंकारः। ❀. उत्प्रेक्षालंकारः।

किं च । मेरुस्पर्द्धिविवृद्धधवन्ध्यशिखरोल्लेखस्खलज्ज्योतिषो यस्या व्यस्यदुपान्तभित्तिविलसद्रत्नासरालत्विषः ।
तुङ्गोत्सङ्गतसङ्गसङ्गविवशव्यापारसारादराः स्वर्गावासनिवासमानसरसाः संजज्ञिरे नामराः ॥५६॥

या च

किं पुण्यपुञ्जनिकरस्त्रिजगज्जनानां लोकेष्ववमात्किमु यशः प्रथितं जिनानाम् ।
इत्थं वितर्कवसतिर्वसतिर्विभाति विश्वंभराम्बरदिशां प्रविभक्तभावा ॥५७॥

ततो महामुनिजनाराधनविनीतवनदेवताविती‍र्णप्रसूनोपहारपरिसरत्परिमलोद्याने तदुद्याने यदा तेन त्रिजगतोस्तूयमानवृत्तेन भगवता सुदत्तेन सह तव विवादाविरोधस्य धर्मावबोधो भविष्यति, तदा भवतो भविष्यन्ति प्रेषणानवद्याः पुनरपीमा विद्याः, भविष्यति च भवान्नभश्चरप्रभुप्रभावः' इत्युक्त्वा तदनूचानचरणार्चनोपचितागण्यपुण्यतया समस्तमहाभागभुवनचक्रवर्ती स विद्याधरचक्रवर्ती जगामाभिलषितं विषयम् । अम्बरचरोऽप्याजगामोज्जयिनीम् ।

इतश्च तस्यामेवोरगपुरीस्पर्धिन्यामुज्जयिन्यामदूरदेशवर्तिनि भाविभवदुरितकन्दैरिवास्थिवृन्दैरुत्पाण्डुरितबाहिरिके, मूर्तिमद्भिः कर्मभिरिव चर्मभिः किर्मीरगोपानसीपर्यन्ते, पुरोजन्मदुःखानलज्वालाभिरिव बल्लूरमालाभिः पाटलोटज-

---

हुईं कान्तियाँ, जिनमें ऊपर शोभायमान होतीं हुई ध्वजाएँ व सुवर्णकलश वर्तमान हैं, ऐसी मालूम पड़ती थीं—मानों—इस स्थान पर दुग्ध कान्ति-सी शुभ्र जिन मन्दिरों की श्रेणी ही शोभायमान हो रही है[1] ॥ ५५ ॥

जिस वसतिका की, जिसकी सुमेरु के साथ स्पर्धा करने वाली वृद्धि में सफल हुईं (विशेष ऊँची) शिखरों की रगड़ से नक्षत्र मण्डल पतित हो रहे हैं और जो कि गिरते हुए समीपवर्ती भित्तियों के रत्नों की प्रचुर कान्तियों से शोभायमान हो रही है, ऊँची मध्यभागवाली उपरितन भूमि के सङ्गम से पराधीन व्यापार से उत्तम आदर वाले देवता लोग स्वर्ग भूमि पर निवास करने के अभिमान से सरस (रसिक—प्रमुदित) नहीं हुए ॥ ५६ ॥

१. अग्रजः वर्षीयान् दशमी ज्यायान्। २. सदाचारशत्रुः। ३. सपरिभवं। ४. कृत। ५. मद एव मषी तया। ६. प्रशस्तकपोल। ७. लेह्य स्वाद्यमान। ८. निद्रा। ९. विप्रः। १०. धन्वन्तरि इत्यवोचत्। ११. गृहीतं सत्। १२. उदर्कः फलमुत्तरं।

निमित्तम्' इति प्रस्तावायातमाचार्योदितमुपश्रुत्य, प्रणिपत्य च 'यद्येवं सूरेः तर्हि भगवन्, अयमपि जनोऽनुगृह्यतां कस्यापि व्रतस्य प्रदानेन' इत्यवोचत्। तदनु 'ततः सूरिः 'खल्वतिविलोकनात्स्वयाशितव्यम्'[2] इति व्रतेन कुलालालयलब्धनिधानः, पयःपूरावि[3]ष्टपिष्टशकटपरित्यागाद्विगतोरगोद्गीर्णगरलजनितमृत्युसंगतिरज्ञातनामानोकुहफलपरिहारेण व्यतिक्रान्त-किंपाकफलापादितापत्तिः[4], पुनरविचार्य किमपि कार्यं ना[5]चर्यमिति गृहीतव्रतजाति[6]रेकदा निशि नगरनायक-निलये[7] नटनृत्यनिरीक्षणात्कृतकालक्षेपक्षणः स्वावासमनुसृत्य शनैर्विघटितकपाटपुटसंधिबन्धः स्वकीयया सवित्र्या विहित[9]गाढावष्टम्भमात्मकलत्रं जातनिद्रातन्त्रमवलोक्योपपति[10]शङ्कया मुहुरुत्खातखड्गो भगवतोपपादितं व्रतमनु-सस्मार। [11]शुश्राव च दैवात्तदैव 'मातगस्त[12]मतः परतः सर, खरं[13] मे शरीरसंबाधः[14]', इति गृहिणीगिरम्। ततश्च 'यदीदं व्रतमहमद्य नाग्रहीषम्, तदेमां मातरमिदं च प्रियकलत्रमसंशयं विश[15]स्येह दुरपवादरजसामत्र च दुरन्तै-नसां भागी भवेयम्' इति जातनिर्वेदः सर्वमपि ज्ञातिलोकं यथायथं मनोरथोत्सेक[16]मवस्थाप्य 'यत्रैव देशे दुरपवादोपहतं चेतस्तत्रैव देशे समाश्रीयमाणमाचरणं न भवति निरपवादम्' इति प्रकाशितोपदेशस्य तस्य भगवतो[17] निदेशाद्दर्शितभूषण-

---

आचार्य से कहे हुए उपदेश को सुनकर आचार्य श्री को नमस्कार कर धन्वन्तरि ने कहा—'भगवन्! यदि यह बात सत्य है तो किसी व्रत-प्रदान से इस मानव का भी अनुग्रह कीजिए'।

आचार्य ने कहा—तुम प्रतिदिन गञ्जे (घुटे सिर) व्यक्ति का दर्शन करके भोजन किया करो।'

इस व्रत के ग्रहण से धन्वन्तरिको कुम्हार से निधि का लाभ हुआ (धन से भरा हुआ घट मिला) [फिर उसने आचार्य से आटे के बने हुए पशुओं के न खाने का नियम लिया] अतः उसने दुग्ध पूर से भरी हुई आटे के पशुओं वाली गाड़ी का त्याग किया; क्योंकि उस आटे के पशुओंमें जहरीला साँप जहर छोड़कर गया था, इससे वह मरण-संगम से बच गया। [फिर उसने आचार्य से अज्ञात नाम वाले वृक्ष के फल न खाने का नियम लिया] इससे 'अज्ञात नामवाले वृक्ष के फल नहीं खाना चाहिए' इस व्रत के ग्रहण से वह विषैले फल-भक्षण से उत्पन्न हुए मृत्यु-संकट से बच गया। पुनः इसने 'बिना विचारे कोई कार्य नहीं करना चाहिए' यह व्रत धारण किया।

एक समय रात्रि में राजमहल में नट-नृत्य-देखने में इसका काफी समय लग गया। जब यह अपने गृह जाकर बन्द किये हुए किवाड़ धीरे से खोलने को तत्पर हुआ तब इसने अपनी माता द्वारा किये हुए गाढा-लिङ्गन वाली सोती हुई अपनी स्त्री देखी तो इसे अचानक जार की शङ्का हुई। अतः इसने उसके घात के लिए खड्ग उठाया, उस समय इसे आचार्य द्वारा दिलाये हुए व्रत (बिना विचारे कोई कार्य नहीं करना चाहिये') का स्मरण हुआ। पश्चात् भाग्योदय से इसने निम्न प्रकार अपनी प्रियाके वाक्य श्रवण किये—'हे माता! यहाँ से जरा दूर हटो मुझे शारीरिक कष्ट हो रहा है, तब बाद में इसने विचार किया—कि 'यदि आज मैं यह व्रत ग्रहण नहीं करता तो अपनी माता और अपनी प्यारी स्त्री को निस्सन्देह मार डालता, जिससे मैं इस लोकमें अपकीर्ति रूप धूलियों का पात्र और परलोक में दुःख देनेवाले पापोंका भागी हो जाता।' इस प्रकार उसकी आत्मा में वैराग्य उत्पन्न हो गया। बाद में उसने समस्त कुटुम्बीजनों के यथोचित मनोरथ पूर्ण किए। [पश्चात् उसने जिन दीक्षा लेनेका विचार किया तब आचार्यश्री ने कहा—'जिस देश में मानव-चित्त

---

१. खल्वाटदर्शनात्। २. भोक्तव्यं। ३. भात लापसी। ४. मरणं। ५. न कर्तव्यं। ६. सन्। ७. राजगृहे। ८. मात्रा। ९. कृतगाढावलिङ्गनं। १०. जार। ११. श्रुतवान् कां गृहिणीगिरं वाणीं। १२. हे अम्ब हे मातः। १३-१४. परतः सर यतो मे खरं कठिनं शरीरसंबाध इति। १५. मारयित्वा। १६. प्रकर्षं। १७. श्रीधर्माचार्यस्य।

भूधरोपकण्ठे तपस्यतः कान्तारदेवताविहितसपर्या[1]द्धुरधर्माचार्यात्सुरसुन्दरीकटाक्षविपक्षां दीक्षामादाय विदितवेदितव्यसंप्र[2]-दायः समम्बरे [3]तपत्यम्बरमणौ [4]सम्बरतम्बरितोपान्तपलाशिमालायामेतदचलमेखलायामातापनयोगस्थितोऽनवरतप्रवर्ध-मानाध्यात्मध्यानावष्टम्भबोध्यनिरतः 'किमयं [5]पर्वतोत्कीर्णः, किं वास्मादेव पर्वतान्निरूढः[6]' इति वितर्कास्पदो बभूव।

संजातसुहृत्समालोकनकामो विश्वानुलोमोऽपि तत्परिजनात्परिज्ञाततत्प्रव्रजनव्यतिकरः 'मित्र[7]धेयस्य धन्वन्तरे-र्या गतिः सा ममापि' इति प्रतिज्ञाप्रवरस्तत्रा[8]गत्य जैनजनसमयस्थितिमनवबुध्यमानः 'हंहो मनोरहस्य वयस्य चिरान्मि-लितोऽसि। किमिति न मे गाढाङ्क[9]पालीं ददासि, किमिति न कामम्[10]आलपसि, किमिति न सादरं वार्तामापृच्छसे[11]', इत्यादि बहुशः सप्रश्रयमाभाष्य निजनियमानुष्ठाने[12]कतानमनसि निरागसि धन्वन्तरियतीश्वरे प्रकुप्य सवि[13]धाशिवतातिः प्रादुर्भवदप्रीतिर्भूतरमणीयपर्वतसमीपसमुत्पादितोट[14]जस्य सहस्रजटिनो निकटे शतजटोऽजनिष्ट। धन्वन्तरिरप्या-तापनयोगान्ते तस्य संबोधनाय समन्ते[15] समुपसृत्य 'मत्प्रणयपात्रविश्रामाराम विश्वानुलोम, जिनधर्मस्थितिमनवबुध्यमानः किमित्यकाण्डे पक्षान्तरमादाय दुराचारप्रवणः समभूः। तदेहि[16]। विहा[17]येमं दुःपथकदाग्रहं [18]समयावसथ-

नीति विरुद्ध आचरण करने से निन्द्य या अपकीर्ति से नष्ट प्राय हो जाता है (वदनाम हो जाता है) फिर उसी देश में धारण किया हुआ आचरण निरपवाद नहीं रहता (निन्दित ही बना रहता है)'—

अतः उक्त उपदेश देनेवाले आचार्य श्री की आज्ञा से उसने 'धरणिभूषण' नामके पर्वत-समीप में तपश्चर्या करने वाले और वन देवता द्वारा की हुई पूजा वाले श्रेष्ठ धर्माचार्य से देवियों के कटाक्षों की प्रतिकूल (मुक्तिश्रीदेनेवाली) जैनेश्वरी दीक्षा धारण कर ली। पश्चात् आम्नाय की जानने योग्य सब बातों को जानकर धन्वन्तरि मुनि जब आकाश में मध्याह्न सूर्य सन्तप्त हो रहा था तब आकाश तट व्यापि वृक्ष श्रेणी वाली इस पहाड़ को मेखला पर आतपन योग (ध्यान) में स्थित हुए एवं निरन्तर वृद्धिगत अध्यात्म ध्यान (धर्म व शुक्लध्यान) के प्रभाव से सकल जानने योग्य सूक्ष्म तत्वों में लवलीन हुए, ऐसे निश्चल मालूम पड़ते थे—मानों—क्या ये पर्वत्-शिखर पर उकीरे गये हैं ?

अथवा मानों—इसी पर्वत से निकले हुए हैं ? [इधर] अपने मित्र के दर्शन की इच्छावाले विश्वानु-लोम ने भी, [उसके गृह जाकर] उसके कुटुम्बियों से अपने मित्र के दीक्षा लेने के समाचार जाने। पश्चात् उसने ऐसी दृढ़ प्रतिज्ञा की 'मेरे मित्र धन्वन्तरि को जो दशा हुई है, वह मेरी भी हो'। फिर वह धन्वन्तरि के पास आया और जैन साधुओं की आचार-मर्यादा को न जानता हुआ कहने लगा—हे मानसिक अभिप्राय के ज्ञाता मित्र ! बहुत दिनों के बाद मिले हो। अतः मेरे लिए गाढ़ालिंगन क्यों नहीं देते ? और मुझसे विशेष बात-चीत क्यों नहीं करते ? एवं क्यों मुझसे आदरपूर्वक कुशल-समाचार नहीं पूछते ?' इत्यादि अनेक बार विनय-पूर्वक कहने पर भी [जब धन्वन्तरि मुनि ने कुछ जबाब नहीं दिया] तब वह अपने नियमानुष्ठान (आत्मध्यान) में एकाग्रचित्त व निर्दोषी धन्वन्तरि मुनीश्वर से विशेष रुष्ट होकर समीपवर्ती अकल्याण परम्परावाला और धन्वन्तरि यतीश्वरसे द्वेष करने वाला वह 'भूतरमणीय' पर्वत के समीप अपनी कुटी बनाने वाले 'सहस्रजट' नामके जटाधारी सन्यासी के निकट 'शतजट' नामका जटाधारी सन्यासी हो गया।

आतपन योग के समाप्त होने पर 'धन्वन्तरि' मुनि भी उसके समीप समझाने गये। और उन्होंने कहा

१. पूजा। २. आम्नायः उपदेशपरम्परः। ३. 'सतम्बरस्तम्बाडम्बरित' क० च०। ४. आकाशतटव्यापिवृक्षश्रेणि। ५. पर्वतस्य कोटी। ६. निरूढः निर्गतः। ७. मित्रस्यैव। ८. धन्वन्तरि-समीपे। ९. आलिङ्गनं। १०. अतिशयेन। ११. कुशलं। १२. एकाग्रं। १३. समीप-अकल्याणं। १४. उटजं तृणगृहं, तृणगृहस्य पर्णशालोटजोऽस्त्रियां। १५. समीपे। १६. आगच्छ। १७. त्यक्त्वा। १८. समयः आश्रमः।

मनोरथं सहैव तपस्यावः' इति बहुशः कृतप्रयत्नप्रकाशोऽपि दुःशिक्षावशात् [1] मोतु [2] पोतवत्भीतपतङ्गपाक [3] मिव मुषामौनमूकतो [4] त्तरङ्गितविसोत्सेकं [5] तितउपात्र [6] इव तन्म [7] नोऽमत्रेऽप्राप्तसदुपदेशपयोवस्थानः प्रतिबोधयितुम-शक्नुवन्गुरुपादमूलमनुशील्य कालेन प्रवचनोचितं चर [8] माचरणाधिकृतं विधिं विधाय विबुधाङ्गनाजनोच्चार्यमाणमङ्गल-परम्परानल्पेऽच्युतकल्पे समस्तसुरसमाजस्तूयमानमहातपः परा [9] यणप्रतिभोऽमितप्रभो नाम देवोऽभवत् ।

विश्वानुलोमोऽपि पुरोपार्जितपुण्यवशाज्जीवितावसाने विपद्योत्पद्य च व्यन्तरेषु गजानीकमध्ये विजयनाम-धेयस्य देवस्य विद्युतप्रभाख्यया वाहनो बभूव । पुनरेकदा पुरंदरपुरःसरेण दिविजवृन्देन सह नन्दीश्वरद्वीपासत्रचैत्या-लयाश्रयामष्टाह्निपर्वक्रियां निर्वर्त्यागच्छन्नसावमितप्रभो देवस्तं विद्युतप्रभमभिवीक्ष्याह्लादमानमानसः प्रयुक्तावधिमव-बुद्धपूर्ववृत्तान्तः 'विद्युतप्रभ, किं स्मरसि जन्मान्तरोदन्तम्' इत्यभाषत । विद्युतप्रभः 'अमितप्रभ, बाढं स्मरामि । किं तु सकलत्रचारित्राधिष्ठानादनुष्ठानान्ममैवंविधः कर्मविपाका [10] नुरोधः । तव तु ब्रह्मचर्यवशात्कायक्लेशादीदृशः । ये च मदीये समये [11] जमदग्नि-मतङ्ग-पिङ्गल-कपिञ्जलादयो महर्षयस्ते तपोविशेषादिहागत्य भवतोऽप्यभ्यधिका भविष्यन्ति । ततो न विस्मेतव्यम्' । अमितप्रभः—विद्युत्प्रभ, संप्रत्यपि न मुञ्चसि दुराग्रहम् । तदेहि । तव मम च लोकस्य परीक्षा-

---

'मेरे प्रेमरूपी पथिक के विश्राम के लिये उद्यान-सरीखे हे विश्वानुलोम ! जैन धर्म की मर्यादा को न जानकर असमय में कुपित होकर क्यों कुमार्गगामी हो गये हो ? इससे आइये और कुमार्ग की कथा वाले इस ताप-साश्रम में निवास करने का मनोरथ छोड़कर साथ ही तपश्चर्या करेंगे।' इस प्रकार धन्वन्तरि ने बार-बार विश्वानुलोम को समझाने का प्रयत्न किया, परन्तु वह ऐसे विश्वानुलोम को, कुशिक्षा के कारण जिसके चित्त का प्रकर्ष झूठे मौन से हुई मूकता से विशेष कल्लोलित हुआ है, जैसे विलाव के बच्चे के शब्द से डरा हुआ पक्षि-शावक झूठा मौन धारण करता है। सन्मार्ग पर लाने में असमर्थ हुए, क्योंकि ये चलनी जैसे उसके मनरूपी पात्र में अपना सदुपदेशरूपी दूध स्थापित न कर सके। तब धन्वन्तरि गुरु के पादमूल में प्राप्त हुये और समय आने पर आगमानुसार विधिपूर्वक सन्यास मरण करके देवियों द्वारा उच्चारण की जाने वाली मंगल परम्परा से श्रेष्ठ 'अच्युत' नामके सोलहवें स्वर्ग में, ऐसे 'अमितप्रभ' नामके देव हुये, जिनकी महान् तप में तत्पर प्रतिभा समस्त देव समूह द्वारा स्तुति की जानेवाली है।

'विश्वानुलोम' भी आयुष्य के अन्त में मरकर पूर्वमें संचय किये हुए पुण्य से विजय नामक व्यन्तर की गजसेना में 'विद्युतप्रभ' नामका वाहन जाति का देव हुआ। पुनः [एक बार] जब अष्टाह्निका पर्वमें 'अमित-प्रभ' देव, इन्द्रकी प्रधानता वाले देव-समूह के साथ 'नन्दीश्वर' द्वीप से वहाँ के चैत्यालयों की अष्टाह्निका पर्व संबंधी पूजा करके वापिस आ रहा था, तब अपने पूर्वजन्म के मित्र 'विद्युतप्रभ' नामके वाहन को देखकर प्रसन्नचित्त हुआ और अवधिज्ञान से पूर्व जन्म का वृत्तान्त जानकर कहा—'विद्युतप्रभ ! क्या पूर्वभव का वृत्तान्त याद है ?'

'विद्युतप्रभ' ने कहा—'अमितप्रभ ! हाँ, खूब याद है। किन्तु पूर्वजन्म में सपत्नीक चारित्र के पालन से मेरा कर्मोदय का आक्षेप ऐसा हुआ और ब्रह्मचर्य के कारण कायक्लेश उठाने से तेरा कर्मोदय का आग्रह ऐसा हुआ। और जो मेरे शासन में 'जमदग्नि-मतङ्ग-पिङ्गल व कपिञ्जल-आदि महर्षि हुए हैं, वे विशेष तपश्चर्या के प्रभावसे यहाँ आकर आपसे भी बड़े देव होंगे; अतः आपको आश्चर्य नहीं करना चाहिए।'

---

१. विश्वानुलोमं। २. ओतुः पार्जारः। ३. डिम्भं। ४. कल्लोलित। ५. प्रकर्षं। ६. तितउः चालनिः चालनिः तितउः पुमान्। ७. अमत्रं पात्रं चित्तभाजने। ८. सन्यास। ९. तत्परः। १०. आग्रहः आक्षेपः। ११. मम शासने।

वहे चित्तम्' इति विहितविवादौ तौ द्वावपि देवौ करहाटदेशस्य पश्चिमदिग्भागमाश्रित्य काश्यपीतलमवतेरतुः ।

तत्र च वनेचरसैन्यसौजन्याशून्ये [1]तन्निकटदण्डकारण्यवने [2]समित्कुश[3]कुशाशय[4]प्रकामे[5] बदरिकाश्रमे[6] बहुलकालकृतकृच्छ्रतपसं चन्द्रचण्ड[7]मरीचिदविपानपरायणमनसमूर्ध्वबाहुमेकपादावस्थानाग्रहराहुमनल्पोल्लसत्पल्लवाविरल-वल्लीगुल्मवल्मीकावरुद्धवपुषमतिप्रवृद्धवृद्धतासुधाधवलितशिरःश्मश्रुजटाजालत्विषमृषेः कश्यपस्य शिष्यं जमदग्निमवलोक्य पत्र[8]रथमिथुनकथोचिताश्लेषं वेषं विरचय्य तत्कूर्चकुला[9]यकुटीरकोटरे निविष्टौ 'कान्ते, काञ्चनाचलमूलमेखलायामशेषशकुन्तचक्रचक्रवर्तिनो वैनतेयस्य वात[10]राजसुतया मदनकन्दलीनामधेयया सह महान्विवाहोत्सवो वर्तते । तत्र मयावश्यं गन्तव्यम् । त्वं तु सखि, समासन्नप्रसवसमया सती सह न शक्यसे नेतुम्[11] । अहं पुनस्तद्विवाहोत्सवानन्तरमकालक्षेपमागमिष्यामि । यथा चाहं तत्र चिरं नावस्थास्ये तथा मातुः पितुश्चोपरि महान्तः शपथाः । किं च बहुनोक्तेन । यद्यहमन्यथा वदामि तदास्य पापकर्मणस्तपस्विनो दुरितभागी स्याम्[12]' इत्यालापं चक्रतुः । तं च जमदग्निः

तब 'अमितप्रभ' ने कहा—'विद्युतप्रभ ! अब भी तुम अपना दुराग्रह नहीं छोड़ते हो तो आओ हम दोनों अपने-अपने धर्मात्मा-लोक के चित्त की परीक्षा करें ।' ऐसा पारस्परिक विवाद करने वाले वे दोनों देव 'करहाट' देश को पश्चिम दिशा में प्राप्त होकर इस पृथिवी तल पर अवतीर्ण हुए ।

वहाँ पर उन्होंने भीलों को सेना के युद्ध से सहित और उक्त देश की पश्चिम दिशा के निकटवर्ती 'दण्डकारण्य' नामके वन में स्थित हुए एवं ईंधन, दर्भ व जलाशय की प्रचुरता वाले 'वदरिकाश्रम' में बहुत काल से कठोर तपश्चर्या करने वाले ऐसे 'जमदग्नि' नाम के तपस्वी को देखा, जो कि 'कश्यप' ऋषि के शिष्य थे। जिसका मन चन्द्र व सूर्य की किरणों के पान करने में तत्पर था। जिसकी दोनों भुजाएँ ऊपर उठी हुईं थीं। जो एक पाद (पैर व पक्षान्तर में किरण) से खड़े होने के आग्रह में वैसे थे जैसे राहु चन्द्र-सूर्य को एकपाद (किरण या चतुर्थांश)-युक्त करने के आग्रह वाला होता है। जिसका शरीर बहुत से शोभायमान पल्लवों, घनी लताओं, बहुतलम्बी वेलों एवं वामियों से आच्छादित (ढका हुआ) था और जिसके शिर व दाढ़ी के जटा-समूह की कान्ति विशेष बढ़ी हुई वृद्धावस्था रूपी सुधा (चूने) से शुभ्र होगई थी ।

इसके पश्चात् उन दोनों देवों ने [विक्रिया से] पक्षियों के जोड़े के वृत्तान्त-योग्य संबंधवाला वेष (रूप) धारण किया और उस तपस्वी की दाढ़ीरूपी घोंसले की झोपड़ी की कोटर में घुस गए ।

एक दिन पक्षी ने अपनी प्रिया से कहा—'प्रिये ! सुमेरु पर्वत की मूलमेखला में समस्त पक्षि-समूह के चक्रवर्ती गरुड़राज का 'मदनकन्दली' नाम की वातराज (पक्षी-विशेष) की पुत्री के साथ महान् विवाहोत्सव हो रहा है, उसमें मुझे अवश्य जाना है। प्रिये ! तुम्हारा प्रसवकाल नजदीक है, अतः तुम्हें ऐसे समय में साथ ले जाना शक्य नहीं है। उक्त विवाहोत्सव के वाद मैं शीघ्र लौट आऊँगा। वहाँ पर मैं बहुत समय तक नहीं ठहरूँगा, यदि ठहरूँ तो मैं अपने माँ-बाप की शपथ करता हूँ। अधिक क्या कहूँ, यदि मैं झूठ बोलूँ तो इस पापी तपस्वी के पाप का भागी होऊँगा।' इस प्रकार उन दोनों पक्षियों ने परस्पर वार्तालाप किया।

---

१. पश्चिमभाग। २. इंधन। ३. दर्भ। ४. कुशाशयः जलाशयः। ५. 'समित्कुजकुश' (क०)। ६. बोरवृक्ष-स्थाने। ७. सूर्य। ८. पत्ररथः पक्षी, पक्षिचटकः। ९. मालक। १०. वातराजः पक्षिविशेषः महर्द्धिकः। ११. मया। १२. अहं भवामि।

कर्णकटुमालापमाकर्ण्य प्रवृद्धक्रोधः कराभ्यां तत्कदर्थनार्थं कूर्चं मलितवान् । अमरचरौ विकिरा[1]वप्युड्डीय तदग्रविटपिनि संनिविश्य पुनरपि तं तापसमलो[2]हलालापौ निकाममुपजहसतुः । तापसः साध्वस[3]विस्मयोपसृतमानसः 'नैतौ खलु पक्षिणौ भवतः । किं तु रूपान्तरावुमामहेश्वराविव कौचिद्देवविशेषौ । तदुपगम्य प्रणम्य च पृच्छामि तावदात्मनः पापकर्मत्वकारणम् । अहो मत्पूर्वपुण्यसंपादितावलोकन दिव्यद्विजो[4]त्तमान्वयसंभवसदनपतङ्गमिथुन, कथयतां भवन्तौ कथमहं पापकर्मा' इति । पतत्त्रिणौ 'तपस्विन्, आकर्णय ।

अपुत्रस्य गतिर्नास्ति स्वर्गो नैव च नैव च । तस्मात्पुत्रमुखं दृष्ट्वा पश्चाद्भवति भिक्षुकः ॥ १५५ ॥

तथा—अधीत्य विधिवद्वेदान्पुत्रांश्चोत्पाद्य युक्तितः । इष्ट्वा यज्ञैर्यथाकालं ततः प्रव्रजितो भवेत् ॥ १५६ ॥

इति स्मृतिकारकीर्तितमप्रमाणीकृत्य तपस्यसि' इति । 'कथं तर्हि मे शुभाः परलोकाः' । 'परिणयनकारणादौरसपुत्रोत्पादनेन' । 'किमत्र दुष्करम्' इत्यभिधाय मातुलस्य विजयामहादेवीपतेरिन्द्रपुरैश्वर्यभाजः काशिराजस्य भूभुजो भवनभाग्भूत्वा तद्दुहितरं रेणुकां परिणीयाविरलकलापो[5]लुपाल[6]कृतपुलिनासराले मन्दाकिनीकूले महदाश्रमपदं संपाद्य परशुरामपिताभूत् ।

भवति चात्र श्लोकः—

उनके इस कर्ण-कटु वार्तालाप को सुनकर जमदग्नि तपस्वी का क्रोध भड़क उठा; अतः उसने पक्षियों को पीडित करने के लिए दोनों हाथों से अपनी दाढ़ी मसली, तब दोनों भूतपूर्व देवता पक्षी भी उड़कर उसके आगे वर्तमान वृक्ष पर जा बैठे और पुनः स्पष्ट वचन बोलते हुए उस ऋषि की विशेष हँसी-मजाक उड़ाने लगे । [यह देखकर] तापसी का मन भयभीत व आश्चर्यान्वित हुआ, अतः उसने विचार किया—'निस्सन्देह ये दोनों पक्षी नहीं हैं किन्तु दूसरा वेष धारण किये हुए पार्वती व शिव-सरीखे कोई देवता हैं, अतः इनके पास जाकर व प्रणाम करके अपने पापी होने का कारण पूँछूं ।'

[यह सोचकर उसने उनके पास जाकर कहा—] 'मेरे पुण्योदय से प्राप्त हुए दर्शन वाले और दिव्य व उत्तम पक्षियों के वंशरूपी उत्पत्तिगृह वाले हे पक्षियुगल ! कहिए कि मैं कैसे पापी हूँ ?'

पक्षि-युगल—'तपस्वी ! सुनो— स्मृतिकारों ने कहा है—'कि पुत्र-रहित मनुष्य की सद्गति नहीं होती और न वह स्वर्ग प्राप्त करता है, इसलिए पुत्र का मुख देखकर पश्चात् भिक्षुक होना चाहिए । विधिपूर्वक वेदों का अध्ययन करके और युक्ति पूर्वक पुत्रों को उत्पन्न करके और यथाकाल यज्ञ संबंधी क्रिया-काण्ड द्वारा पूजा करके पश्चात् तपस्वी होना चाहिए ।। १५५–१५६ ॥

किन्तु तुम स्मृतिकार के उक्त कथन को प्रमाण न मानकर तप करते हो ।'

'तो मेरे परलोक कैसे शुभ हो सकते हैं ?'

'विवाह करके औरस पुत्र के उत्पन्न करने से ?'

'यह क्या कठिन है'—ऐसा कहकर जमदग्नि तपस्वी ने विजया नाम की महादेवी के पति स्वर्ग-सरीखे ऐश्वर्य का सेवन करनेवाले अपने मामा काशीराज नाम के राजा के महलों में जाकर उनकी रेणुका नाम की दुहिता के साथ विवाह संबंध कर लिया और घने पत्र व तृणविशेषों से अलंकृत और बालुकामय प्रदेश से व्याप्त गङ्गा नदी के तट पर वर्तमान महान् आश्रम-स्थान प्राप्त करके परशुराम के पिता हो गए ।

इस विषय में एक श्लोक है उसका अर्थ यह है—

---

१. पक्षिणौ । २. अलोहलः व्यक्तः स्फुटवचनौ । ३. भय । ४. पक्षि । ५. कलापाः पत्राणि । ६. उलुपस्तृणविशेषः ।

अन्तस्तत्त्वविहीनस्य वृथा व्रतसमुद्यमः । पुंसः स्वभावभीरोः स्यान्न शौर्यायायुधग्रहः ॥ १५७ ॥'

इत्युपासकाध्ययने जमदग्नितपःप्रत्यवसादनो नाम पञ्चमः कल्पः । पुनस्तौ त्रिदशौ मगधदेशेषु कुशाग्र[1]नगरोपान्तापातिनि पितृवने कृष्णचतुर्दशीनिशि निशाप्रतिमाशयवशमेकाकिनं जिनदत्तनामानमुपासकमवलोक्य साक्षेपम्[2] 'अरे दुराचाराचरणमते निराकृते[3] अविदितपरमसत्त्व मनुष्या[4]पसद, शीघ्रमिमामूर्ध्वशो[5]षं शुष्क[6]स्थाणुसमां प्रतिमां[7] परित्यज्य पलायस्व । न श्रेयस्करं खलु तवात्रावसरं पश्यावः । यस्मादावां ह्येतस्याः परेतपुरभूयस्या[8] भूमेः पिशाचपरमेश्वरौ । तदलमत्र कालव्यालावलोकनकरप्रस्थानेन[9] । मा[10] हि कार्षीरन्तरायोत्क[11]र्षीभावमतुच्छस्वच्छन्दकेलिकुतूहलबहलान्तःकरणप्रसवयोरावयोः' इत्युक्तमपि प्रकामप्रणि[12]धानोद्युक्तमवेक्ष्य न्यक्षतः[13] कीना[14]शकास[15]रनिकायकायाकारघोरघन-

---

जैसे स्वभाव से भयभीत मानव का शस्त्र-धारण शूरता के लिए नहीं होता (व्यर्थ होता है) वैसे ही आत्मज्ञान से शून्य (रहित) मानव का व्रत (अहिंसा-आदि)-पालन का परिश्रम भी व्यर्थ होता है ॥ १५७ ॥

इस प्रकार उपासकाध्ययन में जमदग्नि तपस्वी को तपश्चर्या से पतन करनेवाला पञ्चम कल्प पूर्ण हुआ।

इसके पश्चात् उन दोनों देवों ने मगध देश के राजगृह नगर को निकटवर्ती श्मशान भूमि पर कृष्ण-पक्ष की चतुर्दशी की रात्रि में रात्रि संबंधी प्रतिमायोग (धर्मध्यान)-धारण के अभिप्राय के अधीन हुए व अकेले 'जिनदत्त' नाम के श्रावक को देखा और उससे निम्न प्रकार तिरस्कारपूर्वक कहा—'अरे दुराचार करने की बुद्धिवाले ! विरूप, मोक्षपद को न जाननेवाले, निन्द्यपुरुष ! ऊपर खड़े होकर शरीर सुखाकर सूखे ठूँठ सरीखे इस कायोत्सर्ग को छोड़कर शीघ्र भाग जा । हम लोग निश्चय से तेरा यहाँ ठहरना कल्याणकारक नहीं देखते । क्योंकि पिशाचों के स्वामी हम दोनों इस विशाल श्मशान भूमि के स्वामी हैं। इसलिए यहाँ ठहरने से तुम्हें कालरूपी सर्प से डँसे जाने के सिवाय कोई लाभ नहीं हो सकता । क्योंकि हम दोनों के अन्तः-करण में श्रेष्ठ व स्वच्छन्द क्रीड़ा करने का विशेष कौतूहल उत्पन्न हो रहा है, इसमें विशेष विघ्न बाधा मत डालो ।

ऐसा कहने पर भी उसे आत्मध्यान में विशेष तल्लीन देखकर वे दोनों देव समस्त रात्रि तक ऐसे विघ्नों की सृष्टि (रचना) से, उसे आत्मध्यान से विचलित (डिगाने) करने में तत्पर हुए, जो कि यम के वाहन महिष-समूह के शरीर की आकृतिवाले (काले काले) भयानक मेघों की गर्जना-ध्वनि को शुरु में प्रारम्भ करनेवाले थे । जो प्रचण्ड बिजलीदण्ड के संघट्टन से बहुत ऊँची जाने वाली गड़गड़ाहट के शब्द-समूह से सहन करने के लिए अशक्य थे । जो सीमातीत (वेमर्याद) प्रचण्ड वायु के सूत्कार-सार (झकोरों के शब्द) के विस्तार से महाशक्तिशाली थे । जो अत्यन्त भयानक वेताल-समूह के उत्पाती कोलाहल के अनुकूल थे एवं जो अन्य साधारण मनुष्यों से करने के लिए अशक्य थे तथा जिनमें उसके मकानात जलाना और बन्धुजनों के और धन के नाश का संबंध वर्तमान था। इसी प्रकार विशेष आदर-सहित मनचाही वस्तु के देने से वे दोनों देव समस्त रात्रि पर्यन्त उसके आत्मध्यान को रोकने के अधीन हुए ।

---

१. राजगृह । २. तिरस्कृतं । ३. निकृष्टा आकृतिर्यस्य, व्रात्यः संस्कारहीनः स्यादस्वाध्यायो निराकृतिः । ४. निन्द्यः पङ्क्ति-रहितः । ५. ऊर्ध्वशोषं 'ऊर्ध्वे शुषिपूरोः' ऊर्ध्वे कर्तृवाचिन्युपपदे शुषेः पूरेश्च णम् ऊर्ध्वशोषं । ६. शुष्कः स चासौ स्थाणुः तत्समां ७. कायोत्सर्गं । ८. महत्याः । ९. स्थितिकरणेन । १०. आवयोर्मा कार्षीः । ११. ऊर्ध्वः सन् । १२. ध्यानस्थं । १३. सर्वतः । १४. यम । १५. महिषः ।

घस्मराडम्बरप्रथमप्रा[१]रम्भनिवहैः* प्रचण्डतडिद्दण्डसंघट्टोच्छलच्छम्बसंदोहदुःसहैः निःसीमसमीरासरालसूत्कारसारप्रसरप्रबलैः करालवेतालकुलकाहलकोलाहलानुकूलैरनन्यसामान्यैरन्यैश्च परिगृहीतगृहदाहवान्धवधनविध्वंसानुबन्धैः प्र[२]त्यूहप्रबन्धैः सबहुमानैस्तत्तद्वरप्रदानैश्च निःशेषामप्युषाम[३]ध्यात्मसमाधिनिरोधनि[४]घ्नौ विहितबहुविघ्नावपि तमेकाग्रभावाभ्यासात्मसात्कृतान्तःकरणबहिष्करणेहितं शर्महर्म्यनिर्माणकार्मणपरमाणुप्रवर्धनाद्धर्मध्यानाच्चालयितुं न शेकतुः[५]। संजाते च खरकिरणविरो[६]कनिकरनिराकृतान्धकारोदये प्रभातसमये समुपहृतोपसर्गवर्गौ प्रकामप्रसन्नसर्गौ[७] तैस्तैर्महाभागोचितैः प्रणयोचितैराश्लाघ्य तस्मै जिनदत्ताय विहायोविहाराय पञ्चत्रिंशद्वर्णानवद्यां विद्यां वितेरतुः[८]। इयं हि विद्या तवास्मदनुग्रहादम्बरविहारायासंसाधितापि भविष्यति परेषां त्वस्माद्विधेरिति। जिनदत्तोऽपि कुलशैलशिखण्डमण्डनजिनायतनालोकनकुतूहलिताशयः समाचरितामरा[९]नुवर्तनसमयस्तां विद्यां प्रतिपद्य हृदयदर्शनोत्सवसमानीतनिखि[१०]लनिलिम्पाचल[११]चैत्यालयस्तदवलोकनकृतकौतुकाय धरसेनाय परमाप्तोपासनपटवे पुण्यवटवे[१२]प्रादात्।

पुनरप्यमित 'विद्युतप्रभ, जिनदत्तोऽयमतीवाऽऽर्हतः*अभिमतवस्तुपरिणतचित्तः स्वभावादेव च स्थिरमतिरशेषोपसर्गसहनप्रकृतिश्च। तदत्र महदप्यपकृतं कुलिशे[१३]घुणकीटचेष्टितमिव न भवति समर्थम्। अतोऽन्यमेव कञ्चनाभि-

उक्त प्रकार विशेष विघ्न करने वाले भी वे दोनों देव उस जिनदत्त को, जिसकी चित्तवृत्ति व बाह्य इन्द्रियवृत्ति की चेष्टा एकाग्रभाव के अभ्यास से आत्माधीन हो चुकी थी, ऐसे धर्मध्यान से, जो कि स्थायी सुखरूपी महल का निर्माण करने वाली पुण्य कर्म की परम्परा को वृद्धिगत करता है, विचलित करने के लिए समर्थ नहीं हुए।

इतने में जब सूर्य की किरण-समूह द्वारा अन्धकार-समूह को नष्ट करने वाला प्रातःकाल हो गया तब उन्होंने अपने उपसर्ग-समूह रोक दिये और वे विशेष प्रसन्न अभिप्राय वाले हुए और भाग्यशालियों के योग्य प्रेम-भरे वचनों से उसकी प्रशंसा करके उसके लिए आकाश में विहार करने के लिए पैंतीस अक्षरों से निर्दोष आकाशगामिनी विद्या प्रदान की और कहा—'यह विद्या हमारे अनुग्रह से बिना सिद्ध की हुई भी तुम्हें आकाश में विहार कराने में समर्थ होगी, परन्तु दूसरों को अमुक विधि से सिद्ध की जाने पर।

जिनदत्त भी, जिसका मन सुमेरु पर्वत की शिखर को अलंकृत करने वाले अकृत्रिम चैत्यालयों के दर्शन करने में कौतूहल-युक्त है, एवं जिसने प्रस्तुत विद्या के लिए देवों की तरह आकाश में ले जाने का संकेत किया है, उक्त विद्या प्राप्त करके पंचमेरु के समस्त चैत्यालयों को हार्दिक दर्शनोत्सव में लाया। इसके बाद उसने उक्त चैत्यालयों के दर्शनार्थ उत्कण्ठित व ईश्वर-भक्ति में निपुण पुरुष-श्रेष्ठ धरसेन श्रावक के लिए उक्त विद्या दे दी।

पुनः 'अमितप्रभ' ने 'विद्युतप्रभ' से कहा—'विद्युतप्रभ! यह जिनदत्त सम्यग्दृष्टियों से माने हुए जीवादि तत्वों के विषय में परिपक्व बुद्धिवाला (दृढ़ श्रद्धालु) है और स्वभाव से निश्चल बुद्धिशाली है तथा समस्त उपसर्गों के सहन करने की प्रकृति वाला है, अतः इस पर किये जाने वाले महान् उपसर्ग भी वैसे व्यर्थ होते हैं जैसे वज्र पर घुण-कीट की चेष्टा व्यर्थ होती है, अतः नवीन जिनेन्द्र भक्ति की स्थानीभूत बुद्धिवाले किसी दूसरे श्रावक की परीक्षा करें।

ऐसा विचार करके दोनों देव वहाँ से प्रस्थान कर गए और उन्होंने मगधदेश को अलङ्कृत करने वाली मिथिलापुरी के स्वामी ऐसे 'पद्मरथ' राजा को देखा, जिसने ऐसे सुधर्माचार्य से, सम्यग्दर्शन पूर्वक

१. 'प्रारम्भावहैः' मु० एवं 'ख' प्रतौ। *. विघ्नसमूहैः। २. विघ्नरचनैः। ३. रात्रि। ४. निघ्नः तत्परः। ५. न समर्थौ तौ देवौ। ६. विरोकः किरणः रश्मिः। ७. सर्गः अभिप्रायः अभिप्रायौ। ८. दत्तवन्तौ। ९. देववत्। १०. समस्त। ११. पंचमेरुः। १२. तां विद्यां। *. अर्हद्देवोऽस्येत्यार्हतः सम्यग्दृष्टिरित्यर्थः। १३. वज्रे।

भवजिनोपासनायतनचैतन्यं निकषावः[1]' इति विमृश्योज्ज्वलिताभ्यामेता[2]भ्यां मगधमण्डलमण्डनमिथिलापुरीनाथः पद्मरथो नाम नरपतिर्निजनगरनिकटतटीधरवृत[3]देहा[4]यां कालगुहायां निवासरसमनसो[5] दीप्ततपसो निःश्रेयसानि-मिषपरिषच्चर्च्यमाणाचरणचातुर्यात्सुधर्माचार्यात्तदङ्गाद्भुतप्र[6] भाप्रभावदर्शनोपशान्ताशयः सम्यग्दर्शनमणुव्रताश्रय-मादाय तद्दिवस एव तदुपदेशान्निश्चिताहंत्परमेश्वरशरीरनिरतिशयप्रकाशम[7]हिमः कृतनियमः सकलभुवनपतिस्तूयमान-गुणगणो[8]दन्तं श्रीवासुपूज्यभगवन्तमुपासितुं प्रतिष्ठमानः प्रमद[9]नादसुन्दरदुन्दुभिरवाकारितनिरवशेषपरिजनः [10]समास-न्नसकलविष्टपनिविष्टविशिष्टादृष्टचेष्टः स च दृष्टः कदाचिदपि क्षुद्रोपद्रवा[11]विप्रलब्धः प्रार[12]ब्धश्च[13]पुरप्लोषान्तः पुरविध्वंसवरू[14]थिनीमथनप्रसभप्रभ[15]ञ्जनोर्जितपर्जन्यपरुषवर्षोपलासाराविवसति[16]भिदुर्दमशार्दूलोत्तराकृतिभिर्विकृति-भिरुपद्रोतुं तथाप्यविचलितचेतसमवसाय[17]नरवरकुञ्जरं मायामयप्रतिघे[18]ऽस्ता[19]घे व्याप्ताखिलदिगारामसंगमे कर्दमे निमज्जयद्भ्यां ताभ्यां 'नमः सुरासुरोपसर्गसङ्ग[20]सूदनाभिधानमात्रमाहात्म्यसाम्राज्याय श्रीवासुपूज्याय' इति तत्र निमज्जतो भूभृतो वचनमाकर्ण्य तद्धैर्योत्कर्षोन्मिषत्तोषमनीषाप्रसराभ्यां लघु परिमुषिताशेषविघ्नव्यतिकराभ्यामाचरितसत्काराभ्याम्

श्रावकों के अणुव्रत धारण किये थे, जिनका मन अपने नगर के निकटवर्ती पहाड़ से वेष्टित शरीर वाली कालगुहा में निवास करने के लिए सरस (प्रीति-युक्त) था। जो महातपस्वी थे और जिनके चरित्र-पालन का चातुर्य समस्त देवों की सभा से पूजा जा रहा था। उनके शारीरिक अद्भुत तेज व प्रभाव के दर्शन से जिसका राग शान्त हो गया था। उसी दिन जिसने आचार्य के उपदेश से अर्हन्त तीर्थङ्कर के शरीर के अनोखे प्रकाश की पूजा का निश्चय किया था और जिसने नियम लिया था। जो समस्त भुवन के स्वामियों से जिनके गुण-समूह का वृत्तान्त स्तुति किया जा रहा है ऐसे वासुपूज्य भगवान् की उपासना के लिए प्रस्थान कर रहा था। आनन्द-भेरी की मधुर ध्वनि से मनोज्ञ दुन्दुभियों (आनकों-वाद्यविशेषों) की ध्वनि से उसने समस्त कुटुम्बी जनों को बुला लिया। जिसकी विशेष पुण्य-चेष्टा समस्त लोक में प्रविष्ट होने का संबंध प्राप्त करती थी। जो कभी भी क्षुद्र उपद्रवों (विघ्नों) से पराभूत नहीं हुआ था।

पश्चात् उन दोनों देवों ने परीक्षा करने के लिए पद्मरथ राजा के ऊपर निम्न प्रकार की घटनाओं से विघ्न करना प्रारम्भ कर दिया, जिनमें उसके नगर का दाह, रनवास का विनाश, सेना का नाश और बलात् प्रचण्ड वायु के संचार से विशेष शक्तिशाली मेघों से उत्पन्न हुई कठोर ओलों की वृष्टि-आदि वाली भयानक जलवृष्टि पाई जाती है और जिनमें दुःख से भी दमन करने के लिए अशक्य सिंहों की उत्तम आकृतियाँ पाईं जातीं हैं।

उक्त उपद्रवों के करने पर भी उन्होंने मनुष्यों में श्रेष्ठ पद्मरथ राजा को विचलित न होनेवाले मन-वाला निश्चय किया। तब उन्होंने उसे मायामयी विघ्नवाली, अगाध और जिसने समस्त दिशाओं व बगीचों के संगम को व्याप्त किया है ऐसी कीचड़ में डुबो दिया।

इसके पश्चात् उन्होंने कीचड़ में डूबते हुए राजा के निम्न प्रकार वचन श्रवण किये—'ऐसे वासु-पूज्य तीर्थङ्कर भगवान् के लिए नमस्कार हो, जिसके नाममात्र के माहात्म्य का साम्राज्य सुरासुर देवों के

---

१. परीक्षावहे। २. पद्मरथो राजा दृष्टः। ३. गिरिवेष्टित। ४. 'तटीध्रघृतदेहायां' इति (क)। ५. सुधर्माचार्यात् सम्यक्त्वं व्रतं चादाय। ६. शरीरतेजः। ७. महिमा-महि पूजायामस्यौणादिक'इम' प्रत्ययः। ८. वृत्तान्तं। ९. आनन्दभेरी। १०. समासजन्ती संबंधमायान्ती। ११. अपराभूतः। १२. उपद्रोतुं प्रारब्धः। १३. नगरदाह। १४. सेना। १५. वायुः। १६. स्थानैः। १७. ज्ञात्वा। १८. विघ्ने। १९. अगाधे। २०. सूदनं निराकरणं विनाशनं।

'अहो नूतनस्य सम्यक्त्वरत्नस्याव्याजप्रसवपथ पद्मरथ, नैतच्चित्रमत्र यत्सं[1]धासत्त्वाभ्यामखिलैरपि लोकैरसदृशेषु भवादृशेषु न प्रभवन्ति प्र[2]सभप्रभवाः क्षुद्रोपद्रवाः । यतः ।

एकापि समर्थेयं जिनभक्तिर्दुर्गतिं निवारयितुम् । पुण्यानि च पूरयितुं दातुं मुक्तिश्रियं कृतिनः ॥ १५८ ॥'

इति निगीर्य, विती[3]र्य च जिनसमयाराधनवशे भवद्वंशे सर्वरुजापहारोऽयं हारः, सकलसपत्न[4]संतानो[5]च्छेदनमिदमातो[6]द्यं च प्रेषणं करिष्यतीति कृतसंकेताभ्यां तद्द्वय[7]मभिमतावस्थानं स्थानं प्रास्था[8]यि । त्रिदशेश्वरवदनजृम्भमाणगुणसंकथः पद्मरथोऽपि तत्तीर्थकृतो गणधरपदाधिकृतो भूत्वा कृत्वा चात्मानमनूनरत्नत्रयतन्त्रं मोक्षामृतपात्रमजायत । भवति चात्र श्लोकः—

उररीकृतनिर्वाहसाहसोचितचेतसाम् । उभौ कामदुघौ लोकौ कीर्तेश्चाल्पं जगत्त्रयम् ॥ १५९ ॥

इत्युपासकाध्ययने जिनदत्तस्य पद्मरथपृथ्वीनाथस्य च प्रतिज्ञानिर्वाहसाहसो नाम षष्ठः कल्पः ।

उपसर्ग-संगम का विनाशक है ।' फिर राजा की धैर्य-वृद्धि के कारण उन दोनों देवों को विस्तृत आनन्द व बुद्धि उत्पन्न हुई और उन्होंने समस्त विघ्न-संबंध दूर करके राजा को सन्मानित करते हुए कहा—'नये सम्यग्दर्शन-रूपी रत्न के निष्कपट गृह-मार्ग पद्मरथ ! प्रतिज्ञा व धैर्य के कारण समस्त प्राणियों की अपेक्षा अनोखे आप-सरीखे महापुरुषों पर हठ से उत्पन्न हुए क्षुद्रोपद्रव धर्मध्यान से डिगाने में समर्थ नहीं हो सकते । इसमें आश्चर्य नहीं ।

क्योंकि अकेली एक जिनभक्ति ही धार्मिक पुरुष को दुर्गति के निवारण करने में, पुण्य वृद्धि करने में एवं मुक्तिरूपी लक्ष्मी को देने में समर्थ है ॥१५८॥'

इसके पश्चात् दिव्य वस्तुओं के प्रति संकेत करने वाले उन्होंने उसे दो दिव्य वस्तुएँ प्रदान कीं । १. दिव्य हार २. दिव्य वाद्य । 'यह दिव्य हार जैन धर्म की आराधना के अधीन हुए आपके कुटुम्बी जनों के समस्त रोग नष्ट करेगा और यह दिव्य वाद्य समस्त शत्रु-कुल का उच्छेद (नाश) करने योग्य है और प्रेषण (भगा देना) करेगा ।' ऐसा कहकर उन दोनों देवों ने अपने अभीष्ट स्थान में प्रस्थान किया ।

इन्द्र के मुख द्वारा निरूपण किये हुए गुण-कथनवाला पद्मरथ राजा भी उस तीर्थङ्कर के समवसरण में गणधर के पद पर अधिष्ठित होकर अपनी आत्मा को रत्नत्रय (सम्यग्दर्शन-ज्ञान-चारित्र) से अलङ्कृत करता हुआ मोक्षरूपी अमृत का पात्र हुआ ।

प्रस्तुत विषय के समर्थक पुण्य श्लोक का अर्थ यह है—

जिन महापुरुषों की मनोवृत्ति स्वीकार किये हुए व्रतों के निर्वाह संबंधी साहस के योग्य है, उनके दोनों लोक अभीष्ट वस्तु का दोहन करने वाले होते हैं एवं उनकी इतनी विस्तृत कीर्ति होती है कि उसे व्याप्त होने के लिए तीन लोक भी अल्प हैं ॥१५९॥

इस प्रकार उपासकाध्ययन में जिनदत्त व पद्मरथ राजा का प्रतिज्ञा-निर्वाह के साहस को बतलाने वाला यह छठा कल्प समाप्त हुआ ।

---

१. संधा प्रतिज्ञा मर्यादा द्रव्या सुव्यवसायेषु सत्वं । २. हठादुत्पन्नाः । ३. वितीर्य दत्वा । ४.५. शत्रुकुलं । ६. वाद्यं । ७. हारः आतोद्यं द्वयं । ८. गतं ।

इतश्च संगमित[1]सकलोपकरणसेनो धरसेनोऽप्यतुच्छमूर्च्छाया[2]मध्ये पर्वदिवसवासते[3]यीमध्ये सर्वतो यातुधान[4]धावनप्रवर्धिनीषु श्मशानमेदिनीषु प्रवर्तिततद्विद्याराधनानुकूलमण्डलो व्यधासु[5] दिक्षु निक्षिप्तरक्षावलोऽद्वय[6]: कृतसकलीकरणो भानवे[7]यीविधानसमये वटविटपाग्रे परितः[8]राकरकर्तितसूत्रसरसहस्रसंपादितमात्मासनसमानान्तरालोचितमन्तर्जल्पसंकल्पितमन्त्रवाक्यः सिक्यं निबध्य प्रबन्धेनाधस्तादूर्ध्वमुखविन्यस्तनिशिताशेषशस्त्रो यथाशास्त्रं बहिर्निवेशिताष्टविधेष्टि[9]सिद्धिस्तद्विद्याराधनसमृद्धबुद्धिर्बभूव ।

अत्रान्तरे निष्कारणकलिकार्याञ्जनसुन्दर्या निशीथ[10] पथवर्तिवीक्षणे क्षपाक्षणे मध्यदेशे प्रसिद्धविजयपुरस्वामिनः सुन्दरीमहादेवीविलासिनः स्वकीयप्रतापहुतवा[11]हनाहुतीकृताराति समितेररिमन्थमहीपतेर्ललितो नाम सुतः समस्तव्यसनाभिभूतत्वाद्दाया[12]दक्रव्यादसंपादितसाम्राज्यपदापाय:[13]परमुपायमपश्यन्नदृश्याञ्जनावष्टम्भोर्जितप्रज्ञः प्रतीताञ्जनचोरापरसंज्ञः किलैवमुक्तः—'कुशाग्रपुर[14]परमेश्वरस्याग्रमहिष्याः ताविष्याः[15] सौभाग्यरत्नाकरं नाम कण्ठालंकारमिदानीमेव यद्यानीय प्रयच्छसि, तदा त्वं मे कान्तः, अन्यथा प्रणयान्तः[16]' इति । सोऽपि 'कियदेतद्गहनमेतत्' इत्युदारमुदा[17]हृत्य प्रियतमामनोरथमन्वर्थं[18]कं चिकीर्षुर्निजच्छायादृश्यताशीलकज्जलबहुलं लोचनयुगलं विधाय प्रयाय[19]

अब धरसेन की, जिसे जिनदत्त ने आकाशगामिनी विद्या साधने के लिए दी थी, और अञ्जनचोर की कथा श्रवण कीजिए।

यहाँ पर समस्त साधनों की सामग्री-समूह एकत्रित करके धरसेन भी गाढ़ान्धकार से सफल पर्वदिन (चतुर्दशी या अमावस्या) की रात्रि के मध्य में सर्वत्र राक्षसों की दौड़-धूप बढ़ानेवाली श्मशान भूमि पर आकाशगामिनी विद्या के आराधन में परिपूर्ण बुद्धिवाला हुआ। वहाँ उसने आकाशगामिनी विद्या के आराधना-योग्य मंडल की रचना की, समस्त दिशाओं में रक्षा-मण्डल स्थापित किये। पुनः अकेले इसने सकलीकरण क्रिया सम्पन्न की, अर्थात्—भूमिशुद्धि व अङ्ग शुद्धि-आदि क्रियाकाण्ड पूर्ण किया। इसके बाद उसने पूजा-विधान के समय में वटवृक्ष की शाखा के अग्रभाग पर मन में पढ़ने से निश्चित मन्त्रवाक्यवाला होते हुए, (मन में ही मन्त्रोच्चारण करते हुए) ऐसा छींका बाँधा, जो कि कन्याओं के करकमलों द्वारा काते हुए सूत के हजार तन्तुओं से बनाया गया था और जिसमें अपने बैठने-सरीखा योग्य मध्य स्थान था। इसके बाद उसने छीके के नीचे पृथ्वी पर समस्त तीक्ष्ण शस्त्रों को उनका अग्रभाग ऊपर की ओर करके स्थापित किया। बाद में मण्डल से वाह्य भूमि पर शास्त्रानुकूल आठ प्रकार की पूजा-सिद्धि स्थापित करके उसने आकाशगामिनी विद्या के आराधन में अपनी बुद्धि सन्नद्ध (तैयार) की।

इसी बीच में एक घटना घटी, अर्थात्—अब अञ्जनचोर की कथा श्रवण कीजिए—

इसी बीच में विना कारण कलह करनेवाली 'अञ्जनसुन्दरी' नाम की वेश्या ने अर्धरात्रि के मार्गवर्ती वीक्षणवाले मध्य रात्रि के समय ऐसे अञ्जनचोर से कहा, जो कि मध्यदेश में प्रसिद्ध 'विजयपुर' नगर के स्वामी, सुन्दरी नाम की पट्टरानी से विलास करनेवाले और अपनी बहुल प्रतापरूपी अग्नि द्वारा शत्रु-समूह को भस्म करनेवाले 'अरिमन्थ' नाम के प्रतापी राजा का 'ललित' नाम का पुत्र था, जो समस्त प्रकार के व्यसनों में आसक्त था, अतः जिसकी राज्यपद की प्राप्ति में उसके बन्धुजनरूपी राक्षसों ने बाधाएँ डालीं तब उसने दूसरा उपाय न देखकर अदृश्य-अञ्जन सिद्ध करके अपनी बुद्धि को शक्ति-युक्त किया, अर्थात्—उस अञ्जन के लगाने से वह अदृश्य हो जाता था और तभी से उसका नाम अञ्जनचोर प्रसिद्ध हो गया।

---

१. एकीकृत-मेलित। २. तिमिरं। ३. रात्रि। ४. राक्षसाः। ५. सर्वासु। ६. एकाकी। ७. बलिः। ८. कन्या। ९. पूजा। १०. मध्यरात्रि। ११. अग्निः। १२. गोत्रिण एव राक्षसाः। १३. विनाशः। १४. राजगृह। १५. 'ताविषी' नामकायाः देव्याः। १६. शत्रुः। १७. उक्त्वा। १८. सार्थकं। १९. गत्वा।

च तन्महीश्वरगृहं गृहीततदलंकारस्तत्प्रभाप्रसरसमुल्लक्ष्यमाणचरणसंचारः शब्द[1] शस्त्रोत्तालाननकरैस्तल[2] वरानुचरैरभियुक्तो निस्तरीतुमशक्तः परित्यज्य तदाभरणमितस्ततो नगरबाहिरिकायां विहरमाणस्तं धरसेनं प्रदीप्त[3]दीपदीप्तिवशातबद्धास्त्रनिवेशभयावेशान्मुहुर्मुहुरारोहावरोहावहदेहदीनमवलोक्य समुपढौक्य च तं देशमेवं निर्दिदेश—'अहो प्रलयकालान्धकारविलायामस्यां वेलायां महासाहसिकधु[4]र्यन् दुष्करकर्मकारिन्, को नाम भगवान् धरसेनः—'कल्याणबन्धो, महाभागवृत्तस्य जिनदत्तस्य विदितपुष्पवटुनियोगसंबन्धोऽहमेतदुपदेशादाकाशविहारव्यवहारनिषद्यां विद्यां सिसाधयिषुरत्रायासिषम्। अञ्जनचोरः—कथमियं साध्यते? धरसेनः—कथयामि, 'पूजोपचारनिक्षेप्ये शिक्येऽस्मिन्निःशङ्कमुपविश्य विद्यामिमामकुण्ठकण्ठं पठन्नेकैकं शरप्रवेकं स्वच्छधीश्छिन्द्यादवसाने गगनगमनेन युज्यते।' 'यद्येवमपसरापसर'। 'त्वं हि त[5]लोन्मुखनिखातनिशितशस्त्रसंपातभीतमतिर्न खलु भवसि एतत्साधने। एतद्यज्ञोपवीतदर्शनेनार्थार्जनकृतार्थः समर्थः। तत्कथय मे यथार्थवादहृद्यां विद्याम्। एनां साधयामि। ततस्तेनात्महितकटुना पुष्पवटुना साधुसमर्पितविद्यः

'राजगृह नगर के राजा की 'ताविषी' नाम की पट्टरानी का 'सौभाग्यरत्नाकर' नाम का कण्ठ-आभूषण यदि इसी समय लाकर मुझे दोगे तब तो तुम मेरे पति हो अन्यथा शत्रु हो।'

वेश्या की बात सुनकर अञ्जनचोर ने कहा—'यह क्या कठिन है?'

इतना उदारतापूर्वक कहकर वह अपनी प्रियतमा का मनोरथ सार्थक (पूर्ण) करने का इच्छुक हुआ। अपने दोनों नेत्रों में ऐसा अञ्जन, जिसके आँजने से उसके शरीर की छाया तक किसी से देखी न जासके, आँजकर राजमहल में घुसकर उसने उक्त राजमहिषी (पट्टरानी) का कण्ठाभरण चुरा लिया। यद्यपि अदृश्य अञ्जन के कारण उसे कोई नहीं देख सका परन्तु उस हार की रत्नकान्ति के विस्तार से उसका पादसंचार [कोट्टपाल-आदि नगर रक्षकों द्वारा] मालूम पड़ा तब शब्द (गाली-गिलोंज) बोलने से उग्र मुखवाले और शस्त्र उठाने से ऊपर उठाये हुए हस्तवाले कोट्टपाल के सेवकों ने उसका पीछा किया। परन्तु उनको धोखा देकर निकल भागने में अपने को असमर्थ देखकर उसने उस आभूषण को वहीं पर छोड़ दिया।

इसके पश्चात् नगर की बाह्य भूमि पर इधर उधर भागते हुए उसने [आकाशगामिनी विद्या सिद्ध करनेवाले] ऐसे 'धरसेन' को देखा, जिसका शरीर उजाले हुए दीपकों की कान्ति से नीचे गाढ़े हुए अस्त्र-शस्त्रों पर गिर जाने के भय के प्रवेश से वार-वार छींके पर चढ़ने-उतरने से दीन था, और उस स्थान पर आकर कहा—

'अहो! प्रलयकाल-सरीखे गाढान्धकार से मलिन इस रात्रि-वेला में महासाहसी पुरुषों में प्रमुख और दुःख से भी करने के लिए अशक्य कर्म करनेवाले पूज्य आप कौन हैं?'

धरसेन—'मेरे हितैषी बन्धु! भाग्यशाली चरित्रवाले जिनदत्त के साथ पूजा के अवसर पर पुष्प लानेवाले पुत्र के सरीखी प्रसिद्ध आज्ञा पालन का संबंध रखनेवाला मैं उसके उपदेश से आकाश-विहार के व्यवहार में प्रवृत्तिवाली (आकाशगामिनी) विद्यासिद्ध करने का इच्छुक होकर यहाँ आया हूँ।'

अञ्जनचोर—'यह कैसे साधी जाती है?'

धरसेन—'कहता हूं—'पूजोपचार के क्षेपण-योग्य इस छींके में निःशङ्क (शङ्का-रहित) बैठकर अविराम कण्ठ से इस विद्या को पढ़ते हुए निर्मल बुद्धि वाले होकर छींके की एक-एक डोर काटनी चाहिए,

---

१. शब्देन उत्तालं मुखं, शस्त्रेण उत्तालः करो येषां। २. तलारः। ३. 'प्रदीप्रः ख०। ४. प्रधान। ५. ऊर्ध्वमुखायघटित।

सम्यग्विविक्तवस्तुः[1] संप्रत्यासन्नशिवागारोऽञ्जनचौरः स्वप्नेऽप्यपरवञ्चनाचारनिवृत्तचित्तो जिनदत्तः । स खलु महतामपि महान्प्रतिपन्नवेशयतिव्रततन्त्रो जन्तुमात्रस्याप्यन्यथा न चिन्तयति, किं पुनश्चिराय समाचरितोपचारस्य तनूद्भवनिर्विशेषपोषितस्यास्य धरसेनस्यान्यथा चिन्तयेत्' इति निश्चित्य निविश्य च सौत्सुक्यं सिक्ये निःशङ्कशेमु[2]षीकः स्वकीयसाहसव्यवसायसंतोषितसुरासुरानीकः सकृदेव[3] तच्छुरप्रसरं चिच्छेद, *आससाद च खेचरपदम् । पुनर्यत्र जिनदत्तस्तत्र मे गमनं भूयादिति विहिताशासनः[4] काञ्चनाचलमेखलानिलयिनि सौमनसवनोदयिनि जिनसद्मनि जिनदत्तस्य धर्मश्रवणकृतो गुरुदेवभगवतः समीपे तपो गृहीत्वावगाहितसमस्तश्रुतितत्त्वो हिमवच्छैलचूलिकोन्मीलित[5]केवलज्ञानः कैलासके[6]सरकान्तारगतो मुक्तिश्रीसमागमसङ्गभोगा[7]यतनो बभूव ।

भवति चात्र श्लोकः—

क्षत्रपुत्रोऽक्षविक्षिप्तः[8] शिक्षितादृश्यकज्जलः । अन्तरिक्षगतिं प्राप निःशङ्कोऽञ्जनतस्करः ॥१६०॥

ऐसा करने से अन्त में आकाश-गामिनी विद्या सिद्ध होगी।'

अञ्जनचोर—'यदि ऐसा है तो हटो हटो, क्योंकि तुम छींके के नीचे पृथिवी तल पर ऊपर अग्रभाग करके गाड़े हुए तीक्ष्ण शस्त्रों पर गिर जाने की भयभीत बुद्धि वाले हो गये हो, इसलिए तुम इसे सिद्ध करने में समर्थ नहीं हो सकते। क्योंकि तुम तो अपना जनेऊ दिखाने मात्र से धनार्जन करने में कृतार्थ हो। अतः मुझे यथार्थ उपाय से मनोज्ञ विद्या को कहो। मैं इसे साधता हूँ।'

यह सुनकर आत्मकल्याण को अप्रिय समझने वाले उसे धरसेन ने अञ्जनचोर के लिए अच्छी तरह विद्या समर्पित कर दी।

इसके बाद जानने योग्य बातों के ज्ञाता व मोक्ष-स्थान के निकटवर्ती (उसी भव से मोक्ष जाने वाले) अञ्जनचोर ने निश्चय किया—'जिनदत्त सेठ, जिसकी चित्तवृत्ति स्वप्न में भी दूसरों को धोखा देने के व्यवहार से दूर है, निश्चय से महापुरुषों में श्रेष्ठ है और जो स्वीकार किये हुए श्रावक-व्रतों के अधीन है जब प्राणीमात्र का भी अहित चिन्तवन नहीं करता तब क्या उस धरसेन के विषय में, जिसने इसकी चिरकाल तक विशेष सेवा की है और जो इसके द्वारा पुत्र-सरीखा लालन-पालन किया गया है, अहित चिन्तवन कर सकता है?,

इसके पश्चात् बड़ी उत्कण्ठा के साथ उस छींके पर बैठ गया और निःशङ्क बुद्धि वाला होकर अपने साहस व उद्योग द्वारा सुर व असुरों के समूह को सन्तुष्ट करने वाले उस अञ्जनचोर ने एकबार में ही समस्त छींके के धागे काट दिये और विद्या धर-पद प्राप्त कर लिया। पुनः इसने इच्छा की 'कि जहाँ जिनदत्त है, वहाँ पर मेरा गमन हो' ऐसी इच्छा करने वाला वह सुमेरु पर्वत की मेखला पर स्थित व सौमनसवन में वर्तमान जिनालय में स्थित होकर आचार्य गुरुदेव से धर्म श्रवण करने वाले जिनदत्त के पास पहुँच गया और प्रस्तुत आचार्य के समीप जिन दीक्षा ग्रहण करके समस्त द्वादशाङ्ग शास्त्रों के तत्वों का ज्ञाता (श्रुतकेवली) हो गया। पुनः उसे हिमवन पर्वत की चूलिका पर केवलज्ञान प्रकट हो गया। जब वह कैलाश पर्वत के बकुल वृक्ष के वन में प्राप्त हुआ तब वह मुक्तिश्री के साथ समागम करने में आसक्त आत्मावाला हुआ।

प्रस्तुत विषय में एक श्लोक है, उसका अर्थ यह है—

अञ्जनचोर, जो कि क्षत्रिय राजकुमार था, और जो जुआ खेलना-आदि व्यसनों के कारण विक्षिप्त

---

१. अञ्जनः। २. शेमुषी मतिः। ३. एकवारं। * प्राप्तवान्। ४. 'विहिताशंसन': क०। ५. प्रकटीकृत। ६. बकुलः। ७. आत्मा। ८. द्यूतेन।

इत्युपासकाध्ययने निःशङ्कितत्वप्रकाशनो नाम सप्तमः कल्पः ।

स्यां[1] देवः स्यामहं यक्षः स्यां वा वसुमतीपतिः । यदि सम्यक्त्वमाहात्म्यमस्तीतीच्छां परित्यजेत् ॥१६१॥

उदश्वितेव[2] माणिक्यं सम्यक्त्वं भवजैः सुखैः । विक्रीणानः पुमान्स्वस्य वञ्चकः केवलं भवेत् ॥१६२॥

चित्ते चिन्तामणिर्यस्य यस्य हस्ते सुरद्रुमः । कामधेनुर्धनं यस्य तस्य कः प्रार्थनाक्रमः ॥१६३॥

उचिते[3] स्थानके यस्य चित्तवृत्तिरनाकुला । तं श्रियः स्वयमायान्ति स्रोतस्विन्य इवाम्बुधिम् ॥१६४॥

तत्कु[4]दृष्ट्यन्तरोद्भूतामिहामुत्र च संभवाम् । सम्यग्दर्शनशुद्धयर्थमाकाङ्क्षां त्रिविधां[5] त्यजेत् ॥१६५॥

श्रूयतामत्रोपाख्यानम्—अङ्गमण्डलेषु समस्तसपत्नसमरारम्भनिष्प्रकम्पायां चम्पायां पुरि लक्ष्मीमति-महादेवीदयितस्य वसुवर्धनाभिधानोचितस्य वसुधापतेर्निरव[6]शेषवैदेहकवरिष्ठः किल प्रियदत्तश्रेष्ठी धर्मपत्न्या गृहलक्ष्मी-सपत्न्या सकलस्त्रैणगुणधाम्नाङ्गवतीनाम्ना सहाह्ना[7]य प्राह्णेऽष्टाह्निकियाकाण्डकरणायाभ्रंकषकूटकोटिघ[8]टितपताकापट-

---

बुद्धिवाला हो गया था तब उसने अदृश्य होने का अञ्जन बनाना सीखा। जब वह विद्या-सिद्धि में निःशङ्क हुआ तब उसने आकाशगामिनी विद्या प्राप्त की और मुक्त हो गया ॥ १६० ॥

इस प्रकार उपासकाध्ययनमें निःशङ्कित तत्वको प्रकट करनेवाला सातवाँ कल्प समाप्त हुआ।

अब निःकांक्षित अङ्ग का स्वरूप कहते हैं—

यदि सम्यग्दर्शन में प्रभाव है तो 'मैं देव हो जाऊँ' 'अथवा यक्ष हो जाऊँ' अथवा 'राजा हो जाऊँ' ऐसी इच्छा का त्याग करना चाहिए। जैसे छाँछ लेकर माणिक्य को बेचनेवाला मानव केवल अपनी आत्मा को ठगनेवाला होता है वैसे ही क्षणिक सांसारिक सुखों के बदले में अपने सम्यक्त्व को बेचनेवाला मानव भी केवल अपनी आत्मा को ठगनेवाला है ॥ १६१-१६२ ॥ जिस धार्मिक सम्यग्दृष्टि के मन में चिन्तामणि है, हस्त में कल्पवृक्ष है और धन में कामधेनु है, उसे याचना से क्या प्रयोजन ? अर्थात्—सम्यक्त्व चिन्तामणि, कल्पवृक्ष और कामधेनु-सरीखा है, अतः सम्यग्दृष्टि को विना याचना किये सब मिलता है, ऐसा जानकर इच्छाएँ छोड़ देनी चाहिए ॥ १६३ ॥ जिसकी मनोवृत्ति धर्मलक्षणवाले योग्य स्थान को प्राप्त करके अनाकुल (सांसारिक सुखों से निःस्पृह) हो जाती है उसे सम्पत्तियाँ वैसी स्वयं प्राप्त होती हैं जैसे नदियाँ समुद्र में स्वयं प्राप्त होती हैं ॥ १६४ ॥ अतः सम्यक्त्व की विशुद्धि के लिए मिथ्यात्व कर्म के उदय से होनेवाली इस लोक व परलोक संबंधी तीन प्रकार की इच्छाएँ (देवता, यक्ष व राजा होने की अभिलाषाएँ) छोड़ देनी चाहिए ॥ १६५ ॥

२. निःकांक्षित अङ्ग में प्रसिद्ध अनन्तमति की कथा—

[अब इस विषय में एक कथा है, उसे श्रवण कीजिए—]

अङ्गदेश में, समस्त शत्रुओं के साथ होनेवाले युद्ध के प्रारम्भ में कम्पन-रहित (निर्भीक) 'चम्पा नाम की नगरी है। उसमें 'वसुवर्धन' नाम का राजा राज्य करता था। उसकी 'लक्ष्मीमति' नामको पट्टरानी' थी। उसके यहाँ समस्त वणिकों में श्रेष्ठ 'प्रियदत्त' नामका श्रेष्ठी था। उसकी गृहलक्ष्मी-सी व समस्त स्त्रियों के गुणों की स्थान 'अङ्गवती' नाम की पत्नी थी।

एकबार प्रातः काल में प्रियदत्त सेठ अपनी धर्मपत्नी के साथ अष्टाह्निका पर्व का क्रियाकाण्ड करने

---

१. अर्हं भवामि । २. तक्रेण । ३. धर्मलक्षणे । ४. मिथ्यादर्शनावरणोद्भूतां । ५. देव-यक्ष-राजोद्भवां । ६. समग्रवणिजां मध्ये श्रेष्ठः । ७. शीघ्रं सपदि । ८. संयोजित ।

ध्वजाग्रध्वजजालस्खलितनिलिम्पविमानवलयं सहस्रकूटचैत्यालयं यियासुः स्वकीयसुतावयस्या[1]मनङ्गमतीमेवमपृच्छत्—'वत्से, अभिनवविवाहभूषणसुभगहस्ते, क्वास्ते स[2]मुल्लिखितलाञ्छनेन्दुसुन्दरमुखी प्रियसखी तवातीव केलिशीलप्रकृतिरनन्तमतिः।' अनङ्गमतिः—'तात,[3] वणिग्वृन्दारकदारि[4] कोद्गीयमानमङ्गला कृत्रि[5] मपुत्रकवरव्याजेनात्मपरिणयनाचरणपरिणामपेशला पञ्जरास्थितशुकसारिकावदनवाद्यसुन्दरे वा[6]सावासपरिसरे समास्ते'। 'समाहूयतामितः'। 'यथाविज्ञपति तातः'। प्रियदत्तश्रेष्ठी वृद्धभावात्परिहासालापनपरमेष्ठी समागतां सुतामवलोक्य 'पुत्रि, निसर्गविलासरसोत्तरङ्गा[7] पाङ्गापहसितामृतसर[8]जिविषये सदैव पञ्चालि[9] काके[10]लिकिलहृद[11]ये सं[12]प्रत्येव तव मन्मथपथाः परिणयनमनोरथाः। तद्गृह्यतां तावत्समस्तव्रतैश्वर्यवर्यं ब्रह्मचर्यम्। अत्रैव ते साक्षी भगवानशेषश्रुतप्रकाशना[13]शयभूरिधर्मकीर्तिसूरिः। अनन्तमतिः—'तात, नितान्तं गृहीतवती। अस्मिन्न केवलमत्र मे भगवानेव साक्षी किं तु भवानम्बा च'। अन्यथा तु

> उद्भिन्ने स्तनकुड्मले स्फुटरसे हासे विलासालसे किंचित्कम्पित[14]कैतवाधरभरप्राये वचःप्रक्रमे।
> कन्दर्पाभिनवास्त्रवृत्तिचतुरे नेत्राश्रिते विभ्रमे प्रावायेव च मध्य[15]गौरवगुणं वृद्धे नितम्बे सति ॥१६६॥

के लिए शीघ्र ऐसे 'सहस्रकूट' चैत्यालय के प्रति गमन करने का इच्छुक हुआ, जिसने गगनतल को स्पर्श करनेवाले शिखरों के अग्रभाग पर संयोजित ध्वजाओं के विस्तृत वस्त्र के प्रान्तभागों के समूह से देवताओं की विमानश्रेणी स्खलित (रोकी हुई) की है, अतः उसने अपनी पुत्री की सखी अनङ्गमति से पूछा—'नवीन विवाह के आभूषणों से सुन्दर हाथोंवाली पुत्री ! लाञ्छन-रहित चन्द्रसरी खे मुखवाली तुम्हारी विशेष प्यारी सखो और क्रीड़ाशील स्वभाववालो पुत्री 'अनन्तमति' कहाँ है ?,

अनङ्गमती—'पिताजी ! जिसका मङ्गल श्रेष्ठ वैश्यों की कन्याजनों द्वारा गान किया गया है और जो गुड्डेरूप वर के विवाह के बहाने से अपने विवाह करने के अभिप्राय से मनोज्ञ है, ऐसी वह अनन्तमति पिंजरे में बैठी हुई तोता-मेना के मुखरूपी बाजे से मनोज्ञ निवासगृह के प्राङ्गण में बैठी हुई है।'

'उसे यहाँ लाओ।'

'पिताजी जैसी आज्ञा देते हैं।'

प्रियदत्त सेठ ने, जो कि वृद्ध हो जाने से परिहास-युक्त वार्तालाप करने में विशेष निपुण था, समीप में आई हुई कन्या को देखकर कहा—'पुत्री ! सदैव गुड्डी से खेलने के लिए पटुतावाले और स्वाभाविक विलास-रस से उच्छलन करनेवाले नेत्रप्रान्तों से अमृत की छोटी नदी को तिरस्कृत करनेवाले तेरे हृदय में अभी से कामदेव के मार्गरूप विवाह के मनोरथ उत्पन्न हो चुके हैं, अतः समस्त व्रतों में श्रेष्ठ ब्रह्मचर्य व्रत स्वीकार करो। पुत्री ! इस विषय में समस्त आगम के प्रकाशन के अभिप्रायरूपी सुवर्णवाले ये भगवान् धर्म कीर्ति सूरि तुम्हारे साक्षी हैं।'

अनन्तमति—'पिताजी ! मैंने सर्वथा ब्रह्मचर्य व्रत ग्रहण कर लिया और इसमें केवल आचार्य ही साक्षी नहीं हैं किन्तु आप और माता जी भी साक्षी हैं।'

अनन्तमति की युवावस्था—उसकी कुचकलियाँ विकसित हो गईं। उसका हास्य, विलास से सुन्दर

---

१. सखीं। २. निर्लाञ्छनचन्द्रवत्। ३. हे मुख्य। ४. कन्याजनः। ५. ढींगला। ६. निवासगृहप्राङ्गणे। ७. नेत्रप्रान्ते। ८. कुल्या। ९. पुत्तलिकाः। १०. क्रीडायां। ११. पटुहृदये, पुत्तलिकाक्रीडायां पटुहृदये। १२. इदानीमपि। १३. आशय एव सुवर्णं विद्यते यस्य सः। भूरि प्राज्ये सुवर्णे चेति विश्वः। १४. कम्पितमिषेण। १५. गौरवगुणं नितम्बेन गृहीतं तेन मध्यं क्षामं जातं।

समायाते[1] मुहुरुत्पथप्रथमानमन्मथो[2]न्माथमन्थरसमस्तसत्त्वस्वान्ते सद्यःप्र[3]सूतसहकाराङ्कुरकवलकषायकण्ठकोकिलकामिनीकुहारावासरालितमनोजविजये मलय.चलमेखलानिलीनकिन्नरमिथुनमोह[4]नामोदमेदुरपरिसरत्समीरसमुदये विकसत्कोश[5]कुरबक[6]प्रसवपरिमलपानलुब्धमधुकरीनिकरझङ्कारसारप्रसरे वसन्तसमयावसरे सा प्रसरत्स्मरविकारा स्मरस्खलन्मतिगतिरनन्तमतिः सह[7]सहचरीसमूहेन मदनोत्सवदिवसे दोलान्दोलनलालसमानसा स्वकीयरूपातिशयसंपत्तिरस्कृतसकलभुवनाङ्गनाङ्गविलासा सुकेशीप्रियतमानुगतेन कृ[8]तकामचारप्रचारचेतसा पूर्वापराकू[9] पारपालि[10]न्दीसुन्दरीसनाथोत्स[11]ङ्गधरस्य विजयार्धावनीधरस्य विद्याधरीविनोदपादपोत्पादक्षोण्यां दक्षिणश्रेण्यां किन्नरगीतनामनगरनरेन्द्रेण कुण्डलमण्डितनाम्नाम्बरचरेण निध्यायिता[12]

शृङ्गारसारममृतद्युतिमिन्दुकान्तिमिन्दीवरद्युतिमनङ्गशरांश्च सर्वान् ।
आदाय नूनमियमात्मभुवा[13] प्रयत्नात्सृष्टा जगत्त्रयवशीकरणाय बाला ॥१६७॥

और प्रीति-जनक था। जब वह वचन बोलने का आरम्भ करती थी तो उसके ओष्ठपल्लवों में कुछ कम्पन के बहाने से विशेष मनोज्ञता पाई जाती थी। उसके नेत्रों के कटाक्षों के संचार कामदेव के नवीन अस्त्रों के संचालन में चतुर थे। उसका नितम्बभाग, मध्यभाग (कमर) की गुरुता को लेकर ही मानों—वृद्धिंगत हो गया था और इसीलिए मानों—उसका मध्यभाग (कमर) कृश हो गया था ॥ १६६ ॥

जब ऐसा वसन्त ऋतु का अवसर आया, जिसमें समस्त प्राणियों के मन बारम्बार उन्मार्ग में बढ़ी हुई कामदेव की पीड़ा से चंचल हो रहे थे। जिसमें नवीन उत्पन्न हुई आम्र-मञ्जरियों के भक्षण से कषायले कण्ठवाली कोकिलाओं के मधुर कूजन से कामदेव की विजय प्रसारित की गई है। जिसमें ऐसी उन्नतिशील वायु का संचार होरहा है, जो कि मलयाचल के तट में प्रविष्ट हुए किन्नर देव-देवियों के जोड़ों की सुरत-क्रीडा से उत्पन्न हुई सुगन्धि से परिपूर्ण है और जिसमें ऐसी भोरियों के समूह की झङ्कार ध्वनि का उत्तम प्रसरण हो रहा है, जो कि विकसित कलियोंवाले कुरवक-पुष्पों की सुगन्धि के रसपान में लुब्ध (लम्पट) हैं।

तब ऐसी अनन्तमति एक बार मदनोत्सव के दिन सखियों के समूह के साथ झूला झूलने के लिए उत्कण्ठित मनवाली होकर उपवन (बगीचा) में गई, जिसमें कामदेव का विकार उत्पन्न हो रहा है और जिसकी बुद्धि की गति कामदेव से स्खलित हुई है एवं जिसने अपनी विशेष लावण्य सम्पत्ति से समस्त लोक की स्त्रियों के शारीरिक अङ्ग-विलास को तिरस्कृत किया है।

उसी अवसर पर उसे ऐसे कुण्डल मण्डित नाम के विद्याधर ने देखा और उसे चाहने लगा, जिसने यथेष्ट संचार में चित्त लगाया था और जो सुकेशी नाम की पत्नी के साथ आया था एवं जो पूर्व-पश्चिम समुद्र-की वीची (तरङ्ग) रूपी कमनीय कामिनीवाली तटी के धारक विजयार्ध पर्वत की विद्याधरियों के विनोदरूपी वृक्ष की उत्पत्ति भूमिवाली दक्षिण श्रेणी में स्थित हुए 'किन्नरगीत' नाम के नगर का स्वामी था।

इसके पश्चात् वह इसके रूप लावण्य से मोहित होकर निम्न प्रकार विचार करने लगा—

'ऐसा मालूम पड़ता है—मानों—ब्रह्मा ने तीन लोक को वश में करने के लिए शृङ्गार का सार, अमृत की तरलता, चन्द्र की कान्ति, नील कमल की शोभा और कामदेव के समस्त वाण ग्रहण करके ही इस बाला की सृष्टि (रचना) स्वयं विशेष प्रयत्न से की है' ॥ १६७ ॥

---

१. वसन्ते। २. पीड़न। ३. उत्पन्न। ४. सुरतं। ५. मध्य। ६. मोगरसदृश–रक्तसुगन्धपुष्पविशेषः। ७. सखी। ८. कृतस्वेच्छाचारगमनचित्तेन। ९. समुद्रः। १०-११. वीची। वेला एव स्त्री-सहिततटी। १२. दृष्टा। १३. ब्रह्मणा।

इति विचिन्त्याभिलषिता च। ततस्तामपजिहीर्षुर्धिषणः[1] मुहुर्निवृत्य[2] निर्वर्तितनिजनिलयसुकेशीनिवेशेन प्रत्यागत्यापहृत्य च पुनर्नभश्चरपुरं प्रत्यनुसरता गगनमार्गार्द्धे—प्रतिनिवृत्तकुपितसुकेशीदर्शनाशङ्कितहृदयेन तत्कायसंक्रमितावलोकिनीपर्णलघुविद्याद्वयेन शङ्खपुराभ्यर्णभागिनि भीमवननामनि कानने मुक्ता। तत्र च मृगयाप्रसंग[3]नमागतेन भीमनाम्ना किरातराजलक्ष्मीसीम्नावलोकिता, नीता चोपान्तप्रकीर्णेङ्गुदी[4] फलच्छलि पल्लिम्[5]। एतद्रूपदर्शनदीप्तमदनमदेन च तेन स्वतः परतश्च तैस्तैरुपायैरात्मसंभोगसहायैः प्रार्थिताप्यसंजातकामिता हठात्कृतकठोरकामोपक्रमेण तत्परिगृहीतव्रतस्थैर्याश्चर्यितकान्तारदेवताप्रातिहार्यात्प[6]र्याप्तपवनाग्निप्लोषेण मृत्युहेतुकातङ्कपावकपच्यमानशरीरेण च 'मातः, क्षमस्वैकमिममपराधम्' इत्यभिधाय वनेचरोपचारोपचीयमानसहचरीचित्तोत्कण्ठे शङ्खपुरपर्यन्तपर्वतोपकण्ठे परिहृता तत्समीपसमावासितसार्थानीकेन पुष्पकनामकेन वणिक्पतिपाकेना[7]वलोकिता सती स्वीकृता च तेन,[8] तेन चार्थेन स्ववश्यमानेतुमसमर्थेन कोशलदेशमध्यायामयोध्यायां पुरि व्यालिकाभिधानकामपल्लवकन्दल्याः शंफल्याः[9] समर्पिता। तयापि मदनमदसंपादनावसथाभिः कथाभिः क्षोभयितुमशक्या तद्रा[10]जधानीवि[11]निवेशस्य सिंहमहीशस्योपायनीकृता[12]।

इसके पश्चात् उसकी बुद्धि इसे अपहरण करने की इच्छुक हुई। पश्चात् वह अपने गृह को ओर लौटा और अपनी पत्नी सुकेशी को अपने गृह में ठहराकर वापिस उसी उद्यान में आकर अनन्तमति को अपहरण करके अपने विद्याधर नगर की ओर चल दिया परन्तु जब इसने आधे आकाशमार्ग से वापिस लौटी हुई और कुपित हुई अपनी पत्नी सुकेशी को देखा तो इसका हृदय भयभीत हुआ। अतः इसने अनन्तमति के शरीर में 'अवलोकिनी' और 'पर्णलघु' नामकी दो विद्याएँ संक्रमण कराईं। पश्चात् उन दोनों विद्याओं ने अनन्तमति को शङ्खपुर के निकटवर्ती 'भीमवन' नामके वन में छोड़ दिया।

वहाँ पर शिकार-क्रीड़ा के लिए आये हुए भीलों की राज्यलक्ष्मी के मर्यादाभूत भिल्लराज भीम ने उसे देखा और वह उसे इङ्गुदी फलों की लताओंवाली भीलों की स्थानीभूत पर्णकुटी (झोंपड़ी) में ले गया। इसके रूप लावण्य को देखकर भिल्लराज का काममद प्रदीप्त हो गया, अतः उसने स्वयं व दूसरों की सहायता की अपेक्षावाले व अपने भोग में सहायता देनेवाले अनेक उपायों से अनन्तमति से प्रार्थना की, किन्तु उसमें कामवासना उत्पन्न नहीं हुई। अतः उसने इससे बलात्कारपूर्वक कठोर कामरूपी रोग का इलाज किया, परन्तु इसके द्वारा धारण किये हुए ब्रह्मचर्य व्रत की निश्चलता से आश्चर्य-चकित हुई वनदेवता के माहात्म्य से भिल्लराज की पूरी झोपड़ी अग्नि से दग्ध कर दी गई, अतः जब भिल्लराज भीम का शरीर मृत्यु-जनक भयरूपी अग्नि से जलने लगा तो उसने कहा—'माता! मेरे इस एक अपराध को क्षमा करो।' बाद में उसने इसे शङ्खपुर के निकटवर्ती पर्वत के समीपवर्ती स्थान पर छोड़ दी, जो कि भीलों द्वारा की जानेवाली सेवा-शुश्रूषा से उनकी भिल्लनियों के चित्त की उत्कण्ठा वृद्धिगत करनेवाला है।

बाद में अनन्तमति को वणिक् पति के पुत्र 'पुष्पक' ने देखा, जिसके द्वारा उक्त पर्वत के निकट व्यापारियों की समूहरूपी सेना बसाई गई है, परन्तु वह धनादि देकर उसे वश करने में असमर्थ रहा तब उसने उसे कौशल देश की मध्यवर्ती अयोध्या नाम की नगरी में रहनेवाली कामरूपी पल्लव की कन्दली-सरीखी 'व्यालिका' नामकी वेश्या के लिए समर्पण कर दी। जब वह वेश्या भी काम के दर्प को उत्पन्न करने की स्थानीभूत कथाओं से उसे ब्रह्मचर्य से डिगाने में असमर्थ हुई तब उसने इसे उस देश की राजधानी में निवास करने-

१. अपहर्तुमिच्छुमतिना। २. व्याघुट्य। ३. क्रीडां प्रति। ४. हिंगोरक। ५. भिल्लालयपर्णकुटी। ६. परिपूर्णपल्लिदाहेन। ७. पुत्रेण। ८. वणिक्पुत्रेण। ९. कुट्टिन्याः। १०-११, तद्राजधान्यां विनिवेशो निवेशः स्थानं यस्य सः तस्य। १२. प्राभृतीकृता।

तेनाप्यलब्धतन्मनःप्रवेशेन विलक्षिताक्षिप्तदुरभिसंधिना[1] तत्कन्यापुण्यप्रभावप्रेरितपुरदेवतापादितान्तःपुरपुरीपरिजनापकारविधिना साधु संबोध्य नियमसमाहितहृदयचेष्टा *विसृष्टा पितृस्वसुः सुदेवीनामधेयायाः पत्युः पितुश्चार्हद्दत्तस्य सुगृहीतनामदत्तस्य[2] जिनेन्द्रदत्तस्योदवसितसमीपवर्तिनं [3]विरतिचैत्यालयमवाप्य तत्र निवसन्ती यमनियमोपवासपूर्वकैर्विधिभिः क्षपितेन्द्रियमनोवृत्तिर्भवन्ती[4] तस्मादङ्गदेशनगराज्जिनेन्द्रदत्तं चिरविरहोत्तालं श्यालं[5] विलोकितुमायतेन प्रियदत्तश्रेष्ठिना वीक्ष्य विषयाभिलाषमोषपरुषकचा सा विहितबहुशुचा पुनः प्रत्याप्य तस्मै जिनेन्द्रदत्तसुतायार्हद्दत्ताय दातुमुपक्रान्ता—'तात, तं भवन्तं भगवन्तं भवन्तं पितरं मातरं च तां प्रमाणीकृत्य कृतनिरवधिचतुर्थ[6] व्रतपरिग्रहा। ततः कथमहमिदानीं विवाहविषये परिकल्पनीया' इति निगीर्य कमलश्रीसकाशे विरतिविशेषवंशरत्नत्रयकोशमभजत्।

हासात्पितुश्चतुर्थेऽस्मिन्व्रतेऽनन्तमतिः स्थिता। कृत्वा तपश्च निष्काङ्क्षा कल्पं द्वादशमाविशत् ॥१६८॥

इत्युपासकाध्ययने निष्काङ्क्षितत्वावेक्षणो नामाष्टमः कल्पः।

वाले 'सिंह' नाम के राजा के लिए भेंट कर दी। परन्तु जब राजा सिंह भी अनन्तमति के हृदय में स्थान न पा सका तब उसने इसके साथ दुष्ट अभिप्राय का ग्रहण किया (बलात्कार करना चाहा) तब उस कन्या के पुण्य के प्रभाव से प्रेरित हुए नगर देवता ने उस राजा के अन्तःपुर की रानियों व नगरवासियों तथा राजसेवकों को नाना प्रकार के कष्ट देकर भले प्रकार उसकी रक्षा की तब राजा ने अनन्तमति को ब्रह्मचर्य-व्रत में स्थिर चित्तवाली समझकर छोड़ दिया।

इसके बाद हिमवन पर्वत पर प्राप्त हुए उसने ऐसी 'पवनवेगा' नामवाली विद्याधर-राजकुमारी देखी, जो कि ऐसे 'गरुड़वेग' नाम के विद्याधर राजा की प्रिय पुत्री थी, जो कि विद्याधरियों के नेत्ररूपी कुमुदों को विकसित करने के लिए चन्द्र-सरीखा था, जो चन्द्रपुर नामक नगर का स्वामी और 'अङ्गवती' नामकी युवती रानी की प्राति का आश्रय-स्थान था। जो (राजकुमारी पवनवेगा) विशेष सौन्दर्य के निरूपण की पात्र थी,

१. स्थान, कुलक्रमायात। २. नामाभिधानस्य (क०)। ३. मामः ज्येष्ठभगिनीपतिः। ४. उत्कटं। ५. विरहिणी। ६. अशोकदलशय्यायां दयितेन भर्त्रा आसाद्या प्राप्या या विद्याधरी। ७. चिह्नितं। ८. पर्वत। ९. विस्तारः। १०. वनम्। *. 'निषद्यां' (ख), टिप्पण्यां तु स्थिति। ११. बहुरूपिण्या।

जगररूपया[1] विद्यया निगीर्णवदनामुपलभ्य परोपकारविचक्षणस्तार्क्ष्यविद्यया तमेतल्लपनाविलतालुं[2] मायाशयालुं[3] विज्ञासयामास। पवनवेगा तत्प्र[4]त्यूहाभोगापगमानन्तरमेव विद्यायाः सिद्धिं प्रपद्य 'अवश्यमिह जन्मन्ययमेव मे कृत-प्राणत्राणावेशः प्राणेशः' इति चेतस्यभिनिविश्य पुनरस्यैव नीहारमहोधरस्य नितम्बतीरि[5]णीपर्यन्ते सूर्यप्रतिमां समाश्रित-वतो भगवतस्तपःप्रभावसंपादितसमस्तसत्त्वव्यापवंतस्य संयतस्य पादपीठोपकण्ठ पठतस्तवेयं सेत्स्यतीत्युपदेशादेशाभिनव-माराय वज्रकुमाराय गगनगमनाङ्गना[6] जीवितभूतामभिमतार्थसाधनपर्याप्तिं प्रज्ञप्तिं विद्यां वितीर्य[7] निजनगर्यां पर्याटत्। वज्रकुमारस्तथैव तत्सूरिसमक्षं फेन[8]मालिनीकूले विद्यां प्रसाध्यासाध्यसाधनप्रवृद्धपराक्रमस्तमक्रमविक्रमा-ल्पीभूतदैवं पुरंदरदेवं पितृव्यमव्याजमुच्छिद्य सद्यस्तां विजयोत्सवपरम्परावतीममरावतीं पुरमात्मपितरमखिलखचरार्चित-चरणसेवं भास्करदेवं निवेश्य वश्येन्द्रियः स्वयंवरव्याजेन विहिताभिलषितकान्तसङ्गामनङ्गसङ्गसंगतशृङ्गारसुभगां पवन-वेगामपराश्चाम्बरचरपतिवराः विवाह्य महाभागगृह्यो विहायश्चरचित्तचिन्तामात्रायासैस्तैस्तैर्विलासैः कालमतिवाहयामास।

जिसका शरीर विद्या सिद्ध करने के लिए हिमवन पर्वत की शिखर पर वर्तमान वन की लताओं से वेष्टित हुए प्रदेश पर स्थित था। जो बहुरूपिणी नाम की निर्दोष विद्या सिद्ध कर रही थी और उस समय विघ्न उपस्थित करने के अधीन होने से अजगर सर्प का वेष धारण करनेवाली इसी बहुरूपिणी विद्या ने जिसे अपने मुख में लील लिया था।

इसके पश्चात् परोपकार करने में चतुर वज्रकुमार ने गरुड़ विद्या द्वारा पवनवेगा राजकुमारी को मुख में लीलने से गीली तालु वाले उस मायामयी अजगर सर्प को पीड़ित कर दिया। उस विद्या-सिद्धि में होने वाले विस्तृत विघ्नों के नष्ट हो जाने के अनन्तर ही जब पवनवेगा राजकुमारी ने विद्या सिद्ध कर ली तब उसने मन में यह दृढ़ संकल्प किया—'अवश्य इस जन्म में मेरी प्राणरक्षा करनेवाला यही मेरा प्राणेश्वर (प्राणनाथ) होगा।

वाद में उस विद्याधरी ने वज्रकुमार को निम्न प्रकार उपदेश दिया—'इसी हिमवन पर्वत के पार्श्व-भाग पर वहने वाली नदी के तट पर सूर्य प्रतिमा (धर्मध्यान विशेष) का आश्रय किये हुए और तप के प्रभाव से समस्त प्राणियों की आपत्तियाँ नष्ट करने वाले संयमी आचार्यश्री के चरणकमलों के आसन के समीप श्रुताभ्यास करते हुए आपको यह विद्या सिद्ध होगी।' इसके वाद उस विद्याधरी ने वज्रकुमार के लिए, जो ऐसा प्रतीत होता था—मानों—नवीन कामदेव ही है, प्राणियों को जीवन-दान देने वाली व मनचाही प्रयोजन-सिद्धि की योग्यतावाली 'प्रज्ञप्ति' नाम की विद्या देकर अपनी नगरी के प्रति प्रस्थान किया।

पुनः वज्रकुमार ने उक्त आचार्यश्री के समक्ष नदी के तट पर प्रस्तुत बहुरूपिणी विद्या सिद्ध की। ऐसा होने से वज्रकुमार का पराक्रम दूसरों के द्वारा प्राप्त होने के अयोग्य दिव्यास्त्ररूपी साधनों से वृद्धिगत हुआ। अतः उसने अपने चाचा 'पुरन्दरदेव' को, जिसका भाग्य क्रम (राजनैतिक ज्ञान सम्पत्ति-आदि) व पराक्रम (सैन्य व कोषशक्ति) के अभाव से क्षीण हो गया था, निष्कपट रीति से नष्ट करके शीघ्र ही विजय श्री संबन्धी उत्सव-परम्परा वाली अमरावती नाम की नगरी में अपने पिता भास्कर देव को, जिसके चरणकमलों की सेवा समस्त विद्याधरों द्वारा की गई थी, राज्यासन पर बैठाया।

फिर जितेन्द्रिय वज्रकुमार ने ऐसी पवनवेगा नाम की विद्याधर-राजकुमारी के साथ विवाह किया, जिसने स्वयंवर के मिष से इच्छित पति प्राप्त किया है एवं जो कामदेव के सङ्गम से व्याप्त हुए शृङ्गार से मनोज्ञ थी और दूसरी विद्याधर-कन्याओं के साथ विवाह किया। तदनन्तर भाग्यशाली विद्याधर राजा द्वारा

१. गृहीताजगरसर्पवेषया। २. अजगरं। ३. मायाऽजगरसर्पं। ४. विघ्नः। ५. नदी। ६. विद्याधरी। ७. दत्वा। ८. नदी।

अन्यदा पुनरिष्टदुष्टज्ञातिप्रज्ञावज्ञाभ्यामात्मनः [1]परैधितत्वमवबुध्य[2] निजान्वयनिश्चये सति शारीरेषूपचारेषु[3] प्रवृत्तिरन्यथा निवृत्तिरित्याचरितसंगर[4]स्ताभ्यां[5] महामुनिमाहात्म्यमन्त्रवित्रासितदुरितनिशाचरायां[6] मथुरायां तपस्यतः सोमदत्तस्य भगवतः सनीडे[7] नीतस्त[8]दङ्गमुद्राप्रायमात्मकायमवसाय[9] संजातानन्दनिकायस्तावुभावप्युपनेतारौ [10]माता-पितरौ सादरमु[11]क्तियुक्तिभ्यां प्रतिबोध्यावधीरितोभयग्रन्थो निर्ग्रन्थश्चारणर्द्धिवृद्धिः समपादि।

भवति चात्रार्या—

तृणकल्पः श्रीकल्पः कान्तालोकश्चितो [12]चितालोकः। [13]पुण्यजनश्च स्वजनः कामविदूरे नरे भवति ॥२११॥

इत्युपासकाध्ययने वज्रकुमारस्य तपोग्रहणो नाम षोडशः कल्पः।

पुनर्महामहोत्सवोत्साहितातोद्यवाद्यनादमेदुर[14] प्रासादकन्दरायामेतस्यामेव मथुरायां किल [15]गोचराय चारणऋद्धि-युगलं नगरमार्गे संगतगतिसर्गं सत्तत्र द्वित्रि[16]परिवत्सर एवावस्थावसरे बालिकामेकां [17]चिल्लचिकिन[18]लोचनसनाथा-

---

पालने-योग्य वह वज्रकुमार ऐसे उन अनेक प्रकार के विलासों से, जो कि विद्याधरों के चित्त में संकल्पमात्र से प्राप्त होने वाले थे, समय यापन करने लगा।

एक बार जब इसने इष्ट गोत्रीजनों की बुद्धि से और दुष्ट गोत्रीजनों के अनादर से अपने को दूसरे के द्वारा पाला-पोषा हुआ समझा तब इसने प्रतिज्ञा की—'जब मुझे अपने वंश का निश्चय हो जायगा तभी मैं शारीरिक उपचार (स्नान व भोजन-आदि) में प्रवृत्ति करूँगा, अन्यथा उसका त्याग करूँगा।' तब उसके पालक माता-पिता उसे महामुनि के माहात्म्यरूपी मन्त्र से पापरूपी राक्षसों को भयभीत करने वाली मथुरा नगरी में तप करने वाले सोमदत्त नामके आचार्य श्री के समीप ले गए। तब वज्रकुमार ने अपनी शरीराकृति प्रस्तुत पूज्य आचार्य के शरीर-सरीखी निश्चय की, जिससे उसकी आत्मा में आनन्द-समूह की प्राप्ति हुई। पश्चात् इसने उन दोनों माता-पिता को सम्मानपूर्वक वचनों से और युक्ति से समझाकर बाह्य व आभ्यन्तर परिग्रहों का त्याग करके निर्ग्रन्थ साधु होकर चारण ऋद्धि की वृद्धि प्राप्त की।

इस विषय में एक आर्याच्छन्द है, उसका अर्थ यह है—जब मुमुक्षु मानव कामवासना का त्याग कर देता है अथवा समस्त परिग्रहों की अभिलाषाओं को छोड़ देता है तब उसे मनोज्ञ लक्ष्मी तृण-सरीखी प्रतीत होती है। और लोक में एकत्रित हुआ स्त्री-समूह मुर्दे की चिता-सरीखा मालूम पड़ता है एवं कुटुम्बीजन राक्षस-सरीखा प्रतीत होता है॥ २११॥

इस प्रकार उपासकाध्ययन में वज्रकुमार के तपग्रहण करने का निरूपण करने वाला सोलहवाँ कल्प समाप्त हुआ।

अथानन्तर महामहोत्सवों के अवसर पर बजाए जाने वाले वादित्रों की ध्वनि से स्थूल हुए भवनरूपी गुफाओं वाली इसी मथुरा नगरी में चारण ऋद्धिधारी दो मुनियों ने, जो कि आहार के लिए नगर-मार्ग में साथ-साथ गमन करने के निश्चय वाले थे, वहाँ पर दो तीन वर्ष की अवस्थावाली एक अनाथ बालिका देखी, जो कि दूषित (धुँधले) व छोटे नेत्रोंवाली थी व दूकानों के अङ्गणों पर वर्तमान धान्य-कण खानेवाली एवं

---

१. परपोषितत्वम्। २. ज्ञात्वा। ३. स्नानभोजनादौ। ४. कृतप्रतिज्ञः। ५. पितृभ्यां। ६. पापान्येव राक्षसाः यत्र सा तस्यां। ७. समीपे। ८. भगवच्छरीरसदृशं। ९. ज्ञात्वा। १०. 'ज्ञातिकरणे विक्रियाकर्तारौ' इति टि० (ख०) प्रतौ। 'जातिकरणादि क्रियाकर्तारौ' इति टि० (च०) प्रतौ। ११. वचन। १२. मृतकचितासदृशः। १३. राक्षससमानः। १४. स्थूल। १५. आहारार्थं। १६. वर्षद्वित्रिसमये। १७. दूषित। १८. अल्पं।

मनाक्कायमाङ्गणकणचारिणीं स्खलद्गमनविहारिणीं निरीक्ष्य [१]प्रतीक्ष्यः पश्चाच्चरः सुनन्दनाभिधानगोचरो भगवानेवम-वादीत्—'अहो, दुरालोकः खलु प्राणिनां कर्मविपाकः, यदस्यामेव दशायां क्लेशाय '[२]प्रभवति' इति ।

पुरश्चारी* भगवानभिनन्दननामधारी—'तपःकल्पद्रुमोत्पादनन्दन[३] सुनन्दनमुने, मैवं वादीः यद्यपीयं गर्भसंभूता सती राजश्रेष्ठिपदप्रवृत्तं समुद्रदत्तं पितरं जातमात्रा तद्वियोगदुःखोपसदां[४] धनदां मातरं प्रवर्धमाना च बन्धुजनमकाण्ड एव [५]दशमीं दशामानीय इदमवस्थान्तरमनुभवन्ती तिष्ठति, तथाप्यनया प्रौढयौवनयास्य मथुरानाथस्योर्विलादेवीविनोदावसथस्य पूतिकवाहनस्य महीनस्याग्रमहिष्या भवितव्यम्' इत्यवोचत् । एतच्च तत्रैव प्रस्तावे [६]पिण्डपाताय हिण्डमानः शाक्यभिक्षुरुपश्रुत्य[७] 'नान्यथा मुनिभाषितम्' इति निर्विकल्पं संकल्प्य, स्वीकृत्य [८]चैनामर्भिकामाहितविहा[९]-रवसतिकामभिलषितानु[१०]हारैराहारैरवीवृधत् । [११]जुहाव च बुद्धदासीति परिजनपरिहासतन्त्रेण [१२]गोत्रेण । ततो गतेषु केषुचिद्वर्षेषु [१३]भ्रमरकभङ्गा[१४]भिनयनभरते भ्रूविभ्रमारम्भोपाध्यायस्थानिनि लोचनविचा[१५]रचातुर्याचार्ये चतुरोक्तिचातुरी-प्रचार[१६]गुरुणि बिम्बाधरविकारसौन्दर्यकादम्बरीयोगे[१७] निम्नोन्नतप्रवेशप्रकाशनशिल्पिनि[१८] मनसिजगजमदोद्दीपनपिण्ड-

---

भूमि पर स्खलित गतिपूर्वक संचार करने वाली थी, पश्चात् पूज्य छोटे 'सुनन्दन' नाम के ऋषि ने कहा—,अहो-आश्चर्य है कि प्राणियों का कर्मोदय निश्चय से दुःख से भी जानने के लिए अशक्य है, क्योंकि वह (कर्मोदय) इतनी छोटी उम्र में भी कष्ट देने के लिए समर्थ होता है।'

इसे सुनकर 'अभिनन्दन' नामधारी, पूज्य ज्येष्ठ ऋषि ने कहा—'तपरूपी कल्पवृक्ष की उत्पत्ति के लिए नन्दनवन-सरीखे हे सुनन्दन मुनि ! ऐसा मत कहो। क्योंकि यद्यपि जब यह गर्भ में स्थित हुई तो राज-सेठ के पद पर प्रतिष्ठित हुए इसके पिता समुद्रदत्त को असमय में मरणावस्था में लाई और जन्मी हुई इसने पति के वियोग के दुःख को प्राप्त हुई 'धनदा' नामकी माता को असमय में काल-कवलित अवस्था में प्राप्त किया एवं बढ़ी हुई इसने अपने बन्धुजनों को असमय में मरणावस्था में प्राप्त किया। अब यह कष्टप्रद दूसरी अवस्था (दरिद्र व रुग्णावस्था) भोग रही है। तथापि जब यह प्रौढ़ युवती हो जायगी तब इसे 'उर्विला' नाम को पट्टरानी के विनोद के स्थान 'पूतिकवाहन' नाम के मथुरा नगरी के राजा की पट्टरानी होनी चाहिए।'

उसी मथुरा नगरी में इसी अवसर पर भिक्षा के लिए प्रस्थान कर रहे बौद्ध भिक्षु ने उक्त बात सुनकर निस्सन्देह विचार किया—'नान्यथा 'मुनिभाषितम्' अर्थात्—'ऋषि-वाणी मिथ्या नहीं होती', अत. उसने इस बालिका को ग्रहण करके बुद्ध मठ में स्थापित किया और वह इच्छानुकूल आहारों से इसका पालन-पोषण करने लगा और सेवकों की हास्य-परम्परा के पात्रभूत 'बुद्धदासी' इस नाम से बुलाने लगा।

जब कुछ वर्ष व्यतीत हुए तब ऐसे यौवन में, लावण्य सम्पत्ति से महान् हुई उस बुद्धिदासी ने, जो कि बुद्धमठ-संबंधी ऊँचे महल की शिखर के मध्य में बैठी हुई थी, भ्रमण से बुद्ध-मठ के समीप आने वाले 'पूतिक वाहन' नामके राजा को उत्कण्ठा के साथ देखा, जो (यौवन) केशों को कुटिल करने के अभिनय में नाट्य-शास्त्र-प्रणेता भरतऋषि-सरीखा है। जो भ्रुकुटी संबंधी विलास के आरम्भ करने में शिक्षक-जैसा है। जो नेत्रों के विचलन (भ्रमण) की निपुणता में आचार्य-सा है। जो चतुर वाणी के कथन की निपुणता में प्रवृत्ति करने से महान् है। जो बिम्बफल-सरीखे ओष्ठों के विकार के सौन्दर्य में सुरा के संबंध जैसा है। जो नीचे-

---

१. पूज्यः। २. समर्थो भवति कर्मविपाकः। *. ज्येष्ठः। ३. हे इन्द्रवन !। ४. प्राप्तां। ५. मरणावस्थां। ६. भिक्षार्थं। ७. श्रुत्वा। ८. बालां। ९. बुद्धस्थान। १०. सदृशैः। ११. आकारितवान्। १२. नाम्ना। १३. केश। १४. वक्रित। १५. विचलनं। १६. प्रवर्तनं। १७. सुरा। १८. सूत्रधारे।

पण्डिते शृङ्गारगर्भगतिरह[1]स्योपदेशिनि समस्तभुवनमनोमोहनसिद्धौषधे प्रतिदिनं प्रादुर्भावसविधे[2] सति यौवने सा रूप-संपन्महीयसी बुद्धदासी सोत्तालमुत्तुङ्ग[3]मङ्गप्रत्यङ्गोत्सङ्गसंगता तं [4]भ्रमणिकया कृतविहारोपान्तागमनं पूतिकवाहनं राजानमदर्शत् । राजा च ताम्—

'अलकवलयावर्तभ्रान्ता[5] विलोचनवीचिका[6] प्रसरविधुरा मन्दोद्योगा स्तनद्वयसैकते ।
त्रिवलिवलनश्रान्ता नाभौ पुनश्च निमज्जनादिह हि सरिति[7] प्रायेणैवं मतिर्मम वर्तते ॥ २१२ ॥'

इति विचिन्त्य, [8]चेतोभूविजृम्भप्रारम्भं [9]निवार्यावधार्य च, 'किमियं [10]विहितविवाहोपचारा, किं वाद्यापि [11]पतिंवरा' इति [12]भिक्षूनापृच्छ्य तत्र [13]'द्वितीयपक्षे सर्वथास्मत्पक्षे कर्तव्या' इति समर्पिताभिलाषमाप्तपुरुषं [14]प्रेष्य [15]रणरणकजडान्तःकरणः [16]शरणमगात् । आप्तपुरुषोऽप्यग्रमहिषीपदपणबन्धेन[17] साध्यसिद्धिं विधाय स्वामिनं तत्स-मागमिनमकरोत् ।

भवति चात्रार्या—

पुण्यं वा पापं वा यत्काले जन्तुना पुराचरितम् । तत्तत्समये तस्य हि सुखं च दुःखं च योजयति ॥ २१३ ॥

ऊँचे शारीरिक प्रदेशों (अङ्गोपाङ्गों) के प्रकाशन करने में सूत्रधार-सा है। जो कामदेवरूपी हाथी के मद को उद्दीपित करने में विशेष निपुण है। जो शृङ्गार रस के भीतरी ज्ञान के गोप्यतत्त्व का उपदेष्टा है और जो समस्त लोक के मन को मोहित करने वाली सिद्ध-औषधि-सा है एवं जो प्रतिदिन वृद्धि के निकट है।

पश्चात् राजा ने उसे देखकर निम्नप्रकार विचार किया—

'इस स्त्रीरूपी नदी में मेरी बुद्धि प्रायः इस प्रकार हो रही है—वह उसके केशपाशरूपी भँवर में पड़ने से भ्रान्त (एक जगह न ठहरने वाली) है। जो नेत्ररूपी तरङ्गों के प्रसार से पीड़ित है। जो दोनों स्तनरूपी बालकामय प्रदेश पर पहुँचने से मन्द उद्योग वाली है। फिर जो त्रिवलियों में भ्रमण करने से थकित है और पुनः जो नाभि में डुबकी लगाने से भी क्लान्त है* ॥ २१२ ॥'

फिर उसने काम के विस्तार को रोककर और निश्चय करके मन्त्री को अपनी अभिलाषा प्रकट करके बुद्धभिक्षुओं से पूँछने को कहा—क्या, इसका विवाह हो चुका है? अथवा अभी तक कन्या है? यदि कन्या है? तो इसे मेरे-अधीन करनी चाहिए।'

फिर उसका मन अरतिजनक घटना से जड़ हो गया और उसने अपने महल की ओर प्रस्थान किया। यहाँ पर मन्त्री ने पट्टरानी पद देने की प्रतिज्ञा द्वारा प्रस्तुत कार्य सिद्ध करके राजा का उसके साथ विवाह कर दिया।

इस विषय से एक आर्याच्छन्द है उसका अर्थ यह है—

इस प्राणी ने पूर्व काल में जिस समय पुण्य अथवा पाप कर्म किया है वह (पुण्य व पाप) उसे समय आने पर निश्चय से क्रमशः सुखी व दुःखी बना देता है ॥ २१३ ॥

---

१. गोप्यतत्त्व। २. समीपे। ३. उपरितनभूमि। ४. भ्रमण। ५. कल्लोल। ६. कल्लोल। ७. क्व योषिन्नद्यां मम मतिरीदृशी वर्तते। ८. मनोभूप्रसरणं। ९. एकत्रीकृत्य। १०. कृत। ११. कन्या वा। १२. बौद्धान्। १३. चेत् कन्या भवति तर्हि ममाधीना कर्तव्येति। १४. मन्त्रिणं। १५. कलमल (अरतिजनक)। १६. गृहं। १७. प्रतिज्ञया। *, रूपकालंकारः।

इत्युपासकाध्ययने बुद्धदास्याः पूतिकवाहनवरणो नाम सप्तदशः कल्पः ।

अथ समायाते भव्यजनानन्दसंपादितकर्मणि नन्दीश्वरपर्वणि तया पतिप्रणयप्रेयस्या बुद्धदास्या प्रतिचातुर्मास्यमौर्विलादेव्याः स्यन्दनविनिर्गमेण भगवतः सकलभुवनोद्धरणकारणस्थितेर्जिनपतेर्महामहोत्सवकरणमुच्छेत्तुमिच्छन्त्या*[1] [2]शुद्धोदनतनयस्येष्टार्थमष्टाहा[3] सकलपरिवारानुगतमेतदुचितमुपकरणजातमवनिपतिर्याचितस्तथैव प्रत्यपद्यत । ऊर्विलादेव्यपि सुभगभावात्सपत्नीप्रभवं दौर्जन्यमनन्यसामान्यमप्रतीकारमाकलय्य सोमदत्ताचार्यमुपसद्य [4]'भगवन्, यद्येतस्मिन्द्वित्रिदिनभाविन्यष्टाहामहे पूर्वक्रमेण जिनपूजार्थं मथुरायां मदीयो रथो भ्रमिष्यति, तदा मे देहस्थितिहेतुषु वस्तुषु साभिलाषं मनः, अन्यथा निरभिलाषम्' इति [5]प्रतिजिज्ञासमाना तेन सोमदत्तेन भगवता तन्मनोरथसमर्थनार्थमवलोकितवक्त्रेण वज्रकुमारेण साधुना साधु संबोधिता 'मातः, [6]सम्यग्दृशामेणीदृशामवाप्तप्रथमकथे, अलमलमावेगेन । यतो न खलु मयि तव [7]समयसविव्याशिवस्तके पुत्रके सति भविताहंतामर्हणायाः[8] प्रत्यवायः[9] । तत्स्वस्थं पूर्वस्थित्यात्मस्थाने स्थातव्यम्' इति हृद्यमनवद्यमभृषोद्यं च निगद्य, आसाद्य[10] च [11]द्युगतिविद्याधरपुरं महामुनितया बान्धवधिषणतया च निखिलेन

इस प्रकार उपासकाध्ययन में बुद्धदासी का पूतिक-वाहन राजा के साथ विवाह का निरूपण करने वाला यह सत्तरहवाँ कल्प पूर्ण हुआ।

इसके पश्चात् जिसमें भव्यजनों के आनन्द-जनक धार्मिक कार्य पाये जाते हैं ऐसा 'नन्दीश्वर पर्व' जब आया तब 'पूतिकवाहन' राजा की प्रेमपत्नी पट्टरानी 'बुद्धदासी', जो कि समस्त लोक का उद्धार करने वाले भगवज्जिनेन्द्र तीर्थङ्कर के महामहोत्सव विधान को, जो कि प्रतिवर्ष चातुर्मास संबंधी नन्दीश्वर पर्व में उर्विला रानी द्वारा जिनेन्द्रदेव का रथ निकाल कर किया जाता था, नष्ट भ्रष्ट करने की इच्छा कर रही थी, उसने आठ दिन तक बुद्धदेव की पूजा की आयोजना की। अतः उसने राजा पूतिकवाहन से भगवान् गौतम बुद्ध की पूजा के लिए आठ दिन तक समस्त अनुचर-वर्ग-सहित रथयात्रा के योग्य उपकरण-समूह के देने की याचना की तो राजा ने समस्त उपकरण-समूह-आदि के देने को स्वीकृति दे दी।

जब उर्विला रानी ने पति की प्रेमपात्र होने से अपनी सौत से उत्पन्न हुई, असाधारण व प्रतीकार करने के लिए अशक्य दुर्जनता का निश्चय किया तब उसने सोमदत्त आचार्य के पास प्राप्त होकर ऐसी प्रतिज्ञा करने की इच्छुक होकर कहा—'भगवन्! यदि इस दो तीन दिन में होने वाले अष्टाह्निका पर्व के महोत्सव में पूर्व क्रम के अनुसार जिनेन्द्र भगवान् की पूजा के निमित्त से मेरा रथ मथुरा में निकलेगा तो मेरा मन शारीरिक स्थिति की कारणीभूत वस्तुओं (अन्न व जलादि) के ग्रहण करने का इच्छुक होगा, अन्यथा नहीं।'

उक्त बात को सुनकर पूज्य सोमदत्त आचार्य ने उसकी अभिलाषा सफल (पूर्ण) करने ने लिए मुनि वज्रकुमार के मुख की ओर देखा।

पश्चात् वज्रकुमार साधु ने उसे अच्छी तरह आश्वासन दिया और उससे निम्न प्रकार मनोहर, निर्दोष व यथार्थ वचन कहे—

'सम्यग्दृष्टि मृगनयनी महिलाओं में आगे वर्णन-योग्य माता! इस विषय में खेद मत करो। क्योंकि

---

१. उच्छेदनं कर्तुमिच्छन्त्या। *. 'उत्सेत्तुमिच्छन्त्या' इति मु० व ख०। २. बौद्धस्य। ३. अष्टाह्नी टि० ख०। 'अहानि दिनानि, अह्नोऽस्त्री नपुंसकलिङ्गत्वात्। स्त्रीलिङ्गे डापि डी विधौ च सति अहा, अह्नी इति च भवति, अष्टाहा इत्यभूत्। अस्याह्न; स्त्रियां त्रैरूप्यं—अष्टाहा, अष्टाही, अष्टाह्नीति'। इति पञ्जिकाकारः। ४. प्राप्य। ५. प्रतिज्ञां कर्तुमिच्छन्ती। ६. सम्यक्त्वसहितानां स्त्रीणां मध्ये धुरि वर्णनीये। ७, जैनजननमातुः। ८. ९. न भविष्यति कोऽपि विघ्नः पूजायाः विघ्नो न भविष्यति। १०. प्राप्य। ११. द्युगत्या आकाशगमनेन।

भास्करदेवमुख्येनाम्बरचरचक्रेण क्रमशः कृताभ्युत्थानक्रियः सप्रश्रयमागमनाय[1]समापृष्टः स्पष्टमाचष्ट ।

तदनन्तरमानन्ददुन्दुभिनादोत्तालक्ष्वे[2]लितमुखरमुखमण्डलैः, [3]सामयिकालंकारसारसज्जितगजवाजिविमानगमन-प्रचलत्कर्णकुण्डलैः, अनेकानर्घमणिकिङ्किणीजालजटिल[4]दुकूलकल्पि[5]तपालिध्व[6]जराजिविराजितभुजपञ्जरैः,[7] करि-मकरसिंहशार्दूलशरभकुम्भी[8]रझष[9]रथाङ्ग[10]नेत्रवरपुरःसराकारपताकासंतानस्तिमितकरैः,[11] मानस्तम्भस्तूपतोरणमणिवि-तानदर्पणसितातपत्रचामरविरो[12]चनचन्द्रभद्रकु[13]म्भसंभृतशयैः,[14] अतुच्छदेव[15]च्छन्दावि[16]च्छिन्नकर्णी[17]रथस्यन्दनद्विप-तुरगनरनिकीर्णसैन्यनिचयैः, सजयघण्टापटुपटहकर[18]टामृदङ्गशङ्खकाहलत्रिविलतालझल्लरीभेरिभ[19]म्भादिवाद्यानुगतगीत-संगताङ्गना[20]भोगसुभगसंचारैः, 'कुब्जवामनकिरा[21]तकितवनटनर्तकवन्दिवाग्जीवनविनोदानन्दितदिविजमनस्कारैः, सखे[22]-लखेचरसहचरीहस्तविन्यस्तस्वस्तिकप्रदीपधूपनि[23]धप्रभृतिविचित्रार्चनोपकरणरमणीयप्रसरैः, पिष्टा[24]तकपटवासप्रसूनोपहा-

---

जब तुझ धर्म-माता की चिन्ता करने वाला मेरे-सरीखा पुत्र वर्तमान है तब निश्चय से अर्हन्त-पूजा में कोई विघ्न नहीं होगा। अतः आप पूर्व की तरह निश्चिन्त होकर अपने महलों में जाकर बैठिए।

इसके बाद वज्रकुमार मुनि आकाशगामिनी विद्या से विद्याधर भास्करदेव के नगर में पहुँचे। महा-मुनि होने से समस्त बान्धवों में बृहस्पति-सरीखे महाविद्वान् होने से भास्करदेव की प्रधानता वाले समस्त विद्याधर-समूह ने इनका अच्छा सत्कारादि किया और विनयपूर्वक उनके आने का कारण पूँछा।

वज्रकुमार ने सब समाचार स्पष्ट रूप से कहा, अर्थात्—उर्विला महादेवी का रथ निकालने के लिए सैनिक सहायता माँगी।

इसके बाद मथुरापुरी के नागरिकों ने वज्रकुमार मुनि को महान् इक्यासी लड़ों वाले हारों से सघन पालकी, रथ, हाथी, घोड़े व पैदल सैनिकों से भरे हुए सैन्य-समूहों के साथ एवं पूजा के योग्य उपकरण-समूह को धारण करने वाले दूसरे विद्याधरों के साथ आकाश से उतरे हुए देखा। जिनके (सैन्य-समूहों के) मुखमण्डल आनन्द-दायक दुन्दुभि बाजों की ध्वनि से उत्कट हुए सिंघनाद की ध्वनि से मुखरित थे। जिनके कानों के कुण्डल यात्रोचित श्रेष्ठ आभूषणों से सजाए हुए हाथी, घोड़ों व विमानों द्वारा गमन करने से कम्पित हो रहे थे। जिनके हाथ अनेक महामणियों की क्षुद्र घण्टियों के समूह से ग्रथित हुए रेशमी वस्त्रों से रचीं हुईं लघु ध्वजाओं की श्रेणी से सुशोभित थे। जिनके हाथ, हाथी, मकर, शेर, शार्दूल, अष्टापद, नाका, मछली व गरुड़-आदि की मुख्य चिह्नों वाली पताकाओं की श्रेणी से निश्चल हो रहे थे। जिनके हाथ मानस्तम्भ, स्तूप, तोरण, मणि-समूह, दर्पण, श्वेतच्छत्र, चमर, सूर्य, चन्द्रमा, और पूर्ण कुम्भ को धारण किए हुए थे। जिनका (विद्याधरों का) गमन जयघण्टा से सहित महाभेरी, करटा (वाद्यविशेष), मृदङ्ग, शङ्ख, काहल (बड़ा ढोल), त्रिविल (वाद्यविशेष), ताल, झल्लरी, हुडुक्का (वाद्यविशेष), भम्भा-आदि वादित्रों के अनुकूल गान करने वाली कमनीय विद्याधरियों के शरीर से मनोज्ञ है। जिन्होंने देवताओं के मन, कुब्ज, बोना, किरात, जुआरी, नट, नर्तक, स्तुति पाठक—वन्दियों व भाटों के विनोदों से आनन्दित किये हैं। जिनके गमन, क्रीड़ा करने वाली विद्याधरियों के हाथों पर रक्खे हुए स्वस्तिक (सौंथिया), दीपक, धूप-घट-आदि विचित्र पूजाओं के

---

१. कारणं। २. हस्तमुखसंयोगजो ध्वनिः। ३. यात्रोचित। ४. मिश्र। ५. रचित। ६. लघुध्वज। ७. हस्तैः। ८. जलचर। ९. मत्स्य। १०. गरुड़। ११. 'कम्पितहस्तैः' टि० ख० ? 'झंपितहस्तैः' टि० च०। १२. सूर्य। १३. पूर्णकुम्भ। १४. हस्तैः। १५. एकाशीति यष्टिको हारः। १६. निरन्तर। १७. शिविका। १८. करट। १९. हुडुक्काः। २०. शरीर। २१. किरातः स्यादल्पतनौ। २२. सक्रीड। २३. घट। २४. नामचूर्ण।

राभिरामरमणीनिकरैः, अपरैश्च तैस्तैर्विबुधपूजापर्यायपरिवारैर्विहायोविहारैः[1] सह तं वज्रकुमारभगवन्तमम्बरादवतरन्त-मुत्प्रेक्ष्य [2]'भिक्षुदीक्षापटीयसी पुण्यभूयसी खलु बुद्धदासी, यस्याः [3]सुगतसपर्यासमये समायातं सकलमेतत्सुरसैन्यम्' इति कृतवितर्के पौरजनान्तःकरणे सति स भगवान्गगनगमनानीकैः साकमौर्विलानिलये निलीय[4] साष्टम्भमष्टाह्नी[5] मथुरायां [6]चक्रचरणं परिभ्रमय्याहंत्प्रतिबिम्बाङ्कि[7]तमेकं स्तूपं तत्रातिष्ठिपत् । अतएवाद्यापि तत्तीर्थं देवनिर्मिताख्यया प्रथते[8] । बुद्धदासी दासीदासीकृतभग्नमनोरथा ।

भवति चात्र श्लोकः—

और्विलाया महादेव्याः पूतिकस्य महीभुजः । स्यन्दनं भ्रमयामास मुनिर्वज्रकुमारकः ॥ २१४ ॥

इत्युपासकाध्ययने प्रभावनविभावनो नामाष्टादशः कल्पः ।

अर्थित्वं भक्तिसंपत्तिः प्रयुक्तिः* सत्क्रियाविधिः । सधर्मसु च [9]सौचित्यकृतिर्वत्सलता मता ॥ २१५ ॥

स्वाध्याये संयमे सङ्घे गुरौ सब्रह्मचारिणि[10] । यथौचित्यं कृतात्मानो[11] विनयं प्राहुरादरम् ॥ २१६ ॥

आधिव्याधिनिरुद्धस्य निरवद्येन कर्मणा । सौचित्यकरणं प्रोक्तं वैयावृत्यं विमुक्तये ॥ २१७ ॥

उपकरणों से मनोहर थे। जिनका कमनीय कामिनी-समूह, पिष्टातक नाम का सुगन्धित चूर्ण, पटवास (वस्त्र सुगन्धित करने वाली द्रव्य-विशेष-सेंट-आदि) व पुष्पोपहार से मनोज्ञ है।

इसके बाद जब नागरिकों के हृदय में ऐसी बुद्धि उत्पन्न हुई—'यह बुद्धदासी निस्सन्देह बौद्ध दीक्षा में विशेष निपुण व पुण्यात्मा है, उसी की बुद्ध-पूजा के अवसर पर यह समस्त देव-सेना आई हुई है।'

किन्तु उस वज्र कुमार मुनि ने विद्याधर-सैनिकों के साथ और्विला महादेवी के महल में अवतरण करके अष्टाह्निका पर्ववाली मथुरा नगरी में गर्व-सहित रथ निकलवाया एवं उस नगरी में तीर्थङ्कर भगवान् की प्रतिमा-सहित एक स्तूप स्थापित किया। इसी से आज भी वह तीर्थ देव-निर्मित नाम से प्रसिद्ध हो रहा है। इसे देखकर दासी-सरीखी बुद्धदासी का मनोरथ भग्न हो गया।

इस विषय में एक श्लोक है, जिसका अर्थ यह है—

वज्रकुमार मुनि ने राजा 'पूतिक वाहन' की रानी महादेवी उर्विला के रथ का विहार कराया ॥२१४॥

इसप्रकार उपासकाध्ययन में प्रभावना अङ्ग का वर्णन करनेवाला अठारहवाँ कल्प समाप्त हुआ।

अब वात्सल्य अङ्ग का निरूपण करते हैं—

धार्मिक पुरुषों का प्रयोजन दान-मानादि द्वारा सिद्ध करना, उनके गुणों में प्रीतिरूपी सम्पत्ति, हित, मित व प्रिय वचन बोलना, उनका आदर-सत्कार करना और साधर्मी जनों को दान व प्रिय वचनों द्वारा सन्तोष उत्पन्न करना यह वात्सल्य अङ्ग माना गया है ॥ २१५ ॥ स्वाध्याय, संयम (प्राणिसंयम व इन्द्रिय-संयम), मुनि संघ, गुरु (आरम्भ-परिग्रह से रहित, विषयों की आशा से रहित एवं ज्ञान, ध्यान व तप में लवलीन रहने वाले साधु) और सहाध्यायी को दान-मानादि से सन्तुष्ट करना व उनके आदर-सत्कार करने को आत्मतत्व के वेत्ता आचार्य विनय कहते हैं ॥ २१६ ॥ मानसिक व्यथा व शारीरिक रोगों से पीड़ित धर्मात्मा पुरुषों की निर्दोष (निष्कपट) विधि से औषधि-आदि देकर सेवा-शुश्रूषा करना वैयावृत्य कहा गया

---

१. विद्याधरैः । २. बौद्ध । ३. बुद्धपूजा । ४. अवतीर्य । ५. अष्टाह्नी उपलक्षितायां । ६. रथं । ७. सहितं । ८. प्रकाशतां । *. 'प्रियोक्तिः' क० । ९. सौमनस्यं । १०. समानशीले । ११. कृतो निश्चितः आत्मा स्वरूपं यैः ।

जिने जिनागमे सूरौ तपःश्रुतपरायणे । सद्भावशुद्धिसंपन्नोऽनुरागो भक्तिरुच्यते ॥ २१८ ॥
चातुर्वर्ण्यस्य सङ्घस्य यथायोग्यं प्रमोदवान् । वात्सल्यं यस्तु नो कुर्यात्स भवेत्समयी कथम् ॥ २१९ ॥
[1]तद्व्रतैर्विद्यया वित्तैः शारीरैः श्रीमदाश्रयैः[2] । त्रिविधात[3]कृच्छ्रसंप्राप्तानुपकुर्वन्तु संयतान् ॥ २२० ॥

श्रूयतामत्रोपाख्यानम्—अवन्तिविषयेषु [4]सुधान्धःसौधस्पर्धिशालायां[5] विशालायां पुरि प्रभावतीमहादेवीभजित-शर्मसीमा जयवर्मनामा [6]काश्यपीश्वरः शाक्यवाक्यवारिधिविक्रान्तिनक्रेण[7] शुक्रेण चार्वाकलोकदिवस्पतिना[8] बृहस्पतिना रुद्रमुद्रानु[9]द्रितविवेकेन प्रह्लादकेन चानुजेनानुगतेन वेदविद्याबलिना बलिना सचिवेन चिन्त्यमानराज्यस्थिति-रेकदा समस्तशास्त्राभ्यासवर्षविस्फारितसरस्वतीतरङ्गपरम्पराप्लावनपवित्रितविनेयजनमनोनलिननिकुरम्बस्य परमतपश्च-रणगुणग्रहणाजि[10]ह्मब्रह्मस्तम्बस्य[11] महामुनिपञ्चशतीवर्यस्य भगवतोऽकम्पनाचार्यस्य महर्द्धिभुषः सर्वजनानन्दनं नाम नगरोपवनमधि[12]तस्थुषश्चरणार्चनोपचाराय राजमार्गेषु महामहोत्सवोत्साहो[13]त्सेकिपरिजनं पौरजनमभ्रंलिहगेहाग्रभागा[14]-

है, जो कि मुक्ति श्री की प्राप्ति का कारण है ॥ २१७ ॥ वीतराग सर्वज्ञ जिनेन्द्र तीर्थङ्कर भगवान् में, उनके द्वारा कहे हुए द्वादशाङ्ग रूप शास्त्र में, आचार्य में, तप में तत्पर हुए साधु में और श्रुत के पारदर्शी उपाध्याय परमेष्ठी में विशुद्ध भाव पूर्वक प्रकट हुए अनुराग को आचार्यों ने भक्ति कहा है ॥ २१८ ॥ जो प्रमुदित होकर मुनि, ऋषि, यति व अनगार इन चार प्रकार के संघ के प्रति यथायोग्य वात्सल्य नहीं करता वह धर्मात्मा कैसे हो सकता है ? ॥ २१९ ॥ अतः व्रतों के देने द्वारा, शास्त्रों के अध्यापन द्वारा, धन के दान द्वारा, उनके शरीर की सेवा द्वारा एवं उत्तम (तप व स्वाध्याय के योग्य) स्थान के दान द्वारा शारीरिक (बुखार व गल-गण्ड-आदि), मानसिक (काम-क्रोधादि) व आगन्तुक (अतिवृष्टि-आदि) दुःखों से पीड़ित हुए संयमी जनों का उपकार करना चाहिए ॥ २२० ॥

अब वात्सल्य अङ्ग में प्रसिद्ध विष्णुकुमार मुनि की कथा कहते हैं—

अवन्तिदेश की उज्जयिनी नामकी नगरी में, जिसके भवन देवों के भवनों से स्पर्धा करने वाले हैं, प्रभावती महादेवी के अधीन हुई सुख-सीमावाला 'जयवर्मा' नाम का राजा राज्य करता था, जिसका राज्य-संरक्षण चार मन्त्रियों द्वारा सम्पन्न होता था। १. बौद्ध-सिद्धान्तरूपी समुद्र में प्रविष्ट होने के लिए मकर-सरीखा (बुद्ध मतानुयायी) 'शुक्र'। २. नास्तिक-मत में इन्द्र-सा बृहस्पति। ३. रुद्र-मुद्रा से उत्कट बुद्धिवाला (शैव-सम्प्रदाय का अनुयायी) प्रल्हादक और ४. बलि नामका मंत्री, जो कि प्रल्हादक का छोटा भाई व उसका अनुयायी एवं वेदविद्या में पारंगत (वैदिक मतानुयायी) था।

एक बार राजा गगनचुम्बी महल के अग्रभाग पर आरोहण के अवसर पर 'दिग्विलोकानन्द' नाम के राजमहल पर स्थित था। उन्होंने ऐसे अकम्पनाचार्य के चरण कमलों की पूजा के लिए राजमार्ग से जाते हुए नागरिक मनुष्य-समूह को देखा, जिसका कुटुम्बीजन महापूजा का उत्सव देखने के उत्साह से गर्वित था। जो कि (अकम्पनाचार्य) एक समय उक्त नगरी के 'सर्वजनानन्द' नाम के बगीचे में आकर ठहरे हुए थे, जो पाँच-सौ महामुनियों के संघ में प्रधान थे, जिन्होंने शिष्यजनों का मनरूपी कमल-समूह समस्त शास्त्रों की अभ्यास-रूपी वृष्टि से बढ़ी हुई सरस्वती (द्वादशाङ्ग वाणी) रूपी नदी की तरङ्ग परम्परा में स्नान कराने से पवित्र

१. व्रतदानेन उपकारं कुर्वन्तु। २. उत्तमस्थानैः कृत्वा। ३. शारीरमानसागन्तुक। ४. सुधान्धसोऽमृतभोजनाः देवाः। ५. उज्जयिन्यां। ६. भूपतिः। ७. मकरेण। ८. इन्द्रेण। ९. उत्कट। १०. सरल, पटु। ११. स्तम्बः आलान-गुल्मयोः, ब्रह्मादीनां प्रकाण्डे च, भुवनत्रयं, पटुभुवनत्रयस्य। १२. स्थितवतः। १३. गर्वित। १४. आरोहणावसरे।

वसरे त्रिविलोकानन्वमन्दिरे स्थितः समवलोक्य 'कोऽयमकाण्डे प्रचण्डः पौराणामुत्सा[1]वोद्योगे नियोगः[2] इति वितर्कयन्, सकलसम[3]यसंभविप्रसूनस्तिमि[4]तहस्तपल्लवान्तरालाद्वनपालात् 'देव, भवद्दर्शनोत्सुकवनदेवतालोचने भगवत्तपःप्रभावप्रवृत्तसमस्तर्तून्मावितमेदिनीनन्दने[5] निजलक्ष्मीविलक्ष्यीकृ*तगन्धमादने पुरोपवने सद्गुणश्रीसंपा[6]दितसमूहेन महता मुनिसमूहेन सह सर्वसत्त्वानन्दप्रदानोदाराभिधासुधाप्रबन्धावधीरितामृतमरीचिमण्डलो[7] निखिलदिक्पालमौलिमणिनायकमुकु[8]रन्दीभवत्पावनखमण्डलः पुण्यद्विपयूथबन्धनवारिरकम्पनसूरिः समायातः। तदुपासनाय चास्योज्जयिनीजनस्य[9] महामहावहद्धिवसोत्साहः' इत्याकर्ण्य प्रतूर्णमेतत्पादवन्दनोद्यतहृदयस्तत्र गमनाय तं मिथ्यात्वप्रबलतालताश्रयकलिं[10] बलिमपृच्छत्।

सद्धर्मधुरोद्धरण[11]गलिर्बलिः—'देव,

न वेदादपरं तत्त्वं न श्राद्धादपरो विधिः। न यज्ञादपरो धर्मो न द्विजादपरो यतिः ॥ २२१ ॥'

किया था। जिसने उत्कट तपश्चर्या रूपी गुण धारण करने से तीन लोक को सरल किया था एवं जो महाऋद्धिधारी थे।

तब उसने विचार किया—'नागरिकों की यह तेज उत्सव देखने की प्रवृत्ति असमय में क्यों हो रही है ?'

इतने में ही उसने वनपाल से, जिसके हस्त पल्लव का मध्य-भाग समस्त छह ऋतुओं में होने वाले पुष्पों से निश्चल था, निम्नप्रकार वृत्तान्त सुना—

'हे राजन् ! आपकी नगरी के ऐसे उपवन में, जहाँ पर वनदेवता के नेत्र आपके दर्शनार्थ उत्कण्ठित हैं। जिसमें आये हुए पूज्य अकम्पनाचार्य की तपश्चर्या के प्रभाव से प्रवृत्त हुईं छह ऋतुओं द्वारा वृक्ष विकसित किये गए हैं। जिसने अपनी सौगन्ध्य लक्ष्मी द्वारा गन्धमादन (पर्वत विशेष) को तिरस्कृत या शोभा-रहित किया है। प्रशस्त गुणरूपी लक्ष्मी से यथार्थ विचार प्राप्त करने वाले महान् मुनिसंघ के साथ, ऐसे श्री अकम्पनाचार्य आये हुए हैं, जिसने समस्त प्राणियों को आनन्द देनेवाले महान् वचनरूप अमृत-समूह द्वारा चन्द्र-मण्डल तिरस्कृत किया है, जिसके चरणों का नख-मण्डल [नम्रीभूत] समस्त दिक्पालों के मुकुटों में जड़े हुए श्रेष्ठ मणियों से दर्पण-सरीखा हो रहा है और जो पुण्य रूपी हाथियों के झुण्ड के बन्धन के लिए खूँटा-सरीखा है, उनकी उपासना करने के लिए इस उज्जयिनी नगरी के मनुष्यों के चित्त में महान् पूजाकारक उत्साह उमड़ रहा है।'

फिर उक्त आचार्यश्री के चरणों की वन्दना के लिए उद्यत हृदय वाले राजा ने वहाँ प्रस्थान करने के लिए बलि नाम के मंत्री से पूँछा, जो मिथ्यात्व की विशेष प्रबलतारूपी लता के आश्रय के लिए बहेड़ा के वृक्ष-सरीखा है।

तब सच्चे धर्म की धुरा को उखाड़कर फैंक देने में दुष्ट बैल-सरीखे बलि मन्त्री ने कहा—'राजन् ! वेद से दूसरा कोई तत्व नहीं है। श्राद्ध से उत्कृष्ट कोई विधि नहीं है। यज्ञ से महान् कोई दूसरा धर्म नहीं है और ब्राह्मण से उत्कृष्ट कोई दूसरा साधु नहीं है ॥ २२१ ॥

---

१. उत्सव। २. कोऽधिकारः। ३. षड्ऋतुः। ४. निश्चल। ५. वृक्षे। *. 'विलक्षीकृत' क०। ६. संपादितः सम्यगूहो विचारो येन। ७. चन्द्रः। ८. दर्पणीभवत्। ९. महापूजाकारकः। १०. बिभीतकतरुं। ११. गलिर्दुष्टवृषः शक्तोऽप्यधूर्वहः कर्मायोग्यो बलिः।

सन्मार्गसर्गोच्छेदकः प्रह्लादकः—

[1]'अद्वैतान्न परं तत्त्वं न देवः शंकरात्परः । शैवशास्त्रात्परं नास्ति भुक्तिमुक्तिप्रदं वचः ॥ २२२ ॥'

तथा नास्तिक्याधिक्यवाक्यवाचस्पती [2]शुक्रबृहस्पती अपि राज्ञे स्वप्रतिज्ञां विज्ञापयामासतुः । मनागन्तःक्षुभितमतिः [3]क्षितिपतिः—'अहो दुर्जनतालतालम्बनकुजाः द्विजाः, किं ममैव पुरतो भवतां भारती प्रगल्भते । किं वा बुधप्रवेकस्य[4] लोकस्यापि । सन्नीतिवसुमतीविदारणहलि[5]र्बलिः—[6]'इलापाल, यदि तवास्मन्मनीषोत्कर्षविषये सेर्ष्यं मनः, तदास्तां तावदभ्यस्तशास्त्रप्रवीणप्रज्ञः परः प्राज्ञः । किन्तु सर्वज्ञस्यापि [7]वादेर्वादे पुरस्तात्परिगृहीतविद्यानवद्या एव ।' स्थिरप्रकृतिः क्षोणीपतिः—'यद्येवं शूराणां कातराणां च रणे व्यक्तिर्भविष्यति' इत्यभिधायानन्ददुन्दुभिरवोपार्जितपरिजनपूजोपकरणो विजयशेखरं नाम करिणमारुह्यान्तःपुरानुगमप्राह्यो[8]ऽतिवाह्य[9] बाह्यनगरमार्गमुपगतारामसीमसंसर्गः, ततः करिणोऽवतीर्य गृहीतार्यवेषपरिकरः कतिपयाप्तपरिवारपुरःसरस्तं व्रतविद्यानवद्यं भगवन्तं यथावदभिवन्द्य समाचरितनीचासनपरिग्रहः सविनयाग्रहं [10]स्वर्गापवर्गस्वरूपनिरूपणपरायणः सद्धर्मसनाथां कथां प्रथयामास[11] । सत्कर्मवंश[12]प्रभिदलि-

---

सन्मार्ग की सृष्टि का उच्छेद करनेवाले प्रह्लादक मंत्री ने कहा—'अद्वैत से महान् दूसरा कोई तत्व नहीं है, शङ्कर से उत्कृष्ट दूसरा कोई देवता नहीं है और शैव शास्त्र से बढ़कर दूसरा कोई भुक्ति (सांसारिक भोग) व मुक्ति को देनेवाला शास्त्र नहीं है ॥ २२२ ॥'

विशेष नास्तिक दर्शन के वचन बोलने के लिए बृहस्पति नाम के दो मन्त्रियों ने भी राजा के लिए अपने सिद्धान्त विज्ञापित किये (समझाए) ।

फिर कुछ चित्त में कोप से कलुषित बुद्धिवाले राजा ने कहा—'अहो दुष्टतारूपी लता के आधारदान में वृक्ष-सरीखे ब्राह्मणो ! क्या मेरे ही सामने आपकी वाणी बोलने में समर्थ होती है ? या महाविद्वान् लोक के सामने भी आपकी वाणी बोलने में समर्थ होती है ?'

पुनः प्रशस्त नीतिरूपी पृथिवी के विदारण के लिए महान् हल-सरीखा बलि बोला—'हे पृथिवी पालक ! यदि हमारी बुद्धि की महत्ता के विषय में आपका मन ईर्ष्या-युक्त है तो शास्त्रों के अभ्यास से प्रवीण बुद्धिवाले विद्वान् की तो बात ही क्या है ।

यदि हम लोगों के सामने सर्वज्ञ ही वादी होकर शास्त्रार्थ करने उपस्थित हो जाय तो उसके सामने भी हमारी विद्या निर्दोष ठहरेगी ।

'यदि ऐसा है तो शूरवीर और कायरों की परीक्षा रण में ही होगी ।'

ऐसा कहकर स्थिर स्वभाव-वाला राजा आनन्द दुन्दुभि की ध्वनि के साथ अनुचर-वर्ग व पूजा के उपकरण प्राप्त करता हुआ व अन्तःपुर का सहगमन न रोककर विजय शेखर नाम के हाथी पर चढ़कर चल दिया और नगरी के वाह्यमार्ग का उल्लङ्घन करके मुनि के उद्यान की सीमा का संग प्राप्त करते ही हाथी से उतर पड़ा और शिष्ट पुरुष का वेष व कुटुम्बी जनों को ग्रहण करनेवाले एवं कुछ हितैषी अनुचर-वर्ग को अग्र-

---

१. एकान्तात् किन्तु सर्वथैकान्तमेव वस्तुतत्त्वं । २. द्वौ मन्त्रिणौ । ३. मन्त्रिणः प्रति प्राह । ४. मुख्यस्य । ५. महद्धलं । ६. भूः । ७. वादिनः । ८. गमने सति अनिषेध्यः राजा । ९. बाह्य, बहिर्नगरमार्गमतिवाह्य अतिक्रम्य संप्राप्तमुनिवनसीमसंगः सन् गजादुत्तीर्य । १०. राजा । ११. मुनिना कृत्वा विस्तारयामास । १२. प्रभेदन-भ्रमरः टि० च० । वेणुस्तत्र प्रभित् भेदनं अलिर्भ्रमरः प्राह । टि० (ख०) ।

बलिः—'स्वामिन्, कोऽयं स्वर्गापवर्गास्तित्वसंग्रहे देवस्य दुराग्रहः, यतो द्वादशवर्षा स्त्री षोडशवर्षः पुरुषः। तयोरन्योन्यमनन्यसामान्यस्नेहरसोत्सेकप्रादुर्भूतिः प्रीतिः प्रत्यक्षसमधिसर्गः[१] स्वर्गो न पुनरदृष्टः कोऽपीष्टः स्वर्गः समस्ति।' गुणभूरिः सूरिः—'सकले[२]प्रमाणबले[३] बले, किं प्रत्यक्षताधिकरणमेकमेव प्रमाणं समस्ति।' नास्तिकेन्द्रमनोरथरथमातलि[४]र्बलिः—'अखिलश्रुतधरोद्धारादिपुरुषविबुध[५], एकमेव।' भगवान्—'कथं तर्हि भवतः पित्रोर्विवाहाद्यस्तित्वतन्त्रम्, कथं वा तवादृश्यानां वंश्यानामवस्थितिः। स्वयम[६]प्रत्यक्षप्रमेयत्वादाप्तपुरुषोपदेशाश्रितौ[७] [८]स्वपक्षपरिक्षतिः परमतोत्सवकृतिश्च। बलिभट्टो[९]भट्ट इवेतस्तदमितो मदोत्कटः करटीति संकटं प्रघट्टकमापतितः परं *सभाजनसभा[१०]जनकरमुत्तरमपश्यन्नश्लील[११]मसभ्यसर्गं निरर्गलमार्गं किमपि तं भगवन्तं प्रत्युवाच। क्षितिपतिरतीवमन्दा[१२]क्षविक्षिप्तवीक्षणो

गामी करनेवाले उसने व्रत व विद्या में निर्दोष पूज्य अकम्पनाचार्य के लिए यथाविधि नमस्कार किया और एक नीचे आसन पर बैठ गया। आग्रहपूर्वक स्वर्ग व मोक्षस्वरूप के विचार में तत्पर हुए उसने उक्त आचार्य द्वारा प्रशस्त धर्म वाली धर्म कथा विस्तारित की।

उसे सुनकर पुण्य कर्मरूपी बाँस के विदारण करने के लिए भँवरा-सरीखे वलि मन्त्री ने कहा—'हे स्वामिन्! स्वर्ग व मोक्ष का अस्तित्व मानने का आप दुराग्रह क्यों करते हैं? क्योंकि बारह वर्ष की स्त्री और सोलह वर्ष के पुरुष की परस्पर में असाधारण प्रेमरस की वृद्धि की उत्पत्ति वाली प्रीति ही प्रत्यक्ष-प्रतीत स्वर्ग है, उससे भिन्न कोई दूसरा अदृश्य व अभिलषित स्वर्ग नहीं है।'

गुणों से बहुल आचार्य ने कहा—'वाद-विवाद के कलह-सहित और प्रमाण-पूजक बलि! क्या एक प्रत्यक्ष ही प्रमाण है?'

नास्तिकों में इन्द्र-सरीखे चार्वाक के मनोरथरूपी रथ के संचालन के लिए सारथि-सरीखे वलि ने कहा—

समस्त शास्त्ररूपी पृथिवी का उद्धार करने में आदिपुरुष सरीखे हे विद्वन्! 'हाँ केवल एक प्रत्यक्ष ही प्रमाण है।'

आचार्य—'यदि आप केवल प्रत्यक्ष प्रमाण ही मानते हो तो आपके माता-पिता के विवाह-आदि की सत्ता कैसे सिद्ध होगी? अथवा तुम्हारे वंश में उत्पन्न हुए अदृश्य पूर्वजों की सत्ता कैसे सिद्ध होगी? उनकी सिद्धि के लिए यदि आप कहेंगे कि प्रमाण द्वारा जानने योग्य उक्त पदार्थ हैं अवश्य, परन्तु वे प्रत्यक्ष प्रमाण द्वारा जानने योग्य नहीं हैं, अतः वे आप्त पुरुष के उपदेश (आगम प्रमाण) की अपेक्षा करते हैं, तब तो आपके पूर्वपक्ष की हानि होती है, अर्थात्—'वस्तु की स्थिति का साधक केवल प्रत्यक्ष प्रमाण ही है, अन्य नहीं' आपका यह सिद्धान्त खण्डित होता है और स्याद्वाद-दर्शन की सिद्धि होती है, क्योंकि आपने प्रत्यक्ष प्रमाण के सिवाय आगम प्रमाण भी मान लिया।

इसके बाद बलि नाम का विद्वान् मंत्री मूर्ख-सरीखा होकर 'यहाँ पहाड़ की भींट है और वहाँ मदोन्मत्त हाथी है' किस मार्ग से जाऊँ? उसकी तरह दुःख-प्रकर्ष को प्राप्त हुआ और जब सभा के सदस्यों को प्रीतिजनक उत्तर न दे सका तब वह आचार्य से अश्लील, व उच्छृंखल मार्गवाला एवं दुष्टजनों के योग्य वचन बोल उठा।

---

१. निश्चयः। २. सह कलिना वर्तसे। ३. प्रमाणे बलिः पूजा यस्य सः। ४. सारथिः। ५. विदुषो बुधस्तस्य संबोधनं हे मुने। ६. ज्ञानं प्रमाणं, ज्ञानेन यद्वस्तु ज्ञायते तत्प्रमेयं, तत्तु तवाप्रत्यक्षं तेन तेषां वस्तूनामवस्थितिर्न। ७. सत्यां। ८. पूर्वपक्षस्य हानिः। ९. अविद्वान्। *. 'परं सभाजनकरमुत्तरं' क०। १०. प्रीतिकरं। ११. अश्रव्यं। १२. लज्जां।

मुमुक्षुसमक्षमासन्नाशिव[1]ताशनिसंघट्टं बलिभट्टं प्रतिष्ठाभङ्गभयात्किमप्यनभिलप्य[2] 'भगवन्, असंपन्नतत्त्वसंबंधस्य निजस्खलितप्रवृत्तचित्तमहामोहान्धस्य सद्धर्मध्वंसहेतोर्जन्तोर्निसर्गस्थैर्यमेरुषु गुणगुरुषु न खलु दुरपवादकरणात्परमवसाने प्रहरणमस्ति' इति वचनपुरःसरं कथान्तरमनुबध्य[3] साधु समाराध्य च प्रशान्तिहैमवती[4]प्रभवगिरिमकम्पनसूरिं विनेयजनसंभावनौचित्यज्ञया तदनुज्ञयात्मसदनमासाद्यापरेद्युरपरदोषमिषेण *सनिकारकरणमनुजैः सह कर्मस्कन्ध[5]बन्धवाद्धलि[6] बलिं निजदेशान्निर्वासयामास ।

भवतश्चात्र श्लोकौ—

[7]सन्तश्च समा एव यदि चित्तं मलीमसम् । यात्यशान्तेः[8] क्षयं पूर्वः पर[9]श्चाशुभचेष्टितात् ॥२२३॥

स्वमेव हन्तुमीहेत दुर्जनः सज्जनं द्विषन् । योऽधितिष्ठेत्तुलामेकः किमसौ न व्रजेदधः ॥२२४॥

इत्युपासकाध्ययने बलिनिर्वासनो नामैकोनविंशः कल्पः ।

बलिद्विजः सानुजस्तथा सकलजनसमक्षमसू[10]क्षमसू[11]क्षमणपूर्वकं निर्वासितः सन्मुनिविषयरोषोन्मेषकलुषितः

यह देखकर राजा के नेत्र विशेष लज्जा से विक्षिप्त होगए और उसने मुमुक्षु आचार्य के सामने समीप में अकल्याण रूपी वज्र का प्रहार करने वाले बलि भट्ट से अपनी प्रतिष्ठा के भङ्ग होने के भय से कुछ भी नहीं कहा और आचार्य से कहा—

'पूज्यवर ! निस्सन्देह कुवादी मानव के लिए, जो तत्त्व-संबंध का ज्ञाता नहीं है (मूर्ख है) और जो आत्मस्वरूप से पतित होने के कारण बढ़े हुए चित्तवर्ती महामोह से अन्धा है एवं जो प्रशस्त धर्म का ध्वंसक है, स्वाभाविक स्थिरता में सुमेरु पर्वत-सरीखे व सम्यग्ज्ञान-आदि गुणों से महान् पूज्य पुरुषों की निन्दा करने के सिवाय अन्त में दूसरा कोई हथियार नहीं है। इसके बाद उसने चर्चा के प्रसङ्ग का उपसंहार करके प्रकृष्ट उत्तम क्षमारूपी गंगानदी का उद्‌गम करने के लिए हिमवान् पर्वत-सरीखे अकम्पनाचार्य की उत्तम आराधना की। शिष्यजनों के समुचित विनय को जाननेवाली आचार्य की आज्ञा लेकर अपने महल में लौट आया। बाद में उसने दूसरे दिन कर्म-समूह के बंध के लिए हस्तिशास्त्र प्रणेता वाद्धलि आचार्य-सरीखे बलि को किसी दूसरे अपराध के बहाने से धिक्कार के विधान सहित उसके साथी (शुक्र प्रह्लादक व बृहस्पति) मन्त्रियों के साथ अपने देश से निर्वासित कर दिया।

इस विषय में दो श्लोक हैं, जिनका अर्थ यह है—

यदि चित्त मलिन (अशुभ विचार से दूषित) है तो सज्जन और दुर्जन एक सरीखे हैं। उनमें से सज्जन तो अशान्ति (क्रोध) के कारण नष्ट हो जाता है और दुर्जन बुरे कार्यों के करने से नष्ट हो जाता है। क्योंकि सज्जन से द्वेष करनेवाला दुर्जन स्वयं अपने घात की चेष्टा करता है। ठीक ही है, जो अकेला ही तराजू में बैठ जाता है, वह नीचे क्यों नहीं जायगा ? ॥ २२३-२२४ ॥

इस प्रकार उपासकाध्ययन में बलि के देश निर्वासन को वर्णन करनेवाला उन्नीसवाँ कल्प कल्प समाप्त हुआ।

जब समस्त लोगोंके समक्ष विशेष तिरस्कार पूर्वक निकाला हुआ बलि ब्राह्मण अकम्पनाचार्य को लक्ष्य करके उत्पन्न हुए क्रोध से सन्तप्त चित्त वाला हुआ तब उसने अपने छोटे भाई प्रह्लादक के साथ कुरुजाङ्गल

---

१. अकल्याणं। २. अनुक्त्वा। ३. उपसंहृत्य। ४. गङ्गा। *. विगोपनं। ५. समूह। ६. गजागमाचार्यं। ७. सत्पुरुषदुर्जनौ। ८. क्रोधात् सत्पुरुषः क्षयं याति। ९. दुर्जनः। १०. वृहत्। ११. पराभव।

कुरुजाङ्गलमण्डलेषु [1]तद्विलासिनीजलकेलिविगलितका[2]लेयपाटलकल्लोलाधरसुरसरित्[3]सीमन्तिनीचुम्बितपर्यन्तप्रसरे हस्तिनागपुरे साम्राज्यलक्ष्मीमिव लक्ष्मीमतीं महादेवीमवहाय[4] सरस्वतीरसावगाहसागरस्य श्रुतसागरस्य भगवतोऽभ्यर्णे पितृविनयविष्णुना[5] विष्णुना लघुजन्मना सूनुना सार्धं प्रवर्धितदीक्षापद्मस्य[6] महापद्मस्य महीपतेर्महान्तं[7] पद्मनामनिलयं तनयमशिश्रियत्[8]। पद्मोऽपि चारसंचाराद्विदितवंशविद्याप्रभावाय तस्मै बलिसचिवाय सर्वाधिकारिकं स्थानमदात्। बलिः—'देव, गृहीतोऽयमनन्यसामान्यसंभावनाह्लादः प्रसादः। किंतु कर्णेजपवृत्तीनां लञ्चलुञ्चनोचितचेतःप्रवृत्तीनां च प्रायेण पुरुषाणां नियोगिपदं हृदयास्पदं न शौर्योर्जितचित्तस्योदारवृत्तस्य च, तदसाध्यसाधनेन नन्वयं[9]जनो निदेशदानेनानुगृहीतव्यः'। पद्मः—'सत्यमिदम्, किंतु स्वामिसमीहितसमर्थनसंवीणेषु[10] सर्वधुरीणेषु★ भवद्विधेषु सचिवेषु सत्सु किं नामासाध्यं समस्ति।' अन्यदा तु कुम्भपुराधिकृतमूर्तिः[11] सिंहकीर्तिर्नाम नृपतिरनेकायोध[12]नलब्धयशःप्रसाधनः संनद्धसारसाधनो हस्तिनागपुरावस्क[13]न्दप्रदानायागच्छन्, एतन्नगरच्छन्नाव[14]सर्पनिवेदितागमनः पद्मनिदेशादभ्यमित्रीण[15]प्रयाणपरायणेन कूटप्रकामकद[16]नकोविदधिषणेन बलिनाध्वमध्ये प्रबन्धेन[17] युद्ध्यमानः, नामनिर्गमविधानैः प्रधानैर्युद्ध-

---

देश के हस्तिनागपुर नगर के, जिसकी विस्तृत पर्यन्तभूमि ऐसी गङ्गा नदीरूपी स्त्री द्वारा चुम्बन की गई है, जिसके तरङ्गरूपी ओष्ठ वहाँ की कामिनियों द्वारा की हुई जलक्रीडा से गिरे हुए कुंकुम से लालिमा-युक्त हैं, ऐसे महापद्म नामक राजा के ज्येष्ठ पुत्र पद्मनाम के स्थान वाले राजा का आश्रय लिया, जिसने साम्राज्य लक्ष्मी-सरीखी लक्ष्मीमति पट्टरानी का त्याग किया था और जिसने ऐसे पूज्य श्रुतसागर नामक आचार्य के समीप पितृभक्ति को विस्तारित करने वाले अपने विष्णु नाम के छोटे पुत्र के साथ दीक्षा-सम्पत्ति ग्रहण की थी, जो कि सरस्वती रूपी नदी के आनन्दरूप जल में अवगाहन का समुद्र है।

पद्मराजा ने भी गुप्तचरों द्वारा जाने हुए वंश व विद्या से प्रभावशाली बलि के लिए समस्त अधिकारी वर्ग में श्रेष्ठ मन्त्री का पद प्रदान किया।

तब बलि ने कहा—'हे देव! मैंने आपका असाधारण सन्मान से सुखप्रद अनुग्रह ग्रहण कर लिया परन्तु अधिकार का पद चुगलखोरों और घूँसखोरों के लिए प्राय: सुखदायक होता है न कि महान् चरित्र वाले व शूरता से शक्तिशाली चित्त वालों के लिए। अतः मुझे ऐसी आज्ञा-प्रदान द्वारा अनुगृहीत कीजिए, जिसमें असाध्य कार्य सिद्ध हो सके।'

तब पद्मराजा ने कहा—'तुम्हारा कहना ठीक है, किन्तु स्वामी के अभीष्ट को पूरा करने में प्रवीण और समस्त कर्तव्यों में कुशल तुम्हारे जैसे मन्त्रियों के होते हुए कुछ भी असाध्य नहीं है।'

एक समय कुम्भपुर के स्वामी सिंहकीर्ति नामके राजा ने, जिसने अनेक युद्धों में यशरूपी सिद्धि प्राप्त की थी और जो युद्ध विद्या में कुशल सैनिकों की शक्तिरूप साधनों से सन्नद्ध (सुसज्जित) था, हस्तिनागपुर पर हमला करने के लिए प्रस्थान किया। परन्तु शत्रु के नगर में प्रच्छन्न हुए—छिपे हुए गुप्तचरों ने इसके आने का समाचार सूचित कर दिया, जिससे पद्म राजा की आज्ञा लेकर शत्रु के सन्मुख आक्रमण करने के लिए प्रस्थान करने में तत्पर हुए एवं कूट कपट की अभिलाषा वाले युद्धों में प्रवीण बुद्धि वाले बलि नामके मन्त्री ने मार्ग के मध्य में ही मार्ग रोककर उसके साथ तुमुल

---

१. देश। २. कुङ्कुमं। ३. गंगानदी एव सीमन्तिनी। ४. परित्यज्य। ५. विस्तारकेण। ६. संपदः। ७. ज्येष्ठं। ८. बलिमन्त्री। ९. मल्लक्षणो जनः। १०. प्रवीणेषु। ★. सर्वकर्मणि कुशलेषु। ११. स्वामी। १२. संग्राम। १३. धाटकः। १४. प्रच्छन्नचरः। १५. शत्रुसन्मुख। १६. संग्राम। १७. मार्गरोधनेन।

सिद्धान्तोपान्तैः[१] सामन्तैश्च सार्धं प्रबध्य तस्मै हृदयशल्योन्मूलनप्रमदमतये क्षितिपतये प्राभृतीकृतः ।

क्षितिपतिः—'शस्त्रशास्त्रविद्याधिकरणव्याकरणपतञ्जले बले, निखिलेऽपि बले चिरकालमनेकशः कृतकृष्णवदनच्छायस्यास्य द्विष्टस्य विजयान्नितान्तं तुष्टोऽस्मि । तद्याच्यतां मनोभिलाषधरो वरः' । बलिः—'अलक, यदाहं याचे तदायं प्रसादीकर्तव्यः' इत्युदारमुदीर्य पुनश्चतुरङ्गबलप्रबलः प्रतिकूलभूपालविनयनाय पद्ममवनिपतिमादेशं याचित्वा सत्वरमशेषाशावशनिवेशानी[२]कसूत्रितसकलमहीतलो दिग्विजययात्रार्थमुच्चचाल ।

अत्रान्तरे विहारवशाद्भगवानकम्पनाचार्यस्तेन महता मुनिनिकायेन साकं हस्तिनागपुरमनुसृत्योत्तरदिग्विलासिन्यवतंसकुसुमतरौ हेमगिरौ महावगाहायां[३] गुहायां चातुर्मासीनिमित्तं स्थितिं बबन्ध । बलिरपि निखिलजलधिरोधः[४] सविधवनविनोदितवीरवधूहृदयो दिग्विजयं विधायागतस्तं भगवन्तमवबुध्य चिरकालव्यवधाने[५]ऽप्य[६]लर्कविषनिषेक इव जातप्रकोपोद्रेकस्तत्परावविधानाय[७] धराधीश्वरं [८]पुरावितीर्णवरव्याजेन [९]समाशाखार्धमात्मैकशासनप्राज्यं राज्यमन्तःपुरप्रचारैश्वर्यमात्रसम्पतः[१०] पद्मतोऽभ्यर्थ्य मखमिषेण मुनिसैन्याजन्योत्कर्षं[११] चिकीर्षुर्मदनद्रव्याधिकरणं-[१२]उपकरणैरग्निहो[१३]त्रमारेभे ।

युद्ध किया । जिससे बलि ने विख्यात नाम वाले प्रधानों और युद्ध-विद्या में समीपभूत सामन्तों के साथ उसे बाँधकर हृदय के कीले के उन्मूलन होने से प्रसन्न बुद्धिवाले पद्मराजा के लिए भेंट कर दिया ।

तब पद्म ने कहा—'शास्त्र-विद्या के आधार व्याकरण शास्त्र में पतञ्जलि-सरीखे शस्त्र विद्या में प्रवीण बलि ! समस्त सैन्य के होते हुए भी चिरकाल से अनेक बार मेरी मुख-कान्ति को काली करने वाले इस शत्रु को जीतने से मैं बहुत प्रसन्न हूँ, इसलिए आप मुझ से अपनी मनोकामना पूर्ण करने वाला वर माँगिए ।' बलि—'स्वामिन् ! जब मैं आपसे याचना करूँ, तब महाराज मुझ पर कृपा करें ।'

ऐसा उदारता पूर्वक कहकर और राजा पद्म से आज्ञा लेकर विरोधी राजाओं को वश में करने के उद्देश्य से चतुरङ्ग सेना से शक्तिशाली हुए बलि ने समस्त दिशाओं को अपने अधीन करने वाले सैन्य-शिविर द्वारा समस्त पृथिवी तल को आच्छादित करके दिग्विजय करने के लिए प्रस्थान किया ।

इसी बीच में पूज्य अकम्पनाचार्य उस बड़े भारी मुनि संघ के साथ विहार करते हुए हस्तिनागपुर में पधारे और उत्तर दिशारूपी स्त्री के लिए कानों के आभूषणरूप फूले हुए वृक्षों वाले हेमगिरि नाम पर्वत की महागम्भीर गुफा में चतुर्मास करने के लिए ठहर गए ।

समस्त समुद्र-तट के समीपवर्ती वनों में वीर वधू का हृदय प्रमुदित करने वाला बलि भी दिग्विजय करके लौट आया । जैसे बहुत समय बीत जाने पर भी वर्षा ऋतु में पागल कुत्ते के काटने का जहर चढ़ जाता है, वैसे ही मुनि संघ का समाचार जानकर उसे विशेष क्रोध-वृद्धि उत्पन्न हुई । इसलिए उसने मुनिसंघ की विराधना करने के उद्देश्य से पूर्व में दिये हुए वर का बहाना लेकर अपने स्वामी राजा पद्म से, जिसका मन्दिर (स्थान) अन्तःपुर में संचार के योग्य वैभव वाला है, एक पक्ष के लिए केवल अपने ही शासन की प्रचुरता वाला राज्य शासन माँग लिया और बलि ने मुनिसंघ के ऊपर विशेष उपसर्ग करने के इच्छुक होते हुए मद्य व मांसादि साधनों द्वारा महायज्ञ करना आरम्भ कर दिया ।

---

१. समीपभूतैः । २. सैन्य । ३. गम्भीरायां । ४. तटसमीप । ५. आच्छादनेऽपि । ६. 'हुडकशुनके जलसेचनमिव, किल उष्णकाले शुना दष्टः पुमान् तस्य विषं वर्षाकाले उदयमागच्छति' टि० ख० । 'अलर्कः ग्रहिलश्च' इति पञ्जिकाकारः । 'ग्रहिलकुर्कुरः' । टि० च० । ७. तेषां मुनीनां विराधनानिमित्तं । ८. पूर्वं दत्त । ९. पक्षैकं । १०. मन्दिरात् । ११. उपसर्ग । १२. मद्यमांस । १३. महायज्ञं ।

अत्रान्तरे [1]निजनिवासपवित्रितमिथिलापुरेः [*]जिष्णुसूरेरन्तेवासी भ्राजिष्णुर्नाम [2]तमीमध्यसमये बहिःविहितविहारः [3]समीरमार्गे नक्षत्रवीथ्यों[4] लोचनालोकनसनाथां विदधानश्च[5]मूरसंचारचकितगात्रं कुरङ्गकलत्रमिव, तरलतारकाश्रयणं श्रवणमवेक्ष्यान्तरिक्षे[6] लक्ष्यं बध्वा किलैवमुच्चैरवोचत्—'अहो, न जाने क्वचिन्महामुनीनां महानुपसर्गो वर्तते' इति। एतच्च [7]श्रमणशरणगणी समाकर्ण्य प्रयुक्तावधिबोधस्त[8]न्नगरगिरिगुहायामकम्पनाचार्यस्य बलिदुर्विलसितमवधार्याकार्यं च गगनगमनप्रभावं पुष्पकदेवं देशव्रतसेवम् 'हंहो पुष्पकदेव, तव विक्रयर्द्धेर्वैधु[9]र्यान्न तदुपसर्गविसर्गे सामर्थ्यमस्ति। ततस्तथाविधर्द्धिवृद्धिरोचिष्णवे विष्णवे तामदृष्टविशिष्टतामिवात्मस्थितामप्यविदुषे[10] निवेद्य[11] तदुपसर्गापवर्गा[12]यास्मत्स[13] र्गाश्नियोजयितव्यः[14]।' पुष्पकदेवस्त्रिदशोचितचरणसेवस्य तस्य [15]महर्षेर्भाषितात्तं देशमासाद्य विष्णुमुनये तथाविधर्द्धिवार्तां गुरुनिदेशप्रवृत्तिं च प्रतिपादयामास। विष्णुमुनिः प्रदीप इव स्फाटिकभित्तिमध्यलब्धप्रसरेण किरणनिकरेण वारिधिवज्रवेदिकानिर्भेदनेन मानुषोत्तरगिरिपर्यन्तसंवेदनेन मनुष्यक्षेत्रसूत्रपातविडम्बनकरेण

इसी बीच में अपने निवास द्वारा मिथिलापुरी को पवित्र करने वाले जिष्णु सूरि नामके आचार्य के शिष्य भ्राजिष्णु नाम के क्षुल्लक ने, जिसने अर्धरात्रि में बाहर विहार किया था और जो आकाश में नक्षत्र-मार्ग को नेत्रों से दर्शन-युक्त कर रहा था, श्रवण नक्षत्र देखा, जो कि वैसा काँपने वाले नक्षत्र का आश्रय कर रहा था, जैसे मृगी का शरीर व्याघ्र के आगमन से काँपने वाला हो जाता है। पुनः ज्योतिष शास्त्र का विचार करके जोर से चिल्लाया—'आह ? न जाने कहाँ पर महामुनियों पर महान् उपसर्ग हो रहा है ?

जब उक्त बात मुनि-संरक्षक जिष्णु सूरि नामके आचार्य श्री ने सुनी तब उन्होंने अवधि ज्ञान से जाना कि हस्तिनागपुर नगर के पर्वत की गुफा में स्थित हुए अकम्पनाचार्य के ऊपर बलि घोर उपसर्ग कर रहा है।' इसके बाद उन्होंने शीघ्र आकाश में विहार करने की शक्ति वाले पुष्पक देव नाम के क्षुल्लक को बुलाकर कहा—'पुष्पक देव ! तुम्हारे पास विक्रिया ऋद्धि नहीं है, इसलिए तुममें मुनि संघ को उपसर्ग से दूर करने की शक्ति नहीं है, अतः उपसर्ग निवारण करने वाली विक्रिया ऋद्धि की वृद्धि से दीप्ति-युक्त हो रहे विष्णु कुमार मुनि से निवेदन करके, जो कि अपने में प्रकट हुई भी विक्रिया ऋद्धि को, जिसकी विशिष्टता का अनुभव स्वयं उन्हें नहीं है, जिससे जो विशेषता-शून्य-सरीखी है, नहीं जान रहा है, मुनि संघ का उपसर्ग नष्ट करने अथवा छुड़ाने के लिए उन्हें हमारी आज्ञा से प्रस्तुत कार्य में नियुक्त करने की प्रेरणा करनी चाहिए।'

इसके उपरान्त पुष्पकदेव देवों के योग्य चरण-कमलों की सेवा वाले महर्षि जिष्णु सूरि के कहने से उस देश में पहुँचा और उनसे विक्रिया ऋद्धि उत्पन्न होने की बात और गुरु की आज्ञा कह दी।

इसे सुनकर जैसे दीपक, स्फटिक मणि की भित्ति के मध्य प्रसार करनेवाले किरण-समूह से शोभायमान होता है, वैसे ही वे विष्णुकुमार मुनि भी लवण समुद्र की वज्रमयी वेदिका का भेदन करनेवाले व मानुषोत्तर पर्वत के पर्यन्त भाग का अनुभव करनेवाले एवं मनुष्य क्षेत्र का आरम्भ तिरस्कृत करनेवाले अपने हाथ से सुशोभित हुए। अर्थात्—जब उन्होंने अपनी विक्रिया ऋद्धि की परीक्षा करने के लिए ज्यों ही अपना कर-कमल फैलाया तो वह लवण-समुद्र की वज्रमयी वेदिका का भेदन करता हुआ मानुषोत्तर पर्वत तक फैल गया।

---

१. निवासेन पवित्रिता मिथिलापुरी येन सः। *. गौरप्रधानहस्तत्वं तस्य सूरेः। २. रात्रि। ३. गगने। ४. मार्गे। ५. व्याघ्र। ६. ज्योतिःशास्त्रे विचारं कृत्वा। ७. श्रमणानां शरणीभूतश्चासौ गणी सूरिः। ८. हस्तिनागपुर। ९. रहितत्वात्—विनाशनात्। १०. अजानते। ११. कथयित्वा। १२. प्रान्ताय—विमोचनाय। १३. १४. आदेशात्स विष्णुर्योजनीयः। १५. जिष्णुसूरेः।

करेणोर्णनाभ[1] इव तन्तुनिकाये काये स्ववशाश्रयया व्याससमासक्रियया च [2]तामवगम्योपगम्य च हास्तिनपुरं 'न खल्वनिवेद्य निखिल[3]वर्णाश्रमपालाय मध्यमलोकपालायामर्षप्रवृत्ततन्त्रेण[4] हुंकारमात्रेणाप्याकम्पितजगत्त्रयाः "[5]प्रसंख्यानवनविध्वंसदावे तपःप्रभावे दुर्जनविनयनार्थमभिनिविशन्ते[6] यतीशाः' इति च परामृश्य, प्रविश्य च पुरं च चिरपरिचितकञ्चुकिसूचितप्रचारोऽ[7]न्तःपुरं 'पद्ममहीपते, [8]राजधानीष्वरण्यानीषु वा तपस्यतः संयतलोकस्य न खलु नरेश्वरात्परः प्रायेणास्ति गोपायिता[9]। तत्कथं नाम तृणमात्रेऽप्यनपराधमतीनां यतीनामात्मन्यशुभलोकनिषेकसर्गमुपसर्गं सहसे'[10] इत्युक्तम्। 'भगवन्, सत्यमेवैतत्। किं तु कतिचिद्दिनानि बलिरत्रराजा, नाहम्' इति प्रत्युक्तियुक्तस्थितिं पद्मनृपतिमवमत्य[11] 'छलेन खलु परेषु प्रायेण फलोल्लासनशीलास्तपःप्रभवर्द्धिलीलाः' इति चावगत्य शा[12]लाजिरसंपुटकोटरावकाशः प्रदीपप्रकाश इव संजातवामनाकृतिः [13]सप्ततन्तुवसुमतीमनुसृत्य मधुरध्वनिः [14]तृतीयेन सवनेन[15] प्राध्ययनं व्यधात्। बलिर्जलधरध्वानबन्धुरं वाक्प्रसरं सिन्धुर[16] इव [17]निभृतकर्णो निवर्ण्य[18] 'कोऽयं खलु [19]वेदवाचि विरिञ्च[20]'

इस प्रकार वह समस्त मनुष्य क्षेत्र में फैल गया। एवं जैसे मकड़ी अपने जाले को अपने अधीन करती हुई उन्हें विस्तृत व संकुचित करती है वैसे ही प्रस्तुत ऋषि भी अपना शरीर विस्तृत व संकुचित करते हुए अपनी विक्रिया ऋद्धि का निश्चय कर हस्तिनागपुर में पहुँचे। 'क्रोध से उत्पन्न हुए कार्य वाले हुँकारमात्र से तीनलोक को कम्पित करनेवाले मुनीश्वर निस्सन्देह ऐसे तप के प्रभाव होने पर भी, जो कि दुर्ध्यानरूपी वन को विध्वंस करनेवाली दावानल अग्नि-सरीखा है, किन्तु वे समस्त पृथिवीवर्ती वर्ण व आश्रम में रहने वाली प्रजा के रक्षक राजा से कहे विना दुष्टों को दंड देने का उद्यम नहीं करते।'

ऐसा सोचकर विष्णुकुमार मुनि अन्तःपुर में प्रविष्ट हुए। पुराने परिचित कञ्चुकि ने उनका प्रवेश सूचित किया।

बाद में विष्णु मुनि ने राजा से कहा—

'पृथिवीपति पद्म! जब निस्सन्देह राजधानियों में भी वन-सरीखा परिणाम रखनेवाले तपस्वी मुनि-समूह का राजा को छोड़कर प्रायः कोई दूसरा रक्षक नहीं है तब तृणमात्र के प्रति अपराध करने की बुद्धि न रखनेवाले ऋषियों के शरीर पर किया हुआ उपसर्ग, जिसकी उत्पत्ति दुष्ट लोक रूपी मलिन जल से हुई है, आप कैसे सहन करते हैं?

राजा पद्म—'भगवन्! आपका कहना ठीक है किन्तु यहाँ कुछ दिनों के लिए यहाँ का राजा बलि है मैं राजा नहीं हूँ।'

तब विष्णुकुमार मुनि ने इस प्रकार के प्रत्युत्तर की युक्ति में राजा पद्म को अनादृत करके यह निश्चय किया—कि 'निस्सन्देह तपश्चर्या से उत्पन्न होनेवाली ऋद्धियों के चमत्कार प्रायः दूसरों पर किये गये छल द्वारा फलदायक होते हैं।' बाद में उन्होंने शराव-संपुट के मध्यवर्ती अवकाश वाले दीपक के प्रकाश-सरीखा वामन रूप धारण किया और यज्ञभूमि में जाकर मधुर ध्वनि पूर्वक ऊँचे स्वर से वेदाध्ययन शुरु किया।

बलि ने मेघ की ध्वनि-सी मनोज्ञ उस विस्तृत वेदवाणी को वैसी निश्चल श्रोत्रवाले होकर सुनी जैसे हाथी मेघध्वनि को निश्चल कर्ण-युक्त होकर सुनता है। इससे उसका हृदय कौतूहल-युक्त हुआ।

'वेद के प्रवचन-विषय में ब्रह्मा-सरीखा उच्चारण करने में चतुर यह कौन है?'

---

१. लूता। २. विक्रियर्द्धिं। ३. पृथ्वी। ४. क्रोधोत्पन्नकार्येण। ५. ध्यान। ६. उद्यमं कुर्वन्ति। ७. प्रवेशः। ८. सराग-स्थानेष्वपि वनेष्विव परिणामः स्यात्। ९. रक्षकः। १०. त्वं सहसे। ११. अवगणय्य। १२. 'शालाजिर शब्देन कपालं' इति टि० (ख०)। 'शालाजिरं शरावं' इति पञ्जिकाकारः। शरावो वर्धमानकः इत्यमरः। १३. यज्ञभूमिं। १४. १५. उदात्तस्वरेण। १६. गजवत्। १७. निश्चल। १८. श्रुत्वा। १९. प्रवचनविषये। २०. ब्रह्मा।

इवोच्चारणचतुरः' इति कुतूहलितहृदयः [1]सत्रनिलयान्निर्गत्य वयसि वपुषि च निश्चिताश्चर्यसौन्दर्यं द्विजवर्यमेनमवादीत्—'भट्ट, किमिष्टं वस्तु चेतसि निधाय प्राधीषे'[2]। 'बले, दायादविलुप्तालयत्वात्सदयं पादत्रयप्रमाणकल[3]मवनितलम्। द्विजोत्तम, निकामं दत्तम्।' 'यद्येवं बहुमानयजमान, विधीयतामुदकधारोत्तरप्रवृत्तिः[4] वृत्तिः।' बलिः प्रबलामा[5]लूमादाय 'द्विजाचार्य, प्रसार्यतां हस्तः' इत्युक्तवति[6] शुक्रः[7] संक्रन्दनमिव[8] कुलिशनिकेतनम्, प्रासादमिव कलशाह्लादम्, जलाशयमिव मत्स्याश्रयम्, सरित्नाथमिव शङ्खसनाथम्, विरहिणीवासरगणनकुड्य[9]प्रदेशमिवोर्ध्वरेखावकाशम्, नारायणमिव चक्रलक्षणम्, यज्ञोपकरणमिव यवाधिकरणम्,[10] जलयानपात्रमिव[11] निश्छिद्रतामत्रम्,[12] स्तम्बेरमकरमिव दीर्घाङ्गुलिप्रसरम्, वंशाङ्कि[13]शलयमिवानुपूर्वीप्रवृत्तपर्वसंचयम्, कमलकोशमिवारुणप्रकाशनिवेशम्, विद्रुमभङ्ग[14]भोग-

बाद में वह यज्ञ-मण्डप से बाहर आया और इस श्रेष्ठ ब्राह्मण से, जिसकी आश्चर्य-जनक मनोज्ञता इसकी उम्र व शरीर के वामनाकार से निश्चित की गई थी, बोला—

'हे विद्वन् ! किस इष्ट वस्तु की इच्छा चित्त में स्थापित करके यह वेद पाठ करते हो ?'

हे ब्राह्मण-श्रेष्ठ बलि ! 'मेरा गृह कुटुम्बी जनों द्वारा नष्ट-भ्रष्ट कर दिये जाने से अपनी कुटी बनाने के लिए केवल तीन पैर के प्रमाण से मनोज्ञ पृथिवी के लिए वेदपाठ करता हूँ।

बलि—'द्विजोत्तम ! मैंने तुम्हें इच्छानुसार तीन पैर जमीन दे दी।'

द्विजोत्तम—'तो माननीय यजमान ! जल-धारा से मनोज्ञ प्रवृत्ति वाला दान कीजिए।

एक बड़ी झारी [हाथ में] लेकर बलि—'द्विजाचार्य ! हाथ फैलाइए।'

ऐसा बलि के कहने पर शुक्राचार्य ने उसका ऐसा हाथ देखकर, बलि से कहा—जो वैसा कुलिश-निकेतन (वज्र के चिह्न वाला) है, जैसे इन्द्र कुलिश-निकेतन (वज्र का धारक) होता है। जो उस भाँति कलश-आह्लाद—कलश के चिह्न से आनन्द प्रद है, जिस भाँति महल कलश-आह्लाद—कलशों से आनन्द दायक होता है। जो वैसा मत्स्य-आश्रय (मछली के चिह्न से अलङ्कृत) है जैसे तालाब मत्स्य-आश्रय (मछलियों का आवास-स्थान) होता है। जो वैसा शङ्ख-सनाथ (शङ्ख के चिह्न सहित) है जैसे समुद्र शङ्ख-सनाथ शङ्खों से व्याप्त) होता है। जो वैसा ऊर्ध्व रेखा-युक्त है जैसे विरहिणी स्त्री के द्वारा पति के वियोग के दिनों की गिनती करने के लिए भित्ति देश खींची गईं रेखाओं का स्थान होता है। जो वैसा चक्रलक्षण (चक्र-चिह्न से सुशोभित) है जैसे विष्णु चक्रलक्षण (सुदर्शन चक्रधारी) होता है। जो वैसा यवाधिकरण (अँगूठे में जौ के चिह्न का, जो कि कीर्तिका चिह्न है, आधार) है जैसे यज्ञ के उपकरण यव-अधिकरण (जौ अन्न के आधार) होते हैं। जो वैसा निश्छिद्रता-अमत्र (संलग्न कर की अङ्गुलियों वाला), है जैसा जहाज निश्छिद्रता-अमत्र (छिद्रों से रहित का स्थान) होता है। जो वैसा दीर्घ-अङ्गुलि-प्रसर (लम्बी व विस्तृत अङ्गुलियों वाला) है जैसे हाथी की सूँड़ दीर्घ-अङ्गुलि प्रसर (लम्बी नोंक से विस्तृत) होती है। जो वैसा आनुपूर्वी प्रवृत्त-पर्व-संचय है, अर्थात् क्रमपूर्वक प्रवृत्त होने वाले पर्व-(गाँठे) समूह से सुशोभित है जिस प्रकार बाँस के नये पत्ते आनुपूर्वी प्रवृत्त पर्व संचयशाली—पर्व और गाँठोंवाले-होते हैं। जो वैसा अरुण-प्रकाश-निवेश (संध्याकालीन आकाश की लालिमा वाला) है जैसे कमल का कोश अरुण-प्रकाश-निवेश (सूर्य के प्रकाश का स्थान) होता है। जिसके नाखूनों का अग्रभाग वैसा स्निग्ध-पाटल (चमकीला

१. 'दानशालायाः' इति टि० ख०। 'सत्रं यज्ञमण्डपः' इति पञ्जिकाकारः। 'यज्ञमण्डपात्' इति टि० च०। २. प्राध्ययनं कुरुषे। ३. मनोज्ञं। ४ मनोज्ञप्रवृत्तिः। ५. भृंगारं झारीं। ६. सति बलौ, अग्रे वक्ष्यमाणं ब्रूते। ७. मन्त्री। ८. इन्द्रं। ९. भित्तिदेशं। १०. अंगुष्ठे यवं यशश्चिह्नं। ११. पोत। १२. संलग्नकराङ्गुलिम्। १३. अङ्कुरं। १४. रचनाविस्तार।

मिव स्निग्धपाटलमक्षरागं लक्ष्मीलताविर्भावोदयं [1]हस्तमुपलक्ष्य बले, न खल्वयमेवंविधपाणितलसंबंधो पोषः[2] परेषां याचिता किन्तु याच्य[3] इति वचनवक्रं शुक्रमवगणय्य बलिः स्वकीयां वसिनुदकधारोत्तरामकार्षीत् ।

तदनु स विष्णुमुनिर्विरोचनविरोकनिकर[4] इवाक्रमेणोर्ध्वमधश्चाम[5] र्यादिवृद्धिपरः पर्वतस्योभयतः प्रवृत्ता-पगाप्रवाह इव[6] तिरःप्रसरद्देहः, [7]क्रमवरमेकमकूपारवज्रवेदिकायां निधायापरं च क्रमं [8]चक्रवालचूलिकायां पुनस्तृ-तीयस्य मेदिनीमलभमानस्तपन[9]रथस्खलनसेतुना [10]सुरसरित्सुरी[11]यक्षोतोहेतुना संपादितविविजसुन्दरीव[12]रणमार्ग-विभ्रमेण[13] समाचरितखेचरीचेतःसंभ्रमेण भूगोलगौरवपरिच्छेदे तुलादण्डविडम्बनेन चरणेन क्षोभितान्तरिक्षचरपुरकक्षः किन्नरामरखचरचारणादिवृन्दैर्वन्द्यमानपादारविन्दः संयतजनोपकारसारः स्वकीयर्द्धिवृद्धिपरितोषितमनोभिर्व्यन्तरानिमिचर-कारणखलतालतास्थलिं[14] बलिं सबान्धवमबन्धयत् । प्रावेशयच्च सदेहं रसातलगेहम् ।

भवति चात्र श्लोकः—

महापद्मसुतो विष्णुर्मुनीनां हास्तिने पुरे । बलिद्विजकृतं विघ्नं शमयामास वत्सलः ॥२२५॥

और लाली लिए हुए है जैसे मूँगों की रचना का विस्तार सचिक्कण व लालिमा-युक्त होता है एवं जिसमें लक्ष्मी (शोभा) रूपी लता की अभिव्यक्ति का उद्गम है। 'बलि ! निस्सन्देह ऐसा हस्ततल शाली मानव दूसरों से याचना करनेवाला नहीं हो सकता, किन्तु दूसरों के द्वारा याचना-योग्य होता है।'

इस प्रकार वक्रोक्ति पूर्वक बोलने वाले शुक्र मन्त्री को तिरस्कृत करके बलि ने अपना दान, जलधारा से मनोज्ञ किया।

इसके बाद विष्णु मुनि सूर्य की किरण-समूह सरीखे अपना शरीर एकदम से बेमर्याद ऊपर नीचे वृद्धिगत करने में तत्पर हुए और वे वैसा अपना शरीर तिरछे रूप से फैलाने वाले हुए, जैसे पर्वत के दोनों पार्श्व भागों पर प्रवाहित होने वाली नदी का प्रवाह तिरछे रूप से फैलता है। उन्होंने एक पैर फैलाकर समुद्र की वज्रमयी वेदिका पर स्थापित किया और दूसरा पैर मानुषोत्तर पर्वत की चोटी पर स्थापित किया और तीसरे पैर को रखने के लिए जगह न मिलने से उसने उससे विद्याधरों के नगरों के गृह क्षुब्ध किये। जो ऐसा मालूम पड़ता था—मानों—सूर्य के रथ को रोकने के लिए पुल ही है। जो गंगा नदी की चौथी धारा के उत्पन्न करने में कारण है। जो देव-सुन्दरियों के नगर-समूह की भ्रान्ति को उत्पन्न करनेवाला है और जो विद्याधरियों के चित्त में भय उत्पन्न करनेवाला है एवं जो भूमण्डल की गुरुता—भारीपन-का निश्चय करने के लिए तराजू-सरीखा है। इससे किन्नरदेव, विद्याधर व चारण-आदि के समूह ने आकर उनके चरणकमलों की वन्दना की। वह संयमी जनों का उपकार करने से उत्तम था उसने अपनी विक्रिया ऋद्धि की वृद्धि से सन्तुष्ट बुद्धिवाले व्यन्तरदेवों ने स्वाभाविक दुष्टतारूपी लता के आश्रय के लिए भूमि-सरीखे बलि को उसके बन्धुजनों सहित बाँध लिया और उसे शरीर-सहित रसातल में पहुँचा दिया।

इस विषय में एक श्लोक है, उसका अर्थ यह है—संयमी जनों से वात्सल्य (प्रेम) करनेवाले व महापद्म राजा के पुत्र विष्णुकुमार मुनि ने हस्तिनागपुर नामक नगर में बलि ब्राह्मण द्वारा मुनियों पर किया हुआ उपसर्ग निवारण किया॥ २२५॥

---

१. हस्तं। २. पुरुषः। ३. अन्यैर्याचनीयः। ४. सूर्यकिरण। ५. अमर्याद। ६. तिरिछु। ७. चरणं। ८. मानुषोत्तरगिरौ। ९. सूर्य। १०. गंगा किल त्रिपथगा। ११. चतुर्थ। १२. नगरसमूह। १३. भ्रान्तिना। १४. भूमि।

इत्युपासकाध्ययने वात्सल्यप्रवचनो नाम विंशतितमः कल्पः ।

[1]निसर्गोऽधिगमो[2] वापि तदाप्तौ[3] कारणद्वयम् । सम्यक्त्वभाक्पुमान्यस्मादल्पानल्पप्रयासतः ॥२२६॥

उक्तं च—आसन्नभव्यताकर्महानिसंज्ञित्वशुद्धपरिणामाः[4] । सम्यक्त्वहेतुरन्तर्बाह्योऽप्युपदेशकादिश्च ॥२२७॥

एतदुक्तं भवति—कस्यचिदासन्नभव्यस्य [5]तन्निदा[6]नद्रव्यक्षेत्रकालभावभ[★]वसंपत्सेव्यस्य विधूतत[7]त्प्रतिबन्धकान्धकारसंबन्धस्याक्षि[8]प्तशिक्षाक्रियालापनिपुणकरणानुबन्धस्य[9] नवस्य भाजनस्येवासंजातदुर्वासनागन्धस्य[10] झटिति यथावस्थितवस्तुस्वरूपसंक्रान्तिहेतुतया स्फाटिकमणिदर्पणसगन्धस्य[11] पूर्वभवसंभालनेन वा वेदनानुभवनेन वा [12]धर्मश्रवणाकर्णनेन वार्हत्प्रतिनिधिनिध्यानेन[13] वा महामहोत्सवनिहालनेन[14] वा महर्द्धिप्राप्ताचार्यवाहनेन[15] वा नृषु नाकिषु[16] वा तन्माहात्म्यसंभूतविभवसंभावनेन[17] वान्येन वा केनचित्कारणमात्रेण विचारकान्तारेषु मनोविहारास्पदं खेदमनापद्य यदा जीवादिषु पदार्थेषु [18]याथात्म्यसमवधानं श्रद्धानं भवति तदा प्रयोक्तुः[19] सुकरक्रियत्वाल्लूयन्ते शालयः

इस प्रकार उपासकाध्ययन में वात्सल्य अङ्ग का प्रवचन करनेवाला बीसवाँ कल्प पूर्ण हुआ ।

अब सम्यग्दर्शन का वर्णन करते हैं—सम्यग्दर्शन की प्राप्ति दो कारणों से होती है । १. निसर्ग (परोपदेश के बिना स्वभाव) से होती है और दूसरा अधिगम (परोपदेश) से होती है । क्योंकि किसी पुरुष को अल्प प्रयत्न करने से ही सम्यक्त्व की प्राप्ति हो जाती है और किसी को प्रचुर प्रयत्न करने से सम्यक्त्व की प्राप्ति होती है ॥ २२६ ॥

कहा भी है—सम्यग्दर्शन के अन्तरङ्ग कारण निकट भव्यता, दर्शनमोहनीय का उपशम, क्षय व क्षयोपसम, संज्ञीपन और शुद्ध परिणाम हैं तथा बाह्य कारण उपदेश और जाति स्मरण व जिनबिम्ब-दर्शन-आदि हैं ॥ २२७ ॥

अभिप्राय यह है—ऐसे किसी निकट भव्यजीव को, जो कि सम्यक्त्व के कारण योग्य द्रव्य, क्षेत्र, काल, भावों की उत्पत्तिरूपी लक्ष्मी से सेवनीय है, जिसने सम्यक्त्व की उत्पत्ति में रुकावट डालनेवाले कर्मरूपी (दर्शन मोहनीय) अन्धकार का संबंध नष्ट कर दिया है । जिसने ऐसा संज्ञी पंचेन्द्रियपन प्राप्त किया है, जो शिक्षा, क्रिया व वार्तालाप करने में निपुण है । जिसमें नये वर्तन की तरह दुर्वासना का संबंध उत्पन्न नहीं हुआ है और जो शीघ्र यथार्थ वस्तु-स्वरूप के संक्रमण में कारण होने से स्फटिक मणि के दर्पण-सरीखा है, पूर्वभव के स्मरण से, कष्टों के अनुभव से, धर्म शास्त्र के सुनने से, जिनबिम्ब के दर्शन से, महामहोत्सवों के देखने से और महाऋद्धिधारी आचार्यों के दर्शन से एवं मनुष्यों में और देवों में सम्यक्त्व के माहात्म्य से उत्पन्न हुए ऐश्वर्य के दर्शन से अथवा अन्य किसी कारण से विचाररूपी बगीचों में मन की क्रीड़ा का स्थान खेद प्राप्त न करके जब जीवादि मोक्षोपयोगी तत्वों में यथोक्त परिज्ञान वाला श्रद्धान उत्पन्न होता है तो उस सम्यक्त्व को 'निसर्गज' सम्यग्दर्शन कहते हैं । तब सम्यग्दर्शन का व्यवहार करनेवाले निकट भव्यात्मा द्वारा सुलभता पूर्वक प्राप्त होजाने से यह निसर्गज सम्यग्दर्शन वैसा कहा जाता है, जैसे धान्य काटने वाले कृषक द्वारा सुल-

---

१. स्वभावः । २ आक्षेपः । ३. सम्यक्त्वप्राप्तौ । ४. आभ्यन्तरकारणं । ५. सम्यक्त्व । ६. कारण । ★. उत्पत्ति । ७. सम्यक्त्व । ८. गृहीत । ९. पंचेन्द्रियमनःसंबंधस्य । १०. संबंधस्य । ११. समानस्य । १२. श्रवणं श्रुतं, धर्मशास्त्राकर्णनेन, मूलाचारश्रावकाचारश्रवणेनेत्यर्थः । १३. प्रतिमावलोकनेन । १४. दर्शनेन । १५. दर्शनेन । अत्र पञ्जिकाकारः प्राह—निध्यानं निहालनं, वाहनं दर्शनं च । हल विशोधने वह परिकल्पने अनयोः रूपमिति । १६. देवेषु । १७. अवलोकनेन । १८. यथोक्तपरिज्ञानं । १९. उपदेशकस्य ।

स्वयमेव, विनीयन्ते[1] कुशलाशयाः स्वयमेव, इत्यादिवत्तन्निसर्गात् संजातमित्युच्यते । यदा [2]स्वव्युत्पत्तिसंशीतिविपर्यस्तसमधिकबोधस्यापि [3]भक्ति[4]युक्ति[5]सूक्तिसंबन्धसविधस्य[6] प्रमाणनयनिक्षेपानुयोगोपयोगावगाह्येषु समस्तेष्वैतिह्येषु[7] [8]परीक्षोपक्षेपादतिक्लिश्य[9] निःशेषदुराशानिशाविनाशनांशुम[10]न्मरीचिरुचिरेण तत्त्वेषु रुचिः संजायते, तदा [11]विधातुरायासहेतुत्वान्मया निर्मापितोऽयं सूत्रानुसारो [12]हारो मयेदं संपादितं रत्नरचनाधिकरणमाभरणमित्यादिवत्तदधिगमादाविर्भूतमित्युच्यते । उक्तं च—

अबुद्धिपूर्वापेक्षायामिष्टानिष्टं स्वदैवतः । बुद्धिपूर्वव्यपेक्षायामिष्टानिष्टं स्वपौरुषात् ॥२२८॥

द्विविधं त्रिविधं दशविधमाहुः सम्यक्त्वमात्महितमतयः । तत्त्वश्रद्धानविधिः सर्वत्र च तत्र समवृत्तिः ॥२२९॥

[13]सरागवीत[14]रागात्मविषयत्वाद्द्विधा स्मृतम् । प्रशमादिगुणं पूर्वं परं चात्मविशुद्धिभाक्[15] ॥२३०॥

भता पूर्वक काटी जा रहीं धान्यों के प्रति यह कहा जाता है, कि ये धान्य स्वयं ही काटीं जा रहीं हैं और जैसे कुशल बुद्धिशाली शिष्य स्वयं शिक्षा प्राप्त करते हैं।

जब निकट भव्य को, जिसकी बुद्धि अनध्यवसाय, संशय व विपर्यय रूप मिथ्याज्ञान से आच्छादित है परन्तु जो श्रद्धा, नय, प्रमाण व सिद्धान्त शास्त्र के वेत्ता गुरु के निकटवर्ती है, जो ऐसे समस्त सिद्धान्त शास्त्रों की परीक्षा के आग्रह से, जो कि प्रमाण, नय, निक्षेप व चारों अनुयोगों के उपयोग द्वारा अवगाहन करने योग्य हैं, कष्ट उठाकर समझाया जाता है, उसे जो चिरकाल के पश्चात् समस्त दुराशारूपी रात्रि को नष्ट करने के लिए सूर्य की किरण-सरीखी तत्वरुचि उत्पन्न होती है, उसे 'अधिगमज' सम्यग्दर्शन कहते हैं, क्योंकि उसमें तत्वोपदेशक का कष्ट कारण है। उसे वैसा अधिगमज कहते हैं, जैसे हार बनाने वाला कहता है, कि यह तन्तुओं में गूँथा हुआ हार मैंने बनाया है। अथवा मैंने यह रत्न-खचित आभूषण बनाया है।

श्री समन्तभद्राचार्य ने देवागम स्तोत्र में कहा है कि जब मानव को बुद्धिपूर्वक प्रयत्न किये बिना ही (विना पुरुषार्थ किए) अतर्कितोपस्थित न्याय से (अचानक) सुख-दुःख प्राप्त होते हैं, उन्हें उसके भाग्याधीन समझने चाहिए। अर्थात्—उनमें उसका पूर्वजन्म में किया हुआ पुण्य-पाप कर्म ही कारण है और जब उसे ऐसे सुख-दुःख प्राप्त होते हैं, जिनमें पुरुषार्थ की अपेक्षा होती है उनमें उसका पुरुषार्थ कारण है। प्राकरणिक अभिप्राय यह है जब मुमुक्षु मानव में, ऐसा सम्यक्त्व प्रकट होता है, जिसमें परोपदेश की अपेक्षा नहीं होती उसे निसर्गज सम्यग्दर्शन कहते हैं। और जिसमें परोपदेश (देशनालब्धि) की अपेक्षा होती है, उसे अधिगमज कहते हैं ॥ २२८ ॥

सम्यग्दर्शन के भेद और उसके कार्य—आत्म-कल्याण में बुद्धि रखनेवाले आचार्यों ने सम्यक्त्व के दो, तीन और दश भेद कहे हैं। इन सभी भेदों में तत्वों की श्रद्धा करना समान रूप से पाई जाती है ॥ २२९ ॥

सराग जीव में (चौथे गुणस्थान से लेकर ग्यारहवें गुणस्थानवर्ती जीवों में) पाये जाने वाले तत्त्वश्रद्धान को सराग सम्यक्त्व कहते हैं और वीतराग आत्मा में (बारहवें गुणस्थान से लेकर चौदहवें गुणस्थानवर्ती अयोगीजिन में) पाये जाने वाले तत्त्वश्रद्धान को वीतराग सम्यक्त्व कहते हैं। इस प्रकार सम्यक्त्व के सराग और वीतराग ये दो भेद समझने चाहिए। उनमें पहला सराग सम्यक्त्व प्रशम, संवेग व अनुकम्पा-आदि चार

---

१. शिक्ष्यन्ते। २. उपदेशकस्य। ३. श्रद्धा। ४. नयप्रमाणं। ५. सिद्धान्त। ६. समीपस्थ उपदेष्टुः। ७. सिद्धान्तेषु। ८. 'आग्रहात्' टि० (ख०), 'प्रशस्यावलोकनात्' टि० (च०)। ९. क्लेशं कृत्वा संबोध्यते। १०. रविः। ११. उपदेशकस्य। १२. सूत्रमनुसरति यो हारः, सूत्रमर्यादः प्रलवणादिक्लेश-सहितः। १३. एकादशगुणस्थानपर्यन्तं सरागं। १४. द्वादशादि वीतरागं। १५. क्षपकश्रेणौ वीतरागं।

यथा हि पुरुषस्य पुरुषशक्तिरियमतीन्द्रियाप्यङ्गनाजनाङ्गसंभोगेनापत्योत्पादनेन च विपदि धैर्यावलम्बनेन वा प्रारब्धवस्तुनिर्वहणेन वा निश्चेतुं शक्यते, तथात्मस्वभावतयातिसूक्ष्मयत्नमपि सम्यक्त्वरत्नं प्रशमसंवेगानुकम्पास्तिक्यैरेक-[1]वाक्यैः राकलयितुं[2] शक्यम् । तत्र—

यद्रागादिषु दोषेषु चित्तवृत्तिनिबर्हणम्[3] । तं प्राहुः प्रशमं प्राज्ञाः समस्तव्रतभूषणम् ॥ २३१ ॥

शारीरमानसागन्तुवेदनाप्रभवा[4]द्भवात्[5] । स्वप्नेन्द्रजालसंकल्पाद्भीतिः संवेगमुच्यते ॥ २३२ ॥

सत्त्वे सर्वत्र चित्तस्य दयार्द्रत्वं[6] दयालवः । धर्मस्य परमं मूलमनुकम्पां प्रचक्षते ॥ २३३ ॥

आप्ते श्रुते व्रते तत्त्वे चित्तमस्तित्वसंयुतम् । आस्तिक्यमास्तिकैरुक्तं [7]मुक्तियुक्तिधरे नरे ॥ २३४ ॥

रागरोषधरे नित्यं निर्व्रते निर्दयात्मनि । संसारो दीर्घसारः[8] स्यान्नरे नास्तिकनीतिके[9] ॥ २३५ ॥

कर्मणां क्षयतः शान्तेः क्षयोपशमतस्तथा । श्रद्धानं त्रिविधं बोध्यं [10]गतौ सर्वत्र[11] जन्तुषु ॥ २३६ ॥

गुणों से युक्त होता है और केवल आत्मविशुद्धि-युक्त क्षपकश्रेणी में वर्तमान सम्यक्त्व को वीतराग सम्यक्त्व कहते हैं [उक्त अभिप्राय टिप्पणीकार का है] ॥२३०॥

जैसे पुरुष की पुरुषत्व शक्ति यद्यपि अतीन्द्रिय (चक्षु-आदि इन्द्रियों द्वारा जानने के लिए अशक्य) है तथापि स्त्रीजनों के साथ रतिविलास करने से, सन्तान के उत्पादन से और विपत्ति में धैर्य के धारण करने से अथवा प्रारम्भ किये हुए कार्य को समाप्त करना-आदि कार्यों से अनुमान प्रमाण द्वारा उसकी शक्ति का निश्चय किया जाता है वैसे ही सम्यक्त्वरूपी रत्न भी यद्यपि आत्म-स्वभाव होने के कारण अत्यन्त सूक्ष्म है, तथापि अव्यभिचारी (निर्दोष) प्रशम, संवेग, अनुकम्पा और आस्तिक्यरूप चिन्हों से उसका निश्चय किया जाता है।

विद्वानों ने राग-आदि दोषों से मनोवृत्ति के निवारण (हटाने) को प्रशम गुण कहा है, जो कि समस्त व्रतों का आभूषण है। क्योंकि इसके बिना व्रत निरर्थक हैं ॥२३१॥ शारीरिक, मानसिक और आगन्तुक दुःखों को उत्पन्न करने वाले और स्वप्न व इन्द्रजाल-सरीखे संसार से भयभीत होने को 'संवेग' गुण कहा है ॥२३२॥ समस्त प्राणियों में मनोवृत्ति को दयालुता से सरस रखने को दयालु विद्वान् अनुकम्पा कहते हैं, जो कि धर्म-रूपी वृक्ष की उत्कृष्ट जड़ है ॥२३३॥ आस्तिक आचार्यों ने आप्त (वीतराग सर्वज्ञ तीर्थङ्कर), द्वादशाङ्ग शास्त्र, व्रत (अहिंसा-आदि) और जीवादि तत्त्व इन पदार्थों के विषय में 'ये मौजूद हैं' इस प्रकार की इनकी मौजूदगी स्वीकार करने वाली चित्तवृत्ति को 'आस्तिक्य' कहा है। यह प्रशस्त गुण मुक्ति श्री के साथ संयोग रखने वाले (मुक्तिगामी) मानव में ही पाया जाता है ॥२३४॥ जो [मिथ्यादृष्टि] मानव सदा रागी व द्वेषी है, न कभी व्रत-धारण करता है और जिसकी आत्मा निर्दयी है एवं जो नास्तिक मत को मानता है, उसका संसार दीर्घ भ्रमण वाला हो जाता है। ॥२३५॥ अभिप्राय यह है कि ऊपर कहे हुए प्रशम, संवेग, अनुकम्पा और आस्तिक्य ये प्रशस्त गुण यथार्थरूप से सम्यग्दृष्टि में ही पाये जाते हैं, मिथ्यादृष्टियों में ये नकली होते हैं। राग, द्वेष, काम व क्रोधादि विकृत भावों का उदय न होने देना प्रशम गुण है। यह संसार बुखार व गलगण्डादि शारीरिक दुःखों एवं काम क्रोधादि से उत्पन्न होने वाले मानसिक दुःखों एवं अति-वृष्टि, अनावृष्टि-आदि आगन्तुक कष्टों से व्याप्त है, इससे सदा डरते रहने को संवेग कहते हैं। इसी प्रकार दयालुता और आस्तिकता ये गुण अनन्तानुबंधि कषाय चतुष्टय व मिथ्यात्व के अभाव हो जाने पर सम्यग्दृष्टि में ही पाये जाते हैं। इन गुणों से सराग सम्यक्त्व का

---

१. अव्यभिचारैः। २. परिज्ञातुं। ३. 'निवारणं' टि० (ख०)। 'निरसनं' पञ्जिकाकारः। ४. उत्पादकात्। ५. संसाराद्भीतिः। ६. सरसता। ७. मोक्षसंयोगधरे, मुक्तिगामिनि। ८. भ्रमणः। ९. शास्त्रे। १०. ११. चतुसृषु गतिषु सर्वासु।

दशविधं तथाह—

आज्ञामार्गसमुद्भवमुपदेशात्सूत्रबीजसंक्षेपात् । विस्तारार्थाभ्यां भवमवपरमावादिगाढं[1] च ॥ २३७ ॥

अस्यायमर्थः—भगवदर्हत्सर्वज्ञप्रणीतागमानुज्ञासंज्ञा[2] आज्ञा, रत्नत्रयविचारसर्गो मार्गः, पुराणपुरुषचरितश्रवणाभिनिवेश[3] उपदेशः, यतिजनाचरणनिरूपणपात्रं[4] सूत्रम्, सकलसमयदल[5]सूचनाव्याजं बीजम्, आप्तश्रुतव्रतपदार्थ[6]समासालापाक्षेपः संक्षेपः, द्वादशाङ्गचतुर्दशपूर्वप्रकीर्णविस्तीर्णश्रुतार्थसमर्थनप्रस्तारो विस्तारः, प्रवचनविषये [7]स्वप्रत्ययसमर्थोऽर्थः, त्रिविध★स्यागमस्य निःशेषतोऽन्यतमदेशाव[8]गाहालीढमवगाढम्, अवधिमनःपर्ययकेवलाधिकपुरुषप्रत्ययप्ररूढं[9] परमावगाढम् ।

निश्चय होता है। परन्तु वीतराग सम्यग्दर्शन आत्मविशुद्धि रूप ही है, जो कि स्वसंवेदन प्रत्यक्ष द्वारा जाना जाता है।

[अब सम्यग्दर्शन के तीन भेदों का कथन करते हैं—]

सम्यग्दर्शन तीन प्रकार का है। औपशमिक, क्षायिक और क्षायोपशमिक। जो सम्यग्दर्शन, अनन्तानुवन्धि क्रोध, मान, माया, लोभ और मिथ्यात्व, सम्यक् मिथ्यात्व और सम्यक् प्रकृति इन सात प्रकृतियों के उपशम होने से होता है, उसे औपशमिक सम्यक्त्व कहते हैं और जो इन सात प्रकृतियों के क्षय से उत्पन्न होता है उसे क्षायिक कहते हैं और जो इनके क्षयोपशम से होता है उसे क्षायोपशमिक कहते हैं। ये तीनों सम्यग्दर्शन चारों नरकादि गतियों में पाये जाते हैं॥ २३६ ॥

[अब सम्यग्दर्शन के दश भेदों का निरूपण करते हैं—]

आज्ञा, मार्ग, उपदेश, सूत्र, बीज, संक्षेप, विस्तार, अर्थ, अवगाढ और परमावगाढ सम्यक्त्व ये सम्यग्दर्शन के दश भेद हैं॥ २३७ ॥

इसका स्वरूप यह है—जिस तत्वश्रद्धा में भगवान् अर्हन्त सर्वज्ञ द्वारा रचे हुए आगम की आज्ञा को स्वीकार करने से उत्पन्न हुआ तत्त्वज्ञान पाया जाता है, उसे 'आज्ञासम्यक्त्व' कहते हैं। सम्यग्दर्शनज्ञानचारित्रात्मक रत्नत्रयरूप मोक्षमार्ग के विचार से प्रकट होने वाले तत्त्वश्रद्धान को 'मार्ग सम्यक्त्व' कहते हैं। तिरेसट शलाका में विभक्त तीर्थङ्करादि पुराण पुरुषों के चरित को श्रवण करने से उत्पन्न होने वाले श्रद्धाविशेष को उपदेश सम्यक्त्व कहते हैं। साधुजनों के महाव्रत-आदि आचार को निरूपण करने के भाजनप्राय आचाराङ्ग सूत्र के श्रवण से उत्पन्न हुए तत्त्वश्रद्धान को सूत्रसम्यक्त्व कहा है। समस्त शास्त्रों के समूह की सूचना का लक्ष्य बीज पद है और उसके आधार से प्रकट होने वाली तत्त्वरुचि को 'बीज सम्यक्त्व' कहते हैं। आप्त, श्रुत, व्रत व पदार्थों के स्वल्प वर्णन से उत्पन्न होने वाली तत्त्वश्रद्धा को संक्षेप सम्यक्त्व कहते हैं। बारह अङ्ग, चौदह पूर्व और सामायिक-आदि प्रकीर्णक आगमों के अर्थ का समर्थन सुनकर प्रकट होने वाली विस्तृत तत्त्वरुचि को विस्तार सम्यक्त्व कहते हैं।

आगमके विषयों को श्रवण करके उत्पन्न हुए आत्मश्रद्धान में समर्थ तत्त्वश्रद्धान को अर्थसम्यक्त्व कहते

---

१. अवगाढं परमावगाढं। २. आदेशस्तथेति। ३. अभिप्रायः। ४. भाजनप्रायं। ५. समूह। ६. स्वल्प। ७. आत्मनि आत्मनो वा विश्वासः। ★. द्वादशाङ्गचतुर्दशपूर्वप्रकीर्णकभेदेन। ८. 'पूर्णं त्रिविधागममवगाह्योत्पद्यते यत् सम्यक्त्वं तदवगाढं' इति टि० (ख०)। 'त्रिविधागममध्येऽन्यतमावगाहेनोत्पद्यते एवं न, किन्तु परिपूर्णं त्रिविधागममवगाह्योत्पद्यते यत्सम्यक्त्वं तदवगाढं इति टि० (घ०)। ९. विश्वासेनोत्पन्नं।

गृहस्थो वा यति र्वापि सम्यक्त्वस्य समाश्रयः । [1]एकादशविधः पूर्वश्चरमश्च चतुर्विधः[2] ॥२३८॥
मायानिदानमिथ्यात्वशल्यत्रितयमुद्धरेत् । [3]आर्जवाकाङ्क्षणाभावतत्त्वभावनकीलकैः[4] ॥२३९॥
[5]दृष्टिहीनः पुमानेति न यथा पदमीप्सितम् । दृष्टिहीनः पुमानेति न तथा पदमीप्सितम् ॥२४०॥
सम्यक्त्वं नाङ्गहीनं स्याद्राज्यवत्प्राज्यभूतये । [6]ततस्तदङ्गसंगत्यामङ्गी निःसङ्गमीहताम् ॥२४१॥

हैं। अङ्ग, पूर्व और प्रकीर्णक इन तीनों आगमों के पूरी तरह से अवगाहन करने पर उत्पन्न होने वाली गाढ़-श्रद्धा को अवगाढ़ सम्यक्त्व कहते हैं। टिप्पणीकार ने भी यही लिखा है और अवधिज्ञानी, मनःपर्यय ज्ञानी व केवलज्ञानी पूज्य महापुरुषों के विश्वास से उत्पन्न होने वाले प्रगाढ़ तत्त्वश्रद्धान को परमावगाढ़ सम्यक्त्व कहते हैं।

भावार्थ—इन सभी सम्यग्दर्शनों में अन्तरङ्ग कारण दर्शनमोहनीय का उपशम, क्षय और क्षयोपशम है, क्योंकि इसके बिना सम्यक्त्व होना अशक्य है। इनमें दर्शनमोह के उपशम से होनेवाले सम्यक्त्व को औपशमिक व क्षय से प्रकट होनेवाले सम्यग्दर्शन को क्षायिक और दर्शनमोह के क्षयोपशम से उत्पन्न होने वाले सम्यक्त्व को क्षायोपशमिक कहते हैं। परन्तु उक्त भेद बाह्य निमित्तों को आधार बनाकर किये गए हैं।

गृहस्थ श्रावक हो अथवा मुनि, परन्तु उसका सम्यग्दृष्टि होना नितान्त आवश्यक है, क्योंकि सम्यक्त्व के बिना न कोई श्रावक कहा जा सका है और न मुनि। गृहस्थ के ग्यारह भेद हैं, जिन्हें ग्यारह प्रतिमाएँ कहते हैं और मुनि के ऋषि, यति, मुनि व अनगार ये चार भेद हैं॥ २३८॥ व्रती को सरलता-रूपी कीले के द्वारा मायारूपी काँटा निकालना चाहिए। भोग-तृष्णा के त्यागरूपी कीले के द्वारा निदानरूपी काँटे का उन्मूलन करना चाहिए और तत्त्वों की भावना (सम्यक्त्व) रूपी कीले के द्वारा मिथ्यात्वरूपी काँटे को निकालना चाहिए।

भावार्थ—सूत्रकार उमास्वामी ने भी (निःशल्यो व्रती) इस सूत्र द्वारा बतलाया है, कि माया, मिथ्यात्व और निदान ये तीन शल्यें (काँटे) हैं, इनका उन्मूलन करके अहिंसादि व्रतों का धारक व्रती कहा जा सकता है। इससे यह बात जान लेनी चाहिए, कि 'केवल अहिंसादि व्रतों को धारण करनेवाला व्रती नहीं हो सकता। अन्यथा द्रव्यलिङ्गी मुनि को भी, जो कि मिथ्यात्व-आदि तीन शल्यों के होने से पहले गुणस्थान वाला मिथ्यादृष्टि है, व्रती कहा जायगा। इसलिए निःशल्य होकर व्रतों के पालन से व्रती कहा जायगा। इसी प्रकार केवल निःशल्य भी व्रत धारण न करने पर व्रती नहीं कहा जा सकता, अन्यथा चौथे गुणस्थानवर्ती अविरत सम्यग्दृष्टि भी निःशल्य होने के कारण व्रती माना जायगा।' उक्त बात हमने श्रीमत्पूज्य विद्यानन्दि आचार्य के 'तत्त्वार्थश्लोकवार्तिक' के आधार से लिखी है॥ २३९ ॥*

जैसे दृष्टि—नेत्रों-से हीन (अन्धा पुरुष) अपने इच्छित स्थान पर प्राप्त नहीं हो सकता वैसे ही दृष्टि (सम्यक्त्व) से हीन (मिथ्यादृष्टि) मानव भी अपना अभिलषित स्थान (मुक्ति) का लाभ नहीं कर सकता॥ २४०॥ पहले कहे हुए निःशङ्कित-आदि आठ सम्यक्त्व के अङ्गों के बिना सम्यग्दर्शन वैसा विशिष्ट विभूति (स्वर्ग व मुक्ति श्री) देने वाला नहीं होता जैसे मन्त्री व सेनापति आदि राज्य के अङ्गों के

---

१. मूलव्रतं व्रतान्यर्चा—इत्यादिभेदेन। २. ऋषि-यति-मुन्यनगारभेदेन। ३. यथासंख्येन। ४. शङ्कुभिः कृत्वा। ५. नेत्र। ६. अष्टाङ्गपूर्णतायां सत्यां प्राणीनिःसङ्गं चारित्रं वाञ्छतु।

*. देखिए 'तत्वार्थश्लोकवार्तिक' अ० ७, सूत्र १८ की अन्तिम २ लकीरें।

विद्याविभूतिरूपाद्याः सम्यक्त्वरहिते कुतः । न हि बीजव्यपायेऽस्ति [1]सस्यसंपत्तिरङ्गिनि ॥२४२॥
चक्रिश्रीः संश्रयोत्कण्ठा नाकिश्रीर्दर्शनोत्सुका । तस्य दूरे न मुक्तिश्रीर्निर्दोषं यस्य दर्शनम् ॥२४३॥
[2]मूढत्रयं मदाश्चाष्टौ तथानायतनानि[3] षट् । अष्टौ शङ्कादयश्चेति दृग्दोषाः पञ्चविंशतिः ॥२४४॥
निश्चयोचितचारित्रः[4] सुदृष्टिस्तत्त्वकोविदः । अव्रतस्थोऽपि मुक्तिस्थो न व्रतस्थोऽप्यदर्शनः[5] ॥२४५॥
बहिः क्रिया[6] बहिष्कर्म[7] कारणं केवलं भवेत् । रत्नत्रयसमृद्धेः स्यादात्मा रत्नत्रयात्मकः ॥२४६॥
[8]विशुद्धवस्तुधीर्दृष्टिर्बोधः [9]साकारगोचरः । [10]अप्रसङ्गस्तयोर्वृत्तं [11]भूतार्थनयवादिनाम् ॥२४७॥

बिना राज्य विशेष समृद्धिशाली नहीं हो सकता। इसलिए जब सम्यक्त्व के आठों अङ्गों की परिपूर्णता हो जाय तब मुमुक्षु श्रावक निःसङ्ग—निर्ग्रन्थ दिगम्बर मुनि हो जाने का इच्छुक होवे ॥ २४१ ॥

जिस प्रकार किसान को धान्य के बीजों के बिना धान्य-सम्पत्ति नहीं हो सकती उसी प्रकार मिथ्यादृष्टि पुरुष को भी सम्यक्त्व के विना सम्यग्ज्ञान, राज्य-विभूति और लावण्य-सम्पत्ति कैसे हो सकती है? ॥२४२॥ जिसका सम्यग्दर्शन निर्दोष है, चक्रवर्ती की विभूति उसका आलिङ्गन करने के लिए उत्कण्ठित रहती है और देवों की विभूति उसके दर्शन करने के लिए लालायित रहती है, अधिक क्या मुक्ति लक्ष्मी भी उससे दूर नहीं है ॥ २४३ ॥

[अब सम्यग्दर्शन के दोषों का निरूपण करते हैं—]

तीन मूँढ़ताएँ, आठ मद, छह अनायतन और आठ शङ्का-वगैरह, ये सम्यग्दशन के पच्चीस दोष हैं।

भावार्थ—देवमूढ़ता, गुरुमूढ़ता और लोकमूढ़ता ये तीन मूढ़ताएँ हैं। जाति, पूजा, कुल, ज्ञान, रूप, सम्पत्ति, तप व बल का मद करना ये आठ मद हैं। कुदेव और उसका मन्दिर, कुशास्त्र व कुशास्त्र के धारक, कुतप व कुतप के धारक ये छह अनायतन हैं। सम्यग्दर्शन के आठ अङ्गों के उल्टे शङ्का, कांक्षा, विचिकित्सा-आदि आठ दोष हैं। ये सम्यग्दर्शन के पच्चीस दोष हैं। जिसने इन दोषों का त्याग किया है, उसका सम्यग्दर्शन निर्दोष कहा जाता है ॥ २४४ ॥

मोक्षमार्गी कौन है?

तत्त्वों का ज्ञाता सम्यग्दृष्टि मानव, जो कि आत्मस्वरूप की प्राप्ति के लिए योग्य चारित्र का धारक है, अर्थात् स्वरूपाचरण चारित्र का धारक है, व्रत-धारण न करता हुआ भी मुक्ति के मार्ग में स्थित है, किन्तु व्रतों का पालन करते हुए भी जो सम्यग्दर्शन से रहित (मिथ्यादृष्टि) है, वह मुक्ति के मार्ग में स्थित नहीं है ॥२४५॥ बाह्यक्रिया (बाह्य ज्ञान व चारित्रादि) और बाह्यकर्म (देवपूजा-आदि में शारीरिक कष्ट-सहन-आदि) तो रत्नत्रय की उन्नति में केवल निमित्त मात्र हैं, किन्तु रत्नत्रय की समृद्धि का प्रधान कारण (उपादान कारण) तो सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक् चारित्रमय आत्मा ही है ॥ २४६ ॥

निश्चयनय के वेत्ता आचार्यों के मत में, अर्थात्—निश्चय नय की दृष्टि से विशुद्ध आत्मस्वरूप में रुचि होना निश्चय सम्यक्त्व है। एवं विशुद्ध आत्मस्वरूप को विकल्प रूप से यथार्थ जानना निश्चय सम्यग्ज्ञान है और उन सम्यग्दर्शन व सम्यग्ज्ञान के विषय में भेद बुद्धि न करके एक रूप होना, अर्थात्—आत्मस्वरूप में लवलीन होना

---

१. धान्यसम्पत्तिः। २. मूढत्रयस्य मदानां च विकल्पं कविः स्वयमेवोत्तरत्र वक्ष्यति। ३. अनायतनानि षट्, कुदेवतदालयतदागम—इत्यर्थः। ४. अव्रतोऽपि योग्यचारित्रः। ५. मुक्तिस्थो न स्यात्। ६. बाह्यज्ञानचारित्रादि। ७. शरीरग्रहणलक्षणं। ८. आत्मस्वरूपे रुचिर्निश्चयसम्यक्त्वं। ९. आत्मपरिज्ञानं। १०. तयोर्दृग्बोधयोर्विषये अप्रसङ्गः अभेदः एकलोलीभावः निश्चयचारित्रं। ११. निश्चयनयज्ञानिनाम्।

[1]अक्षाज्ज्ञानं [2]रुचिर्मोहाद्देहाद्वृत्तं[3] च नास्ति यत् । आत्मन्यस्मिञ्छिवीभूते तस्मादात्मैव तत्त्रयम्[4]॥२४८॥
नात्मा कर्म न कर्मात्मा [5]तयोर्यन्महदन्तरम्[6] । तदात्मैव तदा [7]सत्ता★ चात्मा व्योमेव केवलम् ॥२४९॥
क्लेशाय कारणं कर्म विशुद्धे स्वयमात्मनि । नोष्णमम्बु स्वतः किन्तु तदौष्ण्यं [8]वह्निसंश्रयम् ॥२५०॥
आत्मा कर्ता स्वपर्याये[9] कर्म कर्तृ स्वपर्यये[10] । मिथो[11] न जातु कर्तृत्वमपरत्रोपचारतः[12] ॥२५१॥
स्वतः सर्वं स्वभावेषु सक्रियं[13] सचराचरम्[14] । निमित्तमात्रमन्यत्र वार्गतेरिव सारिणी[15] ॥२५२॥
जीवन्तु[16] वा म्रियन्तां वा प्राणिनोऽमी स्वकर्मतः । स्वं विशुद्धं [17]मनोऽहिंसन्हिंसकः पापभाग् भवेत् ॥२५३॥

निश्चय चारित्र है ॥२४७॥ इस आत्मा के मुक्त हो जाने पर न तो उसे इन्द्रियों या मन से ज्ञान होता है, न मोह से जन्य रुचि होती है और न शारीरिक आचरण होता है, अतः ज्ञान, दर्शन व चारित्र तीनों आत्मस्वरूप ही हैं।

भावार्थ—उक्त निरूपण निश्चय नय की दृष्टि से किया गया है, साथ में अमृतचन्द्राचार्य ने अपने पुरुषार्थसिद्धयुपाय ग्रन्थ में कहा है कि व्यवहार और निश्चय के ज्ञाता ही जगत में धर्मतीर्थ का प्रवर्तन करते हैं। अतः दोनों दृष्टि से वस्तु-विवेचन श्रेयस्कर है ॥ २४८ ॥

अब आत्मा और कर्म के संबंध को स्पष्ट करते हैं—

आत्मा कर्म नहीं है, अर्थात्—ज्ञानावरणादि रूप नहीं है और कर्म आत्मा नहीं है, अर्थात्—शुद्ध चैतन्यरूप नहीं है, आत्मा और कर्म में महान् भेद हैं, क्योंकि उनका स्वरूप भिन्न-भिन्न है। अतः मुक्तावस्था में कर्म-रहित होने से केवल आत्मा की ही सत्ता है और वहाँ वह केवल शुद्ध आकाश की तरह अमूर्तिकरूप से स्थित है ॥ २४९ ॥ आत्मा स्वयं विशुद्ध है और कर्म उसके क्लेश का कारण है। जैसे जल स्वयं उष्ण नहीं है, अर्थात् शीतल है किन्तु अग्नि के आश्रय से उसमें उष्णता आ जाती है ॥ २५० ॥ आत्मा अपनी पर्याय (सिद्ध-पर्याय या ज्ञानादि गुणों की पर्याय) का कर्ता है और कर्म अपनी पर्याय (टि० नर-नरकादि पर्याय) का कर्ता है। उपचार (व्यवहार) के सिवाय दोनों परस्पर में एक दूसरे के कर्ता नहीं हैं, अर्थात्—उपचार से आत्मा को कर्म का कर्ता, और कर्म को आत्मा का कर्ता कहा जाता है, परन्तु वास्तव में दोनों अपनी-अपनी पर्यायों के ही कर्ता है ॥ २५१ ॥ छह द्रव्यों वाला समस्त चराचर लोक स्वयं अपने-अपने स्वभावों में क्रिया-सहित है, अर्थात्-अपने-अपने स्वभावों का कर्ता है, दूसरी वस्तु तो उसमें निमित्तमात्र है। उदाहरण में—आत्मा अपनी सिद्धपर्याय का कर्ता है और कर्म अपनी कर्म पर्याय का कर्ता है, दूसरी वस्तु निमित्त मात्र है। जैसे जल में स्वयं प्रवाहित होने की शक्ति है परन्तु नदी उसके प्रवाहित होने में निमित्तमात्र है ॥ २५२ ॥

यहाँ शङ्का यह है जब जीव अपने अपने कर्मों के उदय से जीते व मरते हैं तो मारने में निमित्त हुए को हिंसा का पाप क्यों लगता है? अतः इसका समाधान करते हैं—

१. आत्मनि मोक्षं प्राप्ते सति अक्षात् षडिन्द्रियात् ज्ञानं न भवति। २. मुक्तजीवे मोहनीयकर्मणः रुचिर्न किन्तु आत्मरुचिरेव। ३. शरीराच्चारित्रं न किन्तु आत्मन्येकलोलीभावश्चारित्रं। ४. दर्शनज्ञानचारित्रत्रयं। ५. आत्मकर्मणोः। ६. भेदः। ७. आत्मतत्त्वे। ★. 'वात्माऽव्योमेव केवलं' (ख०)। अद्य इदानीं केवलमात्मानमेव अङ्गीकृतः? एव निश्चयेन। ८. तस्य जलस्योष्णत्वं अग्नेर्भवति। ९. सिद्धपर्यायलक्षणे। १०. नरनरकादौ पर्याये कर्तृ। ११-१२. परस्परमात्मकर्मणोः कर्तृत्वं न, उपचाराद् व्यवहारादन्यत्र परस्परं कर्तृत्वं भवति न तु निश्चयात्। १३. निजस्वभावेषु क्रियासहितं, आत्मा आत्मानं सिद्धं करोति, कर्म कर्म करोति। १४. जगत्। १५. नौकजलगमनस्य।

१६. 'मरदु व जियदु व जीवो अयदाचारस्स णिच्छिदा हिंसा। पयदस्स णत्थि बन्धो हिंसामित्तेण समिदस्स॥'

१७. अशुद्धं मनः कुर्वन् पुमान् हिंसको भवति पापी च। 'स्वयमेवात्मना ऽऽत्मानं हिनस्त्यात्मा प्रमादवान् पूर्वं, प्राण्यन्तराणान्तु पश्चात् स्याद्वा न वा वधः'। सर्वार्थ सिद्धि अ० ७ सूत्र १३ से संकलित —

शुद्धमार्गमतोद्योगः शुद्धचेतोवचोवपुः । [1]शुद्धान्तरात्मसंपन्नो हिंसकोऽपि न हिंसकः ॥ २५४ ॥
पुण्यायापि[2] भवेद्दुःखं पापायापि भवेत्सुखम्[3] । स्वस्मिन्नन्यत्र वा नीतमचिन्त्यं चित्तचेष्टितम् ॥ २५५ ॥
[4]सुखदुःखाविधातापि भवेत्पापसमाश्रयः । पटीमध्यविनिक्षिप्तं वासः स्यान्मलिनं न किम् ॥ २५६ ॥

ये प्राणी अपने-अपने कर्म के उदय से जीवें या मरें, किन्तु जो मानव अपना मन विशुद्ध (कषाय-रहित) करता है वह अहिंसक है और जो अपने मन को अशुद्ध (कषाय-युक्त) करता है, वह हिंसक और पापी है। जो शुद्ध मार्ग (सदाचार-मार्ग) में प्रयत्नशील है, जिसका मन, वचन व काय शुद्ध है एवं जिसकी अन्तरात्मा शुद्ध (कषायभाव से कलुषित नहीं) है, वह हिंसा करके भी हिंसक नहीं है।

भावार्थ—अमृतचन्द्राचार्य अपने 'पुरुषार्थसिद्धयुपाय' ग्रन्थ में लिखते हैं कि 'राग, द्वेष व मोहादि, दुर्वासनाओं को त्याग कर अपने भावों को विशुद्ध रखते हुए दूसरे प्राणियों की रक्षा करना या यत्नाचार पूर्वक प्रवृत्ति करना अहिंसा है और इसके विपरीत आत्मिक सुख-शान्ति को भङ्ग करनेवाले रागादि दुर्भावों से अपने या दूसरों के प्राणों को घात करना या दिल दुखना हिंसा है। जो कषाय-वश यत्नाचार पूर्वक प्रवृत्ति नहीं करता, उसके द्वारा चाहे जीव मरें अथवा न भी मरें तो भी वह हिंसा के पाप से बच नहीं सकता। ॥ २५३-२५४ ॥

स्वयं को या दूसरों को दुःख देने से पुण्य कर्म का भी बंध होता है और सुख देने से पाप कर्म का भी बंध होता है, क्योंकि मन की चेष्टाएँ चिन्तवन के लिए अशक्य हैं। अभिप्राय यह है कि यदि तपश्चर्या व कष्ट-सहन शुभ परिणामों से यथाविधि किये जाते हैं तो उससे पुण्य कर्म का बन्ध होता है, परन्तु यदि अशुभ-परिणामों से किये जाते हैं तो उनसे पाप-बन्ध ही होगा। इसी तरह शुभ परिणाम से दूसरों को दुःख देने से पुण्य बन्ध होता है और अशुभ परिणामों से दुःख देने से पापबन्ध होता है, क्योंकि मन की चेष्टाएँ अचिन्त्य होती हैं ॥ २५५ ॥

भावार्थ—जैनदर्शनकार समन्तभद्राचार्य[5] ने आप्तमीमांसा में इस विषय की विशद व्याख्या की है, उसे हम संकलित करते हैं—'कुछ लोगों को मान्यता है कि दूसरे प्राणी को दुःख देने से पाप-बन्ध ही होता है और सुख देने से पुण्य-बन्ध होता है।' परन्तु उक्त मान्यता सही नहीं है, क्योंकि ऐसा मानने से तो विष व शस्त्रादि दूसरों को दुःख देने में निमित्त हैं उन्हें पापबन्ध होना चाहिए एवं कषाय-रहित वीतराग दूसरे को सुख देने में निमित्त है उसे पुण्य बन्ध का प्रसङ्ग हो जायगा तो मुक्ति संघटित नहीं होगी। लोक में आपरेशन करने वाला डाक्टर भी बीमार को कष्ट देने में निमित है, तो उसे भी पापबन्ध का प्रसङ्ग हो जायगा ॥ १ ॥

कुछ लोगों की मान्यता है कि 'अपने को दुःख देने से पुण्यबन्ध होता है और सुख देने से पापबन्ध होता है।' ऐसा मानना भी ठीक नहीं क्योंकि ऐसा मानने से तो वीतराग विद्वान् मुनि को भी पुण्य-पापकर्मों को

---

१. धर्मे परिणतः सावद्यलेशो बहु अघ्नन्नपि बचनात्। २. तपः कष्टादिकं तदपि विरुद्धमाचरितं कदाचित् पापाय भवति तेन एकान्तं नास्ति। ३. पापाय तदपि एकान्तं न। ४. परन्तु मनःप्रसारसहितः।

५. तथा च समन्तभद्राचार्यः—
पापं ध्रुवं परे दुःखात् पुण्यं च सुखतो यदि। अचेतनाकषायौ च बध्येयातां निमित्ततः ॥ १ ॥
पुण्यं ध्रुवं स्वतो दुःखात् पापं च सुखतो यदि। वीतरागो मुनिर्विद्वांस्ताभ्यां युञ्ज्यान्निमित्ततः ॥ २ ॥
विशुद्धिसंक्लेशाङ्गं चेत् स्वपरस्थं सुखासुखं। पुण्यपापास्रवौ युक्तौ न चेद्व्यर्थस्तवार्हतः ॥ ३ ॥
आप्तमीमांसा से संकलित—सम्पादक

बहिष्कार्यासमर्थेऽपि हृदि[1] हृद्येव संस्थिते । परं [2]पापं परं पुण्यं[3] परमं च पदं[4] भवेत् ॥ २५७ ॥
प्रकुर्वाणः क्रियास्तास्ताः केवलं क्लेशभाजनः । यो न चित्तप्रचारज्ञस्तस्य मोक्षपदं कुतः ॥ २५८ ॥
यज्जानाति यथावस्थं वस्तु[5]सर्वस्वमञ्जसा । तृतीयं लोचनं नृणां सम्यग्ज्ञानं तदुच्यते ॥ २५९ ॥
यष्टिवज्जनुषान्धस्य तस्यात्सुकृतचेतसः । प्रवृत्तिविनिवृत्त्यङ्गं हिताहितविवेचनात् ॥ २६० ॥
मतिर्जागर्ति [6]दृष्टेऽर्थे दृष्टेऽदृष्टे तथागमः । अतो न दुर्लभं तत्त्वं यदि निर्मत्सरं[7] मनः ॥ २६१ ॥
यद्यर्थे दर्शितेऽपि स्याज्जन्तोः[8] संतमसा मतिः । ज्ञानमालोकवत्तस्य वृथा[9] रविरिपोरिव ॥ २६२ ॥

बन्ध करने का प्रसङ्ग हो जायगा। क्योंकि वह तपश्चर्या द्वारा अपने को दुःखी व ज्ञानाभ्यास द्वारा अपने को सुखी बनाता है तब मुक्ति किसे होगी ? ॥२॥ इसलिए जैनदर्शन बताता है कि पुण्य-पापबन्ध की व्यवस्था हमारे विशुद्ध व संक्लिष्ट परिणामों पर अवलम्बित है, इससे अपने लिए या दूसरों के लिए दिये हुए सुख व दुःख यदि क्रमशः शुभपरिणाम व अशुभ परिणाम पूर्वक हैं तब पुण्यबन्ध और पापबन्ध होता है, अर्थात्—यदि हम दूसरे प्राणी को कषाय-वश दुःख देते हैं तो हमें पापबन्ध ही होगा और यदि हम शुभ परिणामों से दूसरों को सुख देते हैं तो हमें पुण्यबन्ध ही होगा, यदि ऐसा नहीं है तो आपके मत में पुण्यास्रव या पापास्रव निष्फल हैं ॥ ३ ॥

चंचल मन वाला प्राणी दूसरों को सुख-दुःख न देता हुआ भी पापबंध करने वाला हो जाता है। क्या कपड़े की मञ्जूषा में रक्खा हुआ वस्त्र मलिन नहीं होता ? अर्थात्—वैसे ही भोगों की ओर दौड़ता हुआ मन भी क्या अशुभ ध्यान के कारण मलिन होकर पापबंध करने वाला नहीं होता ? ॥ २५६ ॥ शरीरादि से हिंसा व परोपकार-आदि अशुद्ध व शुद्ध कार्य करने में असमर्थ होने पर भी, यदि चित्त चित्त में लीन रहता है तो वह (चित्त) अशुभ ध्यान द्वारा तीव्रतम पापबंध करता है और शुभ ध्यान द्वारा उत्कृष्ट पुण्य बंध करता है तथा शुक्लध्यान द्वारा उत्कृष्ट मोक्ष पद प्राप्त करता है ॥ २५७ ॥ जो मानव चित्त की चंचलता को नहीं जानता, अर्थात्—जो भोगों की ओर दौड़ते हुए मन को नियन्त्रित करके धर्मध्यान में और जीवादि तत्त्वों के स्वरूप के चिन्तवन में प्रेरित नहीं करता, वह मानव बाह्य क्रिया काण्ड (अनशन-आदि तप) को करता हुआ भी केवल कष्ट का पात्र होता है, उसे मोक्षपद कैसे प्राप्त हो सकता है ? अतः चित्त को नियन्त्रित करने में प्रयत्नशील होना चाहिए, तभी बाह्य क्रियाएँ फलप्रद हो सकती हैं, अन्यथा निरर्थक हैं ॥ २५८ ॥

[अब सम्यग्ज्ञान का स्वरूप बताते हैं—]

जो वस्तु का समस्त स्वरूप (गुण व पर्याय) जैसे का तैसा (हीनाधिकता से रहित तथा संशय-आदि मिथ्याज्ञान से रहित) निश्चय करता है, उसे सम्यग्ज्ञान कहते हैं। यह मनुष्यों का तीसरा नेत्र है ॥२५९॥ वह सम्यग्ज्ञान पुण्य करने में मनोवृत्ति रखने वाले धार्मिक मानव को हित (सुख व सुख के कारण) व अहित (दुःख व दुःख के कारण) का विवेचन करके वैसा उसकी हित-प्राप्ति व अहित-परिहार में कारण होता है, जैसे जन्मान्ध पुरुष को लाठी ऊँची-नीची जगह बतलाकर उसकी हित-प्राप्ति और अहित-परिहार (ऊबड़-खाबड़ जगह से बचाने) में कारण होती है ॥२६०॥ मतिज्ञान चक्षुरादि इन्द्रियों के विषयीभूत पदार्थों को ही जानता है, किन्तु श्रुतज्ञान (आगम) इन्द्रियों के विषयभूत और अतीन्द्रिय (सूक्ष्म, अन्तरित व दूरवर्ती) दोनों प्रकार के पदार्थों का ज्ञान कराता है, इसलिए यदि ज्ञाता का मन ईर्षालु नहीं है तो उसे तत्वज्ञान होना दुर्लभ नहीं है ॥२६१॥ यदि तत्त्वोपदेशक द्वारा जीवादि पदार्थों का स्वरूप प्रतिपादन कर देने पर भी शिष्य

---

१. चित्ते। २. से ४. अशुभध्यानेन पापं स्यात्, शुभेन पुण्यं, परमशुक्लेन परं पदं। ५. सर्वार्थं—सर्ववस्तु स्वरूपमित्यर्थः। ६. गुरूपदिष्टे पदार्थे। ७. मात्सर्य-रहितं। ८. मलिना। ९. उलूकस्येव।

ज्ञातुरेव स दोषोऽयं यद्बाधेऽपि वस्तुनि । मतिविपर्ययं धत्ते[1] यथेन्दौ[2] मन्दचक्षुषः ॥ २६३ ॥
[3]ज्ञानमेकं पुनर्द्वेधा पञ्चधा चापि तद्भवेत् । अन्यत्र केवलज्ञानात्तत्प्रत्येकमनेकधा ॥ २६४ ॥
[4]अधर्मकर्मनिर्मुक्तिर्धर्मकर्मविनिर्मितिः[5] । चारित्रं तच्च सागारानगारयतिसंश्रयम् ॥ २६५ ॥

की बुद्धि मलिन या अज्ञान-बहुल रहती है, तो उसका ज्ञान वैसा व्यर्थ है जैसे उल्लू के लिए सूर्य का प्रकाश व्यर्थ होता है ॥२६२॥ जैसे हीन दृष्टि (काच-कामलादि रोग से ग्रस्त नेत्रवाले) मनुष्य की बुद्धि चन्द्र के विषय में विपरीत होती है, अर्थात्—उसे एक के दो चन्द्र दिखाई देते हैं या शुभ्र चन्द्र नीला दिखाई देता है, उसमें उसको चक्षु का दोष समझा जाता है, न कि चन्द्र का, वैसे ही प्रत्यक्ष-आदि प्रमाणों से बाधा-रहित वस्तु (कथंचिन्नित्यानित्यात्मक जीवादि वस्तु) में भी बुद्धि के विपरीत हो जाने में (वस्तु को सर्वथा नित्य या सर्वथा अनित्य समझने में) ज्ञाता का ही दोष (मिथ्यात्व कर्म का उदय) है, न कि वस्तु का ॥२६३॥

[अब सम्यग्ज्ञान के भेदों का निरूपण करते हैं—]

जिसके द्वारा बाह्य व आध्यात्मिक पदार्थों में संशय, विपर्यय व अनध्यवसाय-रहित यथार्थता का निश्चय किया जाय उसे सम्यग्ज्ञान कहते हैं, वह सामान्य से एक भेद वाला है। प्रत्यक्ष व परोक्ष के भेद से वह दो प्रकार का है। मतिज्ञान, श्रुतज्ञान, अवधिज्ञान, मनःपर्यय और केवलज्ञान के भेद से वह पाँच प्रकार का है। केवल ज्ञान के सिवाय अन्य चार ज्ञानों में से प्रत्येक के अनेक भेद हैं। जैसे—मतिज्ञान के तीन सौ छत्तीस भेद हैं। श्रुतज्ञान अङ्ग व अङ्ग बाह्य के भेद से दो प्रकार का है। अवधिज्ञान-देशावधि, परमावधि व सर्वावधि के भेद से तीन प्रकार का है और देशावधि व परमावधि भी प्रत्येक जघन्य, मध्यम व उत्तम के भेद से तीन प्रकार का है। और देशावधि, परमावधि व सर्वावधि इन तीनों में से प्रत्येक के अनुगामी, अननुगामी, वर्धमान, हीयमान, अवस्थित, अनवस्थित, प्रतिपाति एवं अप्रतिपाति के भेद से आठ प्रकार का है। मनःपर्यय ज्ञान भी ऋजु व विपुलमति के भेद से दो प्रकार का है और ये दोनों जघन्य, मध्यम व उत्तम के भेद से तीन प्रकार के हैं ॥२६४॥

[अब सम्यग्चारित्र का स्वरूप व भेद कहते हैं—]

सम्यग्ज्ञानी के हिंसा, झूठ, चोरी, कुशील व परिग्रह रूप पापक्रियाओं के त्याग को और धार्मिक क्रियाओं (अहिंसा, सत्य, अचौर्य, ब्रह्मचर्य व परिग्रह-त्याग) के करने को सम्यग्चारित्र कहते हैं, वह चारित्र गृहस्थों से धारण करने योग्य अणुव्रत और मुनियों से धारण करने योग्य महाव्रत

१. चन्द्रे । २. हीनचक्षुः चन्द्रं नीलं कृष्णादिकं पश्यति, द्वौ त्रीन्वा चन्द्रान् पश्यति ।

३. ज्ञानमेकमित्यादि—ज्ञायते निश्चीयते अव्युत्पत्तिसंशयविपर्यासव्युदासेन बाह्याध्यात्मिकपदार्थेषु याथात्म्यं येन तज्ज्ञानं, एकज्ञानार्थस्य सर्वत्रानुगमात् । द्वेधा-प्रत्यक्षपरोक्षभेदेन । पंचधा-मतिश्रुतावधिमनःपर्ययकेवलभेदेन । प्रत्येकं मतिस्तावदनेकधा—षट्त्रिंशत्त्रिशतीभेदेन । तथाहि—षडिन्द्रियाणि अर्थव्यञ्जनपर्यायलक्षणपर्यायविषयैरवग्रहेहावायधारणाभिर्गुणितानि चतुर्विंशति भवन्ति । चक्षुरनिन्द्रियवर्जितानामपरेषां चतुर्णामिन्द्रियाणां व्यञ्जनलक्षणपर्यायविषयाश्चत्वारोऽवग्रह एवमेतेषामष्टाविंशति बह्वादिभिर्द्वादशभिर्गुणिता षट्त्रिंशत्त्रिशती च भवति । श्रुतमनेकधा—अङ्गाङ्गबाह्यभेदेन । तत्राङ्गानि आचारादीनि अङ्गबाह्यानि सामायिकादीनि पुनरपि पर्याय-पर्यायसमासाक्षराक्षरसमासभेदेन विंशतिभेदं । अवधिरनेकधा—देशावधि - परमावधि—सर्वावधिभेदेन । देशावधिपरमावधी अपि प्रत्येकं जघन्यमध्यमोत्तमभेदेन त्रिविधौ । देशावधित्रयं प्रत्येकं यथासंभवमनुगाम्यननुगामिवर्धमानहीयमानावस्थितानवस्थितप्रतिपाति—अप्रतिपातिभेदेनाष्टविधं । मनःपर्ययोऽनेकधा ऋजुविपुलमतिभेदेन पुनः प्रत्येकमेतौ जघन्यादिभेदेन त्रिविधौ ।

४. त्यागः । ५. करणं ।

[1]देशतः प्रथमं तत्स्यात्सर्वतस्तु[2] द्वितीयकम् । चारित्रं चारुचारित्रविचारोचितचेतसाम् ॥ २६६ ॥
देशतः सर्वतो वापि नरो न लभते व्रतम् । [3]स्वर्गापवर्गयोर्यस्य नास्त्यन्यतरयोग्यता ॥ २६७ ॥
[4]तुण्डकण्डूहरं शास्त्रं सम्यक्त्वविधुरे[5] नरे । ज्ञानहीने तु चारित्रं दुर्भगाभरणोपमम् ॥ २६८ ॥
सम्यक्त्वात्सुगतिः प्रोक्ता ज्ञानात्कीर्तिरुदाहृता । वृत्तात्पूजामवाप्नोति त्रयाच्च लभते शिवम् ॥ २६९ ॥
रुचिस्तत्त्वेषु सम्यक्त्वं ज्ञानं तत्त्वनिरूपणम् । औदासीन्यं परं प्राहुर्वृत्तं सर्वक्रियोज्झितम् ॥ २७० ॥
वृत्तमग्निरुपायो[6] धीः सम्यक्त्वं च रसौषधिः[7] । साधुसिद्धो भवेदेष [8]तल्लाभादात्मपारदः[9] ॥ २७१ ॥
सम्यक्त्वस्याश्रयश्चित्तमभ्यासो मतिसंपदः[10] । चारित्रस्य शरीरं[11] स्याद्वित्तं[12] दानादिकर्मणः ॥ २७२ ॥

के भेद से दो प्रकार का है ॥ २६५ ॥ विशुद्ध चारित्र के विचार से योग्य चित्त-वृत्ति वाले आचार्यों ने गृहस्थों का देशचारित्र कहा है, क्योंकि उसमें हिंसा, झूठ, चोरी, कुशील व परिग्रह इन पाँच पापों का एक देश त्याग किया जाता है और मुनियों का सकलचारित्र कहा है, क्योंकि उसमें हिंसा-आदि पाँच पापों का सर्वदेश त्याग किया जाता है ॥ २६६ ॥ जिस मनुष्य में स्वर्ग व मोक्ष में से किसी को भी प्राप्त करने की योग्यता (शक्ति) नहीं है, वह न तो देश चारित्र ही पाल सकता है और न सकल चारित्र ही पाल सकता है ॥ २६७ ॥ सम्यक्त्व-हीन मानव का शास्त्रज्ञान केवल उसके मुख की खुजली दूर करता है—अर्थात्-वाद-विवाद करने में ही समर्थ होता है; क्योंकि उसमें आत्मदृष्टि नहीं होती। एवं ज्ञान-शून्य का चारित्र-धारण विधवा स्त्री के आभूषण-धारण करने के समान निरर्थक है।

भावार्थ—विना सम्यक्त्व के शास्त्राभ्यास–ज्ञानार्जन–निरर्थक है और विना ज्ञान के चारित्र का पालन करना व्यर्थ है ॥ २६८ ॥ सम्यग्दर्शन से मनुष्य को प्रशस्त गति–स्वर्ग-श्री प्राप्त होती है और सम्यग्ज्ञान से उसकी कीर्ति कौमुदी का प्रसार होता है और सम्यक्चारित्र से सन्मान प्राप्त होता है और तीनों से मुक्ति श्री प्राप्त होती है ॥ २६९ ॥ आचार्यों ने कहा है तत्त्वों में रुचि का होना सम्यग्दर्शन है। तत्त्वों का कथन कर सकना सम्यग्ज्ञान है एवं समस्त पाप क्रियाओं की त्यागवाली उदासीनता होना सम्यक् चारित्र है ॥२७०॥ जो आत्मा-रूपी पारद (पारा) अनादिकाल से मिथ्यात्व, अज्ञान व असंयमरूपी कुधातुओं के संसर्ग से अशुद्ध हो रहा है, उसे विशुद्ध करने के लिए, सम्यग्दर्शन-ज्ञान चारित्र अनूठा साधन है। अर्थात्–उसे विशुद्ध करने के लिए सम्यक् चारित्र अग्नि है और सम्यग्ज्ञान उपाय है तथा सम्यग्दर्शन (चित्त की विशुद्धि) रसौषधि (नीबू के रस में घुटा हुआ सिंग्रप) है। अर्थात्–उक्त रत्नत्रय की प्राप्ति से यह आत्मारूपी पारा विशुद्ध होकर सांसारिक समस्त व्याधियों को ध्वंस करके व मुक्ति श्री प्राप्त करता है।

भावार्थ—अतः मुमुक्षु विवेकी मानव को रत्नत्रय की प्राप्ति के लिए सतत् प्रयत्नशील होना चाहिए ॥ २७१ ॥ सम्यग्दर्शन का आश्रय चित्त है। अर्थात्—इसकी प्राप्ति के लिए मानव को अपने चित्त की विशुद्धि करनी चाहिए। और ज्ञानलक्ष्मी का आश्रय शास्त्राभ्यास है। अर्थात्—ज्ञानलक्ष्मी की प्राप्ति के लिए मनुष्य को शास्त्रों का अभ्यास करना चाहिए। चारित्र का आश्रय शरीर है, अर्थात्—इसकी प्राप्ति के लिए शारीरिक कष्ट

१. विरतिः। २. विरतिः। ३. स्वर्गमोक्षयोर्मध्ये यस्य जीवस्य एकस्यापि योग्यता न भवति तस्याणुव्रतं महाव्रतं च न भवति। ४. मुखखर्जन। ५. रहिते। ६. धमण-फूकण। ७. वीर्यसहितमौषधम्। ८. दर्शनज्ञान चारित्रप्राप्तेः। ९. आत्मा एव पारदः। १०. ज्ञानलक्ष्म्याः अभ्यास एव आश्रयः स्थानं। ११. आश्रयः। १२. आश्रयः।

इत्युपासकाध्ययने रत्नत्रयस्वरूपनिरूपणो नामैकविंशतितमः कल्पः ।


इति सकलतार्किकलोकचूडामणेः श्रीमन्नेमिदेवभगवतः शिष्येण सद्योऽनवद्यगद्यपद्यविद्याधरचक्रचक्रवर्तिशिखण्डमण्डनीभवच्चरणकमलेन श्रीसोमदेवसूरिणा विरचिते यशोधरमहाराजचरिते यशस्तिलकापरनाम्न्यपवर्गमार्गमहोदयो नाम षष्ठ आश्वासः—

सहन करते हुए पाप क्रियाओं का त्याग करना चाहिए और दान-पूजा-आदि धार्मिक कर्तव्यों का आश्रय धन है। अर्थात्—न्याय से संचित किये हुए धन को पात्रदान-आदि धार्मिक कार्यों में लगाना चाहिए ।। २७२ ।।

इस प्रकार उपासकाध्ययन में रत्नत्रय का स्वरूप बतलानेवाला इक्कीसवाँ कल्प समाप्त हुआ।

इस प्रकार समस्त तार्किक-समूह में चूड़ामणि (सर्वश्रेष्ठ) श्रीमदाचार्य 'नेमिदेव' के शिष्य श्रीमत्सोमदेव सूरि द्वारा, जिसके चरणकमल तत्काल निर्दोष गद्य-पद्य विद्याधरों के चक्रवर्तियों के मस्तकों के आभूषण हुए हैं, रचे हुए 'यशोधरमहाराजचरित' में, जिसका दूसरा नाम 'यशस्तिलकचम्पू' महाकाव्य है, मोक्षमार्ग का उदयशाली यह षष्ठ आश्वास समाप्त हुआ।

इसप्रकार दार्शनिक-चूड़ामणि श्रीमदम्बादास शास्त्री व श्रीमत्पूज्य आध्यात्मिक सन्त
श्री १०५ क्षुल्लक गणेश प्रसाद जी वर्णी न्यायाचार्य के प्रधान शिष्य, नीति-
वाक्यामृत के अनुसन्धान-पूर्वक भाषा-टीकाकार, सम्पादक व प्रकाशक,
जैनन्यायतीर्थ, प्राचीनन्यायतीर्थ, काव्यतीर्थ, आयुर्वेद-विशारद,
एवं महोपदेशक-आदि अनेक उपाधि-विभूषित, सागर
निवासी परवार जैन जातीय श्रीमत्सुन्दरलाल शास्त्री
द्वारा रची हुई 'यशस्तिलकचम्पू महाकाव्य'
की 'यशस्तिलक-दीपिका' नाम की
भाषाटीका में मोक्षमार्ग का
उदयशाली यह षष्ठ
आश्वास पूर्ण हुआ।



सप्तम आश्वासः

पुन[1]र्गुणमणिकटक[2], [3]वैकटकर्मेव माणिक्यस्य, सुधाविधानमिव प्रासादस्य, [4]पुरुषकारानुष्ठानमिव दैवसंपदः[5], पराक्रमावलम्बनमिव नीतिमार्गस्य, विशेषवेदित्वमिव[6] सेव्यत्वस्य[7], व्रतं हि खलु सम्यक्त्वरत्नस्योपबृंहकमाहुः । तच्च[8] देशयतीनां द्विविधं मूलोत्तरगुणाश्रयणात् ।

तत्र—

मद्यमांसमधुत्यागः *सहोदुम्बरपञ्चकैः । अष्टावेते गृहस्थानामुक्ता मूलगुणाः श्रुते ॥ १ ॥
सर्वदोषोदयो मद्यान्महामोहकृतेर्मतेः । सर्वेषां पातकानां च पुरःसरतया स्थितम् ॥ २ ॥
हिताहितविमोहेन देहिनः[9] किं न पातकम् । कुर्युः संसारकान्तारपरिभ्रमणकारणम् ॥ ३ ॥
मद्येन यादवा नष्टा नष्टा द्यूतेन पाण्डवाः । इति सर्वत्र लोकेऽस्मिन् सुप्रसिद्धं कथानकम् ॥ ४ ॥
समुत्पद्य[10] विपद्येह देहिनोऽनेकशः[11] किल । मद्यीभवन्ति कालेन[12] मनोमोहाय देहिनाम् ॥ ५ ॥
मद्यैकबिन्दुसंपन्नाः प्राणिनः प्रचरन्ति चेत् । पूरयेयुर्न संदेहं समस्तमपि विष्टपम् ॥ ६ ॥
मनोमोहस्य हेतुत्वान्निदानत्वाच्च[13] दुर्गतेः । मद्यं सद्भिः सदा त्याज्यमिहामुत्र च दोषकृत् ॥ ७ ॥

ज्ञानादि गुणरूपी मणियों के कङ्कणीभूत हे मारिदत्त महाराज! आचार्यों ने कहा है कि निश्चय से व्रत (अहिंसा-आदि) सम्यक्त्वरूपी रत्न के वैसे गुणवर्धक हैं जैसे शोधनादि क्रिया (शाणोल्लेखन-आदि) माणिक्य की गुणवर्धक होती है। जैसे चूने का लेप महल की शोभावर्धक होता है। जैसे पुरुषार्थ का अनुष्ठान भाग्य सम्पत्ति (पूर्वोपार्जित पुण्य लक्ष्मी) का गुणवर्धक होता है। जैसे पराक्रम का आश्रय नीतिमार्ग—सदाचार की समृद्धि करने वाला होता है और जैसे विद्वत्ता सेवनीय (गुरु व राजा-आदि) की उन्नति करने वाली होती है।

श्रावकों के व्रत मूलगुण व उत्तरगुण के भेद से दो प्रकार के होते हैं।

आठ मूलगुण

मद्य, मांस और मधु का त्याग और पाँच उदुम्बर फलों का त्याग ये गृहस्थों के आठ मूलगुण आगम में कहे गये हैं ॥ १ ॥

मद्य—शराब-के दोष—बुद्धि को अज्ञान से आच्छादित करने वाले मद्यपान से समस्त दोष (काम व क्रोधादि) उत्पन्न होते हैं और यह समस्त पापों में अग्रेसर है ॥ २ ॥ मद्य पीने से हित और अहित का विवेक नष्ट हो जाता है, जिससे शराबी लोग संसाररूपी वन में घुमाने वाले कौन-कौन से पाप नहीं करते ? अर्थात्—मद्य पीने से समस्त पाप उत्पन्न होते हैं ॥ ३ ॥ सर्वत्र लोक में यह कथा प्रसिद्ध है, कि शराब पीने से यदुवंशी राजा लोग नष्ट हो गए और जुआ खेलने के कारण पाण्डव नष्ट हो गए ॥ ४ ॥ निश्चय से शराब में असंख्यात जीव अनेक बार जन्म-मरण करके स्वल्प समय में शराबियों का मन मूर्च्छित करने के लिए शराब रूप हो जाते हैं ॥ ५ ॥ मद्य की एक बिन्दु में उत्पन्न हुए बहुत से जीव यदि वहाँ से निकलकर भ्रमण करें तो निस्सन्देह समस्त लोक को व्याप्त कर सकते हैं ॥ ६ ॥ मद्यपान शराबी का मन मूर्च्छित करने

---

१. यथा। २. कङ्कण हे मारिदत्त!। ३. 'शोधनरचनाक्रिया' टि० (ख०)। 'शोधनादिक्रिया' टि० (घ०) (च०) पञ्जिकायां च। ४. पौरुषशक्तिः, कर्तव्यं। ५. पूर्वोपार्जितपुण्यस्य। ६. विद्वत्त्वं। ७. गुरोः नृपादिकस्य। ८. व्रतं। *. 'सहोदुम्बरपञ्चकः' इति क०, ख०, घ०, च०। ९. जीवाः। १०. मृत्वा। ११. बहुवारान्। १२. स्वल्पेन। १३. कारणत्वात्।

श्रूयतामत्र मद्यप्रवृत्तिदोषस्योपाख्यानम्[1]—[2]तत्पुरोद्धवराजन्य[3]गर्वोर्वानल[4]हुतीभूताहितान्वयमकरके[5]पोदनपुरादेकपादनाम परिव्राजको जाह्नवीजलेषु मज्जनाय व्रजन्निजच्छायापरद्विपाशङ्कातिक्रुद्धमदान्धगन्धसिन्धु[6]रोद्धुरविषाण[7]विदीर्यमाणमेदिनीहृदये विन्ध्याटवीविषये प्रकटप्रौढयौवनासवास्वादपुनरुक्तकादम्ब[8]रीपानप्रसूतासरालविलास[9]महिलाभिर्महिलाभिः सह पलोप[10]दंशवश्यं [11]कश्यमासेवमानस्य महतो मातङ्गसमूहस्य मध्ये निपतितः सन् सीधुसंबन्ध[12]विधुरधीसङ्गैर्मातङ्गैरुपरुध्य असौ किलैवमुक्तः—'त्वया मद्यमांसमहिलासु मध्येऽन्यतमसमागमः कर्तव्यः, अन्यथा जीवन्न पश्यसि मन्दाकिनीम्' इति। सोऽप्येवमुक्त[13]स्तिलसर्षपप्रमितस्यापि हि पिशितस्य प्राशने स्मृतिषु महत्यो विपत्तयः श्रूयन्ते। मातङ्गीसङ्गे च मृतिनिकेतनं[14] प्रायश्चेतनम्[15]। य एवंविधां सुरां पिबति न तेन सुरा पीता भवतीति निखिलमखशिखामणौ सौत्रामणौ मदिरास्वादाभिसंधि[16]रनुमतविधिरस्ति। यैश्च पिष्टोदकगुडधातकीप्रायैर्वस्तुकार्यैः सुरा संधीयते[17] तान्यपि वस्तूनि विशुद्धान्येवेति चिरं चेतसि विचार्यानार्यविद्यानिधानः* कृतमद्यपानस्तन्माहात्म्यात्समाविर्भूत-

---

में कारण है और दुर्गति का कारण है, इसलिए इस लोक व परलोक में दुःख देनेवाले मद्यपान का सज्जन पुरुषों को सदा के लिए त्याग कर देना चाहिए ॥ ७ ॥

९. अब मद्य पीनेवाले एक संन्यासी की कथा कहते हैं—

मद्यपान के दोषों के विषय में एक कथा है, उसे श्रवण कीजिए—

'एकपाद' नाम का संन्यासी, जहाँ के राजा की महान् गर्वरूपी बड़वानल अग्नि में शत्रुओं के वंशरूप मकर होमें गए थे, ऐसे पोदनपुर नाम के नगर से गङ्गानदी में स्नान करने के लिए जा रहा था। मार्ग में वह विन्ध्याटवी-देश से गुजरा, जहाँपर अपनी छाया में दूसरे हाथी की शङ्का होने से अत्यन्त क्रुद्ध हुऐ मदोन्मत्त मतवाले हाथी के मजबूत दाँतों से पृथिवी का मध्यभाग विदीर्ण किया जा रहा था, वहाँ वह शराब पीने वाले और ऐसे चाण्डालों के समूह के मध्य में जा पहुँचा, जो कि उत्पन्न हुए प्रौढ़ यौवन (जवानी) रूपी मद्य के आस्वादन से दुगुने हुए मद्यपान से पैदा होनेवाले उत्कट विलास को करनेवाली उन्मत्त विलासिनी तरुणियों के साथ मांस शाक सहित शराब पी रहा था, सुरा पीने से विकृत बुद्धि वाले चाण्डालों ने उसे पकड़ कर कहा—

'तुझे मद्य, मांस और स्त्री में से किसी एक का सेवन करना होगा, नहीं तो तू जीते जी गङ्गा का दर्शन नहीं कर सकता।'

चाण्डालों से उक्त प्रकार कहा हुआ तापसी मन में सोचने लगा—'स्मृतियों में एक तिल या सरसों बराबर भी मांस खाने पर भयानक विपत्तियों का आना सुना जाता है और चाण्डालिनी के साथ रतिविलास करने से मरण लक्षण वाला प्रायश्चित लेना पड़ता है। किन्तु समस्त यज्ञों में चूड़ामणि-सरीखा श्रेष्ठ सौत्रामणि नाम के यज्ञ में मदिरा स्वाद के अभिप्राय वाला वैदिक अनुमति विधान है, और लिखा है, कि जो इस विधि से, अर्थात्—यज्ञ के मन्त्रों द्वारा पवित्र की हुई सुरा पान करता है, उसका मदिरापान मदिरापान नहीं है, क्योंकि जिन पीठी, जल, गुड़ व महुआ-आदि वस्तुओं से सुरा बनाई जाती है, वे सब वस्तुएँ विशुद्ध ही होती हैं।'

---

१. कथानकं आख्यानकं तस्य चेदं लक्षणम्—
इतिहासपुरावृत्तं प्रबन्धरचना कथा। दृष्टोपलब्धकथनं वदन्त्याख्यानकं बुधाः ॥ १ ॥
२. एकचक्रनगरनृप। ३. महत्। ४. बड़वानल। ५. पोदनपुरात्। ६. गज। ७. दन्त। ८. मद्यं। ९. प्रचुर। १०. मांसशाकसहितं। ११. मद्यं। १२. हीन, विकलमतियुक्तैः। १३. मातङ्गैरुक्तः सन् चिन्तयति। १४. मरणलक्षणं। १५. प्रायश्चित्तं। १६. मनःपूर्वको व्यापारः। १७. निष्पाद्यते। *. विधानः क०, ख०।

मनोमहामोहः कौपीनमपहाय [1]हारहूरव्यवहारातिलङ्घितमातङ्गिकागीतानुगतकरतालिकाविडम्बनावसरो ग्रहगृहीत-शरीर इवानीतानेकविकारः पुनर्बुभुक्षाशुशुक्षणि[2]क्षीणकुक्षिकुहरस्तरसमपि[3] भक्षितवान्। प्रादुर्भवदुःसहोद्रेकमदनो मातङ्गीं कामितवान्[4]। भवति चात्र श्लोकः—

हेतुशुद्धेः[5] श्रुतेर्वाक्यात्पीतमद्यः किलैकपात्। मांसमातङ्गिकासङ्गमकरोन्मूढमानसः ॥ ८ ॥

इत्युपासकाध्ययने मद्यप्रवृत्तिदोषदर्शनो नाम द्वाविंशः कल्पः।

श्रूयतां मद्यनिवृत्तिगुणस्योपाख्यानम्—अशेषविद्यावैशारद्य[6] मदमत्तमनीषि [7]मत्तालिकुलकेलि[8] कमलनाभ्यां[9] वलभ्यां पुरि★ खात्रचरित्रशीलः[10] करवालः, कपाटोद्घाटनपटुर्बटुः, महानिद्रासंपादनकुशलो धूर्तिलः, परगोपा[11]यितद्रविणदेशविशारदः शारदः, [12]खरपटागमविलासः कृकिलासश्चेति पञ्च मलिम्लुचाः[13] प्रतिपन्नपरस्परप्रीतिप्रपञ्चाः स्वव्य[14]वसायसाहसाभ्यामीश्वरशरीरार्धवासिनीं भवानीमपि मुकुन्दहृदयाश्रयधियं श्रियमपि कात्यायनीलोचना[15]ञ्जनमञ्जनमपि हर्तुं समर्थाः, पश्यतोहराणामपि पश्यतोहराः, कृतान्तदूतानामपि कृतान्तदूताः।

ऐसा चिर काल तक मन में विचारकर म्लेच्छविद्या के निधि वाले उसने शराब पी ली। उसस प्रभाव से उसे तीव्र नशा चढ़ा। उसने अपनी लंगोटी खोल डाली और मद्यपान से विह्वल हुईं चाण्डालनियों के गीत को अनुकरण करती हुईं तालियाँ पीटने लगा। उस समय उसकी दशा ऐसी हो गई थी—मानों उसके शरीर में कोई भूत घुस गया है, इसलिए उसने अनेक विकृत चेष्टाएँ कीं और जब उसके उदर का मध्यभाग भूखरूपी अग्नि से क्षीण होने लगा तब उसने मांस भी खा लिया। उससे उसे असह्य कामोद्रेक हुआ और उसने चाण्डालिनी के साथ रतिविलास भी कर लिया।

इस विषय में एक श्लोक है, जिसका अभिप्राय यह है—

मद्य को उत्पन्न करने वाली वस्तुओं के शुद्ध होने से तथा वेद में लिखा होने से मूढ़ मनोवृत्ति वाले एकपाद संन्यासी ने मद्य पी लिया और फिर उसने मांस भी खाया और चाण्डालिनी के साथ रति विलास भी किया ॥ ८ ॥

इस प्रकार उपासकाध्ययन में मद्यपान के दोष बतलाने वाला बाईसवाँ कल्प पूर्ण हुआ।

१०. मद्यव्रती धूर्तिल नाम के चोर की कथा—

[अब मद्यत्याग से उत्पन्न हुए गुण वाले की कथा सुनिए।]

सभी विद्याओं की चतुराई के मद से मत्त हुए विद्वान् रूपी भँवरों के समूह की क्रीड़ा के लिये कमल के कोश-सरीखो 'वलभी' नाम की नगरी में पाँच चोर रहते थे। उनमें से 'करवाल' नाम का चोर मकानों में छिद्र (सेंध) लगाने के स्वभाव वाला था। 'बटु' किवाड़ खोलने में चतुर था। 'धूर्तिल' महानिद्रा उत्पन्न करा कर चोरी करने में कुशल था। 'शारद' दूसरों के द्वारा छिपाये हुये धन का स्थान देखने में प्रवीण था और पाँचवाँ कृकिलास ठग विद्या का विलासी था। वे पाँचों पारस्परिक प्रीति विस्तार को स्वीकार करने वाले थे और अपने उद्योग व साहस द्वारा वे शिव के अर्धाङ्ग में निवास करने वाली पार्वती को भी, विष्णु के हृदय में निवास करने की बुद्धि रखने वाली लक्ष्मी को भी और दुर्गा के नेत्रों में लगे हुए अञ्जन को भी चुराने में समर्थ थे। वे चोरों के भी चोर थे और यम-दूतों के भी यम-दूत थे।

१. मद्यपानविह्वलीभूतमातङ्गी। २. अग्निः। ३. मांसं। ४. सेवितवान्। ५. मद्यस्य कारण गुड़, धातकीप्रमुखशुद्धत्वात्। ६. चातुर्यं। ७. मनीषिण एव मत्तभ्रमराः। ८. क्रीड़ा। ९. मध्ये कोशसदृशायाम्। ★. खात्रं छिद्रं। १०. चौरकर्म। ११. गोपित। १२. ठकशास्त्रं। १३. चौराः।। १४. उद्यम। १५. आसक्तं।

कदाचिदेकस्यां निशि *चेलालोपं वर्षति देवे कज्जलपटलकाल[1] कायप्रतिष्ठासु सकलासु काष्ठासु[2] विहित पुरसा[3] रापहाराः पुरबाहिरिकोपवने धनं विभजन्तस्तवेदं ममेदमिति विवदमानाः [4]कन्दलमपहाय [5]समानायित-मैरेयाः [6]पानगोष्ठीमनुतिष्ठन्तः [7]पूर्वाहितकलहकोपोन्मेषकलुषधिषणाः यष्टायष्टि मुष्टामुष्टि च युद्धं विधाय सर्वेऽपि मम्रुरन्यत्र धूर्तिलात् । स किल [8]यथादर्शनसंभवं महामुनिविलोकनात्तस्मिन्नहन्येकं व्रतं गृह्णाति । तत्र च दिने [9]तद्दर्शनादा-सवव्रतमग्रहीत् ।

तदनु धूर्तिलः समानशीलेषु कश्यवश्यां [10]विनाशलेश्यामात्मसमक्षमुपयुज्य[11] [12]विरज्याजवंजवादसुखबीजा-दुत्पाट्य[13] च [14]मनोजकुज[15]जटाजालनिवेशमिव केशपाशं चिरत्राय[16] [17]परत्राहितजैत्राय चरित्राय समीहांचक्रे । भवति चात्र श्लोकः—

एकस्मिन्वासरे मद्यनिवृत्तेर्धूर्तिलः किल । एतद्दोषात्सहायेषु मृतेष्वा[18]पदनापदम्[19] ॥ ९ ॥

इत्युपासकाध्ययने मद्यनिवृत्तिगुणनिदानो नाम त्रयोविंशतितमः कल्पः ।

पत्नी द्वारा गृह में प्रवेश रोका हुआ मृगसेन भी पंच नमस्कार मन्त्र के स्मरण करने में संलग्न चित्त हुआ और एक जीर्ण वृक्ष के खण्ड को तकिया बनाकर मस्तक के नीचे रखकर गाढ़ निद्रा ले रहा था, कि इतने में उस वृक्ष की जड़ के भीतरी भाग से निकले हुए साँप के बच्चे ने उसे डस लिया, जिसके कारण विशेष कष्ट अवस्था में प्रविष्ट हुआ—मर गया। प्रभात होने पर जब उसकी घण्टा नाम की स्त्री ने उसे मरा देखा तब उसने अपनी विशेष निन्दा करके विशेष शोकाकुल होकर इसी के साथ अग्नि में जल जाने का निश्चय किया तथा उसने निदान किया, कि 'जो इसका व्रत था वही मेरा भी है और दूसरे जन्म में भी यही मेरा पति हो'। उसके बाद उसने ईंधन से प्रज्वलित कान्तिवाली चिता की अग्नि में घी-सरीखी चिकनी अपनी देह की आहुति दे दी—अपनी देह होम दी।

वेश्याओं के नेत्ररूपी कमलों के द्वारा दुगुनी हुई तोरण-पंक्तिवाली उज्जयिनी नगरी में 'विश्वगुणा' नाम की पट्टरानी का स्वामी और विश्व का पालक 'विश्वम्भर' नाम का राजा था। वहीं पर गुणपाल नाम का सेठ था। उसकी धनश्री नाम की प्रिया थी और सुबन्धु नाम की पुत्री थी। जब गुणपाल के मनोरथरूपी पथिक के लिए प्रीतिरूपी प्याऊ-सी उसकी पत्नी इस मृगसेन धीवर के आये हुए जीव से गर्भवती हुई तब वहाँ के

१. अस्तपर्वतं। २. आश्रितः। ३. पृथग्भूतं। ४. ज्ञात्वा। ५. निश्छिद्रं। ६. कपाटं। ७. पंचनमस्कार। ८. ९. पुराणतरु—जीर्णवृक्षखण्डं काष्ठं। १०. निद्रां कुर्वन्। ११. सर्पेण। १२. प्रविष्टः। १३. प्रभाते। १४. अग्निः। १५. अग्नौ। १६. घृतवच्चिक्कणं। १७. आहुतीचकार। १८. तोरण। १९. सुबन्धुपुत्री-तातः। २०. कुलभार्यायां। २१. गर्भिण्यां। २२. भाण्डादिरतो नृपः।

कलाकलापालंकृतरूपसमन्वितां सुतामयाचत । श्रेष्ठी दुष्प्रज्ञेन राज्ञा तथा याचितः 'यदि नर्मसचिवसुताय सुतां वितरामि[1] तदावश्यं कुलक्रमव्यतिक्रमो दुरपवादोपक्रमश्च । अथ [2]स्वामिशासनमतिक्रम्यात्रैवासे[3] तदा सर्वस्वापहारः प्राणसंहारश्च' इति निश्चित्य प्रियसुहृदः श्रीदत्तस्य वणिक्पतेर्निकेतने समणिमेखलकलत्रं[4] कलत्र[5]मवस्थाप्य [6]स्वापतेयसारं दुहितरं चात्मसात्कृत्य सुलभकेलिवनवना[7]शयनिवेशं कौशाम्बीदेशमयासीत् ।

अत्रान्तरे [8]धनिमद्दरिद्रमन्दिरनिर्विशेषमाचरितचर्यापर्यटनौ शिवगुप्तमुनिगुप्तनामानौ मुनी श्रीदत्तप्रतिवेश[9]-निवासिनोपासकेन यथाविधिविहितप्रतिग्रहौ[10] कृतोपचारविग्रहौ च तामङ्गणाश्रयां धनश्रियमपश्यताम् । तत्र मुनिगुप्तभगवान्किल केवलसलिलस्नानपरुषवपुषमुद्गमनी[11]यसंगताङ्गाभोगविषमवैधव्यचिह्नदवर[12]कमात्रालंकारसुभगमाप्तकान्तापत्यपरिजनविरहदेहसादां गर्भगौरवखेदां च शिशिरागमवा[13]सरवशवर्तिनीं स्थलकमलिनीमिव मलिनच्छविमुदवसि[14]तपरिसरे[15] परगृहवासविशीर्यमा[16]णमुखश्रियं धनश्रियं निध्याय[17] 'अहो, महीयसां खलु [18]एनसामावासः कोऽप्यस्याः कुक्षौ महापुरुषोऽवतीर्णः, येनावतीर्णमात्रेणापि [19]दुष्पुत्रेणेयं वराकी इयदावेशां दशामशिश्रियत्' इत्यभाषत ।

राजा विश्वम्भर को विटों के साथ वार्तालाप करने में शामिल होने के कारण भाण्डजन बहुत प्रिय थे। अतः उसने नर्मभर्म नाम के विदूषक के पुत्र नर्मधर्म के लिए गुणपाल सेठ से समस्त कलाओं की श्रेणी से अलङ्कृत व सर्वाङ्ग सुन्दरी पुत्री की याचना की। दुर्बुद्धि राजा की इस माँग से गुणपाल ने निश्चय किया—'यदि विदूषक के पुत्र को कन्या देता हूँ तो अवश्य कुल-परम्परा का उल्लङ्घन होता है एवं अपकीर्ति भी फैलती है और यदि स्वामी की आज्ञा को उल्लङ्घन करके भी यहाँ स्थित रहता हूँ तो सर्वस्व अपहरण के साथ-साथ प्राण भी जाते हैं।' ऐसा निश्चय करके रत्नजटित करधोनी से अलङ्कृत जङ्घाओं वाली अपनी पत्नी को तो अपने प्रिय मित्र श्रीदत्त सेठ के यहाँ रक्खो और सार सम्पत्ति-सी अपनी पुत्री को अपने अधीन करके (साथ लेकर) क्रीड़ावनों व जलाशयों की स्थानीभूत 'कौशाम्बी' देश की ओर प्रस्थान किया।'

इसी बीच में धनाढ्य और निर्धनों के गृहों में समान चित्तवृत्तिपूर्वक (भेद न रखते हुए) आहार-चर्या के लिए विहार करनेवाले शिवगुप्त व मुनिगुप्त नामके दो मुनिराजों ने श्रीदत्त के आंगन में बैठी हुई धनश्री को देखा, जिनका पड़गाहना श्रीदत्त के निकट रहनेवाले (पड़ोसी) श्रावक द्वारा यथाविधि किया गया था, एवं जिनकी शारीरिक सेवा-शुश्रूषा की गई थी।

उनमें से मुनिगुप्त मुनि ने ऐसी धनश्री को देखकर कहा,—जिसका शरीर तैल के बिना स्नान करने से रूक्ष था। जिसके शारीरिक अङ्गों की विस्तृत कान्ति शुक्ल वस्त्र से सुशोभित थी। जो सौभाग्य-सूचक मङ्गलसूत्रमात्र आभूषण को प्रीतिपूर्वक धारण कर रही थी। जिसका शरीर हितैषी जन, पति, पुत्री एवं परिजनों के वियोग से कृश हो गया था। जो गर्भ के भार से खेद-खिन्न थी और जिसकी कान्ति उस प्रकार म्लान थी जिस प्रकार शीत ऋतु संबंधी दिवसों के निरन्तर आने से स्थल कमलिनी की कान्ति म्लान होती है। एवं जो गृहाङ्गण में स्थित थी और जिसकी मुखश्री दूसरे के गृह में रहने से म्लान हो रही थी।

'अहो आश्चर्य है कि निस्सन्देह इसकी कुक्षि में ऐसा कोई महान् पापों का स्थान (बड़ा पापी)

---

१. चेद्ददामि। २. राजादेशं। ३. तिष्ठामि। ४. जघनं यस्याः। ५. भार्यां, कलत्रं जघनं भार्या चेति पञ्जिकाकारः। ६. धनं। ७. जलाशयः। ८. सधननिर्धनगृहसमचित्तम्। ९. निकटवासिना। १०. स्वीकारौ। ११. शुक्लवस्त्रयुक्ता अङ्गत्विक् यस्याः। १२. दवरकः दोरः। १३. वासो वासरः। १४. उदवसितं गृहं। १५. परिसरः अङ्गणं। १६. म्लायन्ती। १७. दृष्ट्वा। १८. पापानां। १९. दुष्टसुतेन।

मुनिवृष:[1] शिवगुप्तः—'मुनिगुप्त, मैवं भाषिष्ठाः। यतो यद्यपीयं श्रेष्ठिनी कानिचिद्दिनान्येवंभूता सती पराधिष्ठाने[2] तिष्ठति, तथाप्येतन्नन्दनेन सकलवणिक्पतिना निरवधिशेवधीश्वरेण[3] [4]विश्वंभरेश्वरसुतावरेण च भवितव्यम्' इत्यवोचत्।

एतच्च स्वकीयमन्दिरालिन्दकगत:[5] श्रीदत्तो निशम्य 'न खलु प्रायेणासत्यमिदमुक्तं भविष्यति महर्षेः' इत्यवधार्य सूचीमुखसर्पवद्दुरीहितदत्तचेतोवृत्तिरासीत्। धनश्रीश्च परिप्राप्तप्रसवदिवसा सती सुतमसूत। श्रीदत्तः—[6]'चित्रभानुरिवायमाश्रयाशः[7] खलु बालिशः। [8]तदसंजातस्नेहायामेवास्य जनन्यामुपांशुदण्डः[9] श्रेयान्' इति परामृश्य प्रसूतिदुःखेनातुच्छमूर्छापाश्रयां[10] धनश्रियमाकलय्य निजपरिजनज[11]रतीमुखेन 'प्रमीत[12] एवायं तनयः संजातः' इति प्रसिद्धिं विधायाकार्यं चैकमाचरितोपचारप्रपञ्चं [13]श्वपचं [14]जिह्मब्राह्मी[15]रहस्यनिकेतः कृतापायसंकेतस्तं [16]स्तनन्धयमेतस्य[17] समर्पयामास।

सोऽपि जनंगमः स्वर्भानुप्रभेण[18] करेण रामरश्मिमिव[19] तं स्तनंधयमुपरुध्य निःशलाकावकाशं[20] वेशमाश्रित्य

महापुरुष आया हुआ प्रतीत होता है, जिस दुष्ट पुत्र के गर्भ में आने मात्र से इस विचारी ने ऐसी शोचनीय दशा का आश्रय किया है।'

उक्त बात सुनकर मुनियों में मुख्य या ज्येष्ठ 'शिवगुप्त' मुनिराज ने कहा—'मुनिगुप्त ! ऐसा मत कहो; क्योंकि यद्यपि यह सेठानी कुछ दिनों तक ऐसी शोचनीय दशा का अनुभव करती हुई दूसरे के गृह में रह रही है, तथापि इसका पुत्र समस्त वणिकों का स्वामी, राज-श्रेष्ठी व निस्सीम निधि का स्वामी एवं विश्वम्भर राजा की राजकुमारी का वर होना चाहिए।'

अपने गृह के बाह्य द्वार पर बैठे हुए श्रीदत्त ने उक्त ऋषि की बात सुनकर 'निस्सन्देह महर्षि द्वारा कही हुई वाणी प्रायः झूठी नहीं होती।' ऐसा निश्चय करके उसने अपनी चित्तवृत्ति को उस प्रकार दुष्ट संकल्प की ओर लगाई जिस प्रकार दृष्टि-विषवाला साँप दर्शन मात्र से दुष्ट संकल्प (डँसने) की ओर लगाता है। प्रसव के दिन समाप्त करके धनश्री ने पुत्र को जन्म दिया।

श्रीदत्त ने विचार किया—'निस्सन्देह यह बच्चा अग्नि की तरह अपने आश्रय का भक्षक है, माता का इस पर स्नेह उत्पन्न होने के पूर्व ही इसका गुप्तवध कर देना श्रेयस्कर है।' अतः उसने धनश्री को प्रसूति के कष्ट से विशेष मूर्च्छा का आश्रय करनेवाली (मूर्च्छित—बेहोश) निश्चय कर अपने कुटुम्ब की एक वृद्ध स्त्री के मुख से 'बच्चा मरा ही पैदा हुआ है' ऐसी प्रसिद्धि करके कुटिल भाषा के रहस्य के स्थानीभूत हुए इसने सेवा का प्रपञ्च करनेवाले—घूसखोर एक चाण्डाल को बुलाकर वध का संकेत करते हुए उसके लिए बच्चा समर्पण कर दिया।

वह चाण्डाल भी राहु-सरीखे कृष्ण कान्ति वाले हाथ से चन्द्र-सरीखे बच्चे को आच्छादित करके

१. मुख्यः। २. परगृहे। ३. 'स्थायिधनं' टि० ख०, 'शेवधिः निधिः' इति पञ्जिकाकारः। ४. राजकन्या-भर्ता भविता। ५. प्रघाणप्रघणालिन्दबहिर्द्वारप्रकोष्ठके। ६. अग्निवत्। ७. आश्रयं अश्नातीति। ८. तस्मात् कारणात्। ९. गूढवधः। १०. संश्रयां। ११. वृद्धा स्त्री। १२. मृत एव जनितः। १३. श्वपचः, जनंगमः, अन्त्यावसायी, दिवाकीर्तिश्च चाण्डालः। १४. कुटिला। १५. वाणी। १६. शिशुं। १७. जनंगमस्य। १८. राहुसदृश-कृष्णेन। १९. 'चन्द्रमसमिव' टि० ख०, 'रामरश्मिः हरिणकिरणश्च श्वेतभानुश्चन्द्र इति यावत्। रामःसितेऽपि निर्दिष्टो हरिणश्च तथा मतः इति वचनात्' इति पञ्जिकाकारः। २०. एकान्तं।

पुण्यपरमाणुपुञ्जमिव शुभशरीरभाजमेनमवेक्ष्य संजातकरुणारसप्रसरप्रसन्नमुखः सुखेन विनिधाय धाम [1]स्वकीयमटीकत।

पुनरस्य[2]बाधरभव[3]भगिनीपतिरशेषापणिक[4]पणपरमेष्ठी इन्द्रदत्तश्रेष्ठी विक्रयाडम्बरितशाक्व[5]भक्षलाधीनं पीठोपकण्ठगोष्ठी[6]ममनुसृतो [7]वत्सीयविषयसनीड[8]क्रीडागतगोपालबालकलपन[9]परम्परालापाहूतस्तर[10]-[11]तामकसंतानपरिवृतमनेकचन्द्रकान्तोपलान्तरालनिलीनमरुणमणिनिधानमिव तं [12]जातमुपलभ्य स्वयमदृष्टनन्दनवदनत्वा[13]त्सद्बुद्धया साभ्यनुरुध्य 'स्तनंधयावधानधृतबोधे राधे[14], तवायं गूढगर्भसंभवस्तनूजः' इति प्रवर्धितप्रसिद्धिर्महान्तमपत्योत्पत्तिमहोत्सवमकार्षीत्।

श्रीदत्तः [15]श्रवणपरम्परया तमेतं वृत्तान्तमुपश्रुत्याश्रित्य च शिशुविनाशनाशयेन कीनाश[16]इव तन्निवेशम्[17] 'इन्द्रदत्त, अयं महाभागधेयो भागिनेयो ममैव तावद्धाम्नि वर्धताम्' इत्यभिधाय सभागिनीकं [18]तोकमात्मावासमानीय पुरावत्करप्रज्ञः [19]संज्ञपनार्थमन्तावसायिने[20] प्रायच्छत। सोऽपि विवाकीर्तितपात्रपुत्रभाण्डः सत्वरमुपह्वर[21]गह्वरानुसारी [22]समीरवशविगलितघनाम्बरावरणं हरिणकिरणमिव[23] ईक्षणरमणीयं गुणपालतनयमालोक्य सदयहृदयः प्रबल-

---

एकान्त स्थान में ले गया। वहाँ पुण्य-परमाणुओं के पुञ्ज-जैसे सुन्दर शरीर-धारक इस बच्चे को देखकर इसे विशेष करुणारस उत्पन्न होने से इसका मुख प्रसन्न हो गया, अतः वह जीवित बच्चे को सुख से लिटाकर अपने स्थान पर चला गया।

इसके पश्चात् श्रीदत्त का छोटा बहनोई 'इन्द्रदत्त' नामका सेठ, जो कि सभी वणिक्-व्यवहार में श्रेष्ठ था, बेचने के लिए इकट्ठे किये हुए बैलों के झुण्ड की अधीनता वाले स्थान के निकटवर्ती गोकुल में पहुँचा और उसे ऐसा बालक प्राप्त हुआ, जो कि बछड़ों के लिए हितकारक प्रदेश के निकट क्रीड़ा करने के लिए आये हुए ग्वालों के बच्चों की मुखपरम्परा के वार्तालाप से और छोटे बछड़ों के झुण्ड से घिरा हुआ था। एवं जो अनेक चन्द्रकान्त मणिमयी शिलाओं के बीच में मौजूद था। जो ऐसा मालूम पड़ता था—मानों—लाल मणियों की निधि ही है। उसने कभी स्वयं पुत्र का मुख नहीं देखा था, अर्थात्—उसके पुत्र नहीं था, इसलिए उसने इसे अपने पुत्र की बुद्धि से उठा लिया। उसने विशेष आग्रह पूर्वक अपनी पत्नी राधा से कहा—'सदा बच्चे की लालसा के ध्यान में अपनी बुद्धि प्रेरित करने वाली प्रिये राधे! यह तुम्हारे गूढ़ गर्भ से उत्पन्न हुआ पुत्र है। उसने उक्त प्रकार प्रसिद्धि को वृद्धिगत करते हुए पुत्रोत्पत्ति का महान् महोत्सव किया।

श्रीदत्त कर्णपरम्परा से यह समाचार सुनकर बच्चे का घात करने के दुरभिप्राय से यमराज-सरीखा होकर इन्द्रदत्त के गृह पर पहुँच कर उससे बोला—'इन्द्रदत्त! यह महाभाग्यशाली भानजा मेरे ही स्थान पर बढ़ा होना चाहिए।' और बहिन-सहित बच्चे को अपने गृह पर ले आया एवं पूर्व की तरह निर्दय बुद्धि-वाले उसने वध करने के लिए बच्चे को चाण्डाल के लिए दे दिया। वह चाण्डाल भी पुत्ररूपी बर्तन को लेकर शीघ्र ही एकान्त गुफा की ओर चल दिया। जब उसने ऐसे गुणपाल के शिशु को देखकर, जो कि वायु के संचार से जिसके ऊपर से मेघ-पटल का आवरण हट गया है, ऐसे चन्द्रमा-सरीखा नेत्रों को प्यारा है। उसका

---

१. स्वगृहं गतः। २. श्रीदत्तस्य। ३. लघुभगिनी। ४. वणिग्व्यवहारः। ५. वृषभाः। ६. गोष्ठीनं गोकुलस्थानं। ७. वत्सेभ्यो हितप्रदेश। ८. समीपं। ९. मुखपरम्परा। १०. लघुवत्स। ११. वृषभाः। १२. बालं। १३. पुत्र। १४. हे भार्ये!। १५. कर्णपरम्परया। १६. यमः। १७. इन्द्रदत्तगृहं। १८. अपत्यं पुत्रं वा। १९. मारणार्थं। २०. मातङ्गाय। २१. एकान्तं, रहः। २२. वायुपरवशेन। २३. चन्द्रमिव।

विटपिसंकटे सरित्तटनिकटे परित्यज्य यथायथमश्वल्लीत्[1] ।

तत्राप्यसौ पुरोपार्जितपुण्यप्रभावादुपमातृभिरिव[2] [3]एतद्वीक्षणात्क्षरत्क्षीरस्तनीभिरानन्दोदीरितनिर्भरहुं[4]-भाध्वनिभिः [5]प्रचारायागताभिः कुण्डोध्नीभिर्व्रजलो[6]कधेनुभिरुपरुद्धसविधभागः[7] [8]उपवान्तरमागतेन तद्रक्षण-दक्षेण गोपालजनेन अस्तावतं★सभासिन्य[9]शोकस्तबकसुन्दरे सरोजसुहृदि[10] सति विलोकितः । कथितश्च सकलगोष्ठ-ज्येष्ठाय [11]बल्लवकुलवरिष्ठाय निजाननापहसितारविन्दाय गोविन्दाय । सोऽपि पुत्रप्रेम्णा प्रमोदगरिम्णा चानीय जनित-हृदयानन्दायाः सुनन्दायाः समर्पितवान् । अकरोच्च[12]स्येन्दिरामन्दिरस्य[13] धनकीर्तिरिति नाम । ततोऽसौ क्रमेण परि-त्यक्तशैशववशः कमलेश[14]इव युवजनमनः[15]पण्यतारुण्योत्फुल्लवल्ल[16]वीलोचनालिकुलावलेह्य[17]लावण्यमकरन्दममन्दानन्द-★कामन्द[18]मतिकान्तरूपायतनं यौवनमासादितः पुनरपि प्राज्याज्यवणिज्योपार्जनसज्जागमनेन तेन श्रीदत्तेन दृष्टः । पृष्टश्च गोविन्दस्तदवाप्तिप्रपञ्चम् । [19]श्रीदत्तः—'गोविन्द, मदीये सदने किमपि महत्कार्यमात्मजस्य[20] निवेद्यमस्ति । तदयं

हृदय दया से द्रवीभूत हो गया। अतः उसने उसे स्थूल वृक्षों से व्याप्त नदी के तट के समीप छोड़कर पूर्व की तरह वहाँ से शीघ्र चल दिया।

इसके पूर्वोपार्जित पुण्य के प्रभाव से वहाँ पर भी ऐसी गोकुल की गायों से इसका निकटवर्ती स्थान रोका गया; जो ऐसी मालूम पड़ती थीं—मानों—इसकी धाएँ ही हैं—इस बच्चे को देखने से जिनके थनों से दूध झर रहा था। जिन्होंने आनन्द से विशेष रँभाने की ध्वनि प्रकट की थी। जो घास चरने के लिए वहाँ आई हुई थीं और जिनके थन प्रचुर मात्रा में दूध से भरे होने के कारण कुण्ड-सरीखे थे।

जब सन्ध्या के समय अशोक वृक्ष के गुच्छा-सरीखा मनोज्ञ सूर्य अस्ताचल पर मुकुट-सरीखा शोभायमान हो रहा था, तब इसके पास आए हुए गोरक्षा में चतुर ग्वालों ने इसे देखा और समस्त गोकुल—गोशाला के स्वामी व ग्वालों के वंश में श्रेष्ठ एवं अपनी मुख-कान्ति द्वारा कमलों की कान्ति को तिरस्कृत करने वाले 'गोविन्द' नामके स्वामी से कहा। पुत्र-स्नेह से व आनन्द से महान् गोविन्द भी उस बच्चे को घर ले आया और उसने हृदय में उत्पन्न हुए आनन्द वाली सुनन्दा नाम की प्रिया के लिए समर्पण कर दिया। लक्ष्मी के स्थान इस बालक का नाम 'धनकीर्ति' रक्खा।

इसके पश्चात् क्रम से बाल्यावस्था को छोड़कर श्रीपति सरीखे इसने ऐसी युवावस्था प्राप्त की, जिसमें युवक-जन के मन के ग्रहण करने में बेचने-योग्य (अर्घप्राय) यौवन से प्रमुदित हुईं गोपियों की नेत्ररूपी भ्रमर-श्रेणी द्वारा आस्वादन करने योग्य लावण्यरूपी पुष्परस पाया जाता है। जो प्रचुर सुख का कामद (मन्दिर) है, अथवा पाठान्तर में पञ्जिकाकार के अभिप्राय से जिसमें प्रचुर सुख व कामदेव वर्तमान है और जो बेमर्याद खुबसूरती का स्थान है।

एक दिन प्रचुर घी के व्यापार द्वारा धनोपार्जन की इच्छा से यहाँ आये हुए श्रीदत्त ने इसे देखकर गोविन्द से इसकी प्राप्ति के विषय में विस्तार से पूँछा और उससे कहा—'गोविन्द ! मुझे अपने गृह पर अपने

---

१. आशु गतवान् दवल्ल आशुगमने लुङि । २. धात्रीभिः । ३. शिशु । ४. गोरुतं । ५. तृणादनार्थं । ६. गोकुल । ७. समीप । ८. उपदान्तरं समीपं । ★. 'भागि' ग० । ९. संध्यासमये । १०. रवौ । ११. वल्लवाः गोकुलिकाः । १२. पुत्रस्य । १३. लक्ष्मीगृहस्य । १४. हरिरिव । १५. मनोग्रहणे यत्पण्यं विक्रयमाणं अर्घप्रायं तारुण्यं । १६. गोपी । १७. आस्वाद्य । ★. 'कामदं (मन्दिरं)' ख० । १८. कामन्दः कामः इति पञ्जिकायां । १९. श्रीदत्तः प्राह । २०. मम पुत्रस्य महाबलस्य ।

[1]प्रज्ञुरिमं लेखं ग्राहयित्वा सत्वरं प्रहेतव्यः[2] ।' गोविन्दः—'श्रेष्ठिन्, एवमस्तु ।' लेखं चैवमलिखत्—'अहो विदित-समस्तपौत[3]वकल महाबल, एष खल्वस्मद्वंशविनाशवैश्वानरोऽवश्यं विष्यो[4] मुशल्यो[5] वा विधातव्यः' इति । धन-कीर्तिस्तथा [6]तातवणिक्पतिभ्यामाविष्टः सावष्टम्भं[7] गलालंकारसखं लेखं कृत्वा गत्वा च जन्मान्तरोपकाराधीन-[8]मीनावतारसरसीमेकानसीं[9] तत्प्रवेशपदिर[10]पर्यन्तवर्तिनि वने वर्त्मश्रमापनयनाय [11]पिकप्रियालवालपरिसरे [12]निःसंज्ञमस्वाप्सीत् ।

अत्रावसरे विहितपुष्पावचयविनोदा सपरिच्छदा निखिलविद्याविदग्धा[13] पूर्वभवोपकारस्निग्धा संजीवनौषधि-समानानङ्गसेनानामिका गणिका तस्यैव सहकारतरोस्तलमुपढौक्य विलोक्य च निःस्पन्दलोचना चिराय तमनङ्गमिव [14]मुक्तकुसुमास्त्रतन्त्रं [15]लोकान्तरमित्रमशेषलक्षणोपलक्षितमूर्ति धनकीर्ति पुनरायुःश्रीसरस्वतीसमागमादेशरेखात्रयेणेव प्रकटवितर्कितकर्कोटत्रयेण[16] बन्धुरमध्यप्रदेशात्कण्ठदेशाद्वाद्यापायप्रतिपादनाक्षरालेख्यं लेखमवाचयत् ।

लिलेख[17] च तं वाणिजकापसदं[18] हृदयेन धिक्कुर्वंती[19] लोचनाञ्जनकरण्डादुपात्तेन वनवल्लिपल्लवनिर्या-

---

पुत्र से कुछ जरूरी बात निवेदनीय है। अतः प्रकृष्ट घुटनों वाले इस युवक को यह पत्र देकर शीघ्र भेज दो।'

गोविन्द ने कहा—'श्रेष्ठिन् ऐसा हो।'

उसने पत्र में यह लिखा था—'माप-तोल की कला के ज्ञाता महाबल! यह युवक हमारे वंश को ध्वंस करने के लिए अग्नि-सरीखा है, अतः या तो यह विष देकर घात करने लायक है या मूसलों द्वारा वध करने योग्य है।'

पिता (गोविन्द) और वैश्यपति (श्रीदत्त) द्वारा आज्ञापित हुआ धनकीर्ति उस मुद्राङ्कित पत्र को अपने गले का आभूषणरूप मित्र बना कर उस उज्जयिनी नगरी की ओर चल दिया, जो कि पूर्वजन्म में किये हुए उपकार के अधीन हुई मछली के जन्म के लिए बड़े तड़ाग-सरीखी है और नगरी के निकट पहुँचकर वह नगरी के प्रवेश-मार्ग के निकटवर्ती वन में मार्ग को थकावट दूर करने के लिए आम्रवृक्ष की क्यारी के समीप देश में निश्चेतनता पूर्वक सो गया।

इसी अवसर पर पुष्प-चयन की क्रीड़ा करनेवाली, अपने सेवक जनों से सहित, समस्त विद्याओं में निपुण, पूर्वभव (मछली की पर्याय) में किये हुए उपकार से उससे स्नेह करनेवाली एवं संजीवन बूटी-सरीखो जीवनदात्री अनङ्गसेना नाम की वेश्या, उसी आम्रवृक्ष के नीचे गई और ऐसे धनश्री को देखकर निश्चल नेत्रों वाली हुई, अर्थात्—टकटकी लगाकर देखने लगी। जो ऐसा मालूम पड़ता था—मानों—पुष्परूपी बाणों की पराधीनता से रहित हुआ (बाणों के बिना) कामदेव ही है—जो पूर्वजन्म का मित्र है, एवं जिसका शरीर समस्त शुभ लक्षणों से सुशोभित है। इसके बाद उसने स्पष्ट जानी हुई कण्ठ की तीन रेखाओं से मनोज्ञ मध्य-भाग वाले उसके कंठदेश से, जो ऐसी मालूम पड़ती थीं—मानों—उसकी चिरायु, लक्ष्मी व सरस्वती के समागम को सूचित करनेवाली तीन रेखाएँ थीं, पत्र ग्रहण करके पढ़ा, जिसमें धनकीर्ति के वध करने की सूचक अक्षर-पङ्क्ति चारों ओर लिखी हुई थी।

इसके बाद उस निकृष्ट वणिक् को हृदय से धिक्कार देती हुई उसने अपने नेत्ररूपी अञ्जन की

---

१. प्रकृष्टजानुः । २. प्रेषणीयः । ३. पौतवं तुला मानं च । ४. विषेण वध्यः । ५. मुशलेन वध्यः । ६. गोविन्द । ७. मुद्रासहितं । ८. पूर्वजन्मनि यो मत्स्यः स तत्र वेश्या जाता वर्तते । ९. उज्जयिनीम् । १०. पदिरः मार्गः । ११. पिकप्रियश्चूतः । १२. निश्चेतनं । १३. चतुरा । १४. वाणान् विना कन्दर्पं । १५. पूर्वजन्मोपकारिणं । १६. कण्ठरेखा । १७. ज्ञात्वा । १८. निन्द्यं पङ्क्तिरहितं । १९. निन्दती ।

सरसद्रुतेन[1]कज्जलेना[2]र्जुनशलाकया तत्रैव [3]परिम्लिष्टपुरातनसूत्रे पत्त्रे लेखान्तरम् । तथाहि—'यदि श्रेष्ठिनी मामवधेयवचनं[4] श्रेष्ठिनं मन्यते, महाबलश्च यदि मामनुल्लङ्घनीयवाक्प्रसरं पितरं गणयति, तदास्मै निकामं सप्तपुरुषपर्यन्तपरीक्षितान्वयसंपत्तये धनकीर्तये [5]कूपदप्रक्रमेण द्विजवेदमु[6]खसमक्षमविचारापेक्षं श्रीमती दातव्या' इति ।

ततो यथाम्नातविशिखमिमं[7] लेखमामुच्य[8] समाचरितगमनायामनङ्गसेनायां धनकीर्तिश्चिरेण [9]विद्राणसान्द्रनिद्रोद्रेकः [10]सोत्सेकमुत्थाय प्रयाय[11] च श्रीदत्तनिकेतनं जननीसमन्विताय महाबलाय प्रदर्शितलेखः श्रीमती[12]सखोऽभवत् ।

श्रीदत्तो वार्तामिमामाकर्ण्य प्रतूर्णं प्रत्यावर्त्य[13] निधाय[14] च तद्वधाय राजधानीबाहिरिकायां चण्डिकायतने कृतसंकेतं संनद्धवपुषं पुरुषं [15]कच्चराचरणपिशाचीं देवद्रीचीं[16] च परिप्राप्तोदवसितो[17] रहसि धनकीर्तिं पुनराहूय बहुकूटकपटमतिरेवमाबभाषे—'वत्स, मदीये कुले किलैवमाचारो यदुत यामिनीमुखे कात्यायनीप्रमुखे[18] प्रदेशे प्रतिपन्नाभिनवकङ्कणबन्धेन स्तनंधयागोधेन [19]महारजनरसरक्तांशुक[20]समाश्रयः स्वयमेव [21]माषमयमौ[22]रमौकुलि[23]बलिरूप-

डिबिया से ग्रहण किये हुए और उपवन की लताओं की नई कोपलों के रस में घोले हुए कज्जल से चाँदी की अथवा तृणों की सलाई (लेखनी) द्वारा उसी पत्र पर पहले के अक्षर मिटाकर दूसरा लेख लिखा। लेख इस प्रकार था—'यदि सेठानी मुझे आदरणीय वचनों वाला मानती है और यदि महावल मुझे ऐसा पिता मानता है, जिसके वचन-समूह उल्लङ्घनीय नहीं हैं, तो सात पीढ़ी तक विशेष परीक्षित वंश लक्ष्मी वाले इस धनकीर्त्ति के लिये बिना विचार की अपेक्षा किये ब्राह्मण व अग्नि की साक्षीपूर्वक दहेज के साथ मेरी पुत्री श्रीमती देनी चाहिए।'

यथोक्त मार्ग वाले इस लेख को उसके गले में बाँधकर अनङ्ग सेना चली गई।

जब चिरकाल के बाद धनकीर्ति की गाढ़ निद्रा का वेग दूर हुआ तो वह उत्कण्ठापूर्वक उठा और श्रीदत्त के घर पहुँचा और उसने माता-सहित महावल के लिये पत्र दिखाया, जिससे वह श्रीमति का पति हो गया।

श्रीदत्त इस समाचार को सुनकर शीघ्र ही लौट आया और उसने धनकीर्ति का वध करने के लिए राजधानी के बाह्य प्रदेशवर्ती चण्डिका देवी के मन्दिर में सशस्त्र व वध-करने का संकेत किए हुए पुरुष को एवं निन्द्य कर्म का आचरण करनेवाली पिशाची-सरीखी देवपूजिका स्त्री को नियुक्त करके अपने गृह को चला गया और अत्यन्त कूटकपट की बुद्धिवाले उसने एकान्त में धनकीर्ति को बुलाकर फिर से कहा—'पुत्र! निश्चय से मेरे गृह की ऐसी रीति है कि नवीन कङ्कण-बंधन को स्वीकार करने वाले नवीन विवाहित कन्या के पति को रात्रि के अगले भाग में कात्यायनी देवी के प्राङ्गण प्रदेश में जाकर कुसुंभी रंग से रंगे हुए वस्त्र के

१. घोलितेन। २. 'हेमतृणं वा' टि० ख०, 'अर्जुनं तृणं' इति पञ्जिकायां। ३. पूर्वाक्षराणि परिमृज्य नूतनाक्षराणि लिखितानि। ४. आदरणीय। ५. 'जामातृदेयं वस्तु हिरण्यकन्यादायं कूपदः कथ्यते' टि० ख०, पञ्जिकाकारोऽप्याह—'सहिरण्यकन्यादायं जामातृदेयं वस्तु कूपदः'। ६. वेदमुखो वह्निः। ७. मार्गं विशिखा। ८. कण्ठे बद्ध्वा। ९. उद्गतः उपशान्तः। १०. सगर्वं। ११. गत्वा। १२. भर्ता। १३. गोविन्दगृहात् स्वगृहमागत्य। १४. पुरुषं स्थापयित्वा। १५. 'मलिनाचरित' टि० ख०, 'कच्चरं कुत्सितं' पञ्जिकायां। १६. चण्डिकां। १७. गृह। १८. प्राङ्गणे। १९. कुसुंभ। २०. रक्तवस्त्रेण झंपितः। २१. माष—'धान्येन घटित' टि० ख०, 'धान्यपिष्टेन' टि० च०। २२. मयूरः। २३. काकः।

हर्तव्यः[1] ।' धनकीर्तिः— 'तात, यथा तातादेशः' इति निगीर्य गृहीतकुलदेवतादेय[2]हन्तकारोपकरणस्तेन श्यालेन महाबलेन पुरप्रतोलिप्रदेशान्निःसरन्नवलोकितः । समालापितश्च—'हंहो धनकीर्ते, प्रवर्धमानान्धकारावन्ध्यायामस्यां वेलायामवगणः[3] क्वोच्चलितोऽसि ।' 'महाबल, मातुलनिदेशाद्बलिमसित[4]निवेदनाय दुर्गालये ।' 'यद्येवं नगरजनासंस्तुत*स्त्वमस्वं निवासं प्रति निवर्तस्व । अहमेतदुपयाचित[5]मैशान्याः स्पर्शयितुं[6] प्रगच्छामि । यद्यत्र तातो रोषिष्यति तदा तद्रोषमहमपनेष्यामि ।' ततो धनकीर्तिर्मन्दिरमगात्, महाबलश्च कृतान्तोदरकन्दरम्[7] । श्रीदत्तः सुतमरणशोकातङ्कोपान्तः[8] प्रकाशिताशेषवृत्तान्तः 'सकलनिकाय्य[9]कार्यानुष्ठानपरमेष्ठिनि श्रेष्ठिनि मन्मनोह्लाद[10]चन्द्रलेखे विशाखे, कथमयं वैधेयो[11] मदन्वया[12]पायहेतुः [13]प्रयुक्तोपायविलोपनकेतुः[14] प्रवासयितव्यः[15] ।' विशाखा—'श्रेष्ठिन्, [16]भेलभावात्सर्वमनुपपन्नं[17] त्वया चेष्टितम् । अतः कुरुण्डतो[18] भीतः कुक्कुटपोत इव तूष्णीमास्स्व । भविष्यति भवतोऽशेषं मनीषितम्' इत्याभाष्य अपरेद्युर्व्यथितजीवितव्यतोदकेषु[19] मोदकेषु विषं संचार्य 'सुते श्रीमते, य एते कुन्दकुसुम-

---

आश्रयवाली [अर्थात्—कुसुंभी वस्त्र पहिन कर] एवं पीसे हुए उड़द से बने हुए मौर व कौए की वलि देनी चाहिए ।'

इसे सुनकर धनकीर्ति बोला—'पिताजी ! जैसी आपकी आज्ञा ।'

धनकीर्ति कुलदेवता के लिए अर्पित करने योग्य सामग्री लेकर नगर की बीच की गली से निकला तो उसको उसके साले महाबल ने देखकर कहा—'धनकीर्ति ! इस निविड़ अँधेरी रात्रि की वेला में अकेले कहाँ जा रहे हो ?'

'महाबल ! मामा की आज्ञा से बलि देने के लिए दुर्गादेवी के मन्दिर को जा रहा हूँ ।'

'यदि ऐसा है तो तुम नागरिकों से अपरिचित हो, अतः गृह को लौट जाओ । दुर्गादेवी को यह भेंट देने के लिए मैं जाता हूँ । यदि पिताजी कुपित होंगे तो मैं उनका कोप दूर कर दूँगा ।'

धनकीर्ति अपने गृह पर गया और महाबल यमराज की उदररूपी गुफा में समा गया ।

पुत्र-मरण के शोक से समीप दुःखित हुए श्रीदत्त ने अपनी प्रिया 'विशाखा' से समस्त वृत्तान्त निवेदित करके कहा—'समस्त गृहकर्मों के नियमपूर्वक करने में विष्णु-सरीखी समर्थ और मेरे मन में सुख उत्पन्न करने के लिए चन्द्रपङ्क्ति-सरीखी 'विशाखा' सेठानी ! इस अभागे बालक को, जो कि मेरा वंश नष्ट करने में कारण है और मेरे द्वारा किये हुए अनेक कपट-पूर्ण घातक उपायों के विनाश करने में केतु-जैसा समर्थ है, कैसे मारना चाहिए ?

'सेठजी ! [पञ्जिकाकार के अभिप्राय से अविचारक होने के कारण अथवा टिप्पणीकार के अभिप्राय से] वृद्ध होने के कारण तुमने सब कार्य अयोग्य किया । अतः विलाव से डरे हुए मुर्गे के बच्चे की तरह तुम चुप बैठो । आपके सब मनोरथ पूर्ण होंगे ।'

दूसरे दिन सेठानी ने अपने पति का जीवन व्यथित करनेवाले लड्डुओं में जहर मिलाकर श्रीमति

---

१. दातव्यः । २. दान । ३. एकाकी । ४. 'देयवस्तु' टि० ख०, 'नैवेद्यं' टि० च० । *. असंस्तुतः अपरिचितः । ५. हन्तकारं—दानं । ६. दातुं । ७. अगात्—मृतः इत्यर्थः । ८. समीपदुःखः । ९. निकाय्यं गृहं । १०. सौख्य, हे भार्ये ! । ११. निर्भाग्यो बालिशः । १२. वंश । १३. मम कृतानेककपटविनाशसमर्थः । १४. नवमो ग्रहः । १५. मारणीयः । १६. 'वृद्ध' टि० ख०, 'भेलः अविचारकः' इति पञ्जिकायां । १७. अघटमानं अयुक्तं त्वया कृतं । १८. 'मार्जारात्' टि० ख०, 'कुरुण्डो मार्जारः' पं० । १९. पीड़केषु—व्यथकेषु ।

कान्तयो मोदकास्ते स्वकीयाय कान्ताय देयाः, [1]'श्यावश्यामाकश्यामलवच्चयश्च जनकाय' इति [2]समर्पितसमया समासन्नमरणसमया सरितं [3]सवनायानुससार ।

श्रीमतिः—[4]'यच्चोत्तमभक्ष्यं तत्प्रतीक्ष्याय[5] ताताय वितरीतव्यम्[6]' इत्यवगत्याविज्ञातसवित्रीचित्तकौटिल्या निःशल्यहृदया तानेतयोर्विपर्ययेणावीवृषत्[7] । विशाखा पतिशून्यमरण्यसामान्यमगारमाप्य[8] परिदेव्य[9] च सुचिरं पुनः 'पुत्रि, किमन्यथा भवति महामुनिभाषितम् । केवलं तव वापेन[10] मया च स्थैर्यात्मीयान्वयविलोपाय [11]कृत्योत्थापनमाचरितम् । तदलमत्र बहुप्रलापेन कल्पद्रुमेण कल्पलतेव त्वमनेन दैवदेयदेहरक्षाविधानेन धवेन[12] सार्धमाकल्पमिन्द्रियैश्वर्यसुखमनुभव' इति संभाविताशीर्वादा तमेकं मोदकमास्वाद्य पत्युः पथि[13] प्रतस्थे । एवं स्वयं विहितदुरीहितवशादुपात्तामिततोकनाशशोकावस्थे[14] दशमीस्थे[15] तस्मिञ्छ्वशुरे श्वश्रूजने च सति स पुरातनपुण्यमाहात्म्यादुल्लङ्घितघोरप्रतिघ[16]पञ्चकापत्प्रतिदिनमुदीयमानसंपदेकदा तेन विश्वंभरेण क्षितीश्वरेण निरीक्षितः । तद्रूपसंपत्तौ जातबहुविस्मयेन तनूजया

पुत्री से कहा—'पुत्री श्रीमति ! इन लड्डुओं में से कुन्द व कुमुद-पुष्प-सरीखी कान्ति वाले श्वेत लड्डू तो अपने पति को देना और धूसरित श्याम धान्य-सरीखे श्याम लड्डू अपने पिता को देना' इतना संकेत करके निकटवर्ती मरणवाली सेठानी नदी में स्नान करने के लिए चली गई। इसके पश्चात् श्रीमती पुत्री ने ऐसा निश्चय किया कि 'श्वेत वर्णवाले खाने-योग्य उत्तम लड्डू तो पूज्य पिताजी के लिए देना चाहिए।'

श्रीमति को माता के चित्त की कुटिलता का पता नहीं था और वह निष्कपट मन वाली थी, इसलिए उसने उन दोनों के लिए प्रस्तुत लड्डू उलट कर दे दिये। अर्थात्—विषैले लड्डू अपने पिता के लिए और निर्विष लड्डू अपने पति के लिए खिला दिये। जिससे उसका पिता श्रीदत्त काल-कवलित हो गया।

जब विशाखा स्नान करके आई तो उसका पति मर चुका था, इसलिए वह जंगल-सरीखे पति-शून्य गृह में आकर बड़ी देर तक रोई और बोली—'पुत्रि। क्या महामुनि की वाणी मिथ्या होती है?' केवल तुम्हारे पिता और मुझ वृद्धा ने अपने स्थिर वंश को नष्ट करने के लिए इस कृत्या* का उत्थापन किया है। इसलिए अब शोक करना व्यर्थ है। अतः अब कल्पवृक्ष के साथ कल्पलता-सरीखी तू दैव के द्वारा रक्षा किये हुए इस पति के साथ, कल्पकाल तक इन्द्रिय-सुख व ऐश्वर्य सुखों को भोगो।' ऐसा आशीर्वाद देकर उसने भी एक जहरीला लड्डू खा लिया और पति की अनुगामिनी हो गई—मर गई।

जब धनकीर्ति के सास ससुर स्वयं किये हुए दुरभिप्राय से पुत्र-मरण से विशेष शोकाकुल होकर काल-कवलित हुए तब धनकीर्ति पूर्वजन्म संबंधी पुण्य के माहात्म्य से भयानक विघ्नों वाली पाँच विपत्तियों को उल्लङ्घन करके दिनोंदिन उदित होनेवाली संपत्ति से सुशोभित हुआ। एक दिन 'विश्वंभर' राजा ने उसे देखा,

---

१. 'श्यावः स्यात् कपिशः धूसरारुणाः' टि० ख०, 'श्यावः कर्दमः' इति पञ्जिकायां। २. मता—अभिप्राया। ३. स्नानाय। ४. 'यच्चोक्षं भक्ष्यं' इति क० ख० च० प्रतिपु, टिप्पण्यां तु 'चोक्षः सुन्दरगीतयोः शुचौ।' ५. पूज्याय। ६. देयं। ७. परिवेषयामास—दत्ते स्म। ८. आगत्य। ९. रोदनं कृत्वा। १०. पित्रा। ११. अथर्वणयज्ञे कृते सति यथाऽस्मवधाय कृत्या उत्पद्यते। १२. कान्तेन। १३. मृता इत्यर्थः। १४. उपात्ता बहुला पुत्रमरणशोकस्य अवस्था येन। १५. मृते सति। १६. विघ्नः।

*. कृत्या – अपने नाश के लिए की हुई मन्त्र-सिद्धि।
सारांश यह है कि जिस प्रकार कोई मनुष्य शत्रु का वध करने के उद्देश्य से मन्त्र विशेष सिद्ध करता है, जिससे शत्रु का बध करने के लिए एक पिशाच प्रकट होता है, परन्तु यदि शत्रु जप, होम या दानादि करने से विशेष बलिष्ठ होता है, तब वह पिशाच शत्रु को न मारकर उल्टा मन्त्र-सिद्धि करने वाले को मार डालता है।

सह उभयेन[1] विशामाधिपत्यपदेन योजितश्च । गुणपालः किंवदन्तीपरम्परया अस्य[2] कल्याणपरम्परामुपश्रुत्य-कौशाम्बीदेशात्पद्मावती[3]पुरमागत्य अनेनाश्चर्यैश्वर्यभाजा सुता[4] सह संजग्मे[5] ।

अथान्यदा सकलत्रपुत्रमित्रतन्त्रेण धनकीर्तिना दर्शनायागतयानङ्गसेनया चानुगतिनिष्ठो गुणपालश्रेष्ठी मतिश्रुतावधिमनःपर्ययविषयसज्ञाजमखिलमुनिमण्डलीराजं श्री यशोध्वजनामभाजं भगवन्तमभिवन्द्य सबहुप्रश्रयमेवमपृच्छत्—'भगवन्, किं नाम जन्मान्तरे धर्ममूर्तिना धनकीर्तिना सुकृतमुपार्जितम्, येन बालकालेऽपि तानि तानि दैवैकशरणप्रतीकाराणि व्यसनानि व्यतिक्रान्तः, येनास्मि[6]ल्लोकव्यतिरि[7]क्त[8]रमा[9]रूपसंपन्नोऽभूत् । येनाद[10]भ्राभ्रिय[11]-विभावसुप्रभासंभार इव देवानामप्यप्रतिहतमहाः[12] समजनि, येन चापरेषामपि तेषां तेषां [13]महापुरुषकक्षावगाहाणां[14] गुणानां समवायोऽभवत् । तथाहि—स्थानं [15]विदान्यतायाः, समाश्रयो वदान्यभावस्य[16], निकेतनमवदानकर्मणः[17], क्षेत्रं मैत्रेयिकायाः,[18] स्वप्नेऽपि न स्वजनस्याजनि मनो मन्तुः[19] कन्तुरिव च[20] कामिनीलोकस्य । तदस्य भवन्त,

---

उसकी लावण्य सम्पत्ति देखकर राजा को विशेष आश्चर्य हुआ। उसने उसके साथ अपनी राजकुमारी का विवाह कर दिया और उसे राजसेठ पद पर भी अधिष्ठित कर दिया। अर्थात्—इस प्रकार धनकीर्ति विवाहोत्सव व श्रेष्ठिपदोत्सव इन दोनों उत्सवों से सुशोभित हुआ।

जब धनकीर्ति के पिता गुणपाल ने किंवदन्ती परम्परा (जन-साधारण की खबर) से अपने पुत्र धनकीर्ति की कल्याण परम्परा सुनी तो वह कौशाम्बी से उज्जयिनी नगरी में आकर आश्चर्यजनक ऐश्वर्यशाली अपने पुत्र के साथ सम्मिलित हुआ।

एक बार स्त्री, पुत्र व मित्रादि से युक्त धनकीर्ति पुत्र के साथ और दर्शन के लिए आई हुई अनङ्गसेना के साथ अनुगमन करने वाले गुणपाल सेठ ने मति, श्रुत, अवधि व मनःपर्ययज्ञान के धारी एवं समस्त मुनियों की मंडली में श्रेष्ठ श्री यशोध्वज आचार्य के लिए नमस्कार करके विशेष विनय पूर्वक पूँछा—'भगवन्! इस धर्ममूर्ति धनकीर्ति ने पूर्वजन्म में ऐसा कौन-सा पुण्य संचय किया था? जिसके कारण इसने बचपन में भी ऐसे भीषण दुःख नष्ट किये, जो कि इसके केवल भाग्य की शरण द्वारा दूर किये जा सकते थे। एवं जिससे यह इस जन्म में भी लोक से प्रचुर लक्ष्मी व लावण्य सम्पत्ति से सम्पन्न हुआ। जिसके प्रभाव से यह वैसा देवों द्वारा भी नष्ट न किये जाने वाला तेजस्वी हुआ जैसे बहुल मेघपटल सम्बन्धी वज्राग्नि का तेजपुञ्ज किसी के द्वारा नष्ट न किये जानेवाले तेजवाला होता है। जिसके प्रभाव से यह पुराण-पुरुषों—तीर्थङ्करादि—के पक्ष के उन-उन गुणों के साथ नित्य संबंध करने वाला हुआ।

जैसे यह विद्वत्ता का आश्रय है, उदारता गुण का स्थान है। यह अवदान (शत्रुओं का खंडन, सर्वपालन, सर्वप्रदान अथवा शुद्ध कर्म) का स्थान है। यह समस्त प्राणियों के प्रति मैत्रीभाव की उर्वरा भूमि है। इससे स्वप्न में भी कुटुम्बीजनों के मन में खेद या अपराध उत्पन्न नहीं हुआ एवं यह स्त्री-समूह के लिए

---

१. एको विवाहोत्सवः द्वितीयः श्रेष्ठिपदं। २. धनकीर्तेः। ३. उज्जयिनीं। ४. पुत्रेण। ५. सम्मिलितः। ६. जन्मनि। ७. अधिक। ८. 'साररूप' इति ग०। ९. श्रीः। १०. बहुल। ११. 'अभ्रपटलसंबंधी अग्नितेजः समूहवत्' टि० ख०, 'अभ्रियो वज्राग्निः' इति पञ्जिकायां। १२. तेजः। १३. पुराणपुरुषः। १४. पक्षवशानां। १५-१६. 'विदान्यो विदग्धः' 'वदान्यस्त्यागी' इति पञ्जिकायां, 'विदग्धतायाः' टि० च०, 'स्थानं वदान्यतायाः' इति ख० प्रतौ। 'वक्तृत्वस्य, वदान्यो वल्गुवागपि प्रियवादी। स्युर्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे। वदति दीयतामिति वदान्यः वदेरान्यः। वदान्यो वल्गुवागपि' इति टि० ख०। १७. अवदानं शत्रुखंडनं, सर्वपालनं सर्वप्रदानं वा शुद्धकर्म, टि० ख०। 'अवदानं साहसं' इति पं०। १८. 'मित्रत्वस्य' टि० ख०। 'मित्रयुः व्यवहारवेदी तस्य भावो मैत्रेयिका' इति पं० व टि० च०। १९. 'विप्रियं अपराधः' टि० ख०। 'खेदः' इति टि० च एवं पञ्जिकायामपि। २०. कामः।

आपणिक[1]परिषत्प्रवणस्य निःशेषशास्त्रप्रवीणान्तःकरणस्य निसर्गादेव निखिलपरिजनालापनसरसस्य[2] *सदाचारशुचलस्य विनेयजनमनःकुवलयानन्दिकथावतारामृतमूर्तेः[3] सुकीर्तेर्धनकीर्तेः पुरोपार्जितं सुकृतं कथयितुमर्हसि।' भगवान्—'श्रेष्ठिन्, श्रूयताम्।' तत्संबन्धसक्तं पूर्वोक्तं वृत्तान्तमचकथत्—'या चास्य पूर्वभवनिकटा घण्टा वधूटी सा कृतनिदाना दमूनसि[4] प्रवेशादियं संप्रति श्रीमतिः संजाता। यश्च स मीनः स कालक्रमेण व्यतिक्रम्य पूर्वं पर्यायपर्वेय[5]मनङ्गसेनाभूत्। अतोऽस्य महाभागस्यैकदिवसाऽहिंसाफलमेतद्विजृम्भते। धनकीर्तिरेतद्वचत्र[6]पवित्रश्रोत्रवर्त्मा। तथा श्रीमतिरनङ्गसेना च पुराभवं भवं संभाल्योन्मूल्य च तमःसंतानतरुनिवेशमिव केशपाशं तस्यैव [7]दोषज्ञस्यान्तिके यथायोग्यताविकल्पं तपःकल्पमादाय जिनमार्गोचितेनाचरितेन चिराराराध्य रत्नत्रयं विधाय च विधिवन्निरजन्य[8]मनोवर्तनं प्रायोपवेशनम्[9]। तदनु धनकीर्तिः सर्वार्थसिद्धिसाधनकीर्तिर्बभूव। श्रीमतिरनङ्गसेना च [10]कल्पान्तरसंयोऽयं देवसायुज्य[11]मभजत्।

भवति चात्र श्लोकः सर्वार्थः—

पञ्चकृत्वः[12] किलैकस्य मत्स्यस्याहिंसनात्पुरा। अभूत्पञ्चापदोऽतीत्य धनकीर्तिः पतिः श्रियः॥ ९४॥

कामदेव-सरीखा विशेष प्यारा है। इसलिए पूज्यवर! आप ऐसे धनकीर्ति की पूर्वजन्म में संचय किये हुए पुण्य की कथा कहिए, जो कि वणिक्-परिषत् में नम्र या अनुरक्त है। जिसका मन समस्त शास्त्रों में निपुण है। जो समस्त आश्रित जनों के साथ वार्तालाप करने में मधुर है। जो सदाचार से शुभ्र है। एवं जिसका कथावताररूपी चन्द्रमा शिष्यजनों के मनरूपी कुवलय (चन्द्रविकासी कमल) को प्रमुदित—विकसित करने वाला है और जो प्रशस्त कीर्तिमान है।

मुनिराज ने इसके पूर्वजन्म की कथा कह सुनाई।

जो पूर्वजन्म में समीप रहने वाली इसकी घण्टा नामकी स्त्री थी, वह निदान बंध करके अग्नि में जल मरी थी, वह इस जन्म में इसकी प्रिया श्रीमती हुई है और जो मछली थी, जिसे मृगसेन ने जल में जीवित छोड़ दिया था, वह कालक्रम से पूर्वपर्याय छोड़कर दूसरी पर्याय धारण कर अनङ्गसेना हुई है। अतः एक दिन हिंसा न करने का फल इस भाग्यशाली को प्राप्त हुआ है।

धनकीर्ति ने उक्त आचार्य के वचनों से अपना श्रोत्रमार्ग पवित्र किया। इसकी प्रिया श्रीमती ने और अनङ्गसेना नामकी वेश्या ने अपना पूर्वभव सुनकर अन्धकार-समूहरूप वृक्ष के प्रवेश-सरीखे केश-पाशों का लुञ्चन करके उसी विद्वान् आचार्य के समीप अपनी योग्यतानुसार दीक्षा ग्रहण की और जैन मार्ग के अनुसार चिरकाल तक रत्नत्रय का आराधन किया। और मनोवृत्ति की निर्विघ्नतापूर्वक समाधिमरण किया। धनकीर्ति सर्वार्थ सिद्धि विमान को प्राप्त करने में कीर्तिमान हुआ और श्रीमती और अनङ्गसेना भी स्वर्गलोक में देव हुए।

इस कथा के विषय में समस्त विषय को बतलाने वाला एक श्लोक है, जिसका भाव यह है—निस्सन्देह धनकीर्ति, जिसने पूर्वजन्म में एक मछली की पाँच बार रक्षा की थी, जिससे वह पाँच भयानक आपत्तियाँ पार करके लक्ष्मी का स्वामी हुआ॥ ९४॥

---

१. वणिक्। २. मधुरस्य। *. इदं पदं मु० प्रतौ नास्ति, किन्तु ह० लि० क० प्रतितः संकलितं—सम्पादक। ३. चन्द्र स्य। ४. अग्नौ, 'दमूनाश्चित्रभानुस्तनूनपात्। ५. पर्वप्रस्तावे। ६. वचत्रं वचनं। ७. 'विदुषः' इति टि० ख०, 'दोषज्ञः अतीन्द्रियज्ञः' इति पञ्जिकायां तथा टि० च०। ८. निर्विघ्नं। ९. पादोपयानमरणं—संन्यासविधि। १०. स्वर्गलोक। ११. 'देवत्वं' टि० ख०, 'सायुज्यं साम्यं' इति पं०। १२. पंचवारान्।

इत्युपासकाध्ययने अहिंसाफलावलोकनो नाम षड्विंशः कल्पः ।

अदत्तस्य परस्वस्य[1] ग्रहणं स्तेयमुच्यते । सर्वभोग्यात्तदन्यत्र भावात्तोयतृणादितः ॥ ९५ ॥
ज्ञातीनामत्यये[2] वित्तमदत्तमपि संमतम् । जीवतां तु निदेशेन[3] व्रतक्षतिरतोऽन्यथा ॥ ९६ ॥
संक्लेशाभिनिवेशेन[5] प्रवृत्तिर्यत्र जायते । तत्सर्वं रायि[6] विज्ञेयं स्तेयं स्वान्यजनाश्रये ॥ ९७ ॥
[7]रिक्थं [8]निधिनिधानोत्थं[9] न राज्ञोऽन्यस्य युज्यते । यस्त्वस्या[10]स्वामिकस्येह दायादो मेदिनीपतिः ॥ ९८ ॥
आत्मार्जितमपि द्रव्यं [11]द्वापरायान्यथा भवेत् । निजान्वयादतोऽन्यस्य[12] व्रती स्वं परिवर्जयेत् ॥ ९९ ॥
मन्दिरे पदिरे[13]नीरे कान्तारे धरणीधरे । तन्नान्यदीयमादेयं स्वापतेयं व्रताश्रयैः ॥ १०० ॥
[14]पौतवन्यूनताधिक्ये स्तेनकर्म[15]ततो* ग्रहः[16] । विग्रहे[17] संग्रहोऽर्थस्या[18]स्तेयस्यैते निवर्तकाः[19] ॥१०१॥

इस प्रकार उपासकाध्ययन में अहिंसा का फल बतलानेवाला यह छब्बीसवाँ कल्प समाप्त हुआ ।
अब चोरी न करने का उपदेश करते हैं—

अचौर्याणुव्रत

सर्वसाधारण के भोगने योग्य जल व तृण-आदि पदार्थों को छोड़कर क्रोधादि कषाय से, विना दिया हुआ दूसरे का धन ग्रहण करना चोरी कही जाती है ॥ ९५ ॥ कुटुम्बियों की मृत्यु हो जाने पर, उनका धन विना दिया हुआ भी ग्रहण किया जा सकता है । परन्तु जीवित कुटुम्बियों का धन उनकी आज्ञा लेकर ही ग्रहण किया जा सकता है । अन्यथा (उनकी जीवित अवस्था में उनकी आज्ञा के विना उनका धन ग्रहण कर लेने पर) अचौर्याणुव्रत की क्षति होती है ॥ ९६ ॥ अपने या दूसरों के धन में जब आर्त व रौद्र अभिप्राय से (चोरी के अभिप्राय से) प्रवृत्ति की जाती है, तो वह सब चोरी ही समझनी चाहिए ॥ ९७ ॥ निधि (भूमि-आदि में गड़ा हुआ जो खजाना व्यय करने पर भी नष्ट नहीं होता) और निधान (जो व्यय करने पर नष्ट हो जाता है—अल्प खजाना) से उत्पन्न हुआ बिना स्वामी का धन राजा को छोड़कर दूसरे का नहीं है; क्योंकि लोक में जिस धन का कोई स्वामी नहीं है, उसका स्वामी राजा होता है । अभिप्राय यह है कि नदी, गुफा व खानि-आदि में पड़ा हुआ धन राजा के विना दूसरे का नहीं है, क्योंकि स्वामी से हीन हुए धन का राजा स्वामी होता है ॥ ९८ ॥ अपने द्वारा उद्यम-आदि से उपार्जन किया हुआ धन भी यदि संदिग्ध है अर्थात् (यह मेरा है ? या दूसरे का ?) तो उसका ग्रहण करना भी चोरी है, अतः व्रती पुरुष को अपने कुटुम्ब के सिवाय दूसरों का धन ग्रहण नहीं करना चाहिए ॥ ९९ ॥ अचौर्याणुव्रती पुरुष को मन्दिर, मार्ग, जल, वन व पर्वत-आदि में पड़ा हुआ दूसरों का धन नहीं ग्रहण करना चाहिए ॥ १०० ॥

नापने-तोलने के बाँट तराजू-आदि को कमती-बढ़ती रखना, चोरी करने का उपाय बतलाना, चोर से लाई हुई वस्तु को खरीदना, राज्य-विरुद्ध कार्य करना व पदार्थों को संग्रह करना ये अचौर्याणुव्रत के

---

१. धनस्य । २. विनाशे मरणे सति । ३. आदेशेन ग्राह्यं । ४. विनाशः । ५. आर्तरौद्राभिप्रायेण प्रवर्तनं । ६. धने । ७. धनं । ८. यो व्ययीकृतः क्षयं न याति स निधिः । ९. यद् व्ययीकृतं सत् क्षयं याति तन्निधानमल्पमित्यर्थः । १०. द्रव्यस्य । ११. संशयाय—सन्देहाय । १२. स्ववंशादन्यस्य धनं वर्जयेत् । १३. मार्गे । १४. तुलाहीनाधिक्ये । १५. चौर्यानुमोदनं । *. ततः स्तेनात् । १६. 'चौरार्थादानं' टि० ख०, 'चौरादानीतद्रव्यग्रहणं' टि० च० । १७. राज्यविरुद्धे । १८. वस्तुनः पदार्थस्य । १९. अतीचाराः । 'स्तेनप्रयोग-तदाहृतादान-विरुद्धराज्यातिक्रमहीनाधिक-मानोन्मानप्रतिरूपकव्यवहाराः' मोक्षशास्त्र अ० ७ सूत्र २७ ।

रत्नरत्ना[1]ङ्गरत्न[2]स्त्रीरत्नाम्ब[3]रविभूतयः । भवन्त्यचिन्तितास्तेषामस्तेयं येषु निर्मलम् ॥ १०२ ॥
[4]परप्रमोषतोषेण तृष्णाकृष्णधियां नृणाम् । अत्रैव दोषसंभूतिः परत्रैव च दुर्गतिः ॥ १०३ ॥

श्रूयतामत्र स्तेयफलस्योपाख्यानम्—प्रयागदेशेषु निवासविलासवारलाप्रलापवाचालितविलासिनीनूपुरे सिंहपुरे समस्तसमुद्रमुद्रितमेदिनीप्रसाधनसेनः पराक्रमेण सिंह इव सिंहसेनो नाम नृपतिः । तस्य निखिलभुवनजनस्तवनोचितवृत्ता रामदत्ता नामाग्रमहिषी । सुतौ चानयोराश्चर्यसौन्दर्यौदार्यपरितोषितानिमि[5]षेन्द्रौ सिंहचन्द्रपूर्णचन्द्रौ नाम । निःशेषशास्त्रविशारदमतिः श्रीभूतिरस्य पुरोहितः [6]सूनृताधिकधिषणतया सत्यघोषापरनामधेयः । धर्मपत्नी चास्य पतिहितैकचित्ता श्रीदत्ता नामाभूत् ।

स किल श्रीभूतिर्विश्वासरसनिर्विघ्नतया परोपकारनिघ्नतया[7] च विभक्तानेकापवरक[8]रचनाशालिनीभिर्महाभाण्ड[9]वाहिनीभिर्गोशालोपशल्याभि[10] कुल्याभिः[11] समन्वित[12]मतिसुलभजलयवसे[13]न्धनप्रचारं [14]भण्डनारम्भोद्भट[15]भटी[16]स्पेटकपक्षरक्षासारं [17]गोरुतप्रमाणं वप्रप्राकार[18]प्रतोलिपरिखासूत्रितत्राणं प्रपासत्[19]त्रसभासनाथ[20]वीथि[21]-

---

अतीचार हैं ॥ १०१ ॥ जिन महापुरुषों में विशुद्ध—निरतिचार-अचौर्याणुव्रत प्रतिष्ठित होता है, उन्हें माणिक्य-आदि रत्न, सुवर्ण-आदि, उत्तम स्त्री, उत्तम वस्त्र-आदि विभूतियाँ विना चिन्तवन की हुईं स्वयं प्राप्त हो जाती हैं ॥ १०२ ॥ जो मनुष्य दूसरों की धनादि वस्तु चुराकर हर्षित होते हैं, तृष्णा से मलिन बुद्धि वाले उन्हें ऐहिक दुःख (जेलखाने-आदि का कष्ट) और पारलोकिक दुर्गति के कष्ट भोगने पड़ते हैं ॥ १०३ ॥

१४. चोरी में आसक्त श्रीभूति पुरोहित की कथा

चोरी के फल के संबंध में एक कथा है, उसे सुनिए—प्रयाग देश के सिंहपुर नामक नगर में, जहाँ पर वेश्याओं के नूपुर, गृहों में क्रीड़ा करती हुईं हंसिनियों के मधुर स्वरों के साथ मुखरित हो रहे थे—झुनझुन ध्वनि कर रहे थे, 'सिंहसेन' नामक राजा था, जिसकी सेना समस्त समुद्रों से चिह्नित पृथ्वी को वश करने वाली थी और जो सिंह-सरीखा पराक्रमी था। उसकी समस्त लोक के मनुष्यों द्वारा प्रशंसनीय चरित्रशालिनी 'रामदत्ता' नामकी पट्टरानी थी। उनके आश्चर्यजनक लावण्य सम्पत्ति एवं उदारता द्वारा देवों के इन्द्रों को प्रमुदित करने वाले 'सिंहचन्द्र' व 'पूर्णचन्द्र' नामके दो पुत्र थे। समस्त शास्त्रों में निपुण बुद्धिशाली 'श्रीभूति' राज-पुरोहित था। अपनी बुद्धि को सत्य वचन की ओर विशेष प्रेरित करने से उसका दूसरा नाम 'सत्यघोष' भी था। पति का हित करने में लीन चित्तवाली उसकी 'श्रीदत्ता' नामकी धर्मपत्नी थी।

श्रीभूति पुरोहित विना विघ्न बाधाओं के अपना विश्वास व प्रेम उत्पन्न करने में समर्थ था और परोपकार करने के अधीन था। अतः उसने एक ऐसा क्रयाण नगर बनवाया, जो कि ऐसी पटशालाओं (वस्त्रगृहों—तम्बुओं) से युक्त था, जो कि जुदे-जुदे अनेक अन्तर्गृहों की रचना से सुशोभित थीं। जहाँ पर बड़े-बड़े वर्तन स्थापित थे और जो गोशाला के नजदीक थीं। जहाँ पर जल, घास व ईंधन का मिलना सुलभ था। जो युद्ध के आरम्भ करने में उत्कट योद्धाओं के समूह के निवास से विशेष सुरक्षित होने के कारण उत्तम था। जो एक कोस के विस्तार में बना था। जो खेत, कोट, मुख्य मार्ग और खाईं होने से सुरक्षित था और

---

१. सुवर्णादि । २. उत्तमस्त्री । ३. उत्तमवस्त्र । ४. परवस्तुचौर्यहर्षेण । ५. देवाः । ६. सत्यवचन । ७. परवशतया । ८. अरंडा वोवरा ? । ९. 'कुण्डकूण्डीप्रमुख' टि० च०, 'वाखरभाजन ? टि० ख० । १०. गोमहिषीबन्धनस्थानसमीपाभिः । ११–१२. वस्त्रशाल, पटशालाभिः क्रयाणपत्तनं पीठस्थानं विनिर्माप्य । १३. तृण । १४. संग्राम । १५. उत्कट । १६. सुभट । १७. क्रोश । १८. अधोलोढ़भित्त्याधारः । १९. सत्रमाच्छादने यज्ञे सदादाने वनेऽपि च इत्यमरः, । संकलित—सम्पादक २०. सहित । २१. मार्ग ।

निवेशनं पण्यपुटभेदनं[1] विदूरितकितवविटविदूषक[2]पीठ[3]मर्दावस्थानं [4]पेण्ठास्थानं विनिर्माप्य नानादिग्देशोपसर्पज्जुषां वणिजां प्रशान्त[5]शुल्क[6]भाटक[7]भाय[8]हारव्यवहारमचीकरत्।

अत्रान्तरे पद्मिनीखेटपट्टनविनिविष्टा[9]वासतन्त्रस्य सुदत्ताकलत्रचरित्रपवित्रितगोत्रस्य वणिक्पतेः सुमित्रस्य [10]निजसनाभिजनाम्भोजभानुः सूनुर्भद्रमित्रो नाम समानधनचारित्रैर्वणिक्पुत्रैः सत्रं [11]वहित्रयात्रायां यियासुः।

'पादमाया[12]न्निधि[13] कुर्यात्पादं वित्ताय कल्पयेत्। धर्मोपभोगयोः पादं पादं भर्तव्यपोषणे[14] ॥१०४॥' इति।

*पुण्यश्लोकार्थमवधार्य विचार्य चातिचिरमुप[15]निधिन्यासयोग्यमावासम् उचिताचारसेव्योऽवधारितेतिकर्तव्यस्तस्याखिललोकश्लाघ्यविश्वासप्रसूतेः श्रीभूतेर्हस्ते तत्पत्नीसमक्षमनर्घ[16]कक्षमनुगताप्तकं[17] रत्नसप्तकं निधाय विधाय च जलयात्रासमर्थमर्थमेकवर्णप्रजाप्रलापसुवर्णद्वीपमनुससार।

जहाँ पर प्याऊ, सदावर्त और व्यवहार-निर्णय करने वाली सभा से युक्त हुईं गृह पंक्तियों की रचना पाई जाती थी।

और उसमें ऐसा पीठस्थान (बाजार) बनवाया, जो कि जुआड़ियों, विटों, विदूषकों व मशखरों की स्थिति से रहित था। वहाँ वह नाना दिशा संबंधी देशों से आने वाले वणिकों के साथ स्वल्पव्याज व स्वल्प-भाड़ा और थोड़े दान-ग्रहण वाला व्यापार करने लगा।

इसी बीच में पद्मिनीखेट नगर में स्थित हुए गृह में निवास करने वाले और सुदत्ता नामकी स्त्री के सदाचार से पवित्र वंशवाले, वणिक् स्वामी 'सुमित्र' नामके सेठ का अपने कुटुम्बी जनरूपी कमलों को विकसित करने के लिए सूर्य-सरीखा 'भद्रमित्र' नाम का पुत्र था।

एक समय वह धन व चरित्र में अपने-सरीखे अन्य वणिक् पुत्रों के साथ यानपात्र (जहाज) द्वारा समुद्र-यात्रा करने का इच्छुक हुआ।

नीति में कहा है—'अपनी आमदनी का एक चौथाई तो पूंजी-निमित्त निर्धारित करके रखना चाहिए। एक चौथाई व्यापार के लिए निर्धारित करना चाहिए। एक चौथाई धार्मिक कार्यों व उपभोग में खर्च करना चाहिए और एक चौथाई से अपने आश्रितों का पालन करना चाहिए' ॥ १०४ ॥

इस सत्य वाणी को निश्चय कर भद्रमित्र ने अपनी स्थापनीय रत्नादि निधि को किसी सुरक्षित योग्य स्थान में रखने का चिरकाल तक विचार करके शास्त्रोक्त सदाचार पालनेवाले व निश्चित कर्तव्यशील उसने अन्त में समस्त लोक में प्रशंसनीय विश्वास के जनक उसी श्रीभूति के हाथ में उसकी स्त्री के समक्ष अत्यन्त मूल्यवान पक्षवाले व पूर्व पुरुषों द्वारा संचय किये हुए अपने सात रत्न धरोहररूप में स्थापित करके जल-यात्रा में समर्थ धन को अपने पास रखकर एक जहाज द्वारा ऐसे सुवर्ण द्वीप को प्रस्थान किया, जहाँ पर एक वर्ण वाली प्रजा के रहने की किंवदन्ती है।

---

१. क्रयाणपत्तनं। २. वैहासिक। ३. 'कामाचार्य वेश्याचार्य' टि० ख०, पञ्जिकाकारस्तु 'पीठमर्दः नाटकाचार्यः' इत्याह। ४. पीठस्थानं। ५. स्वल्प। ६. व्याज। ७. भाड़ा। ८. दाण। ९. स्थितम्। १०. 'गोत्रजन' टि० ख०, 'सनाभिर्बन्धुः' इति पञ्जिकायां। ११. यानपात्र। १२. उपार्जन-लाभमध्यात्। १३. पुंजीनिमित्तं। १४. निर्धारितं कार्यं। *. पुण्यश्लोकः सत्यवाक्। १५. स्थापनीयं द्रव्यं। १६. बहुमूल्यपक्षं। १७. पूर्वपुरुषसंचितं।

पुनरगण्यपण्यविनिमयेन तत्रत्यमचिन्त्यमात्माभिमतं [१]वस्तुस्कन्धमादाय [२]प्रत्यावर्तमानस्यादूरसागरावसानस्याकाण्डप्रचण्डबलादनिलात्परिवर्तित[३]पोतपात्रस्य [४]यद्दृष्टिवश्यतया आयुषः शेषत्वात्तस्यैकस्य प्रभावफलका[५]-वलम्बनोद्यतस्य कण्ठप्रदेशप्राप्तजीवितस्य कथंकथमपि क्षणदायाः[६] क्षयिणि चरमयामक्षणेऽब्धिरो[७]धोपलब्धिरभवत् ।

ततोऽसौ [८]सुखंवितशरीरत्वादपाराकूपारक्षारवारिवशवशि[९]काशयश्चिरायापचित[१०]मूर्च्छोदयः करप्रचारघूर्णितचक्रवाकचिन्तामणौ[११] प्रागचलचूलिकाचक्रवालचूडामणौ कमलिनीकुलविकासाहितहंसवा[१२]सिताशर्मणि विश्वकर्मणि[१३] [१४]वलन्नलिनान्तरालरुचिरे लोचनगोचरे संजाते सति बान्धवजनमरणाद्द्रविणसंद्रवणा[१५]च्चातीवान्तर्मनस्तया[१६] [१७]क्षातच्छायकायः [१८]पटच्चरचेलचीरीनिचिताङ्ग[१९]शकटिः कर्पटिः* परपस्त्यो[२०]पास्तिनिरस्ताभिमानावनिरवर्तनिः[२१] सन् क्रमेण सिंहपुरं नगरमागत्य गीर्मात्रावसेय[२२]पूर्वपर्यायस्तं महामोहरसो[२३]त्सारितप्रीतिं श्रीभूतिमभिज्ञानाधिकवाक्यो माणिक्यसप्तकमयाचत । परप्रतारणाभ्यस्तश्रुतिगीतिः[२४] श्रीभूतिः ।

वहाँ अनगिनती विक्रेय वस्तुएँ बेंचकर तथा उनके बदले में चिन्तवन के लिए अशक्य व मनचाही वस्तु-समूह खरीदकर वापिस लौट रहे उसको जब समुद्र का किनारा समीप आया तब असमय में आये हुए प्रचण्ड शक्तिशाली वायु के झकोरों से (बड़े जोर का तूफान आने से) इसका जहाज उच्छलित हो गया—उलट गया। दैव (भाग्य) की अवलम्बन-परता से व आयु बाकी रहने से वह टूटी हुई जहाज के टूटे हुए काष्ठ खण्ड को ग्रहण करने उद्यत हुआ। कण्ठदेश में प्राप्त हुए प्राणवाले उसे रात्रि के अन्तिम पहर बीतने पर किसी प्रकार से समुद्र-तट की प्राप्ति हुई।

यह सुख से वृद्धिगत शरीर वाला था, परन्तु उक्त घटना से और अपार समुद्र के खारे जल से इसका चित्त शून्य हो गया और चिरकाल में इसकी उत्पन्न हुई मूर्च्छा दूर हुई। जब ऐसा सूर्य दृष्टिगोचर हुआ—उदित हुआ, जिसने अपनी किरणों के प्रसार से चकवी-चकवी का चिन्तारूपी मणि चूर-चूर किया है। जो उदयाचल की शिखर-मण्डल का चूड़ामणि (मुकुटमणि) है। जिसने कमलिनी के समूह को विकसित करने से हंसिनी में सुख स्थापित किया है और जो विकसित कमलों के मध्य प्रविष्ट होने से मनोज्ञ है। तब बन्धुजनों के मरण से और धन के विनाश हो जाने से उसे विशेष मानसिक दुःख हुआ। उसकी शारीरिक कान्ति म्लान हो गई थी। उसकी शरीररूपी छोटी गाड़ी जीर्ण वस्त्र के चीथड़ों से आच्छादित थी। वह निर्धन था। परगृहों की सेवा से उसकी अभिमानरूपी पृथिवी नष्ट हो चुकी थी। अन्त में आजीविका-शून्य हुआ वह घूमता-घूमता क्रम से सिंहपुर में आया। उसकी पूर्वदशा केवल वचन द्वारा ही निश्चय करने योग्य थी। वह श्रीभूति का स्मरण करके जोर-जोर से चिल्लाता था। उसने तीव्र लोभ के कारण प्रीति का त्याग करनेवाले श्रीभूति से अपने सात रत्न माँगे।

दूसरों को ठगने के लिए वेद व स्मृति शास्त्र का अभ्यास किये हुए श्रीभूति ने सोचा—

---

१. वस्तुसमूहं। २. व्याघुटितस्य। ३. उच्छलित। ४. दैवावलम्बनपरतया। ५. त्रुटितभग्नप्रवहणिकाष्ठं। ६. रात्रेः। ७. समुद्रतट। ८. वर्द्धित। ९. शून्यचित्त। १०. स्फेटित। ११. चिन्ता एव मणिः। १२. स्त्री। १३. आदित्ये—सूर्ये। १४. विकसत्कमल। १५. धनविनाशात्। १६. मानसदुःखेन। १७. कृशः। १८. जीर्णवस्त्र। १९. अङ्गमेव शकटिः। *. 'कटिमात्रवस्त्रः कापड़ीसदृशो वा' इति टि० ख०। पञ्जिकायां तु 'कर्पटिः निस्वः।' 'दरिद्री' इति टि० च०। २०. परगृहसेवा। २१. 'वर्तनिः आजीविका' टि० ख०। पं० तु 'अवर्ता-निर्जीविका'। २२. ज्ञातानुक्रमः। २३. त्यक्तस्नेहं। २४. शास्त्रं, वेदः स्मृतिश्च।

'सुप्रयुक्तेन दम्भेन [1]स्वयंभूरपि वञ्च्यते । का नामालोचना[2]न्यत्र[3] संवृत्तिः[4] परमा यदि ॥ १०५ ॥'

इति परामृश्य [5]महातृष्णाघ्रातचेतास्तमायातम्[6]इभ्यमेवमवोचत्—'अहो, दुर्दुरूट[7] किरात, किमिह खलु त्वं केनचित्पिशाचेन छलितः, किमु मनोमहामोहावहानुरोधेन मोहनौषधेनातिलङ्घितः, किं वा कितवव्यवहारेषु हारितसमस्तचित्तवृत्तिः, उत अहो परचित्तवञ्चनपिशाचिकया कयाचिल्लञ्जिकया[8] अनितदुष्प्रवृत्तिः, आहोस्वित्फलवतः[9] पादपस्येव श्रीमतः क्रियमाणोऽभियोगो[10] न खलु किमपि फलमसंपाद्य विश्राम्यतीति चेतसा केनचिद्दुर्मेधसा विप्रलब्धबुद्धिर्यैनैवमतिविरुद्धमभिधत्से[11] । क्वाहम्, क्व भवान्, क्व मणयः, कश्चावयोः संबन्धः । तत्कूटकपटचेष्टिताकर, पट्टनपाटच्चर[12], अणकवणिक[13], सकलमण्डल*प्रतीतप्रत्य[14]यिकशीलमति[15]बेलमेवं मामकाण्डे चण्डकर्मन्पर्यनुयुञ्जानः[16] कथं न लज्जसे ।'

पुनश्चैनमर्थप्रार्थनपथमनोरथविशालं शब्दालं[17] बलात्पालिन्द[18]मन्दिरमनुचरैरानाय्यानार्यमतिः[19], 'देव, अयं वणिग्निष्कारणमस्माकं दुरपवादमृदङ्गवन्मुखरमुखः सुखेनानस्तिततस्तानक[20] इवासितुं न ददाति' इत्यादिभिरुदितैरवाप्तप्रसरतयोत्तेजित[21]राजहृदयस्तथैव पृथिवीनाथेनापि [22]निराकारयत् ।

'अच्छी तरह से प्रयोग किये हुए छल से ब्रह्मा भी ठगाया जाता है और यदि [ठगने-योग्य] दूसरे मनुष्य में पूर्व अवस्था का लोप हो गया है, अर्थात्—विशेष परिवर्तन हो गया है, तब तो विचार करने की बात ही क्या है ? अर्थात्—उसे ठगना सुलभ है' ॥ १०५ ॥

विशेष तृष्णा से व्याप्त चित्त वाले श्रीभूति ने शोकाकुल वणिक्-पुत्र से कहा—'अरे दुराग्रही भील ! क्या तू यहाँ पर किसी पिशाच द्वारा निस्सन्देह छला गया है ? या मानसिक तृष्णा को उत्पन्न करने वाले आग्रह वाली किसी मोहन औषधि द्वारा तू आक्रान्त हुआ है ? अथवा जुआ खेलने में तेरी समस्त चित्तवृत्ति हराई गई है ? अथवा आश्चर्य है कि क्या दूसरों के चित्त को धोखा देने में पिशाचिनी-सरीखी किसी दासी द्वारा तेरे में खोटी प्रवृत्ति उत्पन्न की गई है ? अथवा—जिस प्रकार फलशाली वृक्ष पर किया हुआ लकड़ी का प्रहार, विना फल गिराये विश्राम नहीं लेता उसी प्रकार धनाढ्य के ऊपर किसी दुष्ट पुरुष के द्वारा किया हुआ प्रहार भी विना धन-आदि प्राप्त किए विश्राम नहीं लेता, ऐसा सोचकर किसी दुर्बुद्धि ने तेरी बुद्धि ठगी है ? जिससे तू उल्टे वचन बकता है; क्योंकि कहाँ मैं, कहाँ तू, कहाँ रत्न और कहाँ मेरा व आपका संबंध ? अतः कूट कपट-पूर्ण चेष्टाओं की खानि, नगरचोर, निन्द्य व उग्र कर्म वाले वणिक् ! समस्त देश में विश्वसनीय प्रकृति वाले मुझसे असमय में विशेषरूप से पूँछता हुआ तू लज्जित क्यों नहीं होता ?

इसके उपरान्त दुर्बुद्धि श्रीभूति धन की प्रार्थना के मार्ग-युक्त महान मनोरथ वाले और वाचाल इस भद्रमित्र वणिक्-पुत्र को जबर्दस्ती सेवकों द्वारा राजमहल में ले गया और राजा से बोला—'देव ! यह वणिक्, जिसका मुख अकारण मेरी अपकीर्ति करने के लिए मृदङ्ग-जैसा वाचाल हो रहा है और जो विना नाथ के बैल-जैसा मुझे सुख से बैठने नहीं देता ।' इत्यादि बातों द्वारा नम्रता प्राप्त करने से श्रीभूति ने राजा का हृदय

१. ब्रह्मा । २. विचारः । ३. परनरे । ४. क्षपनं लोपः । ५. तृष्णा । ६. प्राप्तशोचं । ७. 'दुराग्राहिन्' टि० ख० । पं० तु 'दुर्दुरूट दुराग्रही' । ८. दास्या । ९. वृक्षस्य चालनं संखेरणं । १०. उद्यमः शकटकलक्षणः । ११. वदसि । १२. रे पत्तनचौर ! । १३. निन्द्यवणिक् ! । *. देश । १४. 'विश्वासस्वभावं' टि० ख०, पञ्जिकायां तु 'प्रत्ययिको विश्वास्यः' । १५. गाढं अतीव । १६. पृच्छन् । १७. वाचालं । १८. राजमन्दिरं । १९. असभ्यः । २०. नाथरहितवृषभवत् । २१. कोपित । २२. निर्धाटनं कारयामास टि० ख०, निर्धाटयामास टि० च० ।

भद्रमित्रः 'चित्रमेतन्ननु यन्मामपि [1]परविप्रलम्भाय कुलक्रमायाताखिलकमलानिलयमनन्यसामान्यसाहसालयमेव, [2]मोषविषणानिधिरपर[3] इवापायजलधि र्नगरमध्येऽपि मोषितुमभिलषति' इति जाता[4]मर्षोत्कर्षस्तं [5]न्यासार्पणेऽतिचिक्कणचित्तं[6] निश्चित्य स्वाध्यायिपरिषदि[7] महापरिषदि[8] च तदन्यायोपन्यासविन्यासेन साध्यसिद्धिमनवबुद्धयानधीनधीः[9] [10]अशङ्कशुकमतिर्महादेवीधामनेम[11]निवेशमम्लि[12]कानोकहशिखादेशमारुह्यापद्गृह्यः [13]कुररीविरहावसरः कुरर इव [14]तमस्विनीप्रथमपश्चिमयामसमये '[15]सुहृच्चराहूतिः श्रीभूतिरेवंविधकरण्डविन्यस्तम्, इयत्संस्थानसमम्, एतद्वर्णम्, अदः संख्यास्पदं च मदीयं मणिगणमुपनिधि[16]निधेयं न प्रतिददातीत्यत्रास्यैव धर्मरमणी साक्षिणी च। यदि च [17]यद्वदतयैतदन्यथा मनागपि भवति तदा मे चित्रवधो विधातव्यः।'

इति दीर्घघोषघूर्णितमूर्ध्वमध्यमूर्ध्वबाहुः सर्वर्तुपरिवर्ताद्धं[18] पूतकुर्वन्नेकदा नगराङ्गनाजनस्य [19]*चन्द्रामृतपात्रयन्त्रधारागृहावगाहगौरितजगत्त्रयं कौमुदीमहोत्सवसमयमालोकमानया तमङ्गोत्सङ्गसमासीनया[20] निपुणिकाभिधानो-

---

कुपित कर दिया, जिससे राजा ने भी उसे निकलवा दिया।

तब भद्रमित्र ने विचार किया—'निस्सन्देह यह आश्चर्य की बात है कि चोरी करने की बुद्धि का निधि यह श्रीभूति, जो ऐसा मालूम पड़ता है—मानों—मेरा धन नष्ट करनेवाला दूसरा समुद्र ही है—दूसरों को ठगने के निमित्त से वंशपरम्परा से प्राप्त हुई समस्त लक्ष्मी के स्थानीभूत और असाधारण साहस के गृह मुझे भी नगर के मध्य में ठगने की इच्छा करता है'। अतः उसे उत्कट क्रोध उत्पन्न हुआ। पश्चात् उसने श्रीभूति को स्थापित धन के वापिस देने में विशेष लुब्धचित्तवाला अथवा पञ्जिकाकार के अभिप्राय से विचार-शून्य निश्चय किया और जब उसने मठाधीश विद्वानों की सभा में और न्याय के चिन्तन में नियुक्त हुए धर्माधिकारियों की सभा (न्यायालय) में श्रीभूति के अन्याय (धरोहर सम्पत्ति का अपहरण) के स्थापन करने से अपनी प्रयोजन-सिद्धि (सात रत्नों की प्राप्ति) नहीं समझी तब परवश बुद्धिवाला और स्थिर-अस्थिर बुद्धि-युक्त हुआ वह महारानी के महल के समीप स्थित हुए इमली के वृक्ष की शिखर पर आरूढ़ होकर वैसा संकट-ग्रस्त हुआ जैसे पक्षिणी के वियोग के अवसर वाला पक्षी संकट-ग्रस्त होता है।

इसके उपरान्त वह रात्रि के प्रथम व अन्तिम प्रहर की वेला में अपनी भुजाओं को ऊपर उठाकर अपना मध्यभाग ऊपर करने पूर्वक ऊँचे स्वर से कम्पन-पूर्वक जोर से चिल्लाता रहा—'मेरा पूर्व का मित्र किन्तु अब शत्रु नाम वाला श्रीभूति, अमुक प्रकार के पिटारे में रक्खे हुए, अमुक आकारवाले, अमुक वर्णवाले, अमुक संख्यावाले मेरे रत्न-समूह (सात रत्न) नहीं देता, जिन्हें मैंने उसके पास स्थापनीय (धरोहर के रूप में) रूप से स्थापित किये थे। इस विषय में इसकी धर्मपत्नी ही साक्षी है। यदि मेरा यह कथन असम्बद्ध प्रलाप से जरा भी झूँठ हो तो मेरा गूढ़ वध कर देना चाहिए।' इस प्रकार वह छह माह तक चिल्लाता रहा।

इसके पश्चात् एक समय ऐसी रामदत्ता रानी ने इसका चिल्लाना सुनकर करुण अभिप्राय से इसे

---

१. परवंचननिमित्तं मामपि मोषितुमभिलषति। २. चौर्य। ३. द्वितीयः। ४. क्रोध। ५. स्थापितधनदाने। ६. लोभिष्ठं। 'चिक्कणः अपरिच्छेदकः' इति पं०। ७. स्वाध्यायिमठिकाप्रतिवद्धसमूहे। ८. न्यायचिन्तनाधिकारसमूहे—धर्माधिकारे। ९. परवशबुद्धिः। १०. अशङ्कशुका स्थिरास्थिरा। ११. नेमं समीपं। १२. चिंचिणीवृक्ष। १३. पक्षिणी। १४. रात्रिः। १५. पूर्वं सुहृदिदानीं शत्रुरिति नाम। १६. स्थापनीयं धनं स्थाप्यं। १७. असम्बद्धप्रलापतया। १८. षण्मासान् यावत्। १९. चन्द्र एव अमृतपात्रं तदेव यन्त्रधारागृहं। *. "शिशिरकरकिरणामृतासारावगाहगौरितजगत्त्रयम्" इति क०। २०. उपरितनभूमिस्थितया रामदत्तया।

[1]धात्रीसमेतया अनाथलोकलोचनचकोर[2]कौमुदीकल्पवृत्तया रामदत्तया करुणारसप्रचारपदव्या[3] महादेव्याकलितानु-[4]क्रोशाभिनिवेशान्निर्वर्णितश्च ।

तदनु 'अस्मन्मनःसंधात्रि धात्रि,[5] न खल्वेष मनुष्यः पिशाचपरिष्कृतो[6] नाप्युन्मत्ताचरितो यतस्तं दिवसमाद्यं कृत्वा सकलमपि [7]परिवत्सरदलमेकवाक्यव्याहा[8]राकुण्ठ[9]पाठकठोरकण्ठनालः । तद्विचारयेयं तावदचिरकालं [10]शारविशारदहृदयाम्बुजस्य एतत्क्रीडाव्याजेन [11]मन्त्रेरन्तःकरणम् । अम्बिके[12], त्वयापि [13]द्यूतदेवनावसरे यद्यहमेनमनेककुत्सि[14]ताचारनिचितचित्तमतिबहुकुहक[15]विचेष्टितं बकोटवृत्तमुदन्तजातं पृच्छामि, यच्चास्य [16]कटकोर्मिकांशुकादिकं जयामि, तत्तदेवाभिज्ञानीकृत्य मृगीमुखव्याघ्रीसमाचारकुट्टनी[17] श्रीदत्ता भट्टिनी [18]तिन्तिणीकातरुभावोऽस्य वणिजो [19]विषमरुचिमरीचिसंख्यासंपन्नानि रत्नानि याचयितव्या ।'

इति निपुणिकायाः कृतसंगीतिः[20] श्वस्त्येऽह्नि[21] 'सदैव मदीयहृदयानन्ददुन्दुभे दुन्दुभे[22], त्वयापि भगवत्या साधु विजृम्भितव्यम्, यद्यस्य चिञ्चापुरुषस्यास्ति सत्यता' इत्यभ्यर्थ्य[23] तथैवाचरिताचरणा शतशस्तत्तदभिज्ञानज्ञापनानु-

---

देखा, जो कि राजमहल की उपरितन भूमि पर बैठकर नागरिक कामिनी जनों की कौमुदी महोत्सव-वेला को, जिसने चन्द्ररूपी अमृतपात्र के फुव्वारा-गृह में प्रवेश करने से तीन लोक शुभ्र किये हैं, देख रही थी, जो निपुणिका नाम की धाय सहित थी। जिसका चरित्र अनाथलोक के नेत्ररूपी चकोर पक्षियों को सन्तुष्ट करने के लिए चाँदनी की सृष्टि करनेवाला है और जो करुणा रस के प्रचार की मार्गरूप है।

पश्चात् उसने अपनी निपुणिका धाय से कहा—'मेरे मन में मैत्री स्थापित करनेवाली धाय ! निस्सन्देह यह मनुष्य पिशाच के द्वारा गृहीत नहीं है, और न इसका आचरण पागलों-सरीखा है; क्योंकि इसकी कण्ठनाल उसी दिन से लेकर लगातार छह माह तक उक्त प्रकार एक वाक्य संबंधी उच्चारण के अमन्द पाठ से कठोर हो गई है। अतः मुझे द्यूतक्रीड़ा के बहाने से द्यूत-क्रीड़ा में प्रवीण हृदय कमलवाले श्रीभूति मन्त्री के हृदय की परीक्षा शीघ्र करनी चाहिए।

माता ! जुआ खेलते समय मैं अनेक कुत्सित (निन्द्य) आचरण से व्याप्त चित्तवाले, अत्यधिक मायाचार की चेष्टा-युक्त व बगुला भगत से जो जो वृत्तान्त-समूह पूँछूं और जो उसके कङ्कण, अँगूठी व वस्त्रादि जीतूँ उनकी स्मृति या पहिचान कराकर—उन सब को प्रमाण रूप से उपस्थित करके—तुम्हें उस मृगी के समान मुखवाली किन्तु सिंहनी के समान आचरणवाली कुट्टनी श्रीदत्ता से इमली के वृक्ष पर आरूढ़ हुए इस वणिक् के सप्तार्चि (अग्नि) की संख्यावाले (सात) रत्न माँग लाने चाहिए।'

रानी ने इसप्रकार 'निपुणिका' धाय को संकेत कर दिया और आगामी दिन में प्रार्थना की—'हे मेरे हृदय को सदा आनन्द देनेवाले दुन्दुभि-सरीखे पाशदेवता ! यदि इस इमली के वृक्षवाला पुरुष सच्चा है तो भगवती तुझे भी इसमें अच्छी तरह सहायता करनी चाहिए।' पश्चात् उसने वैसा ही किया, अर्थात्—श्रीभूति के साथ शतरञ्ज खेलकर उसके कड़े, अँगूठी और वस्त्रादि जीत लिये और श्रीभूति की पत्नी से,

---

१. धात्री। २. 'चन्द्रिकाचारुवृत्तया' इति क०। ३. मार्गरूपया। ४. 'करुणाभिप्रायात्' टि० ख०। पं० तु अनुक्रोशः अनुग्रहः। 'अनुग्रह' टि० च०। ५. हे मातः !। ६. गृहीतः। ७. संवत्सरार्द्धं। ८. आलापः। ९. अमन्दः। १०. द्यूतक्रीडा। ११. सचिवस्य। १२. हे धात्रि !। १३. क्रीडन। १४. कुत्सित। १५. माया। १६. कंकण, मुद्रिका, वस्त्र। १७. 'कुट्टिनी' इति क०। १८. चिञ्चा। १९. सप्तार्चिसंख्यानि। २०. संकेतः। २१. आगामिदिने। २२. हे धात्रि !। २३. प्रार्थ्य।

वश्य[1]तन्मात्सल्कलत्रान्मणीनुपप्रणीय[2] राज्ञः समर्पयामास। स राजाऽद्भुतांशौ[3] स्वकीयरत्नराशौ तानि संकीर्य[4] आकार्य चैनमासन्नलक्ष्मीकल्पलताविलासनन्दनं[5] वैदेहिकनन्दनम्[6], 'अहो वणिक्तनय, यान्यत्र रत्ननिचये[7] तव रत्नानि सन्ति तानि त्वं विचिन्त्य गृहाण' इत्यभाणीत्। भद्रमित्रः 'चिरप्राय[8] ननु दिष्ट्या[9] वर्धेऽहम्' इति मनस्यभिनिविश्य[10] 'यथादिशति विशां पतिः' इत्युपदिश्य विमृश्य च तस्यां माणिक्यपुञ्जौ[11] निजान्येव मनाग्विलम्बितपरिचयचिरत्नानि[12] रत्नानि समग्रहीत्।

ततः स नरवरः सपरिवारः प्रकामं विस्मितमतिः 'वणिक्पते, त्वमेवात्रान्वर्थतः सत्यघोषः, त्वमेव च परम-निःस्पृहमनीषः, यस्तव चेतसि वचसि च न मनागप्यन्यथाभावः समस्ति' इति प्रतीतिभिः पारितोषिकप्रदानपुरःसरप्रकृति-भिस्तत्तदो[13]पयिकोपचितिवसतिभिश्च भणितिभिस्तमखिलब्रह्म[14]स्तम्बस्ति[15]मीविजृम्भमाणगुणगणस्तोत्रं भद्रमित्रं कथं-कारं न श्लाघयामास। पुनरदूराशिवतातिं[16] श्रीभूतिं निखिललोक[17]लपनालवालमूलकौलीनता[18]लताश्रयशालिनं न्युब्जाननं[19] निसर्गेण [20]हरिणीसमच्छायमपि महासाहसानुष्ठानात्सू[21]र्मीसमानकायमनल्पवैलक्ष्य[22]स्फुटदास्वनित[23]-

---

जो कि सैकड़ों उन उन चिह्नों—कङ्कण-आदि—के ज्ञापन की निरन्तर प्रवृत्ति से परवश हुई है, उक्त वणिक् के सात रत्न मँगवाकर राजा के लिए समर्पण कर दिये।

राजा ने अद्भुत किरणों वाली अपनी रत्न-राशि में उन्हें मिलाकर समापवर्ती लक्ष्मीरूपी कल्पलता की क्रीड़ा के लिये नन्दनवन-सरीखे उस वैश्यपुत्र को बुलाकर कहा—'वणिक्पुत्र! इस रत्नसमूह के मध्य में जो रत्न तुम्हारे हों, उन्हें जानकर ले लो।'

'चिरकाल के पश्चात् उत्पन्न हुए पुण्य से मैं बढ़ रहा हूँ' ऐसा मन में अभिप्राय करके 'भद्रमित्र' ने कहा—'राजा सा० जैसी आज्ञा देते हैं।'

पश्चात् उसने उस रत्न-समूह के मध्य में से अपने ऐसे सात रत्न विचार कर ग्रहण कर लिए, जिनमें अल्प विलम्ब वाली जानकारी के कारण काल-क्षेप (कुछ समय का यापन) वर्तमान था।

यह देखकर राजा सकुटम्ब विशेष आश्चर्यान्वित बुद्धि वाला होकर बोला—'हे वणिक्-पति! तुम ही लोक में यथार्थ सत्यघोष हो, तुम ही विशेष वाञ्छा-रहित बुद्धिमान हो, क्योंकि तुम्हारे मन व वचन में जरा-सी भी धनलम्पटता या छलछिद्रता नहीं है।' राजा ने इस प्रकार के पारितोषिक-पूर्वक धन-प्रदान स्वभाव वाले विश्वासों द्वारा और तत्काल में उचित सम्मान के स्थानीभूत वचनों द्वारा भद्रमित्र की अत्यधिक प्रशंसा को, जिसके गुण-समूह की स्तुति समस्त ब्रह्माण्ड के हृदय में विस्तृत हो रही है,

जब राजा ने श्रीभूति को ऐसा देखा, जो कि समीपवर्ती अमङ्गल वाला है, जो कि समस्त लोक की मुखरूपी क्यारी में स्थित हुई जड़वाली लोक-निन्दारूपी लता के आश्रय के लिए वृक्ष-सरीखा है, जो नीचा मुख

---

१. संतत्या प्रवर्तमानपरवशात्। २. आनीय। ३. किरणे। ४. मिश्रीकृते। ५. 'क्रीड़ावनं' टि० ख०, 'देवोद्यानं' टि० च०। पञ्जिकायां तु नन्दनं देवोद्यानं। ६. वैश्यपुत्रं। ७. रत्न-समूहमध्ये। ८. चिराय। ९. समुपजातेन पुण्येन। १०. अभिप्रायं कृत्वा। ११. पुञ्जिः समूहः। १२. मनाग्विलम्बितपरिचयेन चिरत्नः कालक्षेपो येषु रत्नेषु तानि चिरत्नानि। १३. तत्तस्मात्तदाकाले उचितजाताभिः टि० ख०, पं० तु उपचिकमुचितम्। १४. ब्रह्माण्ड। १५. हृदयं। १६. समीपाऽमंगलं। १७. मुख। १८. जनापवादः टि० ख०, पं० तु दुरपवादः। १९. अधोमुखं। २०. स्वर्णप्रतिमा। २१. लोहप्रतिमा। २२. उन्मार्ग। २३. हृदयं।

सतीव भयाविर्भूतोत्पन्न[1]वेपथुस्ति[2]मितमवेक्ष्य बह्मालेपम्, 'आः[3] [4]सोमपायिनामपाङ्क्तेय[5] वैधेय[6], विश्वासघातक, पातकप्रसव, श्रोत्रियकितव, दुराचार, प्रवर्तितनूत्नरत्नापहार, कुशिककुलपांसन[7], बकानुष्ठानसदन, साधुजनमनःशकुनि[8]बन्धनायातनुतन्त्री[9]जालमिव खलु तवेदं यज्ञोपवीतम्। असदाचारावधिक[10], वेदवैवधिक[11], सद्धर्मधामध्या[12]मलताविधानाय [13]विहवभोजसमिन्धन[14], अकृत्यचैत्य[15], वात्या[16]मात्य, जरायमदूतिकोपपत्तिक[17] दुर्गतिक[18], किमात्मनो न पश्यसि [19]धर्मतरुत्वचमिवातिप्रवृद्धविस्रोवात्यो[20]न्माथशिथिलतां प्रभातप्रदीपिकामिवास्तासन्नजीवितरविमङ्गच्छविं[21] येनाद्यापि वयोवसि[22] वयसि वर्तमान इव चेष्टसे। तदिदानीं यदि घनाभि[23]घारघोरतेजसि विश्ववेदसि[24] निक्षिप्यसे, तदा चिरोपचितदुराचारग्रहस्य तवाचिरदुःखदायिपरिग्रहोऽनुग्रह इव।

ततो द्विजापसद, [25]कदाचित्त्वयेदमतिदुर्गन्धगोवरोद्गर्भ[26]तमभ्याशयं [27]शालाजिरत्रयमशितव्यम्, नो चेदशराल[28]बलोत्फुल्लगल्लानां मल्लानां त्रयस्त्रिंशदवहस्त[29]प्रहृतानि सहितव्यानि। ध्रुवमन्यथा तव सर्वस्वापहारः।' प्रणाशाव-

---

किये हुए है, जो पूर्व में स्वभावतः सुवर्ण की मूर्ति-सरीखा कान्ति-युक्त था, परन्तु महान् दुस्साहस-युक्त कर्म करने से वह लोहे की मूर्ति-सरीखे शरीर-युक्त मालूम पड़ता है, जिसका मन प्रचुर उन्मार्ग (कुपथ) में गमन करने से भग्न हो रहा था—चूर-चूर-हो रहा था और जो विशेष भय से उत्पन्न हुए बेमर्याद कम्पन से प्रस्वेदित (अत्यधिक पसीना-युक्त) था, तब उसने विशेष तिरस्कार पूर्वक कहा—'बड़ा खेद है, हे ब्राह्मणों के मध्य पङ्क्ति-रहित ! अर्थात्—हे ब्राह्मण-श्रेणी में रखने के अयोग्य (जाति से वहिष्कृत) ! निर्भाग्य ! हे विश्वासघातक व पातकों की उत्पत्ति स्थान ! हे ब्राह्मण-धूर्त ! दुराचारी ! नवीन रत्नों का अपहरण करनेवाले ! हे ब्राह्मण-वंश-दूषण ! हे बगुला-सरीखी कुटिलता के स्थान ! निस्सन्देह तेरा यह यज्ञोपवीत शिष्ट पुरुषों के मनरूपी पक्षियों के बन्धन के लिए वृहत् तातों का जाल-सरीखा है। हे पापाचार की चरम सीमावाले ! वेदरूपी कावड़ी के धारक (वेदों के भारवाहक) ! प्रशस्त धर्मस्थान में मलिनता उत्पन्न करने के लिये अग्नि के ईंधन ! हे कुकर्म के गृह ! हे निकृष्ट (अधम) मंत्री ! हे वृद्धावस्था रूपी यमदूती के आदर करने में तत्पर ! और हे जार !

क्या तुम विशेष बढ़ी हुई वृद्धावस्थारूपी प्रचण्ड वायु द्वारा उत्पन्न हुई घातक शिथिलतावाली, भोजपत्र-सरीखी शारीरिक शिथिलतावाली और तेज हवा के चलने से बुझने के उन्मुख हुए प्रभातकालीन दीपक-सरीखी व जिसमें जीवनरूपी सूर्य का अस्त होना निकटवर्ती है, ऐसी शरीर की खाल को नहीं देखते हो ? जिससे अब भी ऐसी चेष्टाएँ करते हो—मानों—तुम युवा हो। अतः इस समय यदि तू प्रचुर घृत डालने से भयानक तेजवाली—धँधकती हुई अग्नि में फेंक दिया जाय तो चिरकाल से संचित किये हुए पाप को स्वीकार करनेवाले तेरा अनुग्रह जैसा होगा, क्योंकि तुझे अग्नि में फेंकना तत्काल दुःख देने वाला है। इसलिए हे निकृष्ट ब्राह्मण ! या तो तुझे विशेष दुर्गन्धित गोबर से भरे हुए मध्यदेश वाले तीन सकोरों परिमाण गोबर खाना चाहिए। यदि ऐसा नहीं कर सकता तो प्रचुर बल से फूले हुए गालों वाले पहलवानों के तेतीस कोहनियों के प्रहार

१-२. कम्पेनार्द्रं प्रस्वेदितं। ३. खेदे। ४. सोमपायिनो ब्राह्मणाः। ५. पङ्क्तिरहित। ६. निर्भाग्य। ७. ब्राह्मणकुलदूषण। ८. पक्षिबन्धनार्थं। ९. दवरकस्य तांतणनुजाल। १०. मर्यादक। ११. वेदानुष्ठानरत। १२. कृष्णत्व। १३. अग्नेः। १४. इन्धन। १५. गृह। १६. निकृष्ट मन्त्रिन्!। १७. जरैव यमदूती, उपपत्तिकः आदरपरः। १८. जार। १९. भूर्जतरुपत्रवत् शिथिलशरीरखल्लां। २०. जरा एव वात्या। २१. कायखल्लां। २२. यौवने इव। २३. घृत। २४. अग्नौ। २५. अथवा। २६. भृतमध्यप्रदेशं। २७. भाजन—भाणा टि० ख०, पं०·तु०'शालाजिरं शरावं' शरावं टि० च०। २८. बहुलबल। २९. अवहस्त—कोहणी।

कृताविभूतिः श्रीभूतिराज्ञस्तयं दण्डद्वयं क्रमेणातितिक्षमाणः[1] [2]पर्याप्तसमस्तद्रविणः क्रिमिकिर्मीर[3]परिषत्परिकल्पित[4]-प्रमार्ष्टिः कृतकलशकपाल[5]मालावासिक[6]मुच्छिष्टसृष्ट[7]सरावस्रक[8]परिष्कृतः[9] [10]पुराद्वालवालेय[11]कमारोह्य सनिकारं निष्कासितः पापविपाकोपपन्नाप्रतिष्ठ[12]कुष्ठो कुपरिणामकनिष्ठः[13] शुभाशयारण्यविनाशमहसि हिरण्यरेतसि[14] तनुविसर्गादतिरौद्रसर्गादाहेये[15]ऽन्ववाये प्रादुर्भूय[16] चिरायापराध्य[17] च प्राणिषु जातजीवितावधि[18]रधःप्रधाननिधिर्बभूव।

भवति चात्र श्लोकः—

श्रीभूतिः स्तेयदोषेण पत्युः प्राप्य पराभवम्। रोहित[19]इवप्रवेशेन दंदोरः[20] सन्नधोगतः ॥१०६॥

इत्युपासकाध्ययने स्तेयफलप्रलपनो नाम सप्तविंशतितमः कल्पः।

अत्युक्तिमन्यदोषोक्तिमसभ्योक्तिं[21] च वर्जयेत्। भाषेत वचनं नित्यमभिजातं[22] हितं मितम् ॥१०७॥

तत्सत्यमपि नो वाच्यं यत्स्यात्परविपत्तये। जायन्ते येन वा स्वस्य व्यापदश्च दुरास्पदाः ॥१०८॥

(मुक्के) सहन करना चाहिए। नहीं तो निस्सन्देह तेरा समस्त धन अपहरण किया जायगा।'

मृत्यु से अपनी रक्षा की विभूति माननेवाला श्रीभूति जब गुरू के दो राज-दण्ड क्रमशः सहन न कर सका तब राजा द्वारा उसका समस्त धन ग्रहण कर लिया गया और उसके शरीर पर कीड़ों से कर्बुरित कीचड़ से विलेपन करके घड़ों की खप्पर श्रेणी की माला पहिना कर उसे जूठे सकोरों की माला से अलङ्कृत किया गया। बाद में बड़े गधे पर चढ़ा कर उसे तिरस्कार पूर्वक नगर से निकाल दिया। पापकर्म के उदय से उसे चारों ओर अशोभमान कोढ़ हो गया। खोटे परिणामों से वह जघन्य कोटि का था। इसलिए उसने उसके शुभ परिणामरूप वन को भस्म करनेवाली अग्नि में जलकर शरीर त्याग किया—मर गया और उत्पन्न हुए रौद्र ध्यान के कारण साँपों के वंश में उत्पन्न हुआ। वहाँ उसने अनेक प्राणियों को डँसा और आयु पूरी करके नरकवासी हुआ—

प्रस्तुत विषय के समर्थक श्लोक का अर्थ यह है—श्रीभूति नाम का पुरोहित चोरी करने के अपराध से राजा द्वारा तिरस्कृत हुआ और अग्नि में जलकर मर गया। पश्चात् सर्पयोनि में उत्पन्न होकर नरकगामी हुआ ॥ १०६ ॥

इस प्रकार उपासकाध्ययन में चोरी का फल बतलानेवाला सत्ताईसवाँ कल्प समाप्त हुआ।

अब सत्यव्रत का निरूपण करते हैं—

सत्याणुव्रत

सत्यवादी को किसी बात को बढ़ाकर नहीं कहते हुए दूसरों के दोष नहीं कहना चाहिए और असभ्य वचन बोलने का त्याग करना चाहिए। उसे सदा कुलीनता प्रकट करनेवाले, हितकारक व परिमित वचन बोलना चाहिए ॥१०७ सत्यवक्ता को ऐसा सत्य भी नहीं बोलना चाहिए, जिससे दूसरे प्राणियों पर विपत्ति (पीड़ा या मरण)

---

१. असहमानः। २. गृहीत—उद्दालित। ३. कृमिभिः विचित्रकर्दमः टि० ख०, पं० तु किर्मीरः कर्बुरः, परिषत् कर्दमः। ४. परिविरचितविलेपनः टि० ख०, पं० तु प्रमार्ष्टि विलेपनं। ५. कुम्भस्य खर्परश्रेणी। ६. बद्धरचना। ७. उच्छिष्ट। ८. माला। ९. परिष्कृतः अलङ्कृतः। १०. नगरात्। ११. बृहद्रासभं। १२. अशोभमान। १३. जघन्यः। १४. अग्नौ। १५. सर्पवंशे। १६. उत्पन्नः। १७. प्राणिषु अपराधं कृत्वा। १८. सर्पोऽपि। १९. अग्नि। २०. सर्पः। २१. 'असत्योक्तिं च' इति क०। २२. 'अभिजातस्तु कुलजे बुधे सुकुमारे न्याय्ये चोपचारात्' टि० ख०, 'अभिजातं शुभकुलोद्भवं वचनं' टि० च०।

प्रियशीलः प्रियाचारः प्रियकारी प्रियंवदः । स्यादानृ*शं[1]सधीर्नित्यं नित्यं परहिते रतः ॥१०९॥
केवलिश्रुतसङ्घेषु देवधर्मतपस्सु च । [2]अवर्णवादवाञ्जन्तुर्भवेद्दर्शनमोहवान्[3] ॥११०॥
मोक्षमार्गं स्वयं जानन्नर्थिने यो न भाषते । मदापह्नवमात्सर्यैः स स्यादावरणद्वयी ॥१११॥
मन्त्रभेदः परीवादः[4] पैशून्यं कूटलेखनम् । मृषासाक्षिपदोक्तिश्च सत्यस्यैते विघातकाः ॥११२॥
परस्त्रीराज[5]विद्विष्टलोक[6]विद्विष्टसंश्रयाम् । [7]अनायकसमारम्भां न कथां कथयेद्बुधः ॥११३॥
असत्यं सत्यगं किंचित्किंचित्सत्यमसत्यगम् । सत्यसत्यं पुनः किंचिदसत्यासत्यमेव च ॥११४॥

[8]अस्त्येवमैदंपर्यम[9]सत्यमपि किंचित्सत्यमेव, यथान्धांसि[10] रन्धयति वयति वासांसीति[11]। सत्यमप्यसत्यं किंचिद्यथार्धमासतमे दिवसे तवेदं देयमित्याश्रुत्य[12] मासतमे संवत्सरतमे वा दिवसे ददातीति। सत्यसत्यं किंचिद्यद्वस्तु यद्देशकालाकारप्रमाणं प्रतिपन्नं तत्र तथैवाविसंवादः[13]। असत्यासत्यं किंचित्स्वस्यासत्संगिरते[14] कल्ये दास्यामीति।

आती हो या अपने ऊपर भयानक दुर्निवार आपत्तियाँ आतीं हों ॥१०८॥ सत्यवादी मानव को सदा प्यारी प्रकृति वाला, प्रिय आचरण वाला, प्रिय करने वाला, प्रिय भाषण करने वाला एवं सदा परोपकार करने में तत्पर होकर सदा दूसरों से द्रोह न करने वाली बुद्धिवाला (दयालु) होना चाहिए ॥१०९॥ जो प्राणी केवली, द्वादशाङ्ग-शास्त्र, मुनिसंघ, देव, धर्म (अहिंसा लक्षण) व तप में गैरमौजूद दोषों का आरोपण करता है, या इनकी निन्दा करता है, वह मिथ्यादृष्टि है, अर्थात्—उसे दर्शनमोहनीय कर्म का आस्रव होता है ॥ ११० ॥ जो विद्वान् पुरुष मोक्ष के मार्ग को स्वयं जानता हुआ भी अपने ज्ञान का घमण्ड करने से, ज्ञान को छिपाने से, मात्सर्यभाव से—ईर्ष्या से (मेरे सिवाय दूसरा कोई न जानने पावे ऐसी ईर्ष्या के कारण) मोक्ष मार्ग के इच्छुक दूसरे मानव को नहीं बताता, वह ज्ञानावरण और दर्शनावरण कर्म का बन्ध करता है ॥ १११ ॥ दूसरे के मन की बात जानकर उसे दूसरों पर प्रकट कर देना, असम्बद्ध भाषण करना अथवा झूँठा उपदेश देना, चुगली करना, झूँठे दस्तावेज-आदि लिखाना और झूँठी गवाही देना ये पाँच दुर्गुण सत्यव्रत के घातक हैं, अर्थात्—ये सत्याणुव्रत के पाँच अतिचार हैं ॥११२॥ विद्वान् पुरुष को परस्त्री-कथा, राज-विरुद्ध कथा व लोक विरुद्ध कथा का त्याग करते हुए निरर्थक, नायक-रहित व कपोल-कल्पित कथा नहीं कहनी चाहिए ॥ ११३ ॥ वचन चार प्रकार का होता है—१. असत्य-सत्य, २. सत्यासत्य, ३. सत्यसत्य व ४. असत्यासत्य ॥ ११४ ॥

इस श्लोक का यह अभिप्राय है कि कोई वचन असत्य होते हुए भी सत्य होता है। जैसे 'यह भात पकाता है' या 'वस्त्र बुनता है।' यहाँ पर पकाने योग्य चाँवलों में भात शब्द का प्रयोग किया गया है एवं वस्त्र-निर्माण-योग्य तन्तुओं में वस्त्र शब्द का प्रयोग किया गया है। इसलिए उक्त वाक्यों में असत्यता होते हुए भी सत्यता है। अतः असत्य सत्य वचन [लोक व्यवहार के अनुकूल] है।

इसी तरह कुछ सत्यवचन ऐसे होते हैं, जिनमें काल का व्यवधान हो जाने से असत्यता का मिश्रण होता है। जैसे कोई व्यक्ति किसी से कहता है, कि 'मैं आपको अमुक वस्तु पन्द्रह दिन में दूँगा।' ऐसी प्रतिज्ञा करके वह एक महीना व एक वर्ष में उसे प्रतिज्ञात वस्तु देता है, इसे सत्यासत्य वचन जानना चाहिए। क्योंकि

---

*. 'स्याद्यानृसंस्यधीर्नित्यं' इति क० च०। १. पराऽद्रोहबुद्धिः दयासहितः। २. निन्दापरः। ३. मिथ्यादृष्टिः। ४. असम्बद्धालापः। ५. राजविरुद्धां। ६. लोकविरुद्धां। ७. फल्गुकथां नायकरहितां कपोलकल्पिताम्। ८. श्लोकस्य। ९. रहस्यं–अयमर्थः। १०. 'ओदन' टि० ख०, पं० तु अन्धांसि अन्नानि। ११. वस्त्राणि। १२. प्रतिज्ञाय। १३. अमिथ्यावादः। १४. कथयति, सम् प्रतिज्ञायां टि० ख०, 'प्रतिज्ञायति' इति टि० च०।

तुरीयं[1] वर्जयेन्नित्यं [2]लोकयात्राश्रये स्थिता। सा मिथ्यापि न गीर्मिथ्या या गुर्वादिप्रसादिनी ॥११५॥
न स्तुयादात्मनात्मानं न परं परिवादयेत्[3]। न [4]सतोऽन्यगुणान्हिंस्यान्नासतः स्वस्य वर्णयेत् ॥११६॥
तथा [5]कुर्वन्प्रजायेत नीचैर्गोत्रोचितः पुमान्। उच्चैर्गोत्रमवाप्नोति विपरीतकृतेः[6] कृती ॥११७॥
यत्परस्य प्रियं कुर्यादात्मनस्तत्प्रियं हि तत्। अतः किमिति लोकोऽयं पराप्रिय[7]परायणः ॥११८॥
यथा यथा परेष्वेतच्चेतो[8] वितनुते तमः। तथा तथात्मनाडीषु तमोधारा निषिञ्चति ॥११९॥
दोषतोयैः [9]गुणग्रीष्मैः संगन्तृणि[10] शरीरिणाम्। भवन्ति चित्तवासांसि गुरूणि च लघूनि च ॥१२०॥
सत्यवाक्सत्यसामर्थ्याद्वचःसिद्धिं समश्नुते। वाणी चास्य भवेन्मान्या यत्र यत्रोपजायते ॥१२१॥
तर्वेर्ष्यामर्षह[11] [11]धर्षिमृ षाभाषामनीषितः। जिह्वाच्छेदमवाप्नोति परत्र च गतिक्षतिम्[12] ॥१२२॥

यहाँ पर वस्तु के देने में विरोध न होने के कारण सत्यता है और प्रतिज्ञा किये हुए काल के उल्लङ्घन हो जाने से असत्यता है। जो वस्तु जिस देश में, जिस काल में, जिस आकार में और जिस प्रमाण में जानी है, उसको उसी रूप से सत्य कहना सत्य-सत्य है : जो वस्तु अपने पास नहीं है, उसके लिए ऐसी प्रतिज्ञा करता है कि मैं तुम्हें सबेरे दूँगा परन्तु देता नहीं है। इसे असत्य-असत्य समझना चाहिए।

इनमें से चौथे असत्य-असत्य वचन को कभी नहीं बोलना चाहिए। क्योंकि लोक व्यवहार शेष तीन प्रकार के वचनों पर ही स्थित है। इसी प्रकार जो वाणी गुरु-आदि हितैषियों को प्रमुदित करनेवाली है, वह मिथ्या होने पर भी मिथ्या नहीं समझी जाती॥ ११५॥ सत्यवादी को अपनी प्रशंसा न करते हुए दूसरों की निन्दा नहीं करनी चाहिए। उसे दूसरों में विद्यमान गुणों का घात (लोप) नहीं करना चाहिए। और अपने अविद्यमान गुणों को नहीं कहना चाहिए कि मेरे में ये गुण हैं॥ ११६॥ परनिन्दा, आत्मप्रशंसा व दूसरों के प्रशस्त गुणों का लोप करनेवाला मानव नीच गोत्र का बंध करता है और जब धार्मिक पुरुष उससे विपरीत करता है। अर्थात्—अपनी निन्दा और दूसरों की प्रशंसा करता है तथा दूसरों में गुण न होने पर भी उनका वर्णन करता है तथा अपने में गुण होते हुए भी उनका कथन नहीं करता तब उच्चगोत्र का बध करता है॥ ११७॥ जो व्यक्ति दूसरों का हित करने में तत्पर रहता है, वह अपना ही हित करता है, फिर भी न जाने क्यों यह लोक-संसार-दूसरों का अहित करने में तत्पर रहता है?॥ ११८॥ जिस जिस प्रकार से यह विकृत मनोवृत्ति दूसरे प्राणियों में अज्ञानरूप अन्धकार का प्रसार करती है, उस उस प्रकार से वह अपनी धमनियों—नाड़ियों—में अज्ञानरूप अन्धकार की धारा को प्रवाहित करता है। अभिप्राय यह है कि दूसरों का अहित करने से अपना ही अहित होता है॥११९॥ [लोक में] प्राणियों के चित्तरूपी वस्त्र जब दोषरूपी जल में डाले जाते हैं तो आर्द्र होने से गुरु (वजनदार व पक्षान्तर में पापी) हो जाते हैं और जब वे गुणरूपी गर्मी में फैलाये जाते हैं तो सूख जाने के कारण लघु (हल्के व पक्षान्तर में पुण्यशाली) हो हो जाते हैं।

निष्कर्ष—अतः नैतिक पुरुष को अपना मनरूपी वस्त्र सदा सम्यग्ज्ञानादि प्रशस्त गुणरूप गर्मी द्वारा लघु (हल्का-पुण्यशाली) करते रहना चाहिए॥ १२०॥

सत्यवादी पुरुष सत्य के प्रभाव से वचन-सिद्धि प्राप्त करता है। उसकी वाणी जिस-जिस विषय में

---

१. असत्यासत्यं। २. व्यवहार। ३. निन्दयेत्। ४. विद्यमानान्। ५. परात्मनिन्दाप्रशंसां कुर्वाणः। ६. तद्विपर्ययो नीचैर्वृत्तिः। ७. अहिततत्परः। ८. मनः। ९. जलैर्मनोवस्त्राणि आर्द्रीभवन्ति। १०. संबंधीनि। ११. तृष्णामोह। १२. सुगतिविनाशं।

श्रूयतामत्रासत्यफलस्योपाख्यानम्—जाङ्गलदेशेषु [1]हस्तिनागनामावनीश्वरकुञ्जरजनितावतारे हस्तिनागपुरे प्रचण्डदोर्दण्डमण्डलीमण्डनमण्डलाग्र*खण्डितमण्डलकण्डू[2]लारा[3]तिकीर्तिलतानिबन्धनोऽभूदयोधनो नाम नृपतिः। [4]अनवरतवसुविश्राणनप्रीणितातिथिरतिथिर्नामा चास्य महादेवी। सुता चानयोः सकलकलावलोकनलसा सुलसा नाम। सा किल तया महादेव्या गर्भगतापि [5]ज्ञातेयेनैकोदरशायिनो[6] रम्यकदेशनिवे[7]शोपेतपोदनपुरनिवेशिनो [8]निर्विपक्षलक्ष्मीलक्षिताक्षूणमङ्गलस्य[9] पिङ्गलस्य [10]गुणगीर्वाणाचलरत्नसानवे सूनवे दुर्वारवैरिवक्षःस्थलोहलना[11]-वदानोद्योगलाङ्गलाय मधुपिङ्गलाय परिपणिता [12]बभूव।

भूभुजा च महोदयेन तेन विदितमहादेवीहृदयेनापि 'यस्य कस्यचिन्महाभागस्य भाग्यैर्भोग्यतया योग्यमिदं स्त्रैणं द्रविणं तस्यैतद्भूयात्। अत्र सर्वेषामपि वपुष्मतामचिन्तितसुखदुःखागमानुमेयप्रभावं दैवमेव शरणम्' इति विगणय्य[13] स्वयंवरार्थं भीम-भीष्म-भरत-भाग-सङ्ग-सगर-सुबन्धु-मधुपिङ्गलादीनामवनिपतीनामुपदानुकूलं[14] मूलं[15] प्रस्थापयांबभूवे[16]।

प्रवृत्त होती है, उस उस विषय में मान्य होती है ॥ १२१ ॥ इसके विपरीत जो मानव तृष्णा, ईर्षा, क्रोध व हर्ष-आदि के कारण झूँठ बोलने की बुद्धि वाला होता है, उसे इस लोक में जिह्वाच्छेदन-आदि कष्ट होते हैं और परलोक में उसकी सुगति नष्ट होती है, अर्थात्—दुर्गति होती है ॥ १२२ ॥

१५. असत्यभाषी वसु और पर्वत-नारद की कथा

अब झूँठ बोलने का कटुकफल बतलाने वाली कथा सुनिए—

जाङ्गलदेश के 'हस्तिनाग' नामक श्रेष्ठ राजा का जन्म होने के कारण सार्थक नाम वाले 'हस्तिनागपुर' नाम के नगर में, अपनी प्रचण्ड बाहुदण्डमण्डली के अलङ्काररूप खड्ग द्वारा युद्ध करने की खुजली वाले शत्रुओं की कीर्तिरूपी लता को खण्डित करने में कारणीभूत 'अयोधन' नामका राजा था। इसकी निरन्तर धन के दान द्वारा अतिथियों को सन्तुष्ट करनेवाली 'अतिथि' नामकी पट्टरानी थी। इनके समस्त कलाओं के अभ्यास में प्रयत्नशील 'सुलसा' नामकी पुत्री थी। जब राजकुमारी सुलसा महारानी के गर्भ में थी, तभी से महारानी ने निस्सन्देह रम्यक देशवर्ती पोदनपुर नगर के निवासी, जिसका परिपूर्ण मङ्गल (राज्यसुख) शत्रु-रहित राज्य लक्ष्मी द्वारा जाना गया था व जो महारानी का सहोदर था, ऐसे अपने भाई पिङ्गल के पुत्र ऐसे मधुपिङ्गल के लिये वाग्दान (देनी) कर रक्खी थी, जो गुण (वीरता-आदि) रूपी सुमेरु पर्वत का रत्नमयी शिखर था और जिसका उद्योगरूपी लाङ्गल (हल) दुःख से भी निवारण करने के लिए अशक्य (दुर्जेय) शत्रुओं के वक्षःस्थलों (उरोभूमि) के विदारणरूपी प्रशस्त कर्म वाला था।

[जब सुलसा विवाह-योग्य हुई] तब विशेष उन्नतिशील राजा-अयोधन को यद्यपि अपनी महारानी के हृदय की बात ज्ञात थी तो भी उसने सोचा कि—'यह स्त्री धन जिस किसी महाभाग्यशाली के भाग्य में भोगने के योग्य है, उसी का यह होना चाहिए। इस विषय में सब शरीरधारियों का देव ही शरण है और देव का

---

१. 'हस्तिनाग' नामा कश्चिद्राजा तत्र पूर्वमभूत् तेन तन्नगरं हस्तिनागपुरमित्यभवत्। *. असिः। २-३. खर्जितकर। ४. द्रव्य। ५. ज्ञातेर्भावः ज्ञातेयं तेन बन्धुत्वेनेत्यर्थः। ६. अतिथिपिङ्गलावेकोदरोत्पन्नौ। ७. स्थान। ८. शत्रुरहितः। ९. परिपूर्णमङ्गलस्य। १०. गुणा एव गीर्वाणाचलः 'मेरुस्तत्र रत्नशिखराय टि० ख०, गुणा एव गीर्वाणाः देवाः तेभ्यः अचलः मेरुः तत्र रत्नसानुः टि० च०। ११. उद्दलनायावदानं अद्भुतकर्म शुद्धकर्म वा तत्र उद्योग एव लाङ्गलं यस्य सः। १२. दत्ता। १३. ज्ञात्वा। १४. प्राभृतपूर्वं। १५. लेखं। १६. तेन भूभुजा।

अत्रान्तरे मगधमध्यप्रसिद्धयाराध्यायामयोध्यायां नरवरः सगरो नाम। स किल लास्यादिविला[1]सकौशल-सरसायाः सुलसायाः कर्णपरम्परया श्रुतसौरूप्यातिशयो [2]मनागुपरमत्तारुण्यलावण्योदयः प्रयोगेण[3] तामात्मसात्चिकीर्षुः स्तौर्यत्रिकसूत्रे [4]प्रतिकर्मविकल्पेषु संभोगसिद्धान्ते [5]विप्रश्नविद्यायां-स्त्रीपुरुषलक्षणेषु [6]कथाख्यायिकाख्यानप्रवाह्लीका-स्वपरासु च तासु तासु कलासु [7]परमसंवीणतालताधरित्रीं मन्दोदरीं नाम धात्रीं ज्योतिषादिशास्त्रनिशितमतिप्रसूतिं विश्वभूतिं च बहुमानसंभावितमनसं पुरोधसं तत्र पुरि प्राहिणोत्।

[8]विशिकाशयशार्दूलदरी[9] मन्दोदरी तां पुरमुपगम्य परप्रतारणप्रगल्भमनीषा [10]कृतकात्यायिनीवेषा तत्तत्कलावलोकनकुतूहलमयोधनधरापालं निजनाथार्थसिद्धिपरवती[11] रञ्जितवती सती [12]शुद्धान्तोपाध्यायी भूत्वा सुलसां सगरे संगरं[13] ग्राहयामास। तथा बकोटवृत्तिवेषः स पुरोधाश्च तैस्तैरादेशैस्तस्य नृपस्य महादेव्याश्च वशीकृतचित्तवृत्तिः।

प्रभाव अचानक सुख-दुःख के आगमन से अनुमेय है।' ऐसा जानकर उसने स्वयंवर के लिये भीम, भीष्म, भरत, भाग, सङ्ग, सगर, सुबन्धु, और मधुपिङ्गल-आदि राजाओं के पास भेंट पूर्वक पत्र भिजवा दिये।

[इसी बीच एक दूसरी घटना घटी]

मगध देश के मध्य में ख्याति प्राप्त करने से आराधना के योग्य अयोध्यानगरी में 'सगर' नामका राजा था। निस्सन्देह उसने कर्णपरम्परा से नृत्यादि कलाओं की निपुणता से व विलास (हावभाव) को चतुरता से रसीली सुलसा राजकुमारी को सर्वोत्कृष्ट अनोखी सुन्दरता की चर्चा सुनी। इस राजा की जवानी की सौन्दर्य-वृद्धि कुछ अल्प हो रही थी। अतः वह किसी भी उपाय से उसे अपने अधीन करने का इच्छुक हुआ। अतः उसने 'मन्दोदरी' नामकी धाय को, जो कि भरत मुनि के गीत, नृत्य व वादित्ररूप संगीतकला में, मण्डन-आभरण-आदि में, कामशास्त्र में, होराक्षरादि द्वारा दूसरे की मनोवृत्ति के ज्ञान में, स्त्री-पुरुषों के लक्षण-ज्ञान में, कथा (चित्र अर्थ बतानेवाली), आख्यायिका (प्रसिद्ध अर्थवाली कथा), आख्यान (दृष्टान्त-कथन) व पहेली और दूसरी ललित कलाओं में विशेष पटुतारूपी लता को पल्लवित करने के लिए पृथिवी-सरीखी थी। तथा ऐसे विश्वभूति नामक पुरोहित को, जिसकी बुद्धि का प्रसार ज्योतिष-आदि शास्त्रों में तीक्ष्ण था एवं जिसका मन विशेष सन्मान से आह्लादित था, हस्तिनागपुर भेजा।

मन्दोदरी धाय ने, जो कि दूसरों को धोखा देने के उपाय संबंधी अभिप्राय के लिए व्याघ्र की गुफा-जैसी थी और जिसकी बुद्धि दूसरों को ठगने में प्रवीण थी, उस नगर में पहुँच कर कात्यायनी (समस्त लोक द्वारा नमस्कार करने के योग्य वेषवाली, समस्त कलाओं में प्रवीण, प्रौढ़ अर्द्धवृद्धा नारी) का वेष बनाया और अपने स्वामी की प्रयोजन-सिद्धि करने में तत्पर हुई। इसने उन उन कलाओं के देखने का कौतूहल वाले अयोधन राजा को अपने ऊपर विशेष प्रसन्न कर लिया और अन्तःपुर की अध्यापिका होकर सुलसा से सगर राजा को

---

१. नृत्यविशेष। २. विरमत्। ३. 'प्रयोगस्तु निदर्शने कार्मणे च प्रयुक्तौ च केनाप्युपायेनेत्यर्थः।' टि० ख०, 'प्रसाधनेन' टि० च०। ४. 'मण्डनाभरणादिषु' टि० ख०, 'नेपथ्य' टि० च०। 'प्रतिकर्म नैपुण्यं' इति पञ्जिकायां।
५. होराक्षरादिभिः परचित्तज्ञाने अथवा अहोरात्र्यादिभिः परचित्तज्ञाने।
६. कथा चित्रार्थगा ज्ञेया ख्यातार्थाऽऽख्यायिका मता। दृष्टान्तस्योक्तिराख्यानं प्रवाह्लीका प्रहेलिका ॥ १ ॥
७. पटुता। ८. विशिका परवंचनोपायः। ९. व्याघ्रगुहापि प्राणात्यये वर्तते। १०. 'अर्द्धवृद्धा' टि० ख०, पञ्जिकाकारस्तु कात्यायनी लक्षणं प्राह—
'सर्वलोकनमस्कार्यवेषाऽशेषकलाश्रया। कात्यायनी भवेन्नारी प्रगल्भातीतयौवना' ॥ १ ॥
११. तत्परा। १२. अन्तःपुर। १३. संगरं प्रतिज्ञां।

कुण्ठे (ण्ठे) षष्टिरशीतिः स्यादेकाक्षे बधिरे शतम् । वामने च शतं विंशं दोषाः पिङ्गे त्वसंख्यकाः ॥१२३॥
मुखस्यार्द्धं[1] शरीरं स्याद्घ्राणार्धं[2] मुखमुच्यते । नेत्रार्धं[3] घ्राणमित्याहुस्तत्सेषु[4] नयने परे ॥१२४॥

इत्यादिभिः स्वयं विहितविरचनैर्मधुपिङ्गले विप्रीतिं कारयामास ।

[5]ततश्चाम्पेयमञ्जरीसौरभपयःपानलुब्धबोधस्तनंधयेषु पुष्पंधयेष्विव मिलितेषु स्वयंवराह्वानभृङ्गारिताहंकारेषु महीश्वरेषु सा मन्दोदरीवशमानसा सुलसा श्रुतिमनोहरं सगरमवृणीत[6]निम्नचरोपगापगेव[7] सागरम् ।

भवति चात्र श्लोकः—

अल्पैरपि समर्थैः स्यात्सहायैर्विजयी नृपः । कार्यायान्तो[8] हि कुन्तस्य दण्डस्तस्य[9] परिच्छदः ॥१२५॥

इत्युपासकाध्ययने सुलसायाः सगरसंगमो नामाष्टाविंशः कल्पः ।

ही वरण करने की प्रतिज्ञा करा ली। बगुला-जैसी कुटिल वृत्ति में वृहस्पति-सरीखे राजपुरोहित ने भी अनेक उपदेशों से उस राजा का और महारानी का मन अपने वश में कर लिया।

इसके उपरान्त उसने उन्हें स्वयं रचे हुए श्लोकों द्वारा मधुपिङ्गल के विषय में विरक्तता उत्पन्न कराई।

उन श्लोकों का भाव यह था—

टुण्टे में ६० दोष होते हैं, काने में ८० और बहरे में सौ दोष होते हैं। बौने में एक सौ बीस दोष होते हैं, किन्तु पीत नेत्रवाले में तो अगणित दोष होते हैं॥ १२३॥

समस्त शरीर, मुख के मूल्य को प्राप्त करता है, अर्थात्—शरीर में मुख कीमती होता है। मुख नासिका का मूल्य प्राप्त करता है (मुख में नासिका श्रेष्ठ होती है)। एवं नासिका नेत्रों का मूल्य प्राप्त करती है (नासिका की अपेक्षा नेत्र श्रेष्ठ हैं)। तथा नेत्र शरीर, मुख व नासिका-आदि के मध्य सर्वोत्कृष्ट माने गये हैं॥ १२४॥

इसके बाद स्वयंवर हुआ—

स्वयंवर में बुलाने से वस्त्राभूषणों से मण्डित होने के कारण अहङ्कारी राजा लोग, जिनके ज्ञानरूपी शिशु, चम्पक-वल्लरियों की सुगन्धिरूपी दुग्धपान में विशेष लुब्ध हैं, भौरों की तरह जब स्वयंवर मंडप में एकत्रित हुए, तब उनमें से मन्दोदरी धाय के अधीन हुई मनोवृत्ति वाली सुलसा ने कर्णों के लिए मनोज्ञ सगर राजकुमार को वैसा वरण किया जैसे नीची पृथिवी पर गमन करनेवाली नदी समुद्र का वरण करती है—उसमें प्रविष्ट होती है।

प्रस्तुत विषय के समर्थक श्लोक का अर्थ यह है—

राजा शक्तिशाली थोड़े से भी सैनिक सहायकों से विजयश्री प्राप्त करता है, जैसे भाले की नौंक ही अपना कार्य (प्रहार) करती है, उसमें लगा हुआ दण्ड तो केवल सहायक मात्र है॥ १२५॥

---

१. सर्वं शरीरं मुखस्यार्द्धं तुल्यं मूल्यं। २. सर्वं मुखं नासिकायाः अर्द्धं तुल्यं मूल्यं वा लभते। ३. एकनेत्रस्य मूल्यं नासिका लभते। ४. पूर्वोक्तेषु मध्ये नेत्रे उत्कृष्टे। ५. चम्पकवल्लरीसु लसत्सुगन्धता एव दुग्धपानं तत्र लोभिष्ठज्ञानबालकेषु। ६. निम्नभूगामिनी। ७. नदी। ८. अग्रभाग। ९. कुन्तस्य।

प्ररूढनिर्वेदकन्दलो* मधुपिङ्गलः 'धिगिदमभोगायतनं[1] भोगायतनं[2] यदेकदेशदोषादिमामुचितसमागमामपि [3]मातुलतनूरुहामहं नालप्सि[4]' इति मत्वा विमुक्तसंसारपक्षः परिगृहीतदीक्षः क्रमेण तांस्तान्ग्रामारामनिवेशान्निरनुगो[5] जङ्घाकरिक[6] इव लोचनोत्सवतां नयन्नशनाया[7] बुद्धयायोध्यामागत्यानेकोपवासपरवशहृदयोत्साहस्तीव्रतपोऽतिश्रान्तदेहो वाप्पीह[8] इव [9]क्लमथुव्यपोहाय सगरागारद्वार*मन्दिरे[10] मनाग्व्यलम्बत। तत्र च पुराप्रयुक्तपरिणयापायनीतिर्विश्वभूतिः प्रगल्भमतये शिवभूतये रुचिष्याय[11] शिष्याय रहितरहस्य[12]मुद्रकं सामुद्रकमशेषविदु[13]षविचक्षणो व्याचक्षाणो बभूव। परामर्शवशाशीतिः[14] शिवभूतिस्तं न्यक्षलक्षणपेशलं मधुपिङ्गलमवलोक्य 'उपाध्याय,[16] घनघृताहुतिवृद्धिमद्धामशालिनि [17]ज्वालामालिनि 'हूयतामेतदैतिह्यस्वाध्यायो यदेवंविधमूर्तिरप्ययमीदृगवस्थाकीर्तिः' सदाचारनिगृहीतिर्विश्वभूतिः—अपर्याप्तपूर्वापरसंगीते[18] शिवभूते, मा गाः खेदम्, यदेष नृपवरस्य सगरस्य निर्देशादस्मदुपदेशादनन्यसामान्यलावण्यविनिवासां सुलसामलभमानस्तपस्वी[19]तपस्वी समभूत्। एतच्चासन्नारिष्ट[20]तातेर्विश्वभूतेर्वचनमेकायनमनाः[21] स यतिर्निशम्य

इस प्रकार उपासकाध्ययन में सुलसा का सगर के साथ संगम नाम का अट्ठाईसवाँ कल्प समाप्त हुआ।

इस घटना से मधुपिङ्गल के हृदय में वैराग्य रूप कन्द ऊँग गया और ऐसा सोचकर उसने संसार से मोह छोड़कर जिनदीक्षा ग्रहण कर ली। 'भोग-शून्य स्थान वाले इस शरीर को धिक्कार है, जिसके एकदेश (नेत्र) में दोष होने के कारण मैं समागम के योग्य (अनोखी सुन्दरी) मामा की पुत्री को नहीं प्राप्त कर सका।' इसके उपरान्त एकाकी पादचारी की तरह घूमते हुए उसने क्रम से अनेक ग्रामों व बगीचों के स्थान नेत्रों की उत्सवता में प्राप्त किये। एक दिन वह भोजन की इच्छा की बुद्धि से आहार के लिए अयोध्या नगरी में आया। अनेक उपवास करने के कारण उसके हृदय का उत्साह पराधीन (बेकाबू) हो गया और तीव्र धूप से उसका शरीर विशेष थक गया था, अतः चातक पक्षी की तरह थकावट दूर करने के लिए सगर राजा के महल के द्वार-मण्डप पर थोड़ी देर के लिए ठहर गया।

वहाँ पर समस्त विद्वानों में प्रवीण विश्वभूति, जिसने पूर्व में इसका सुलसा राजकुमारी के साथ होनेवाले विवाह-संबंध को छुड़ाने की कूटनीति का प्रयोग किया था, प्रतिभाशाली, बुद्धिमान एवं शास्त्रोपदेश के योग्य (अथवा टि० के अभिप्राय से प्रेमपात्र) शिवभूति नामक शिष्य के लिए गोप्य-रहित मुद्रापूर्वक (खुले तौर पर) सामुद्रिक विद्या का व्याख्यान दे रहा था, उस समय विचार के अधीन चित्तवाले शिवभूति शिष्य ने समस्त लक्षणों से मनोज्ञ मधुपिङ्गल को देखकर अपने गुरु से कहा—उपाध्याय ! 'प्रचुर घी की आहुति से वृद्धिगत तेजवाली—धँधकती हुए अग्नि में इस सामुद्रिक विद्या को जला देनी चाहिए; क्योंकि इस प्रकार के लक्षणों से युक्त होने पर भी इस मानव की ऐसी शोचनीय अवस्था है।'

इसे सुनकर सदाचार के शत्रु विश्वभूति ने कहा—'पूर्वापर संबंध को न जाननेवाले शिवभूति ! खेद मत करो, क्योंकि सगर राजा की आज्ञा से और हमारे कहने से अनोखे सौन्दर्य की आश्रय सुलसा को प्राप्त न

---

* कन्द। १. भोगरहितं गृहं। २. शरीरं। ३. मातुलपुत्रीं। ४. न प्राप्तवान्। ५. असहायः एकाकी। ६. चरणचरः पादचारी। ७. 'आहारार्थं' टि० ख०, 'बुभुक्षायाः' टि० च०, पं० तु अशना क्षुधा। ८. चातकः। ९. श्रमस्फेटनाय। *. 'द्वारपदिरे' इति ख०,। १०. 'पदिरे—प्राङ्गणे मण्डपे' टि० ख०, पञ्जिकाकारस्तु 'मन्दिरं मण्डपः' इत्याह। ११. 'वल्लभाय' टि० ख०, पं० तु 'रुचिष्यः शास्त्रोपदेशयोग्यः'। १२. गोप्यरहित। १३. विदुषं पण्डितः। १४. 'चित्तः' टि० ख०, पं० तु 'आशीतिः आशयः'। १५. न्यक्षः सर्वः। १६. हे उपाध्याय !—हे प्रगल्भ ! टि० ख०। १७. अग्नौ। १८. संबंध। १९. दीनः, पं० तु तपस्वी वर्पुटः। २०. अमङ्गल। २१. एकाग्रचित्तः।

प्रवृद्धक्रोधानलः कालेन [1]विपद्योत्पद्य चासुरेषु कालासुरनामा भवप्रत्ययमाहात्म्यादुपजातावधिसन्निधिस्तपस्याप्रपञ्च[2]मसुरान्वयोद्भवं[3] चात्मनो विनिश्चित्य यदीदानीमेव महापराधनगरं सगरमकारणप्रकाशितदोषजातिं विश्वभूतिं च चूर्णपेषं पिनष्मि, तदानयोः[4] सुकृतभूयिष्ठत्वात् प्रेत्यापि[5] सुरश्रेष्ठत्वावाप्तिरिति न साध्वपराधः स्यात्। ततो यथैतयोर्बहुविडम्बनावरोधो वधः, परत्र च दुःखपरम्परानुरोधो भवति, तथा विधेयम्। न चैकस्य बृहस्पतेरपि कार्यसिद्धिरस्ति' इत्यभिप्रायेणात्मवैकारिक[6]र्द्धिप्रदर्शनातिथिं[7] वैरनिर्यातन[8]मनोरथरथसारथिमन्वेषमाणमतिरासीत्।

अथ कामकोदण्डकारणकान्तारैरिवेक्षुवनावतारैर्विराजितमण्डलायां[9] [10]डहालायामस्ति स्वस्तिमती नाम पुरी। तस्यामभिचन्द्रापरनामवसु[11]र्विश्वावसुर्नाम नृपतिः। तस्य निखिलगुणमणिप्रसूति[12]वसुमती वसुमती नामाग्रमहिषी। सूनुरनयोः[13]समस्तसपत्नभूरुहविभावसु[14]र्वसुः। पुरोहितश्च निश्चिताशेषशास्त्ररहस्यनिकुरम्बः क्षीरकदम्बः। कुटुम्बिनी पुनरस्य सतीव्रतोपास्तिमती स्वस्तिमती नाम। [15]अन्यूरनयोरनेकनमसित[16]पर्वतप्राप्तः पर्वतो नाम। स

करने के कारण यह बेचारा तपस्वी हो गया है।'

उस तपस्वी ने एकाग्रचित्त होते हुए निकटवर्ती अमङ्गल-समूहवाले विश्वभूति के वचन सुनकर उसकी क्रोधाग्नि भड़क उठी। वह आयु के अन्त में मर कर असुरकुमार जाति के देवों में कलासुर नामका देव हो गया। वहाँ पर देव पर्याय के माहात्म्य से उसे भवप्रत्यय अवधिज्ञान की समीपता उत्पन्न हुई। उसके द्वारा उसने अपनी तपश्चर्या का विस्तार व उससे असुर कुमार जाति के देवों में अपनी उत्पत्ति का निश्चय किया।

इसके उपरान्त उसने सोचा-कि 'यदि मैं इसी समय महान् अपराध के स्थान सगर को व निष्कारण मेरे गैरमौजूद दोष-समूह को प्रकाशित करने वाले दुष्ट विश्वभूति को चूर्ण की तरह पीसता हूँ तब पुण्य अधिक होने से इन दोनों को देवों की श्रेष्ठ पर्याय ही मिलेगी, जिससे इनका विशेष अपकार नहीं होगा।' इसलिए ऐसा प्रयत्न करना चाहिए कि इनका वध महान् कष्टों के संबंध वाला हो और परलोक में भी इन्हें दुःख-परम्परा का संबंध हो। परन्तु अकेला बृहस्पति भी सहायकों के विना कार्य-सिद्धि में सफलता प्राप्त नहीं कर सकता। ऐसा सोचकर उसकी बुद्धि ऐसे कुशल पुरुष की खोज करने में तत्पर हुई, जो इसकी वैक्रियक ऋद्धि के चमत्कार दिखलाने का अतिथि हो एवं जो वैर-शुद्धि के मनोरथ रूप रथ का सारथि हो। अर्थात्—वैर शोधने में सहायक हो।

इक्षु-वनों की उत्पत्ति द्वारा, जो मानों—कामदेव के धनुष उत्पन्न करनेवाले वन ही हैं, सुशोभित विस्तार वाले डहाला देश में स्वस्तिमती नामकी नगरी है। उसमें विश्वावसु नामका राजा राज्य करता था, उसका दूसरा नाम अभिचन्द्र भी था। उसकी समस्त गुणरूप मणियों की उत्पत्ति के लिए वसुमति (पृथ्वी) सरीखी 'वसुमति' नामकी पट्टरानी थी। इनके समस्त शत्रुरूपी वृक्षों को भस्म करने के लिए अग्नि-जैसा वसु नामक पुत्र था। समस्त शास्त्र के रहस्य-समूह को निश्चय करने वाला 'क्षीरकदम्ब' राज-पुरोहित था। इसकी पातिव्रत्य धर्म की उपासना करनेवाली स्वस्तिमती नामकी प्रिया थी। इनके पर्वत नामक पुत्र था, जो कि बहुल नैवेद्य चढ़ाकर की हुई देवताओं की आराधनाओं से प्राप्त हुआ था।

---

१. मृत्वा। २. विस्तारं। ३. उद्भवं—उत्पत्तिं। ४. नृपमन्त्रिणोः। ५. मृत्वापि। ६. विकारे भवा विक्रियर्द्धि। ७. प्राघूर्णिकं, मम विक्रियां तस्य दर्शयामीति भावः। ८. वैरशुद्धिकरणसहायं। ९. चक्रवालायां विस्तारायां। १०. नाम देशे। ११. अभिचन्द्रः विश्वावसुः इति तस्य नृपस्य नामद्वयं। १२. उत्पत्तौ भूमिः। १३-१४. शत्रुवृक्षदहनाग्निः। १५. पुत्रः। १६. हस्तकारा एव पर्वताः तैः प्राप्तः बहुलनैवेद्येन देवाराधनैः प्राप्त इत्यर्थः।

किल सदाचरणसूरिः क्षीरकदम्बकसूरिः शिष्यशेमुष्यामिव स्वाध्यायसंपादनविशालायां सुवर्णगिरिगुहाङ्गणशिलायां[1]एकदा तस्मै मुदा गतस्मयाय[2] यथाविधि [3]समधिजिगांसवे वसवे प्रगलितपितृपाण्डित्यगर्वपर्वताय तस्मै पर्वताय गिरिकूटपत्तनवसतेर्विश्वनाम्नो विश्वंभरापतेः पुरोहितस्य [4]विहितानवद्यविद्याचार्यचरणसेवस्य विश्वदेवस्य नन्दनाय नारदाभिधानाय च [5]निखिलभुवनव्यवहारतन्त्रमागमसूत्रमतिमधुरस्वरापदेश[6]मुपविशन्नम्बरादवतरद्भ्यां सूर्याचन्द्रसमाभ्याममितगत्यनन्तगतिभ्यामृषिभ्यामोक्षांचक्रे ।

तत्र समासन्नसुगतिरनन्तगतिर्भगवान्किलैवमभाषत—'भगवन्, एत[7] एव खलु विबुध्याः[8] शिष्याः, यदेवमनवद्यं ब्रह्मोद्यविद्य[9]मेत[10]स्माद्ग्रन्थार्थप्रयोगभङ्गीषु[11]यथार्थप्रदर्शनतया [12]विधूतोपाध्यायादुपाध्यायादेक[13]सर्गधियोऽधीयते ।'

प्रयुक्तावधिबोधस्थितिरमितगतिर्भगवान्—'मुनिवृषन्[14], सत्यमेवैतत् । किन्त्वेतेषु चतुर्षु मध्ये द्वाभ्यामंभसि[15] गौरवोपेतपदार्थवदधःप्रबोधो[16]चितमतिभ्यामिदमतिपवित्रमपि सूत्रं विपर्यासयितव्यम् ।'

एतच्च प्रवचनलोचनालोकितब्रह्मस्तम्बः[17] क्षीरकदम्बः संश्रुत्य 'नूनमस्मिन्महामुनिवाक्येऽर्यातसप्तरुचि[18]-

---

एक समय निस्सन्देह विशेष सदाचारी क्षीरकदम्ब नामक विद्वान् सुवर्ण गिरि की गुफा के आँगन की शिला पर, जो कि उस प्रकार स्वाध्याय के सम्पादन के लिए विशाल (विस्तृत) थी जिस प्रकार शिष्य की बुद्धि स्वाध्याय के सम्पादन में विशाल (प्रखर) होती है, गर्व-रहित (विनीत) व यथाविधि अध्ययन के इच्छुक वसु राजकुमार के लिए और अपने पुत्र पर्वत के लिए, जिसका पिता की विद्वत्ता का गर्वरूपी पर्वत नष्ट हो चुका था, एवं नारद नामक शिष्य के लिए, जो कि गिरिकूट नगर के स्वामी राजा विश्व के पुरोहित व निर्दोष विद्या के आचार्यों का चरण सेवक विश्वदेव का पुत्र था, त्रैलोक्य के वर्णन के सम्प्रदाय वाले सिद्धान्त-सूत्र का अत्यन्त मधुर स्वर-सहित उपदेश देता था। इसी अवसर पर आकाश से उतरते हुए व सूर्य-चन्द्रमा-सरीखे अमितगति व अनन्तमति नामके चारणऋद्धिधारी ऋषियों ने उसे देखा।

उनमें से समीपवर्ती प्रशस्त गतिवाले अनन्तगति मुनि निस्सन्देह बोले—'भगवन्! निस्सन्देह ये ही शिष्य विद्वान् हैं; क्योंकि ये लोग एक अभिप्रायवाली बुद्धि से युक्त हुए ग्रन्थ के अर्थ की प्रयोग-रचनाओं को यथार्थ दिखलाने के कारण दुराचार की उत्पत्ति को नष्ट करनेवाले (सदाचारी) इस उपाध्याय (शिक्षक) से, तीर्थङ्करों द्वारा कहा हुआ निर्दोष शास्त्र पढ़ रहे हैं।'

उपयोग की शक्ति से अवधिज्ञान को स्थिति लानेवाले भगवान् अमितगति ने उत्तर दिया—'मुनि-श्रेष्ठ! आपका कहना सत्य है, परन्तु इन चारों के मध्य दो शिष्य उस प्रकार अधः (नरक) के अनुभवन के योग्य बुद्धिवाले होंगे जिस प्रकार जल में फेंकी हुई वजनदार वस्तु (पाषाण-आदि) अधः अनुभवन के योग्य (नीचे जानेवाली) होती है। क्योंकि उनके द्वारा अत्यन्त पवित्र भी शास्त्र का अर्थ विपरीत—उल्टा किया जायगा।'

---

१. पट्टशालायां। २. रहितगर्वाय। ३. अध्येतुमिच्छवे। ४. कृत। ५. त्रैलोक्यवर्णनसंप्रदायं सिद्धान्तं। ६. स्वर सहितं। ७. चत्वारः। ८. विचक्षणाः। ९. शास्त्रं। १०. उपाध्यायात्। ११. रचनासु। १२. विधूतः स्फेटितः उपाधेर्विकारस्य आयः आगमनं येन सः तथोक्तस्तस्मात् टि० ख०, पञ्जिकाकारोऽप्याह—विधूतः स्फेटितः उपाधेरसदाचारस्य आयः उत्पादो येन सः तस्मात्। १३. एकाभिप्रायाः, सर्गः स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिषु। १४. श्रेष्ठ। १५. जले यथा गुरु वस्तु निमज्जति। १६. अनुभवन। १७. ब्रह्माण्ड। १८. सप्तरुचिरग्निः।

मरीचिचक्षुर्द्वाभ्यामूर्ध्वंगाभ्यां भवितव्यमिति प्रतीयते। तत्राहं तावदेकदेशयतिपूतात्मानमात्मानम्[1]नरकासन्नं न संभावयेयम्। नरकान्तं राज्यम्, बंधनान्तो नियोगः, मरणान्तः स्त्रीषु विश्वासः, विपदन्ता खलेषु मैत्री, इति वचना-द्विभ्रमविरामवलमलिनमनःप्रचारे राज्यभारे [2]प्रसरदसुं वसुं च नोर्ध्वं यियासुम्[3]। तन्नारदपर्वतौ परीक्षाधिकृतौ' इति निश्चित्य [4]समिदमयपूर्णायुद्वयं[5] निर्माय प्रदाय च ताभ्याम् 'अहो, द्वाभ्यामपि भवद्भ्यामिदमूर्णायुयुगलं यत्र न कोऽप्यालोकते तत्र विनाश्य प्राशितव्यम्' इत्यादिदेश। तावपि तदादेशेन *हव्यवाहवाहनद्वितयं प्रत्येकमादाय यथायथ-मयासिष्टाम्। तत्र[6] सख्यातिलघुः[7] पर्वतः [8]पस्त्य[9]पाश्चात्यकुम्बा[10]मुपस[11]र्पाप्य च भटित्रपुरःप्रपुत्रपुचरानकपाल-मकार्षीत्। शुभाशयविशारदो नारदस्तु 'यत्र न कोऽप्यालोकते' इत्युपाध्यायोक्तं ध्यायन् 'को नामात्र पुरे कान्तारे वा [12]सद्मघनो योऽधिकरणं[13] नात्मेक्षणस्य व्यन्तरगणस्य महामुनिजनान्तःकरणस्य च' इति विचिन्त्य तथैव तं [14]वृष्णि-मुपाध्यायाय समर्पयामास।

उपाध्यायो नारदमप्यूर्ध्वंगमवबुद्ध्य संसारतरुस्तम्बमिव[15] कचनिकुरम्बमुत्पाट्य स्वर्गलक्ष्मीसपक्षां दीक्षा-मादाय निखिलागमसमीक्षां शिक्षामनुश्रित्य चातुर्वर्ण्यश्रमणसङ्घसंतोषणं गणपोषणमात्मसात्कृत्य [16]एकत्वादिभावना-

शास्त्ररूपी नेत्र द्वारा ब्रह्माण्ड को प्रकाशित करनेवाले क्षीरकदम्बक ने जब मुनियों की बात सुनी तब उसने निश्चय किया—कि 'वास्तव में इस महामुनि के वाक्य के अभिप्राय से यह प्रतीत होता है कि हममें से दो निश्चय से अग्नि की शिखा की तरह ऊर्ध्वंगामी हैं। उनमें से मैंने तो अपनी आत्मा को श्रावकों के चरित्र पालन से पवित्र किया है, अतः मैं अपने को नरक स्थान के समीप होने की सम्भावना नहीं कर सकता और वसु को, जिसके प्राण लक्ष्मीरूपी मदिरा के मद से मनोवृत्ति को कलुषित करनेवाले राज्य-भार में विस्तृत हो रहे हैं, ऊर्ध्वंगामी होने की संभावना नहीं करता, क्योंकि नीतिकारों ने कहा है—'राज्य का फल अन्त में नरक है। शासन का फल बन्धन है। स्त्रियों में विश्वास करने से अन्त में मृत्यु होती है। दुष्टों की संगति अन्त में दुःख देनेवाली है।' अतः अब नारद और पर्वत परीक्षणीय हैं। ऐसा निश्चय कर उसने गेहूँ के आटे के दो मेढ़े बनाकर उन दोनों के लिए एक एक मेढ़ा देकर आज्ञा दी—'शिष्ययुगल! तुम दोनों इस मेढ़े के जोड़े को जहाँ कोई न देख सके, ऐसे एकान्त स्थान पर मारकर खा जाओ।'

गुरु की आज्ञा से वे दोनों एक-एक मेढ़ा लेकर यथायोग्य स्थान पर चले गए। उन दोनों छात्रों में से सज्जनों के साथ मित्रता करने में लघु पर्वत नामके छात्र ने अपने गृह की पिछवाड़े भाग की बाड़ी के समीप जाकर कुल्हाड़ी वगैरह हथियार लेकर मेढ़े को अपनी जठराग्नि का स्थान बना लिया। किन्तु शुभ-अभिप्राय में प्रवीण नारद ने तो 'जिस स्थान पर कोई नहीं देख सके' इस गुरु को कही हुई बात पर चिंतवन करके विचारा—'इस नगर व वन में ऐसा कौन सा प्रदेश है, जो अतींद्रिय दर्शी व्यन्तर देव-समूह के ज्ञान का स्थान नहीं है? या महामुनि जनों के ज्ञान का विषय नहीं है? ऐसा विचार कर वह मेढ़ा जैसे का तैसा—उपाध्याय के लिए समर्पण कर दिया।

शिक्षक ने जान लिया कि नारद भी स्वर्गगामी है। अतः उसने संसाररूप वृक्ष की जड़ सरीखे केश-

१. नीचस्थान-नरक। २. विस्तरत्प्राणं। ३. नाहं संभावयेयम्। ४. गोधूमचूर्णं। ५. मेषयुगलं। *. मेषयुगलं टि० ख०, पं० तु हव्यवाहवाहनः उरभ्रः वृष्णिश्च मेषः। ६. तयोर्द्वयोर्मध्ये। ७. लघुः। ८–११. गृहपश्चाद्भागमहा-वृतिकान्तरे नीत्वा कुम्बा तु गहनावृत्तिरित्यमरः। १२. प्रदेशः। १३. स्थानं। १४. मेषं। १५. अथ कांडे स्तम्ब-गुल्मौ अवकः विटपश्च सः। १६. भावनाःपञ्च—एकत्वभावना, तपोभावना, श्रुतभावना, शीलभावना, धृतिभावना-श्चेति भावनाः पञ्च।

पुरस्कारमात्मसंस्कारं विधाय कायकषायकर्शनां सल्लेखनामनुष्ठाय निःशेषदोषालोचनपूर्वकाङ्गविसर्गसमर्थमुत्तमार्थं[1] च प्रतिपद्य सुरसुखसुकृतार्थो बभूव पूर्वमेव। तदादेशादात्मदेशोपदेशदः[2] सकलसिद्धान्तकोविदो नारदः सद्गुणभूरेः क्षीरकदम्बसूरेः प्रव्रज्याचरणं स्वर्गाधिरोहणं चावगत्य 'गुरुवद्गुरुपुत्रं गुरुकलत्रं च पश्येत्' इति कृतसूक्तस्मरणः [3]पर्यास-तदाराधनोपकरणस्तद्विरहदुःखदुर्मनसमुपाध्यायानीं जननीं सह पांसुक्रीडितं पर्वतं च द्रष्टुमागतः।

अपरेद्युस्तं पर्वतम् 'अजैर्यष्टव्यम्' इति वाक्यम् 'अजैरजात्मजैः[4]र्यष्टव्यं हव्यकव्यार्थो विधिर्विधातव्यः' इति श्रद्धामात्रावभासिभ्योऽन्तेवासिभ्यो [6]व्याहरन्तमुपश्रुत्य 'बृहस्पतिप्रज्ञ पर्वत, मैवं व्याख्यः। किं तु 'न जायन्त इत्यजा वर्षत्रयप्रवृत्तयो व्रीहयस्तैर्यष्टव्यं शान्तिकपौष्टिकार्था क्रिया कार्या' इति [7]परार्येवाचार्यादिदं वाक्यमेवमश्रौष्व[8] [9]पदसखु-[10]स्तथैवाचिन्तयाव। तत्कथमेषम[11] एव तव मतिद्वैपरवसतिः[12] समजनीति बहुविस्मयं मे मनः। आचार्यनिकेत पर्वत, यद्यवमवश्यीने[13]ऽप्यर्थाभिधाने[14] भवानपरवानपि[15] विपर्यस्यति[16], तदा पराधीने 'मादृग्विधीने'[17] को नाम संप्रत्ययः।'

समूह का लुञ्चन करके स्वर्ग लक्ष्मी की सखी जिनदीक्षा धारण करके समस्त जिन-सिद्धान्तों की समीक्षावाली शिक्षा प्राप्त कर चारों प्रकार के मुनि संघ को सन्तुष्ट करने वाला आचार्य-पद प्राप्त किया, जो कि मुनि संघ का संरक्षण रूप है, एवं एकत्वादि पाँच भावनाओं के साथ रहने वाला आत्म-संस्कार करके और आयु के अन्त में काय व कषाय को कृश करने वाला समाधिमरण धारण किया और ऐसा सन्यासमरण प्राप्त क्रिया, जो कि समस्त दोषों को आलोचना-पूर्वक शरीर-त्याग में समर्थ है, जिससे वह पूर्व में ही देव लोक का सुख प्राप्त करके कृतार्थ हो गया।

समस्त शास्त्रों का वेत्ता व मोक्षमार्गी नारद पूर्व में ही गुरु की आज्ञा लेकर अपने देश की ओर चला गया था। उसने जब प्रशस्त गुणों से महान् आचार्य क्षीर कदम्बक के दीक्षा-ग्रहण व स्वर्गारोहण के समाचार सुने तो उसे 'गुरु के समान ही गुरु-पुत्र व गुरुपत्नी को मानना चाहिए।' इस नीति वाक्य का स्मरण हो गया। इसलिए वह 'उसकी सेवा की सामग्री (वस्त्रादि) भेंट लेकर पति-वियोग के दुःख से दुःखित चित्त वाली माता-सरीखी गुरुपत्नी और एक साथ धूलि में क्रीड़ा किये हुए मित्र पर्वत को देखने के लिये आया।

दूसरे दिन नारद ने पर्वत को, जो कि गुरु-वचनों की प्रतीति से चमत्कारी छात्रों के लिये 'अजैर्यष्टव्यम्' इस वाक्य का 'बकरों के बच्चों की बलि द्वारा देवकार्य व पितृकार्य (श्राद्ध) करना चाहिए।' इस प्रकार का विपरीत अर्थ कहते हुए सुना तो उसे रोककर कहा—'बृहस्पति-सरीखे विद्वान् पर्वत ! ऐसी विपरीत व्याख्या मत करो। किन्तु 'अज' अर्थात्—'जो न ऊँग सकें ऐसे तीन वर्ष के पुराने धान्य से शान्ति व पुष्टिक्रिया करनी चाहिए।' ऐसा अर्थ करो। क्योंकि हे मित्र ! गत तृतीय वर्ष में (तीन वर्ष पूर्व) ही आचार्य से हम दोनों ने उक्त वाक्य का ऐसा ही अर्थ सुना था। एवं गतवर्ष हम दोनों ने साथ-साथ उसी प्रकार चिन्तवन भी किया था। तब इसी वर्ष में ही तुम्हारी बुद्धि संदिग्ध कैसे हो गई ? यह जानकर मेरा मन विशेष आश्चर्यान्वित हुआ है। पर्वत ! तुम आचार्य की गद्दी पर हो। जब आप पुराने अर्थ-कथन में स्वतन्त्र होकर भी इस प्रकार उल्टा अर्थ करते हो। तब पराधीन हम-सरीखों के अर्थ-कथन के स्वामित्व में किस प्रकार विश्वास हो सकता है ?'

---

१. सन्यासं। २. नारदो गतः अर्थात्—मोक्षमार्गे वर्तमान इत्यर्थः, टि० ख०, 'आत्मदेशोपदे शदः' इति च० 'आत्मदेशोपशदः' इति क०, पञ्जिकाकारस्तु 'अपसदः गतः, उपसदो वा गतः' इति प्राह, अर्थात्—तन्मते 'आत्मदेशोऽपसदः' इति पाठः साधुः। ३. गृहीत। ४. छागपुत्रैः। ५. गुरुवचनप्रतीतिचमत्कारिभ्यः। ६. कथयन्तं। ७. गत-तृतीयवर्षे एव हे मित्र !। ८. आवां श्रुतवन्तौ। ९. गतवर्षे। १०. सह। ११. इदानीमस्मिन् वर्षे। १२. संशयः। १३. पुराणे। १४. अर्थकथने। १५. स्वतंत्रः। १६. विपरीतं करोति। १७. मादृशां विधिस्तस्य इने ईश्वरे।

पर्वतः—'नारद, नेदमस्तुङ्गारं[1] पदस्य पदस्य मत्रिकृत एवातिसूक्ष्मोऽर्थः। यदि चायमन्यथा स्यात्तदा [2]रसवाहिनीखण्डनमेव मे दण्डः।' नारदः—'पर्वत, को नु खल्वत्र विवदमानयोरावयोर्निकषभूमिः[3]।' पर्वतः—'नारद, वसुः। कहि तर्हि तं [4]समयानुसर्तव्यम्। इदानीमेव [5]'नात्रोद्धारः' इत्यभिधाय द्वावपि तौ वसुं निकषा प्रास्थिषाताम्[6], ऐक्षिषातां च। तथोपस्थितौ तेन वसुना गुरुनिर्विशेषमाचरितसंमानौ यथावत्कृतकशिपुविधानौ[7] विहितोचितोचितकाञ्चनदानौ समागमनकारणमापृष्टौ स्वाभिप्रायमभाषिषाताम्।

वसुः—'यथाहतुस्तत्रभवन्तौ[8] तथा प्रातरेवानुतिष्ठेयम्[9]।

अत्रान्तरे वसुलक्ष्मीक्षयक्षपेव क्षपायां सा किलोपाध्यायी नारदपक्षानुमतं क्षीरकदम्बाचार्यकृतं तद्वाक्य-व्याख्यानं स्मरन्ती स्वस्तिमती पर्वतपरिभवापायबुद्ध्या वसुमनुसृत्य 'वत्स वसो, यः पूर्वमुपाध्यायादन्तर्धा[10]नापराध-लक्षणावसरो वरस्त्वयादायि, स मे संप्रति समर्पयितव्यः' इत्युवाच। सत्यप्रतिपालनासुर्वसुः—किमम्ब, संदेहस्तत्र।

यद्येवं यथा सहाध्यायी पर्वतो वदति, तथा त्वया साक्षिणा भवितव्यम्।' वसुस्तथा स्वयमाचार्याण्याभिहतः[11]—

पर्वत—मेरा यह अर्थ-कथन असङ्गत नहीं है; क्योंकि इस पद का मेरा कहा हुआ अर्थ ही ठीक है। यदि यह ठीक नहीं है तो जिह्वा-खंडन ही मेरे लिये दण्ड है।'

नारद—'पर्वत! इस विषय में निश्चितरूप से विवाद करनेवाले हम दोनों का परीक्षा-स्थान (परीक्षक—फैसला करनेवाला) कौन है?'

पर्वत—'नारद! राजा वसु।'

नारद—'तो उसके पास कब चलना चाहिए?'

पर्वत—'इसी समय ही, इसमें विलम्ब नहीं करना चाहिए।'

इस प्रकार बातचीत करके उन दोनों ने वसु के समीप प्रस्थान किया और वहाँ उपस्थित होकर वसु के दर्शन किये। वसु ने उनका गुरु-जैसा आदर-सत्कार किया और यथायोग्य अन्न व वस्त्र प्रदान किये एवं यथायोग्य सुवर्ण का दान दिया और उनसे आने का कारण पूँछा। तब दोनों ने अपना-अपना अभिप्राय कह दिया।

वसु—'पूज्य आप दोनों ने जिस प्रकार कहा है, उसका फैसला कल प्रातःकाल कराऊँगा।'

इसी प्रसङ्ग में निस्सन्देह वसु राजा की लक्ष्मी के विनाश के लिए प्रलय रात्रि-जैसी स्वस्तिमती नाम-को क्षीर-कदम्बक नामके उपाध्याय की पत्नी ने, अपने पति क्षीर-कदम्बक के द्वारा किया हुआ उस वाक्य का व्याख्यान स्मरण किया, जो कि नारद के पक्ष का समर्थक था, अतः अपने पुत्र पर्वत के पराजय को नष्ट करने की बुद्धि से वह रात्रि में ही वसु के समीप गई और बोली—'पुत्र वसु! पहिले गुरु से छिपने का अपराध करने के समय वाला जो वर तुमने मुझे दिया था, वह मुझे अब दो।'

सत्य-रक्षण को प्राण समझनेवाले वसु ने कहा—'माता! उसमें सन्देह मत करो।'

स्वस्तिमती—'यदि ऐसा है तो तुम्हारा सहपाठी पर्वत जैसा कहता है उसी प्रकार तुम्हें साक्षी होना चाहिए।'

---

१. असङ्गतं। २. जिह्वा-खंडनं। ३. परीक्षास्थानं। ४. समीपे। ५. न विलम्बः। ६. प्रस्थितौ। ७. भोजना-च्छादनौ। ८. पूज्यौ। ९. अहं कारयेयं। १०. तिरोधानं। ११. प्रार्थितः।

'यदि साक्षी भवामि तदावश्यं निरये पतामि। अथ न भवामि तदा सत्यात्प्रचलामि' इत्युभयाशयशार्दूलविद्रुतमनोमृगश्चिरं विचिन्त्य।

न व्रतमस्थिग्रहणं[1] शाकपयोमूलभैक्षचर्या वा। व्रतमेतदुन्नतधियामङ्गीकृतवस्तुनिर्वहणम् ॥१२६॥'

इति च विमृश्य निरयनिदानदक्षं चरमपक्षमेव[2] पक्षमाक्षैप्सीत्[3]।

तदनु[4] मुमुदिषमाणारविन्दहृदयविनिद्रेन्दिन्दिरचरणप्रचारोदञ्चन्मकरन्दसिन्दूरितनीरदेवतासीमन्तान्तराले प्रभातकाले, सेवासमागतसमस्तसामन्तोपास्तिपर्यस्तोत्तंसकुसुमसंपादितोपहारमहीयसि च सति सदसि मृगयाव्यसनव्याजशरव्यीकृते[5] कुरङ्गपोते, *अपराद्धेषुः[6] प्रत्यासादितस्पर्शमात्रावसेयाकाशस्फटिकघटितविलसनं सिंहासनमुपगत्य 'सत्यशौचादिमाहात्म्यादहं विहायसि गतो जगद्व्यवहारं[7] निहालयामि' इत्यात्मनात्मानमुत्कुर्वाणो[8] विवादसमये तेन '[9]विनतवरदेन नारदेन 'अहो, मृषोद्योद्भिदविभावसो[10] वसो, अद्यापि न किंचिन्नङ्क्ष्यति[11]। तत्सत्यं ब्रूहि सत्यं ब्रूहि' इत्यनेकशः

गुरु-पत्नी द्वारा स्वयं उस प्रकार प्रार्थना किये हुए वसु ने विचार किया—'यदि पर्वत का साक्षी होता हूँ तब तो मेरा नरक में पतन अवश्य होगा और यदि साक्षी नहीं होता हूँ तो सत्य से (वर देने की प्रतिज्ञा से) विचलित होता हूँ।' इस प्रकार उसका मनरूपी मृग दोनों अभिप्रायरूपी व्याघ्र द्वारा विचलित हुआ तब उसने इस प्रकार चिरकाल तक निश्चय किया—

'हड्डी (कपाल) का धारण करना, शाक, जल, व कन्दमूल का लेना अथवा भिक्षा-भोजन करना ये सब व्रत नहीं हैं, किन्तु स्वीकार की हुई प्रतिज्ञा का पूर्ण करना ही विशिष्ट बुद्धिशाली मानवों का व्रत है ॥१२६॥

उसने ऐसा विचार करके नरक ले जाने में समर्थ कारण पर्वत का पक्ष ही स्वीकार किया। दूसरे दिन जब ऐसा प्रातःकाल हो रहा था, जिसमें जल देवता के केशपाश का मध्यभाग, विकसित हो रहे कमलों के मध्य में जाग्रत हुए—उत्साही भवरों के चरण-संचार से उछलते हुए पुष्प-रस रूपी सिन्दूर से युक्त किया गया था। जब राज-सभा ऐसी हो रही थी, जो कि सेवा के लिए आये हुए सभी सामन्तों द्वारा की जानेवाली उपासना के समय गिरे हुए मुकुटों के पुष्प-समूह रूपी दी हुई भेंट से महान् प्रतीत हो रही थी। जब मृग-शावक ऐसे हो रहे थे, जो कि शिकारियों द्वारा शिकार खेलने के व्यसन के बहाने से वाणों के लक्ष्य (बींधने-योग्य) किये गए हैं। [इसी अवसर पर] राजा वसु लक्ष्य से च्युतबाणवाला (निशाना-चूकनेवाला) होकर उसका वाण किसी वस्तु से टकराकर वापिस लौट आया तब वह ऐसे राज-सिंहासन पर आकर बैठ गया, जो कि स्पर्श मात्र से निश्चय करने योग्य व प्राप्त हुए आकाश-स्फटिक से घटित होने के कारण सुशोभित हो रहा था। उस समय वह स्वयं अपनी आत्मा को इस प्रकार उत्कर्षता में प्राप्त करा रहा था (अपने मुख से अपनी प्रशंसा कर रहा था) कि 'मैं सत्य व शौच (लोभ-निग्रह) आदि धर्म के प्रताप से आकाश में बैठ कर जगत का न्याय देखता हूँ।'

विवाद के अवसर पर नम्र शिष्यों के लिए इच्छित वस्तु देनेवाले नारद ने कहा—'मिथ्या भाषण-

१. 'कीकस' टि० ख०, 'कापालिकव्रतं' टि० च०। २. 'साक्षिवचनं' टि० ख०, पर्वतवचनं टि० च०। ३. अङ्गीचकार। ४. विकसमानपद्ममध्यउच्छीयमानभ्रमरचरण। ५. 'वेधी' टि० ख०, 'लक्ष्यीकृते' टि० च० एवं यश० पञ्जिकायामपि।

*. 'अपराद्धेषुरिषुप्रत्यावृत्यासादितस्पर्श' च० ख०। 'अपराद्धेषुरिषुप्रत्यासादितस्पर्श' क०।

६. लक्ष्यच्युतबाणः। ७. न्यायं पश्यामि। ८. उत्कर्षतां प्रापयन् टि० ख०, पं० तु प्रकाशयन्। ९. विनतानां। विनेयानां। १०. 'वृक्षदहनाग्ने:' टि० ख०, 'उद्भिदस्तरुगुल्माद्याः इत्यमरः' टि० च०, पं० तु 'उद्भिदः तरुः'। ११. विनाशं यास्यति।

कृतोपदेशः काश्यपीतलं यियासुर्वसुः—'नारद, यदेवाह पर्वतस्तदेव सत्यम्' इत्यसमीक्ष्यं[1] साक्ष्यं वदन् 'देव, अद्यापि यथार्थ्यं वद यथार्थ्यं वद' इत्यालापबहुले [2]समन्युमानसविलासिनीस्ख[3]लितोक्तिलोहले[4] विषादासादितहृदयप्रजा-प्रजल्पकाहले स्फुटद्ब्रह्माण्ड[5]खण्डध्वनिकुतूहले समुच्छलति परिच्छदकोलाहले सत्यधर्मकर्मप्रवर्तनकुपितपुरदेवतावश-दुर्विलसनः ससिंहासनः क्षणमात्रमप्यनासादित[7]सुखकालं पातालमूलं[8] जगाहे। अत एवाद्यापि प्रथममाहुतिवेलायां प्रजा[9] जल्पन्ति—'उत्तिष्ठ वसो, स्वर्गं गच्छ' इति।

भवति चात्र श्लोकः—

अस्थाने बद्धकक्षाणां नराणां सुलभं द्वयम्। परत्र दुर्गतिर्दीर्घा दुष्कीर्तिश्चात्र शाश्वती ॥१२७॥

इत्युपासकाध्ययने वसो रसातलासादनो नामैकोनत्रिंशः कल्पः।

नारदस्तमेव निर्वेदमुररीकृत्य मतभ्रू[10]विभ्रमभ्रमरकुलनिलयनीलोत्पलस्तूपमिव कुन्तलकलापमुन्मूल्य परम-निष्किंचनतानिरूपं[11] जातरूपमास्थाय सकलसत्त्वाभयप्रदानामृतवर्षाधिकरणं संयमोपकरण[12]माकलय्य[13] मुक्तिलक्ष्मी-समागमसंचारिका[14]मिवोदकपरिचारि[15]कामावृत्य शिवश्रीवशीकरणाध्यायमिव[16] स्वाध्यायमनुबद्ध्य[17] मनोमर्कट-

---

रूपी वृक्ष को भस्म करने के लिए अग्नि-सरीखे वसु ! अब भी कुछ नष्ट नहीं होगा, अतः सच बोल सच बोल।'

परन्तु बार-बार उपदेश दिए हुए नरक जाने के इच्छुक वसु ने यही कहा—'नारद ! जो पर्वत कहता है वही सत्य है।' इस प्रकार जब अपरीक्षणीय झूँठी गवाही बोल रहा था तब ऐसा कुटुम्बीजनों का कोलाहल उत्थित हुआ, जो कि महाराज ! 'अब भी सच बोलिये, अब भी सच बोलिए' इस प्रकार के शब्दों से प्रचुर था। जो कोपसहित मनवाली राज-स्त्रियों के अव्यक्त वचनों से अस्फुट था। जो खेद से व्यथित हृदय-वाली प्रजाओं के जोर-शोर से चिल्लाने रूपी काहल (वाद्य विशेष) वाला था एवं जिसमें ब्रह्माण्ड (मध्य लोक) के फटने का कुतूहल वर्तमान था। तब अधर्म कर्म (मिथ्याभाषण) में प्रवृत्ति करने से कुपित हुए नगर देवता द्वारा विशेष कष्ट दिया गया वसु सिंहासन-समेत ऐसे सप्तम नरक में प्रविष्ट हुआ, जिसमें क्षणमात्र भी सुख-प्राप्ति का अवसर नहीं है, इसीलिए आज भी यज्ञ में पहली आहुति देते समय ब्राह्मणजन कहते हैं—'वसु उठ, स्वर्ग जा।'

प्रस्तुत विषय-समर्थक नैतिक श्लोक का अर्थ यह है—

नीति से विरुद्ध खोटे मार्ग में दुराग्रह से प्रवृत्त होनेवाले मानवों के लिए दो वस्तुएँ सुलभ होती हैं—परलोक में दीर्घकाल तक दुर्गति और इस लोक में अमिट अपकीर्ति ॥ १२७ ॥

इस प्रकार उपासकाध्ययन में वसु की रसातल में प्राप्ति करानेवाला उनतीसवाँ कल्प समाप्त हुआ।

इस घटना से नारद ने उसी वैराग्य को स्वीकार करके ऐसा केश-समूह उत्पाटित (लुञ्चित) करके जो ऐसे मालूम पड़ते थे—मानों—कमनीय कामिनियों के विलासरूपी भ्रमर-समूह के आवास स्थान वाली नीलकमलों की राशि ही है, और उत्कृष्ट परिग्रह के त्याग को बतलानेवाली दिगम्बर मुद्रा धारण करके ऐसा प्राणियों की रक्षा का उपकरण मयूरपिच्छ ग्रहण किया, जो कि समस्त प्राणियों के लिये अभय-

---

१. अपरीक्षणीयं। २. 'कोपसहितचित्त' टि० ख०, पं० तु 'मन्युः दुःखं'। ३. अव्यक्तवचन। ४. अस्फुटे—अव्यक्ते। ५. चन्द्रे। ६. मर्त्यलोक। ७. अप्राप्त। ८. सप्तमनरकं। ९. विप्राः। १०. स्त्री। ११. कथकं। १२. मयूरपिच्छं। १३. गृहीत्वा। १४. दूती। १५. कुण्डिकां—कमण्डलुं। १६. परिच्छेद। १७. कृत्वा।

क्रीडाप्रकाम[1]मिन्द्रियाराममुपरम्य[2] अन्तरात्महेमाश्म[3]समस्तमलदहनं ध्यानदहनमुद्दीप्य संजातकेवलस्तत्प[4]दाप्ति-पेशलो बभूव ।

पर्वतस्तु तथा सर्वसभासमाजोदीरितोद्दीर्घदुरपवादरजसि मिथ्यासाक्षिपक्षविचक्षणवचसि दुराचारेण क्षुभित-सहस्राक्षानुचरी[5]क्षितजीवितमहसि कथाशेषतेजसि वसौ सति [6]अह्रस्वह्रीणतया पौरापचिकीर्षया[7] च निरन्तरोदञ्च-रोमाञ्चनिकायः [8]शल्लशलाकानिकीर्णकाय इव निजागणे[9]यदुरोहिताध्मातो[10]दरचर्मपुटः स्फुटन्निव च तैर्नृपतिविनाशव-शामर्षिभिः संभूयोपविष्टलोष्टवर्षिभिरलु[11]च्छपिच्छो[12]लवलास्फालनप्रकर्षिभिः प्रतिघातोच्छलच्छकल[13]कशा[14]प्रहारतर्षि-भिर्नगरनिवासहर्षिभिर्जनैरगणितापकारं खरासभारोहणावतारं कण्ठप्रदेशे प्राप्तप्राणः [15]पुरुपूत्कृतोल्बणक्वाणः[16] सकल-पुरवीथिषु [17]विश्वघुष्टानुयातो* निष्काशितः [18]श्वपचश्मशानांशुकपिहितमेहनो विपरीतक्षुरधाराचरितमार्गमुण्डनः[19]

दानरूपी अमृत की वृष्टि का आश्रय है। बाद में उसने मुक्ति लक्ष्मी के समागम के लिए दूती-सरीखी कुण्डिका (कमण्डलु) धारण करके और मुक्तिश्री के वशीकरण का परिच्छेद-जैसा शास्त्र-स्वाध्याय करके एवं मनरूपी बन्दर की बहुल क्रीड़ावाले इन्द्रियरूपी बगीचे से दूर होकर ऐसी धर्मध्यानरूपी अग्नि उद्दीपित करके, जो कि अन्तरात्मारूपी सुवर्ण-पाषाण की समस्त पापरूपी किट्टकालिमा को दग्ध करनेवाली है। अर्थात्—उसने धर्मध्यान व शुक्लध्यानरूपी अग्नि द्वारा ज्ञानावरण, दर्शनावरण, मोहनीय व अन्तराय इन चार घातिया कर्मरूपी ईंधन को भस्म करके केवलज्ञान प्राप्त किया, जिससे वह मोक्षपद प्राप्त करने से मनोज्ञ हो गया।

जब ऐसा वसु, जिसका तेज केवल कथामात्र में ही शेष था, अर्थात्—जो मर चुका था। जिसके प्रति समस्त सभासदों व सामाजिक जनों द्वारा महान् धिक्काररूपी धूलि उच्चारण की गई थी, (पक्षान्तर में फेंकी गई थी) जिसके वचन झूँठी गवाही देने के पक्ष के समर्थन में प्रवीण थे। जिसका जीवनरूपी तेज दुराचार (मिथ्या-पक्ष का समर्थन) के कारण कुपित हुईं इन्द्र की किङ्करियों द्वारा विशेष रूप से नष्ट किया गया था। तब कालासुर (जो कि पूर्वजन्म में मधुपिङ्गल था) ने ऐसे पर्वत को देखा, दीर्घलज्जा से व नागरिकों को द्रोह करनेवाली इच्छा के कारण जिसे अविच्छिन्न व उच्चतर रोमाञ्च श्रेणी उत्पन्न हुई थी। जिसकी कुक्षि का चर्मपुट अपने असंख्य पापों से फट गया था—मानों—उसका शरीर सेही के काटों से बींधा गया-जैसा मालूम पड़ता था। जो ऐसा मालूम पड़ता था—मानों—फट ही रहा है। जो ऐसे नगर में निवास करने से हर्षित हुए नागरिक जनों द्वारा अगणित अपकार पूर्वक गधे पर चढ़ाकर समस्त नगर की गलियों में दुरपवाद की घोषणा को प्राप्त हुआ नगर से बाहर निकाल दिया गया था। जो कि (नागरिक जन) वसु राजा के मर जाने के वश से इससे कुपित थे। जो एकत्रित होकर इसके ऊपर पत्थरों की वर्षा करने का उपदेश देते थे। जो कि बहुल बाँस के खण्डों द्वारा इसे विशेष रूप से ताड़ित करते थे और जो ताड़न करने से ऊपर उछलते हुए खण्डों वाले कोड़ों से प्रहार करने की अधिक तृष्णा करते थे। कष्ट से उसके प्राण कण्ठ देश में आ गये थे। जो विशेष चिल्लाने का उत्कट शब्द करता था।

---

१. यथेष्टं-अधिकं। २. परितो भूत्वा। ३. सुवर्णपाषाण। ४. मोक्ष। ५. किङ्करीभिः क्षितं विध्वस्तं जीवितमेव महस्तेजो यस्य। ६. दीर्घलज्जया। ७. द्रोहकरवाञ्छया टि० ख०, अपकर्तुमिच्छया टि० च०। ८. सेहीशूल-विद्धशरीरः। ९. बहुल, असंख्य। १०. आफटितकुक्षिः। ११. बहुल। १२. वंश। १३. खण्ड। १४. 'तर्जनक' टि० ख०, 'हयहननोपकरणं टि० च०, यश० पञ्जिकायामपि। १५. महान्। १६. शब्दः। १७. विश्वग्घुष्टं दुरपवादघोषणा यश० पं०। *. 'विश्वरपृष्टानुजातो' इति ख०, टिप्पण्यां तु 'सारमेयाः पृष्टतो भवन्ति'। १८. चाण्डालचितास्थानवस्त्रेण कृतकौपीनः। १९. विपरीत पीछणी मध्ये मध्ये पाटापाड़ित।

प्रकाशितशिखाश्रीफलजालो[1] गलनालावलम्बितशरावमालः प्रथीयसि वनगहनरहसि प्रविष्टः तुच्छोदकद्वी[2]पिनीतटिनीतटनिकटोपविष्टस्तेन कालासुरेण दृष्टः [3]प्रत्यवमृष्टहृच्चेष्टेन चाहं [4]तावदहंकारिकर्द्धिप्रविकाशयिषुशक्तिः 'एषोऽपि स्वमतप्रतिष्ठापयिषुमतिप्रशक्तिरतो निष्प्रतिघः[5] खलु मे कार्योल्लाघः[6] इति निभृतं वितर्क्य[7] पर्याप्तपरिव्रा[8]जकवेषेण मायामयमनीषेण भाषितश्च ।

तथाहि—'पर्वत, केन खलु समासन्नकीना[9]शकेलिनर्मणा दुष्कर्मणा विनिर्मापितनिर्व[10]रापकारः' पर्वतः—'तात, को भवान्' । 'पर्वत, भवत्पितुः खलु प्रियसुहृदहं सहाध्यायी शाण्डिल्य इति नामाभिधायी । यदा हि वत्स, भवान् [11]षोडन् समभवत्तदाहं तीर्थयात्रायामगाम । इदानीं [12]चागाम् । अतो न भवान्मां सम्यगवधारयति । तत्कथय हन्त[13] कारणमस्य व्यतिकरस्य' ।

पर्वतः—'मत्प्राणितपरित्रा[14]णकारिन् भगवन्, समाकर्णय । समस्तागमरत्नसंनिधातरि[15] सुकृतमणिसमाहर्तरि जिनरूपानुजातरि पितरि नाकलोकमिते सति स्वातन्त्र्यादेकदा प्रदीप्तनिकामकामोद्गमः [16]संपन्नपण्याङ्गनाजनसमागमः [17]कृतपिशितकापिशा[18]यिनस्वादः पापकर्मप्रासादः [19]चेतन्नप्यार्यो[20]पविष्टं विशिष्टं व्याख्यानमहं [21]दुरात्माख्यानः

चाण्डाल की चिताभूमि के वस्त्र (मुर्दे का कफ्फन) से जिसने लँगोटी की थी। मार्ग में उल्टे उस्तरे से उसका सिर मूँडा गया था। जिसकी चोटी में विल्व फल-समूह प्रकट रूप से बाँधे गए थे। जिसकी कण्ठनाल में सकोरों की श्रेणी आश्रित थी। वह विशाल वन के गहन एकान्त प्रदेश में प्रविष्ट हुआ और थोड़े जलवाली द्वीपिनी नाम की नदी के तट के निकट बैठ गया।

वहाँ उसे कालासुर व्यन्तर ने देखा, उसकी मन की दशा जानते हुए कालासुर ने निश्चल विचार किया—'मैं अपनी विक्रिया ऋद्धि को प्रकट करने की शक्तिवाला हूँ और इस पर्वत को बुद्धि की प्रकृष्ट शक्ति अपने मत को स्थापन करने की इच्छुक है, अतः निश्चय से मेरी कार्य-घटना निर्विघ्न है।

ऐसा विचार कर उसने सन्यासी का वेष प्राप्त (धारण) किया और अपनी बुद्धि को छल-कपट-पूर्ण करते हुए कहा—'पर्वत ! निश्चय से यमराज की क्रीड़ा के निकटवर्ती परिहास (मजाक) करनेवाले किस दुष्ट के द्वारा तुम्हारे साथ यह निष्ठुर अपकार कराया गया ? अर्थात्—तुम्हारे अपकार करनेवाले की मृत्यु निश्चित है।

पर्वत—'पिता ! आप कौन हैं ?'

कालासुर—'पर्वत ! निस्सन्देह मैं आपके पिता का सहपाठी प्रिय मित्र हूँ। मेरा नाम शाण्डिल्य है। जब तुम छह दाँतों वाले शिशु थे तब मैं तीर्थयात्रा के लिए चला गया था और अब वापिस आया हूँ, इसी लिये आप मुझे अच्छी तरह नहीं जानते। अतः अहो पुत्र ! तुम अपनी इस दशा का कारण कहो।'

पर्वत—'मेरे प्राणों की जीवन-रक्षा करनेवाले भगवन् ! सुनिए—समस्त शास्त्र रूपी रत्नों को भलीभाँति धारण करनेवाले और पुण्य रूप मणि को एकत्रित करने वाले मेरे पिता जिन-दीक्षा धारण करके जब स्वर्गारोहण कर चुके तब मैं स्वच्छन्द होने से एक समय मेरे में कामोत्पत्ति अतिशय रूप से प्रज्वलित हुई,

---

१. श्रीफलं विल्वं। २. नाम्नी। ३. परामृष्टहृदयचेष्टेन। ४. विक्रियां ऋद्धिं प्रकटयितुं शक्तिः। ५. निर्विघ्न। ६. घटना। ७. निश्चलं विचार्य। ८. तपस्वी। ९. यम। १०. 'निष्ठुर' टि० ख०, पञ्जिकाकारस्तु निर्वरो निर्वैरः' इत्याह। ११. यदा तव षट्दन्ताः षोडन्, साधनिका पचन्तवत्, टि० ख०, 'षड्दन्तः' टि० च०, पं० तु 'षोडन् षट्दशनः'। १२. आगतः। १३. अहो !। १४. जीवितरक्षणे। १५. सन्धारके। १६. कृत। १७. मांस। १८. मद्य। १९. जानन्नपि। २०. पितृ। २१. दुरात्म-दुष्टस्वभावं आख्यानं चरितं यस्य मम सोऽहं।

स्वव्यसनविवृद्धयेऽधर्मबुद्धया साधुमध्ये अजैर्यष्टव्यमितीदं वाक्यमशेषकल्मषनिवेश्यो[1]ऽन्यथोपन्यस्यमानो[2] नारदेनापावितवचनस्खलनः सन् एतावद्विपत्तिस्थामवस्थामवापम्'।

कालासुरः—'पर्वत, मा शोच। मुञ्च त्वमशेषं धिषणाकलुषम्। अङ्ग, साधु संबोधयात्मानम्। न खलु निरीहस्य[3] नरस्यास्ति काचिन्मनीषितावाप्तिः। तदलं हन्त[4] हृदयदाहानुगेनावेगेन[5]। हंहो पुत्र पर्वत, यथा स्वकीयसंकेताङ्कं ब्राह्मगोसवाश्वमेधसौत्रामणिवाजपेयराजसूयपुण्डरीकप्रभृतीनां सप्ततन्तूनां[6] प्रतिपादकानि वाक्यानि विरचय्य अन्तरान्तरा[7] वेदवचनेषु निवेशय। वत्स, मयि भूर्भुवःस्वस्त्रयीविपर्यासनसमर्थमन्त्रमाहात्म्ये, त्वयि च तरसासवसवित्रीप्रवृत्तिहेतुश्रुतिगीति[8]समभ्यस्तसात्म्ये[9] किं नु[10] नाम*इहासाध्यम्' इत्युत्साह्य स्वयं विद्यावष्टम्भसृष्टाभिरष्टा[11]भिरपीतिभि[12]रुपद्रूयमाणजनपदहृदयमयोध्याविषयमागत्य नगरबाहिरिकायां स देवश्चतुराननोऽभूत्। [13]अध्वर्युः पर्वतः समासीत्। मायामयसृष्टयः पिङ्गल-मनु-मतङ्ग-मरीचि-गौतमादयश्च [14]ऋत्विजोऽजनिषत। तत्र [15]श्रुतिश्रुतिश्चतुर्भिर्वदनैरुपदिशति।

जिससे मैंने वेश्याजनों के साथ रति विलास किया और मांस-भक्षण किया और मदिरा पी, इस प्रकार मैं पातकों का गृह बन गया। 'अजैर्यष्टव्यं' इस वाक्य का पिताजी ने जो विशिष्ट अर्थ किया था, उसे जानते हुए भी दुष्ट स्वभाववाले चरित-युक्त मैंने पापबुद्धि से अपने व्यसनों की वृद्धि के लिए उसे बदलकर समस्त पापों से आश्रयणीय मैंने सज्जन पुरुषों के बीच विपरीत अर्थ को उपस्थापक रूप से निरूपण कर रहा था तब नारद ने मेरे अन्यथा निरूपण को सज्जनों के समक्ष प्रदर्शित कर दिया। अर्थात्—मेरी गल्ती पकड़ ली। इससे मैं इस प्रकार की विपत्ति के आश्रय वाली इस दयनीय दशा को प्राप्त हुआ हूँ।'

कालासुर—पर्वत! शोक मत कर और समस्त बुद्धि की मलिनता को छोड़। हे पुत्र! अपनी आत्मा को सम्बोध। जो मानव शत्रु-लोक के ऊपर निःस्पृह होता है या निरुद्यमी होता है उसे कोई अभिलषित वस्तु प्राप्त नहीं होती। अतः हृदय के दाह को अनुसरण करनेवाले शोक को छोड़। अहो पुत्र-पर्वत! ब्राह्ममेध, गोमेध, अश्वमेध, सौत्रामणि, वाजपेय, राजसूय व पुण्डरीक-आदि यज्ञों के निरूपण करनेवाले वाक्यों को अपने संकेत के अनुसार (अपने अभिप्राय के सूचक) रचना करके उन्हें वैदिक वाक्यों के बीच बीच में प्रविष्ट कर दो। पुत्र! जब मेरे में पृथिवीलोक, अधोलोक व ऊर्ध्वलोक इन तीनों लोकों को विपरीत करने में समर्थ हुए मन्त्रों की सामर्थ्य होते हुए और मांस-मदिरा और माता में प्रवृत्ति करने में कारण वैदिक मन्त्रों के पाठ में अभ्यस्त हितवाले तुम्हारे होते हुए मैं पूँछता हूँ कि तब लोक में ऐसी कौन वस्तु है, जिसे हम प्राप्त नहीं कर सकते?'

इस प्रकार पर्वत को उत्साहित करके वह कालासुर ऐसे अयोध्या नाम के देश में आया, जिस देश

---

१. आश्रयणीयः। २. उपसर्गादात्मनेपदं 'उपसर्गादस्यत्यूह्योर्वा' इत्यनेन। ३. 'शत्रुलोकोपरि निःस्पृहस्य' टि० ख०, 'निरुद्यमस्य' टि० च०। ४. हन्त हर्षेऽनुकम्पायां वाक्यारंभविषादयोः। ५. शोकेन। ६. यज्ञानां। ७. मध्ये मध्ये। ८. पाठ। ९. हिते। १०. नु पृच्छायां विकल्पे च वितर्के च। *. नाम-प्राकाश्यसम्भाव्यक्रोधोपगमकुत्सने। ११-१२. अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः। स्वचक्रं परचक्रं च सप्तैताः ईतयः स्मृताः॥ १॥

अष्टमी नाम सा हिम-आतपवर्षादिका।

१३. 'यजुर्वेदज्ञाता' अध्वर्युः अध्वर्यूः होतृहोतारो यजुः समाः' टि० ख०, 'यज्वा' टि० घ० च०। १४. संजाताः माया तु कालासुरस्यैव। १५. ब्रह्मा।

पर्वतस्तु—यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयंभुवा । यज्ञो हि भूत्यै सर्वेषां तस्माद्यज्ञे वधोऽवधः ॥ १२८ ॥

★ ब्रह्मणे ब्राह्मणमालभेत[1], इन्द्राय क्षत्रियं, मरुद्भ्यः वैश्यं, तमसे शूद्रम्, उत्तमसे तस्करं, आत्मने [2]क्लीबं, कामाय पुंश्चलं, अतिक्रुष्टाय मागधं, [3]गीताय सूतं, आदित्याय स्त्रियं गर्भिणीं, सौत्रामणौ च एवंविधां सुरां पिबति, न तेन सुरा पीता भवति । सुराश्च[4] तिस्र एव श्रुतौ संमताः—पैष्टी, गौडी,[5] माधवी चेति । गोसवे ब्राह्मणो [6]गोसवेनेष्ट्वा संवत्सरान्ते मातरमप्यभिलषति । उपेहि मातरम्, उपेहि स्वसारम् ।

[7]षट्शतानि ★नियुज्यन्ते पशूनां मध्यमेऽहनि । अश्वमेधस्य वचनादूनानि पशुभिस्त्रिभिः ॥ १२९ ॥

[8]महोक्षो वा [9]महाजो वा श्रोत्रियाय विशस्यते[10] । निवेद्यते तु दिव्याय स्रक्सुगन्धिनिर्विधिः ॥ १३० ॥

का मध्यभाग अपनी विद्या के बल से रची हुई आठ ईतियों (सर्प व कण्टकादि अथवा टिप्पणीकार★ के अभिप्राय से अतिवृष्टि व अनावृष्टि-आदि) द्वारा पीड़ित किया जा रहा था और ब्रह्मा का रूप धारण करके नगर केबाह्य प्रदेश पर बैठ गया । एवं उसी के निकट यजुर्वेद का ज्ञाता पर्वत पुरोहित होकर बैठा था । मायामयी सृष्टिवाले पिङ्गल, मनु, मतङ्ग, मरीचि और गौतम वगैरह होता हो गए, यह सब कालासुर की माया थी। ब्रह्माजी चारों मुखों से उपदेश देते थे और पर्वत आदेश देता था ।

ब्रह्मा ने स्वयं यज्ञ के लिए ही पशुओं की सृष्टि की है । यज्ञ सबकी समृद्धि के लिये है । इसलिए यज्ञ में किया जानेवाला पशु-वध वध नहीं है ॥ १२८ ॥

ब्रह्मा के लिये ब्राह्मण का होम करना चाहिए । इन्द्र को सन्तुष्ट करने के लिये क्षत्रिय का होम करना चाहिये । वायु के लिए वैश्य को होम देना चाहिए । तम के लिए शूद्र को होम देना चाहिए । उत्तमस—राहु की शान्ति के लिए चोर को होम देना चाहिए । आत्मा के लिए नपुंसक का होम करना चाहिए । कामदेव के लिए व्यभिचारी का होम करना चाहिए । अतिक्रुष्ट के लिए मागध का होम करना चाहिए । गीत के लिए पुत्र का होम करना चाहिए । और सूर्य देवता के लिए गर्गिणी स्त्री का होम करना चाहिए । जो मानव सौत्रामणि यज्ञ में वैदिक मन्त्रों द्वारा सुसंस्कृत सुरा पीता है, उसे शराबखोर नहीं समझा जाता । वेद में तीन प्रकार की सुरा मानी गई है । १. पेष्टी—जौ वगैरह के आटे से बनी हुई, गौडी—गुड़ से बनाई हुई और माधवी—जो महुए से बनती है । गोसव यज्ञ में ब्राह्मण तत्काल जन्मे हुए गाय के बछड़े से यज्ञ करके वर्ष के अन्त में माता की भी इच्छा करता है । माता के पास जाओ । बहिन के पास जाओ ।

अश्वमेध यज्ञ में मध्याह्न-वेला में तीन कम छह सौ अर्थात्—पाँचसौ सत्तानवे- ५९७ पशु मारे जाते

★. 'ब्रह्मणे ब्राह्मणमालभते । क्षत्राय राजन्यं । मरुद्भ्यो वैश्यं । तपसे शूद्रं । तमसे तस्करं । नारकाय वीरहणम् । पाप्मने क्लीवं । आक्रयाया योगूम् । कामाय पुँश्चलम् । अतिक्रुष्टाय मागधम् । गीताय सूतं । नृत्ताय शैलूषम् ।'—तैत्तिरीय ब्राह्मण ३, ४ । वाजसनेयी संहिता ३०, ५ में तथा शतपथ ब्राह्मण १३, ६, २ में भी पाठ भेद के साथ उक्त उद्धरण मिलता है । १. होमयेत् । २. नपुंसकम् । ३. भाट-स्युर्मागधास्तु मगधाः बन्दिनः स्तुतिपाठकाः । ४. 'गौडी पेष्टी च माध्वी च विज्ञेया त्रिविधा सुरा ।'—मनुस्मृति ११-९४ । ५. गुड़विकार । ६. धेन्वा—सद्यःप्रसूतगवा । ७. वाजसनेयी संहिता २४, ४० की उव्वट और महीध्र की टीका में यह श्लोक पाया जाता है, उसमें उत्तरार्ध इस प्रकार है—'अश्वमेधस्य यज्ञस्य नवभिश्चाधिकानि च । ★. अधिक्रियन्ते । ८. 'महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत् । सत्क्रियान्वासनं स्वादु भोजनं सूनृतं वचः ॥ १०९ ॥ याज्ञवल्क्य स्मृति, पृ० ३४ । उक्षो वृषभः । ९. छागः । १०. हिंस्यते ।

गोसवे सुरभिं हन्याद्राजसूये तु भूभुजम् । अश्वमेधे हयं हन्यात्पौण्डरीके तु दन्तिनम् ॥ १३१ ॥
***औषध्यः पशवो वृक्षास्तिर्यञ्चः पक्षिणो नराः । यज्ञार्थं निधनं प्राप्ताः प्राप्नुवन्त्युच्छ्रितां गतिम् ॥१३२॥**
मानवं व्यासवासिष्ठं वचनं वेदसंयुतम् । अप्रमाणं तु यो ब्रूयात्स भवेद्ब्रह्मघातकः ॥ १३३ ॥
[1]पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम् । आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः ॥ १३४ ॥

इत्याज्ञापयति । मनु-मरीचि-मतङ्गप्रभृतयश्च [2]सवषट्कारमजद्विजगजवाजिप्रभृतीन्देहिनो जुह्वति । तदेवं [3]श्रुतिशस्त्रवाणिज्यजित्यो*पजीविनामीतीः[5] पर्वतो व्यपोहति । कालासुरः [6]पुनरालभ्यमानान्प्राणिनः साक्षाद्विमाना-रूढान्स्वर्गं [7]सांवर्या पर्यटतो दर्शयति । मनुप्रमुखाश्च मुनयः प्रभावयन्ति[8] । ततो मायाप्रदर्शितत्रिदशवेश्मप्रदेशाविलोभे संजाते सकलजनक्षोभे स [9]प्रत्यासन्ननरकनगरः सगरः स च श्वभ्रविभ्रमोचितस्थितिर्विश्वभूतिस्त[10]दुपदेशात्तांस्तान्[11] सत्त्वान् हत्वा [12]प्सात्वा च दुरन्तदुरितोचितचेतसौ मखमिषात्कालासुरेण स्मारितपूर्वभवागसौ[13] [14]वीतिहोत्राहुति-

हैं, ऐसी आज्ञा है ॥ १२९ ॥ श्रोत्रिय (यज्ञ करनेवाले वेदपाठी विद्वान्) के लिए बड़ा बैल अथवा बड़ा बकरा मारा जाता है। पुष्प-माला व सुगन्धि-युक्त उक्त विधि स्वर्ग-सुख के लिए निरूपण की गई है ॥ १३० ॥ गोसव यज्ञ में तत्काल प्रसव करनेवाली गाय का वध करना चाहिए। रायसूय यज्ञ में राजा का वध करना चाहिए। अश्वमेध में घोड़े का वध करना चाहिए और पौण्डरीक यज्ञ में हाथी का वध करना चाहिए ॥ १३१ ॥

औषधियाँ, पशु, वृक्ष, तिर्यञ्च, पक्षी और मनुष्य यज्ञ में मारे जाने से उच्चगति प्राप्त करते हैं ॥ १३२ ॥ मनु का धर्म शास्त्र (मनुस्मृति-आदि) और व्यास व वशिष्ठ का शास्त्र (महाभारत-आदि) एवं वैदिक वचनों को जो अप्रमाण बतलाता है, वह ब्रह्मघाती है ॥ १३३ ॥ पुराण, मानवधर्म, छह अङ्गों (शिक्षा, कल्प, व्याकरण, निरुक्त, छन्द व ज्योतिष) समेत चारों वेद और आयुर्वेद ये चारों स्वयं प्रमाण हैं, इन्हें युक्तियों से खण्डित नहीं करना चाहिए ॥ १३४ ॥

पर्वत इस तरह की आज्ञा देता था और मनु, मरीचि और मतङ्ग-आदि ऋषि स्वाहा शब्द के साथ बकरा, द्विज, हाथी और घोड़ा वगैरह प्राणियों का होम करते थे। इस प्रकार वेद से जीविका करनेवाले ब्राह्मणों में, शस्त्रजीवी क्षत्रियों में, व्यापार से जीविका करनेवाले वैश्यों में, कृषि से जीविका करनेवाले कृषकों में कालासुर ने जो ईतियाँ (सर्प-कण्टक-आदि के दुःख) फैलाईं थीं, उन्हें पर्वत दूर करता था और कालासुर मारे गए प्राणियों को अपनी माया के द्वारा विमान में सवार कराकर स्वर्ग को जाते हुए प्रत्यक्ष दिखाता था। मनु-वगैरह ऋषि इससे दूसरों को प्रभावित करते थे। इस प्रकार जब समस्त नागरिक जनों में ऐसा क्षोभ हो गया, जिसमें माया द्वारा दिखलाये गये स्वर्ग-प्रदेश के गमन-आदि का लोभ था। तब समीपवर्ती नरक आवास वाले सगर राजा ने और उस नरक के विलास के योग्य स्थितिबंध करने वाले विश्वभूति ने कालासुर के उपदेश से बहुत से प्राणियों का घात करके भक्षण किया, जिससे उन दोनों के चित्त महाभयानक पाप का संचय करने वाले हुए फिर कालासुर ने उन दोनों को पूर्वजन्म संबंधी सुलसा राजकुमारी के अपहरण का दोष

*. 'ओषध्यः''''पक्षिणस्तथा ।''''प्राप्नुवन्त्युत्सृतीः पुनः ॥४०॥'—मनुस्मृति अ० ५ ।
१. मनुस्मृति १२, ११० । २. स्वाहासहितं । ३-५. श्रुतिजीविनां ब्राह्मणानां, शस्त्रजीविनां क्षत्रियाणां या ईतयः कालासुरेण मायया कृताः ताः पर्वतः कालासुरमायया स्फेटयति । *. कृषिः । ६. हिंस्यमानान् । ७, मायया । ८. प्रभावनां कुर्वन्ति । ९. समीपनरकावासः । १०. कालासुरोपदेशात् । ११. प्राणिनः । १२. खादित्वा । १३. सुलसापहारदोषौ । १४. अग्निः ।

विहितविचित्रवधरहस्यौ[1] विविक्ताया[2] धरित्र्या [3]द्राघीयो दुःखदवथुमन्थरं[4] तलमगाताम्[5]। पर्वतोऽप्य[6]ग्नायी-पतिविजये [7]जठरधनंजये च [8]हव्य[9]कव्यकर्मभिः समाचरितसमस्तसत्त्वसंहारः कालासुरतिरोधान[10]विधुरविधि-सारस्सविरहातङ्कजो[11]ऽशोचिष्केशकृशशरीरः[12] कालेन [13]क्षीणजीवितप्रचारः [14]सप्तमरसावसरः समपादि[15]। भवति चात्र श्लोकः—

मृषोद्यादीन[16]वोद्योगात्पर्वतेन समं वसुः । जगाम जगतीमूलं ज्वलदातङ्कपावकम् ॥ १३५ ॥

इत्युपासकाध्ययने असत्यफलसूचनो नाम त्रिंशत्तमः कल्पः ।

[17]वधूवित्तस्त्रियौ हित्वा[18] सर्वत्रान्यत्र तज्जने[19] । माता स्वसा तनूजेति मतिर्ब्रह्म* गृहाश्रमे ॥ १३६ ॥
[20]धर्मभूमौ स्वभावेन मनुष्यो नियतस्मरः[21] । यज्जात्यैव[22] [23]पराजातिबन्धुलिङ्गिस्त्रियस्त्यजेत् ॥ १३७ ॥

स्मरण कराकर यज्ञ के बहाने से उन दोनों को यज्ञ की अग्नि में होम दिया, जिससे वे विचित्रवध-लक्षणवाले हुए। इसके उपरान्त वे दोनों बालुकाप्रभा नामकी तीसरी नरक-भूमि के विस्तृत तल में चले गये, जो कि दुःख-दायक परिताप से मन्दगमन वाला था।

पर्वत ने भी अग्नि को तिरस्कार करने वाली अपनी जठराग्नि में देवताओं और पितरों की तृप्ति के बहाने से समस्त प्राणियों का संहार कर डाला। कालासुर के तिरोधान हो जाने से उसकी यज्ञ-विधि असमर्थ (फीकी) हो गई। उसका शरीर कालासुर के वियोग-दुःख रूपी शोकाग्नि से कृश हो गया। आयु के अन्त में उसका जीवन-प्रचार क्षीण हुआ और मरकर सप्तम नरक-भूमि में गया।

इस विषय में एक श्लोक है, उसका भाव यह है—

झूँठ बोलने के दोष में प्रवृत्ति करने के कारण पर्वत के साथ वसु भी सप्तम नरक में गया, जहाँपर संतापरूपी अग्नि प्रज्वलित रहती है॥ १३५॥

इस प्रकार उपासकाध्ययन में असत्य का कटुक फल सूचित करनेवाला तीसवाँ कल्प समाप्त हुआ।

अब ब्रह्मचर्याणुव्रत का निरूपण करते हैं—

अपनी विवाहिता स्त्री और रखैली स्त्री के सिवाय दूसरी समस्त स्त्रीजनों में अपनी माता, बहिन व पुत्री की बुद्धि रखना ब्रह्मचर्याणुव्रत है॥ १३६॥ धर्म-भूमि आर्यखण्ड में मनुष्य स्वभाव से ही अल्पकामी होता है, अतः उसे अपनी जाति की विवाहिता स्त्री से ही संभोग करना चाहिए और दूसरी कुजातियों की तथा

---

१. तत्वौ वधलक्षणपदार्थौ। २. वालुकाप्रभायाः। ३. दीर्घतरं। ४. परितापेन मन्दगमनसहितं। ५. गतौ। ६. अग्नितिरस्कारके। ७. निजोदराग्नौ। ८. देवदेयं। ९. पितृदेयं। १०. असमर्थ। ११. शोकाग्निः। १२. तनूप्रभवत। १३. जीर्ण अथवा क्षीणः। १४. सप्तमभूमि। १५. संजातः। १६. 'आदीनवं दोषः' टि० च०, यश० पं०, 'आस्रवदोषः' टि० घ०। १७. परिणीता अवधृता च। १८. मुक्त्वा। १९. स्त्रीजने।

*. 'न तु परदारान् गच्छति न परान् गमयति च पापभीतेर्यत्। सा परदारनिवृत्तिः स्वदारसन्तोषनामाऽपि' ॥५९॥—रत्नकरण्ड श्रा०। 'उपात्ताया अनुपात्तायाश्च पराङ्गनायाः सङ्गान्निवृत्तरतिर्गृहीति चतुर्थमणुव्रतम्।'—सर्वार्थसिद्धि ७, २०। २०. आर्यखण्डे। २१. अल्पकन्दर्पः तस्य वेगाः दश, तथाहि—

चिन्तादिदृक्षानिश्वासज्वरतापारुचिरपि। मूर्च्छोन्मत्तत्वसंदिग्धप्राणमृत्यून् भजेद्विटः॥ १॥

२२. स्वजात्या परिणीतया सह संभोगः कार्यः अथवा सन्तोषः कार्यः। २३. परा चासौ अजातिश्च पराजातिः परकीय-जातिस्त्री, बन्धुस्त्रीलिङ्गिनीस्त्री त्यजेत् यस्मात्।

रक्ष्यमाणे हि बृंहन्ति यत्राहिंसादयो गुणाः । उदाहरन्ति तद्ब्रह्म[1] ब्रह्मविद्याविशारदाः ॥ १३८ ॥
मदनोद्दीपनैर्वृत्तैर्[2]मदनोद्दीपनै रसैः । मदनोद्दीपनैः शास्त्रैर्मदमात्मनि नाचरेत् ॥ १३९ ॥
[3]हव्यैरिव हुतप्रीतिः [4]पाथोभिरिव[5] नीरधिः । तोषमेति पुमानेष न भोगैर्भवसंभवैः ॥ १४० ॥
*वि[6]षवद्विषयाः पुंसामापाते[7] [8]मधुरागमाः । अन्ते विपत्तिफलदास्तत्सतामिह को ग्रहः ॥ १४१ ॥
बहिस्तास्ताः क्रियाः कुर्वन्नरः संकल्पजन्मवान् । [9]भावाप्तावेव निर्वाति [10]क्लेशस्तत्राधिकः परम् ॥१४२॥
[11]निकामं [12]कामकामात्मा [13]तृतीया प्रकृतिर्भवेत् । अनन्तवीर्यपर्यायस्तस्यानारतसेवने ॥१४३॥
सर्वा क्रियानुलोमा [14]स्यात्फलाय[15] हितकामिनाम्[16] । [17]अपरत्रार्थकामाभ्यां [18]यतो [19]न स्तां तदर्थिषु[20] ॥१४४॥

बन्धुजनों की स्त्रियों से एवं तपस्विनी स्त्रियों से संबंध नहीं करना चाहिए ॥ १३७ ॥ निस्सन्देह जिसकी रक्षा की जाने पर अहिंसा-आदि गुण वृद्धिगत होते हैं उसे अध्यात्म-विद्या में प्रवीण आचार्य ब्रह्म कहते हैं ॥ १३८ ॥ अतः काम की वृद्धि करनेवाले सरागी कार्यों से और कामोद्दीपन करनेवाले रसों के सेवन से एवं काम-वर्धक शास्त्रों (कामसूत्र-आदि ग्रन्थों) के श्रवण-पठन से अपनी आत्मा में काम का मद नहीं लाना चाहिए ॥ १३९ ॥ जैसे देवताओं के लिए समर्पण करने योग्य द्रव्यों (घृत-आदि हवन सामग्री) से अग्नि सन्तुष्ट नहीं होती एवं जैसे प्रचुरजल से समुद्र तृप्त नहीं होता वैसे ही यह मानव भी सांसारिक भोगों से कभी तृप्त नहीं होता ॥१४०॥ स्त्री-आदि पंचेन्द्रियों के विषय वैसे आरम्भ (तत्काल) में पुरुषों को मधुर (प्रिय) मालूम पड़ते हैं और अन्त में विपत्ति (दुःख) रूप फल देनेवाले होते हैं जैसे वत्सनाग विष आस्वादन-काल में मधुर (स्वादिष्ट—मीठा) होता है और अन्त में विपत्ति (मरण) रूप कुफल देनेवाला होता है, इसलिए सज्जनों का विषयों में आग्रह कैसे हो सकता है ? ॥ १४१ ॥ अनेक प्रकार की वाह्य क्रियाओं को करता हुआ कामी पुरुष रति-रस की प्राप्ति में ही सुखी होता है, परन्तु उसमें उसे केवल क्लेश ही अधिक मिलता है और सुख तो बहुत थोड़ा नाम मात्र होता है ॥ १४२ ॥ जो मानव विशेष रूप से काम सेवन की इच्छा के स्वभाव वाला है वह निरन्तर काम का सेवन करने से असमय में नपुंसक हो जाता है, इसके विपरीत ब्रह्मचर्य के प्रभाव से वह अनन्त वीर्य के धारण करने के अवसर वाला होता है।

भावार्थ—प्रस्तुत आचार्य श्री ने नीतिवाक्यामृत के व्यसन-समुद्देश में लिखा है कि 'स्त्रियमतिशयेन भजमानो भवत्यवश्यं तृतीया प्रकृतिः ॥ १ ॥ सौम्यधातुक्षयेण सर्वधातुक्षयः ॥ २ ॥ अर्थात्—अपनी स्त्री को अधिक मात्रा में सेवन करनेवाला मानव अधिक वीर्य धातु के क्षय हो जाने से असमय में वृद्ध या नपुंसक हो जाता है ॥ १ ॥ क्योंकि स्त्री सेवन से पुरुष की शुक्र (वीर्य) धातु क्षय होती है, इससे शरीर में वर्तमान बाकी की समस्त छह धातुएँ (रस, रुधिर, मांस, मेद व अस्थि-आदि) नष्ट हो जाती हैं। निष्कर्ष यह है कि नैतिक पुरुष को वीर्य रक्षार्थ ब्रह्मचर्य पालन करना चाहिए अथवा अपनी स्त्री को अधिक मात्रा में सेवन का त्याग करना चाहिए ॥ १४३ ॥

---

१. 'अहिंसादयो धर्मा यस्मिन् परिपाल्यमाने बृंहन्ति वृद्धिमुपयान्ति तद् ब्रह्म।' —सर्वार्थसिद्धि ७-१६ । २. सरागानुष्ठानैः । ३. देवदेयद्रव्यैः । ४. अग्निर्न तोषमेति । ५. जलैः । *. किंपाकफलसम्भोगसन्निभं तद्धि मैथुनम् । आपातमात्ररम्यं स्याद्विपाकेऽत्यन्तभीतिदम् ॥ १० ॥ —ज्ञानार्णव पृ० १३४ । ६. वत्सनागोऽपि आस्वादने सति मृष्टः (स्वादिष्टः) स्यात् । ७. आरम्भे । ८. स्वादु प्रियौ तु मधुरौ । ९-१०. रतिरसप्राप्तावेव सुखी भवति किन्तु तत्र सुखं स्तोकम् । ११. अतीव । १२. कामवाञ्छास्वभावः । १३. नपुंसकः । १४. हिता । १५. हिताय । १६. हिताभिलाषिणां । १७. परन्तु अर्थकामलक्षणा क्रिया फलाय न स्यादित्यर्थः । १८. यस्मात् कारणात् । १९-२०. तावर्थकामौ न स्तां न भवेतां, केषु तदर्थिषु अर्थकामवाञ्छकेषु, कोऽर्थस्तेषु तृप्तिर्न भवतीति भावार्थः ।

[1]क्षयामयसमः कामः सर्वदोषोदयद्युतिः । [2]उत्सूत्रे तत्र मर्त्यानां कुतः श्रेयःसमागमः ॥१४५॥
[3]देहद्रविणसंस्कारसमुपार्जनवृत्तयः । जितकामे वृथा सर्वास्तत्कामः [4]सर्वदोषभाक् ॥१४६॥
स्वाध्यायध्यानधर्माख्याः क्रियास्तावत्करे कुतः । [5]इन्धे चित्तेन्धने यावदेव कामाशुशुक्षणिः[6] ॥१४७॥
[7]ऐदंपर्यमतो मुक्त्वा भोगानाहारवद्भजेत् । देहदाहोपशान्त्यर्थमभिध्यान[8]विहानये ॥१४८ ॥
[9]परस्त्रीसंगमानङ्गक्रीडान्योपयमक्रियाः[10] । [11]तीव्रता रतिकैतव्ये[12] हन्युरेतानि तद्व्रतम्[13]* ॥१४९॥
मद्यं द्यूतमुपद्रव्यं[14] तौर्यत्रिकमलंक्रियाः । मदो विटा वृथाटयेति[15] दशधानङ्गजो गणः* ॥१५०॥
हिंसनं साहसं[16] द्रोहः [17]पौरोभाग्यार्थदूषणे[18] ।
ईर्ष्या वा[19]ग्दण्डपारु[20]ष्ये कोपजः[21] स्याद्गणोऽष्टधा ॥१५१॥

सुखाभिलाषी मानवों की सुख-प्राप्ति के लिए की जाने वाली समस्त अनुलोम (हित) क्रियाएँ फल-दायक होती हैं, किन्तु अर्थ व काम को छोड़कर। अर्थात्—धन व काम की प्राप्ति के लिए किये जानेवाले कर्त्तव्य फलप्रद नहीं होते। क्योंकि धन चाहने वालों को धन प्राप्त नहीं होता और काम चाहनेवालों को काम-सुख प्राप्त नहीं होता। अभिप्राय यह है कि धन चाहने वालों को प्रचुर धन मिल जाने पर भी तृप्ति नहीं होती और कामियों को काम-सुख प्राप्त हो जाने पर भी तृप्ति नहीं होती ॥ १४४ ॥

काम, क्षयरोग-सरीखा है। यह वैसा समस्त दोषों (पापों) का जनक है जैसे क्षयरोग समस्त दोषों (वात, पित्त व कफ की विकृतियों) का जनक होता है, इसलिए उसकी अधिकता में प्रवृत्त हुए मानवों के लिए कल्याण की प्राप्ति कैसे हो सकती है ? ॥१४५॥ काम पर विजयश्री प्राप्त करनेवाले जितेन्द्रिय मानव के, शरीर का संस्कार करना और धन कमाना-आदि सभी व्यापार व्यर्थ हैं; क्योंकि काम ही समस्त दोषों का जनक है ॥ १४६ ॥ जब तक कामी पुरुष के चित्त रूपी ईंधन में यह कामरूपी अग्नि प्रज्वलित रहती है तब तक उसमें स्वाध्याय, धर्मध्यान व धर्माचरण-आदि क्रियाएँ किस प्रकार उत्पन्न हो सकती हैं ? ॥ १४७ ॥ अतः काम (रतिविलास) की अधिकता छोड़कर शारीरिक सन्ताप की शान्ति के लिए व आर्तध्यान को नष्ट करने के लिए आहार को तरह भोगों का सेवन करना चाहिए ॥ १४८ ॥ व्यभिचारिणी स्त्री के यहाँ आना जाना, काम-सेवन

---

१. क्षयरोग। २. आधिक्ये। ३. देहस्य संस्कारवृत्तिः द्रविणस्योपार्जनवृत्तिः। ४. कन्दर्पो दोषवान्। ५. ज्वलति। ६. कामाग्निः। ७. आधिक्यं। ८. आर्तध्यान। ९. इत्वरिका। १०. परविवाहकरणं। ११. विपुलतृषा। १२. विटत्वं। १३. ब्रह्मचर्यं।

*. 'परविवाहकरणेत्वरिकापरिगृहीतापरिगृहीतागमनानङ्गक्रीडाकामतीव्राभिनिवेशाः ॥२८॥ —मोक्षशास्त्र अ० ७। 'अन्य-विवाहाकरणानङ्गक्रीडाविटत्वविपुलतृषाः। इत्वरिकागमनं चास्मरस्य पञ्च व्यतीचाराः ॥६०॥ —रत्नकरण्डश्रा०। १४. यन्त्रलिङ्गलेपादिप्रयोगः। १५. एवमेव विहरणं। *. 'मृगयाऽक्षो दिवास्वप्नः परिवादः स्त्रियो मदः। तौर्यत्रिकं वृथाटघा च कामजो दशको गणः ॥ ४७ ॥'—मनुस्मृति अ० ७। १६. परपरिग्रहाभिगमः कन्यादूषणं वा साहसम्। १७. 'पौरे भाग्यार्थदूषणे' इति ख०। तत्र टिप्पणी—'नगरसंबंधिनी द्वे, परनिन्दा भाग्यदूषणं।' पञ्जिकाकारस्तु पौरोभाग्य-मसूयकत्वमित्याह। टि० ग, टि० च इत्यत्रापि असूयकत्वमित्युल्लेखः।

१८. अतिव्ययोऽपात्रव्ययश्चार्थदूषणम्। १९. जातिवयोवृत्तविद्यादोषाणामनुचितं वचो वाक्पारुष्यम्।

२०. वधः परिक्लेशोऽर्थहरणमक्रमेण दण्डपारुष्यम्।

हमारे द्वारा अनूदित 'नीतिवाक्यामृत' व्यसनसमुद्देश पृ० २४३-२४४ से संकलित—सम्पादक।

२१. 'पैशुन्यं साहसं द्रोहः ईर्ष्यासूयाऽर्थदूषणम्।
वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥ ४८ ॥—मनुस्मृति अ० ७।

ऐश्वर्यौदार्यशौण्डीर्य[1]धैर्यसौन्दर्यवीर्यताः । लभेताद्भुतसंचारांश्चतुर्थव्रतपूतधीः ॥१५२॥

अनङ्गानलसंलीढे परस्त्रीरतिचेतसि । सद्यस्का विपदो ह्यत्र परत्र च दुरास्पदाः ॥१५३॥

श्रूयतामत्राब्रह्मफलस्योपाख्यानम्—काशिदेशेषु सुरसुन्दरीसपत्नपौराङ्गनाजन[2]विनोदारविन्दसरस्यां वाराणस्यां संपादितसमस्तारातिसंतानप्रकर्षकर्षणो दुर्मर्षणो नाम नृपतिः। अस्यातिचिरप्ररूढप्रौढप्रणयसहकारमञ्जरी सुमञ्जरी नामाग्रमहादेवी। [3]षड्दर्शनतन्त्रादिशास्त्रविस्तृतवचन उग्रसेनो नाम सचिवः। पतिहितैकमनोमुद्रा सुभद्रा नामास्य पत्नी। दुर्विलासरसरङ्गः कडारपिङ्गो नामानयोः सूनुः। अनवद्यविद्योपदेशप्रकाशिताशेषशिष्यः पुष्यो नाम पुरोहितः। सौरूप्यातिशयापहसितपद्मा[4] पद्मा नामास्य धर्मपत्नी। समस्ताभिजात[5]जनवाह्यव्यवहारानुरागः स

के अङ्गों से भिन्न अङ्गों में कामक्रीड़ा करना, दूसरों का विवाह करना, काम-भोग की तीव्र लालसा रखना और विटत्व ये कार्य ब्रह्मचर्यव्रत के घातक हैं। अर्थात्—ब्रह्मचर्याणुव्रत के उक्त पाँच अतिचार हैं ॥ १४९ ॥

मद्य-पान, जुआ खेलना, उपद्रव्य (टि० के अभिप्राय से मांस-भक्षण व मधु-सेवन और पञ्जिकाकार के अभिप्राय से जननेन्द्रिय पर लेप-आदि का प्रयोग), गीत-सुनने में आसक्ति, नृत्य देखने में आसक्ति, वाजों के सुनने में आसक्ति, भड़कीली वेष-भूषा, मद, विटत्व (लुच्चापन) एवं व्यर्थ भ्रमण ये दश काम के गण (अनुचर) हैं ॥ १५० ॥ दूसरों की हिंसा करना, साहस (परस्त्री-सेवन व कन्याओं को दूषित करना), मित्रादि के साथ द्रोह करना, पैशुन्य (दूसरों की चुगली करना), अर्थ-दूषण (आमदनी से अधिक धन खर्च करना और अपात्रों के लिए धन देना), ईर्षा, वाक् पारुष्य (कठोर वचन बोलना, अर्थात्—कुलीन को नीच कुल का कहना, वयोवृद्ध को बालक, सदाचारी को दुराचारी, विद्वान् को मूर्ख कहना और निर्दोषी को सदोषी कहना-आदि कठोर वचन) और दण्डपारुष्य (अन्याय से किसी का वध करना, जेल खाने की सजा देना और उसका समस्त धन अपहरण कर लेना या उसकी जीविका नष्ट करना) ये आठ क्रोध के अनुचर हैं ॥१५१॥ ब्रह्मचर्य से पवित्र बुद्धिवाला मानव आश्चर्य-जनक वैभव, उदारता, दानवीरता व विशेष पराक्रम, धीरता, मनोज्ञता, विशिष्ट शक्ति और आश्चर्यजनक संचार (आकाश में गमन करना-आदि) इन प्रशस्त गुणों को प्राप्त करता है ॥ १५२ ॥ जो मानव कामरूपी अग्नि से संस्पृष्ट है और जिसका चित्त परस्त्री के साथ रतिविलास करने में संलग्न है, उसे इस लोक में तत्काल विपत्तियाँ (लिङ्ग-च्छेद-आदि) उठानी पड़ती हैं और परलोक में भी नरक-आदि दुष्ट स्थान वाली भयानक विपत्तियाँ भोगनी पड़ती हैं ॥ १५३ ॥

अब दुराचार के कटु फल की समर्थक कथा सुनिए—

१६. दुराचारी कडारपिङ्ग की कथा

काशी देश की वाराणसी नगरी में, जो कि देव-सुन्दरियों से स्पर्धा करने वाली नागरिक कामिनीजनों की क्रीड़ा रूपी कमलों के लिए सरसी (तड़ाग) है, समस्त शत्रु-समूह की उन्नति को क्षीण करने वाला दुर्मर्षण नामका राजा था। इसकी चिरकाल से उत्पन्न हुए गाढ़ प्रेम रूपी आम्रवृक्ष की मञ्जरी-जैसी सुमञ्जरी नामकी पट्टरानी थी और *दर्शनशास्त्र व व्याकरण-आदि शास्त्रों के अध्ययन से विस्तृत वचन वाला उग्रसेन नामका मन्त्री था। उसकी पति के कल्याण में अनोखे मनो व्यापार वाली सुभद्रा नामकी प्रिया थी। इनके निन्द्य काम क्रीडारूपी रस के अभिनय करने के लिए रङ्गमञ्च-सरीखा कडारपिङ्ग नामका पुत्र था। उक्त

१. त्यागविक्रमाभ्यां शौण्डीरः। २. विनोद एव कमल। ३. तर्कव्याकरणादि। ४. तिरस्कृतलक्ष्मी।
५. अभिजातस्तु कुलजे बुधे सुकुमारे न्याय्ये च। *.

कडारपिङ्गः स्वापतेयताकण्यमदमन्दमान[1]बलाल्चापलादुरालापनमन्देन विड्गवंडेन[2] सह मतभ्रूविभ्रमाभ्यर्च्यमानभुजङ्गातिथिषु[3] पुरवीथिषु संचरमाण[4]स्तामेकदा प्रासादतलोपसदामरा[5]लपक्ष्मेक्षणाक्षिप्तपद्मां[6] पद्मामवलोक्य

[7]एषेन्द्रियद्रुमसमुल्लसनाम्बुवृष्टिरेषा मनोमृगविनोदविहारभूमिः।
एषा स्मरद्विरदबन्धनवारिवृत्तिः किं खेचरी किममरी किमियं रतिर्वा ॥१५४॥'

इति च विचिन्त्य मकरकेतुवशव्यापारनिधिः प्रवृत्तदुरभिसंधिः [8]पुरुषप्रयोगेणाभिमतकार्यघटनासिद्धिमनवबुध्यमानः पराशय*शैलविदारणतडिल्लतामिव[9] तडिल्लतां नाम धात्रीं अषडक्षीणे[10] शरणे[11] सुनयायतनपतनाविभिः[12] पादपतनादिभिः प्रश्रयै[13]रसवाशयाश्रयैरव[14]न्ध्यसाध्यमुपलभ्य स्वकीया[15]कूतकान्तारप्रवर्धनधरित्रीमकरोत्।

[16]तदुपरोधात्तथाविधविधिविधात्री[17] धात्री—(स्वगतम्।) 'परपरिग्रहो[18]ऽन्यतरानुरागग्रहश्चेति दुर्घटप्रतिभासः[19] खलु कार्योपन्यासः[20]। अथवा सुघट एवायं कार्यघटः। यतस्तप्तातप्तवयसोरयसोरिव चेतसोः सांगत्याय खलु

राजा का निर्दोष विद्याओं के उपदेश से समस्त शिष्यों को प्रकाशित करने वाला पुष्य नामका पुरोहित था। इसकी अपने रूप लावण्य की विशेषता से लक्ष्मी को तिरस्कृत करने वाली पद्मा नाम की प्रिया थी।

एक समय समस्त कुलीन जनों से विपरीत आचार में अनुरक्त हुआ कडारपिङ्ग धन व जवानी के मद से प्रचुर शक्तिशाली चपलता के कारण अश्लील वचन बोलने वाले विट्-समूह के साथ ऐसी नगर की गलियों में घूम रहा था, जहाँपर कमनीय कामिनीजनों के विलास से आमन्त्रित होकर कामीजन आतिथ्य ग्रहण करते थे, एक समय वह महल के तल पर बैठी हुई एवं अपने सुन्दर पलकों वाले नेत्रों से लक्ष्मी को तिरस्कृत करने वाली पद्मा को देखकर सोचने लगा—

इन्द्रियरूपी वृक्ष को विकसित करने के लिए जलवृष्टि-सरीखी, मनरूपी मृग की क्रीड़ा के लिए विहार-भूमि-सी एवं कामरूपी हाथी को बाँधने के लिए बंधनरज्जु-सी यह कौन है? क्या विद्याधरी है? क्या देवी है? अथवा क्या रति है? ॥ १५४ ॥*

इसके पश्चात् काम के अधीन कर्तव्य-निधिवाले उसने दुष्ट अभिप्राय उत्पन्न किया। बलात्कार से अपनी मनोरथ-सिद्धि न जानकर उसने दूसरों के अभिप्रायरूपी पर्वत के विदारण के लिए बिजली-सरीखी तडिल्लता नाम की धाय को उसके पास भेजने का विचार किया। उसने उस धाय को तीसरे मनुष्य-आदि के लिये अगोचर (एकान्त) गृह में ऐसे विनयों द्वारा सफलता पूर्वक रोककर, जो कि नैतिक स्थान की प्राप्ति को नष्ट करनेवाले थे, और जिनमें पैरों पर गिरना-आदि वर्तमान थे एवं जो दुर्जनों द्वारा आश्रय किए जानेवाले थे, उसे अपने अभिप्राय की वृद्धिगत वन-भूमिप्राय कर दी।

उसके आग्रह से उसी प्रकार के कर्तव्य को करनेवाली धाय ने अपने मन में विचार किया—निस्सन्देह परस्त्री व उसके प्रति प्रेमी का प्रेम-कथन इस कार्य की वार्ता का प्रारम्भ दुःख से भी करने के लिए

---

१. प्रचुरीभवत्। २. विटसमूहेन। ३. कामिजन। ४. उदः सकर्मकश्चर इत्यधिकारे 'समस्तृतीयायुक्ते' इत्यात्मने पदं। ५. 'वक्रं अरालं कुटिलं जिह्मं' इति टि० ख०। पञ्जिकाकारस्तु 'अरालं चारु' इत्यचीकथत्। ६. श्रियं। ७. पद्मा। *. रूपकपरिपुष्टः सन्देहालंकारः। ८. बलात्कारेण। *. चित्त। ९. विद्युतं। १०. 'अषडक्षीणो यस्तृतीयाद्यगोचरः' टि० ख०, 'चतुर्लोचने' टि० घ० च० तथा यश० पं०। ११. गृहे। १२. सुनयायतनस्य पतनं गमनं अदन्ति विनाशयन्ति इत्येवं शीलानि तैः। १३. विनयैः। १४. 'सफल' टि० ख०, पं० तु क्रियाविशेषणमिदं। १५. अभिप्रायवनभूमिप्रायां। १६. तस्याग्रहात्। १७. कर्त्री। १८. कलत्रं। १९. प्रत्ययः विश्वासः। २०. उपन्यासस्तु वाङ् मुखं।

यत्क्रियते तद्दौत्यं[1] [2]दौत्यमन्यथा सरसतरसो[3]रम्भसोरिव[4] द्वयोरपि द्रवस्वभावयोरेकीकरणे किं नु नाम [5]प्रतिभाविजृम्भितम् । किं च ।

> सा दूतिकाभिमतकार्यविधौ बुधानां चातुर्यवर्यवचनोचितचित्तवृत्तिः ।
> या चुम्बकोपलकलेव* हि शल्यमन्तश्चेतो*निरूढमपरस्य बहिष्करोति ॥१५५॥

तदलं विलम्बेन । परिपक्वफलमिव न खलु व्यतिक्रान्तकालमदः[6] [7]सरसताधिष्ठानमनुष्ठानम् । किंत्वस्य साहसावलम्बनधर्मणः कर्मणः सिद्धावसिद्धौ वा दैवात्परेङ्गिताकारसर्वज्ञैः प्राज्ञैः कथमपि बहुजनावकाशे प्रकाशे कृते[8] सति [9]पुरश्चारी हि शरीरी भवति दुरपवादपरागावसरो व्यसनगोचरश्च[10] । तद्ब्रूत[11] [11]ध्येयमिदमवसेयम[12] [12]द्वितीयापत्यप्रसवाय सचिवाय, [13]तदुदाहरन्ति न चानिवेद्य भर्तुः किंचिदारम्भं कुर्यादन्यत्रा[14]पत्प्रतीकारेभ्यः ।' इति । (प्रकाशम् ।)

'प्राणप्रियैकापत्य अमात्य[15], [16]ईदृश इव ननु भवादृशोऽपि जनो [17]जातजीवितामृतनिषेकाय [18]अचिरस्नं यत्नं कर्तुमर्हति ।'

अशक्य विश्वास वाला है । अर्थात्—बड़ा कठिन है । अथवा यह कार्य-रचना सुलभता-पूर्वक प्रयत्न करने के लिए शक्य है । अर्थात्—सरल है; क्योंकि तपे हुए और विना तपे हुए लोहों के समान परस्पर विरुद्ध दो चित्तों के अनुकूलीकरण के लिए निस्सन्देह विद्वानों के द्वारा जो प्रकाश के योग्य प्रयत्न किया जाता है वही तो वास्तव में दूतत्व है । अन्यथा द्रवीभूत वेगवाले दो जलों की तरह दो तरल हृदयों को मिलाने में दूती का बुद्धि-विस्तार क्या कहा जायगा ?

विद्वानों ने ऐसी दूती इष्ट कार्य करने में समर्थ मानी है, जिसकी मनोवृत्ति बुद्धि की चतुराई से श्रेष्ठ वचनों के योग्य है । जो चुम्बक पत्थर की तरह दूसरे के मन के भीतर की शल्य को (पक्षान्तर में लोहादि को) खींचकर बाहर फेंक देती है ॥ १५५ ॥

अतः इस कार्य में विलम्ब करने से कोई लाभ नहीं । जैसे समय के बीत जाने पर पका फल भी सरस नहीं रहता वैसे ही समय बीत जाने पर कार्य भी सरस (सिद्ध) नहीं होता, किन्तु यह कार्य साहस के आश्रय से साध्य है । यदि भाग्योदय से सिद्ध हो गया तो दूसरों का मानसिक अभिप्राय और शारीरिक आकृति के जानने में सर्वज्ञ विद्वान् लोग बड़े कष्ट से बहुत लोगों के मन में प्रत्यक्ष रूप से स्थान (सन्मान) प्राप्त कर लेते हैं, जिससे साहस कर्म करने वाला मनुष्य अग्रेसर (श्रेष्ठ) हो जाता है । परन्तु भाग्य-चक्र के पलट जाने से जब कार्य सिद्ध नहीं होता तो दूत ही अपकीर्ति रूपी धूलि पड़ने का अवसर प्राप्त करता है और विपत्ति में फँस जाता है । अतः मैं यह कार्य, इकलौते पुत्र को उत्पन्न करने वाले मन्त्री से कहती हूँ । क्योंकि नीतिकार आचार्यों ने कहा है कि 'असह्य संकट दूर करने के सिवा दूसरा कोई भी कार्य सेवक को स्वामी से निवेदन किये विना नहीं करना चाहिए । अर्थात्—केवल आपत्ति का प्रतीकार स्वामी को विना निवेदन किये भी करना चाहिए ।

ऐसा मन में सोचकर धाय मन्त्री से स्पष्ट बोली—'प्राणों से प्यारे इकलौते पुत्र वाले हे मन्त्री ! निश्चय

१-२. प्रकाश्यं यत्क्रियते तदेव दूतत्वम् । ३. द्रवीभूतवेगयोः । ४. जलयोरिव । ५. मति । *. पक्षे लोहादिकं । *. चित्तमध्ये । ६. कार्य । ७. यथा पक्वं फलं अतीतकालं सरसं न भवति । ८. कार्ये । ९. दूतः । १०. दूतो भवति । ११. कथयामि । १२. कार्यं । १३. आचार्याः कथयन्ति । १४. किन्तु आपत्प्रतीकारः स्वामिनः अनिवेद्यापि करणीयः, अन्यत्कार्यं कथनीयमित्यर्थः । १५. हे मन्त्रिन् ! । १६. पूर्वं त्वमपि ईदृशो बभूवेति भावः । १७. पुत्रजीवितमेवामृतं तत्सेचनाय । १८. शीघ्रं ।

अमात्यः—'समस्तमनोरथसमर्थनकथास्मार्ये आर्ये, तज्जीवितामृतनिषेकाय मज्जीवितोचितविवेकाय च तत्रभवत्येव[1] प्रभवति[2] ।'

धात्री—'[3]अथ किम् । तथाप्यबलाजनमनोतिरिक्तप्रतिभावता[4] तत्रभवतापि प्रतियतितव्यम् ।' इत्यभिधाय [5]धृतकात्यायिनीप्रतिकर्मा करतलामलकमिवाकलितसकलस्त्रैणधर्मा तैस्तैः परचित्ताकर्षणमन्त्रैर्वचनै[6]श्चक्षुश्चेतोह्लादवास्तुभि[7]र्वस्तुभिश्च अतिचिरायाचरितोपचारा परिप्राप्तप्रणयप्रसरावतारा च एकदा मुदा रहसीमं प्रस्तुतकार्यघटनासमसीमं तां पुष्पकान्तामुद्दिश्य श्लोकमुदाहार्षीत् ।

स्त्रीषु धन्यात्र गङ्गैव परभोगोपगापि या । मणिमालेव सोल्लासं ध्रियते मूर्ध्नि शंभुना ॥१५६॥'

भट्टिनी—(स्वगतम् ।) '[8]इत्वरीजनाचरणहर्म्यनिर्माणाय प्रथमसूत्रपात इवायं वाक्योपोद्घातः[9] । तथापि ज्ञेयं तावदेतदाकूतपरिपाकम्[10] । (प्रकाशम् ।) आर्ये, किमस्य सुभाषितस्य [11]ऐदंपर्यम् ।'

धात्री—परमसौभाग्यभागिनि भट्टिनि, जानासि एवास्य सुभाषितस्य कैंपर्यम्[12], यदि न वज्रघटितहृदयासि ।

से आप भी पहिले ऐसे ही थे, इसलिए आपको पुत्र के जीवनरूपी अमृत के सिञ्चन के लिए शीघ्र प्रयत्न करना चाहिए ।'

मन्त्री—'देवी ! आप समस्त मनोरथों को सफल करने की कथा में स्मरण के योग्य हैं, अतः उसके जीवनरूपी अमृत के सिंचन के लिए और मेरी जीवन-रक्षा के योग्य ज्ञान के लिए आप ही समर्थ हैं ।'

धाय—'यह तो ठीक है, परन्तु आप स्त्रीजनों के मानसिक ज्ञान की अपेक्षा अधिक बुद्धिशाली हैं अतः आपको भी प्रस्तुत कार्य में प्रयत्न करना चाहिए ।'

इतना कहकर धाय ने अर्ध वृद्धा स्त्री का वेष धारण किया और उसने समस्त स्त्रीजनों के उचित कर्तव्य हस्त पर रक्खे हुए आँवले को तरह स्पष्ट निश्चय किए । उसने दूसरों के चित्त को आकर्षण करने के लिए मन्त्र-सरीखे वचनों द्वारा और नेत्र-सुख व मानसिक सुख को स्थानीभूत वस्तुओं की भेंटों द्वारा पद्मा की चिरकाल तक सेवा की । जिससे उसने अपने ऊपर पद्मा की विस्तृत प्रेम की उत्पत्ति प्राप्त की ।

एक समय उसने एकान्त में पद्मा को लक्ष्य करके हर्षपूर्वक ऐसा श्लोक पढ़ा, जो कि प्रसङ्ग में प्राप्त हुई कार्य-रचना की अनुकूल मर्यादा से युक्त था ।

'इस लोक की स्त्रियों में गङ्गा ही धन्य है, जो दूसरों के समीप भोग-दान के लिए जाती है, फिर भी वह शङ्करजी द्वारा मणियों की माला की तरह उल्लास-सहित मस्तक पर धारण की जाती है ॥ १५६ ॥

इसे सुनकर पद्मा ने अपने मन में विचार किया—'यह वाक्य के अवतारणों का क्रम कुलटा स्त्रीजन-के आचरणरूपी महल के निर्माण करने के लिए प्रथम सूत्रपात-सरीखा है । फिर भी इसने जो कुछ कहा है, उसके अभिप्राय का सार जान लेना चाहिए ।'

पश्चात् पद्मा ने स्पष्ट कहा—'माता ! आपके इस सुभाषित का क्या रहस्य है ?'

---

१. त्वमेव । २. समर्था । ३. एवमेतत् । ४. अधिकवुद्धया । ५. अर्धजरती । ६. वचनैः । ७. वास्तु गृहम् । ८. कुलटा । ९. 'संग्रहवाक्यं अवतारणक्रमः, उपन्यासस्तु वाङ्मुखं, उपोद्घातः उदाहारः' टि० ख०, 'अवतारणक्रमः' इति टि० च० तथा यश० पं० अपि । १०. अभिप्रायोदयं सूत्रपातसदृशम् । ११. रहस्यं । १२. रहस्यं ।

भट्टिनी—(स्वगतम् ।) सत्यं वज्रघटितहृदयाहम्, यदि भवत्प्रयुक्तोपघातघणजर्जरितकाया न भविष्यामि । (प्रकाशम् ।) आर्ये, हृदयेऽभिनिविष्टमर्थं श्रोतुमिच्छामि ।

धात्री—वत्से, कथयामि । किं तु ।

चित्तं द्वयोः पुरत एव निवेदनीयं, ज्ञानाभिमानधनधन्यधिया नरेण ।
यः प्रार्थितं न[1] रहयत्यभियुज्यमानो[2], यो वा भवेन्ननु जनो मनसोऽनुकूलः[3] ॥१५७॥'

भट्टिनी—(स्वगतम् ।) अहो [4]नभःप्रकृतिमपीयं पङ्केनोपलेप्तुमिच्छति । (प्रकाशम् ।) आर्ये, [5]उभयत्रापि समर्थाहं न चैतन्ममोपधिर्न[6] भवदुपक्रमं वा[7] ।

धात्री—(स्वगतम् ।) [8]अनुगुणेयं खलु कार्यपरिणतिः, यदि [9]निकटतटतन्त्रस्य वहित्रपात्रस्येव दुर्वातालो[10] संनिपातो न भवेत् । (प्रकाशम् ।) अत एव भद्रे, वदन्ति पुराणविदः—

'विधुर्गुरोः कलत्रेण गोतमस्यामरेश्वरः । [11]संतनोश्चापि [12]बृद्धशर्मा समगंस्त[13] पुरा किल ॥१५८॥'

धाय—'परम सौभाग्य शालिनी देवी ! यदि तुम्हारा हृदय वज्रघटित नहीं है तो इस सुभाषित का रहस्य (अभिप्राय) तुम जानती ही हो ।'

पद्मा—(मन में) 'यदि आपके द्वारा फैंके जाने वाले प्रहार रूपी घनों द्वारा जर्जरित शरीर वाली नहीं होऊँगी तो वास्तव में मैं वज्रघटित हृदय वाली हूँ ।' (प्रकाश में) 'माता ! मैं आपके मन में स्थित हुआ अभिप्राय सुनने की इच्छा करती हूँ ।'

धाय—'पुत्री ! कहती हूँ, किन्तु

ज्ञान और स्वाभिमान रूपी धन से धन्य बुद्धिवाले मनुष्य को दो व्यक्तियों के सामने ही अपने मन की बात कहनी चाहिए । १. प्रार्थना किया हुआ जो व्यक्ति प्रार्थना की हुई वस्तु छुड़ाता नहीं है, अर्थात्—प्रार्थना की हुई वस्तु दे देता है । २. निस्सन्देह जो मानव प्रार्थना करने वाले के मन के अनुकूल है ॥ १५७ ॥

पद्मा—(मन में) 'अहो ! आश्चर्य है, कि यह आकाश के स्वभाव-सरीखी निर्लिप्त वस्तु को भी कीचड़ से लीपने की इच्छा करती है । अर्थात्—आकाश-सी निर्मल प्रकृतिवाली पतिव्रता मुझको यह धाय कुलटा स्त्रीजनों के दोषरूपी कीचड़ से लीपना चाहती है ।' (प्रकाश में) 'पूज्य देवी ! मैं आपको दोनों बातों में (प्रार्थना की हुई वस्तु के देने में और आपके मन की अनुकूलता में) समर्थ हूँ । यह मेरी उपाधि नहीं है और न इसमें आपका उद्यम ही है; क्योंकि मेरी पहले से ही ऐसी प्रवृत्ति है ।'

धाय—(मन में) यह कार्य का परिणमन मेरे अभिप्राय के अनुकूल है, परन्तु यदि तट के समीप प्राप्त हुई नौका के लिए प्रतिकूल चलनेवाली प्रचण्ड वायु के झकोरों का वेग से आगमन न हो । अर्थात्—मेरा कार्य इस समय सिद्ध प्राय है, यदि इसमें विघ्न न हो ।

(प्रकाश में) 'पुत्री ! इसीलिए पुराणकारों ने कहा है कि—निस्सन्देह प्राचीनकाल में चन्द्रमा ने बृहस्पति की पत्नी के साथ रति विलास किया व इन्द्र ने गौतम की प्रिया (अहिल्या) के साथ एवं रुद्र (श्रीशिव) ने शान्तनु राजा की रानी के साथ रतिविलास किया ॥ १५८ ॥'

---

१. न त्याजयति । २. प्रार्थितः, प्रार्थ्यमानः । ३. हितः । ४. आकाशस्वभावं । ५. प्रार्थितदाने मनोऽनुकूलतायाञ्च । ६-७. न हि मदीय उपाधिर्न च भवदीय उद्यमः किन्तु पुरैव ईदृशी गतिरस्ति । ८. अनुकूला इयं । ९. पोतस्य । १०. वात्या । ११. शान्तनुराज्ञः । १२. हरः । १३. एकत्र बभूव ।

भट्टिनी—'आर्ये, एवमेव । यतः ।

स्त्रीणां वपुर्बन्धुभिरग्निसाक्षिकं परत्र विक्रीतमिदं न मानसम् ।
स एव तस्याधिपतिर्मतः कृती विस्रम्भगर्भा[1] ननु यत्र निर्वृतिः[2] ॥१५९॥

धात्री—पुत्रि, तर्हि श्रूयताम् । त्वं किलैकदा कस्यचि[3]त्कुसुमकिसारुनिर्विशेषवपुषः पुराङ्गनाजनलोचनोत्पलोत्सवामृतरोचिषः प्रासादपरि[4]सरविहारिणी वीक्षणपथानुसारिणी सती कौमुदीव हृदयचन्द्रकान्तानन्दस्यन्दसंपादिनी अभूः । तत्प्रभृति ननु तस्य मदनसुन्दरस्य यूनः [5]प्रत्यवसितवसन्तश्रीसमागमसमयस्य [6]पुष्पंधयस्येव [7]रसालमञ्जर्यामिव भवत्यां महान्ति खलु मन्दमक[8]रन्दास्वादने दोहदानि नितान्तं चिन्ताचक्रपरिक्रान्तं स्वान्तम्, प्रसभं गुणस्मरणपरिणामाधिकरणमन्तःकरणम्, अनवरतं रामणीयकानुकीर्तनसंकेतं चेतः, प्रविकसत्कुसुमविलासोचितसंनिहितेऽप्यन्यस्मिल्ल[9]ताकान्ताजने महानुद्वेगः, पिशाचच्छलितस्येव वाऽस्थानानुबंधः[10] प्रलपितप्रबंधः, संजातोन्मादस्येव विचित्रोपलम्भः क्रियाप्रारम्भः, [11]स्कन्दगवगृहीतस्येव प्रतिवासरं कार्श्यावतारः, स्मराराधनप्रणीतप्रणिधानस्येवेन्द्रियेषु [12]सन्नता जडता, प्राणेषु [13]चाद्यश्वीनपथा कथा । अपि च ।

पद्मा—'पूज्य देवी ! आपका कहना ठीक है, क्योंकि

बन्धुजनों द्वारा कामिनियों का केवल शरीर मात्र ही अग्नि की साक्षीपूर्वक दूसरों के लिए बेंचा गया है, न कि मन । इसलिए वही भाग्यशाली या कुशल पुरुष उनके मन का स्वामी माना गया है, जिसके द्वारा उन्हें विश्वास-सहित रति-विलास-आदि का सुख प्राप्त हो ॥ १५९ ॥'

धाय—पुत्री ! तो सुनिए—एक समय तुम महल के उपरितन प्राङ्गण पर घूम रही थीं, तब निस्सन्देह किसी ऐसे प्रेमी नवयुवक के नेत्रों की दृष्टि के मार्ग को अनुसरण करनेवाली हुईं । जिसका शरीर कामदेव-जैसा विशेष मनोज्ञ है और जो नागरिक कामिनी जनों के नेत्ररूपी कुमुदों को विकसित करने के लिए चन्द्र-सरीखा है । उस समय तुम कौमुदी-(चन्द्र-किरण) सरीखी उसके हृदयरूपी चन्द्रकान्तमणि में आनन्द रूपी जल-निर्गम को उत्पन्न करनेवाली हुईं । तभी से लेकर निस्सन्देह कामदेव-सरीखे अत्यन्त सुन्दर उस नवयुवक को उस प्रकार आपके मुख की सुगन्धि रूपी मकरन्द (पुष्परस) के आस्वादन करने के महान् मनोरथ हुए जिस प्रकार वसन्तलक्ष्मी के समागम के समय को प्राप्त करनेवाले भौंरे के लिए आम्रमञ्जरी के रसास्वाद करने का तीव्र दोहला (मनोरथ) होता है । उसी दिन से उसका मन सदा आपकी चिन्ता के चक्र से व्याकुलित रहता है । एवं उसका अन्तः करण अत्यन्त आपके गुणों के स्मरण की परिणति का आधार है । उसका चित्त निरन्तर आपके देह-सौन्दर्य के पुनः पुनः स्मरण करने में संकेत-युक्त है । आपको छोड़कर विकसित पुष्पों-सरीखी विलास के योग्य दूसरी लता-सी कामिनी जनों के समीप आनेपर भी उसके हृदय में महान् घबड़ाहट उत्पन्न हो जाती है । भूताविष्ट की तरह उसका एक स्थान में सन्ततिरूप से प्रवर्तन नहीं है और उसमें प्रलाप-(बकवाद) समूह वर्तमान है । पागलों की तरह उसके कार्य का प्रारम्भ विचित्र विभ्रम वाला है, क्षयरोग से पीड़ित रोगी की तरह उसका शरीर प्रतिदिन क्षीणता प्राप्त कर रहा है । कामदेव की आराधना

---

१. विश्वाससहिता । २. सुखं । ३. 'किसारुः सस्यसूकं स्यात्, सूकोऽस्त्रीशलक्ष्णतीक्ष्णाग्रे पुष्पकेसरसमः कनकवर्णः' इति० टि० ख०, 'पुष्पकेसरसदृशः कनकवर्ण इवेत्यर्थः' टि० च०, यश० पञ्जिकाकारस्तु 'कुसुमकिसारुः' कामः' इत्याह । ४. उपरितनप्राङ्गण । ५. संजात । ६. भ्रमरस्येव । ७. रसालश्चूतः । ८. 'अत्र मुखपरिमलं मकरन्दः' टि० ख०, 'अत्र मुखकमलमेव मकरन्दः' टि० च० । ९. वत् । १०. संतत्या प्रवर्तनम् । ११. क्षयरोग । १२. 'चेष्टाभावक्षीणता टि० च० 'जडता' टि० ख० । १३. अद्य कल्ये वा प्राणाः यास्यन्ति ।

अनवरत[1]अलार्द्रान्दोलनस्यन्दमन्दै[2] रतिसरसमृणालीकन्दलैश्चन्दनार्द्रैः[3]।
अमृतरुचिमरीचिप्रोढितायां निशायां प्रियसखि सुहृदस्ते[4]किंचिदात्मप्रबोधः[5] ॥१६०॥

भट्टिनी—आर्ये, किमित्यद्यापि गोपाय्यते।

धात्री—([6]कर्णजाहमनुसृत्य।) [7]एवमेवम्।

भट्टिनी—को दोषः।

धात्री—कदा।

भट्टिनी—यदा तुभ्यं रोचते।

इतश्चानन्तरायतया [8]तनयानुमताहितमतिपाटवः सचिवोऽपि नृपतिनिवासोचितप्रचारेषु [9]वासुरेषु गुणव्यावर्णनावसरायातमेतस्य महीपतेः पुरस्तादच्छलोकमिममुपन्यास्थत्[10]—

'राज्यं प्रवर्धते तस्य किञ्जल्पो यस्य वेश्मनि। शत्रवश्च क्षयं यान्ति सिद्धाच्चिन्तामणेरिव ॥१६१॥'

राजा—'अमात्य, क्व तस्य प्रादुर्भूतिः, कीदृशी च तस्याकृतिः।

में एकाग्रता प्राप्त करने वाले पुरुष की तरह उसकी इन्द्रियों में चेष्टाभाव-क्षीणता है और जड़ता है। आज व कल में उसके प्राण निकल जाँयगे।

'प्यारी सखी! निरन्तर जल से भीगे हुए वस्त्र के पंखों के हिलाने के कारण वेग में मन्द हुए पंखों के द्वारा और अतिस्निग्ध कमल-नाल के चन्दन-सहित कन्दों द्वारा शीतोपचार किये हुए तेरे मित्र को चन्द्र-किरणों से वृद्धिगत (चाँदनी) रात में कुछ चेतना होती है ॥ १६० ॥

पद्मा—'देवी! क्या अब भी मुझ से छिपाती हो?'

धाय—पद्मा के कानों के समीप धीरे से बोली—'ऐसा ही है, अर्थात्—कडारपिङ्ग आपको चाहता है।'

पद्मा—'इसमें क्या बुराई है?'

धाय—'तो कब?'

पद्मा—'जब तुम चाहो।'

[यहाँ धाय प्रयत्नशील थी, वहाँ मन्त्री भी प्रयत्नशील था।]

उधर पुत्र के प्रिय कार्य में बुद्धि की पटुता स्थापित करने वाले उग्रसेन मन्त्री ने भी राजा के समक्ष ऐसा श्लोक बे रोक टोक पढ़ा, जो कि राजमहल के योग्य प्रचारवाले पक्षियों के गुणों के कथन के अवसर पर प्राप्त हुआ था।

'जिस राजा के महल में किञ्जल्प नामक पक्षी रहता है, उसकी राज्य-वृद्धि होती है और सिद्ध किये हुए चिन्तामणि की तरह उससे शत्रु नष्ट होते हैं' ॥ १६१ ॥

राजा—'मन्त्री! यह पक्षी किस स्थान पर उत्पन्न होता है? और उसकी आकृति कैसी होती है?'

---

१. 'अलार्द्रं वस्त्रव्यजनं' इति पञ्जिकाकारः। २. व्यजन। ३. कन्दैश्चन्दनसहितैः। ४. मनाक्। ५. भवति, ईदृशो वर्तते। ६. कर्णसमीपं शनैः कथितवती। ७. कडारपिङ्ग एव त्वां वाञ्छति। ८. पुत्र। ९. पक्षिषु। १०. पठतिस्म।

अमात्यः—देव, भगवतः पार्वतीपतेः [1]श्वशुरस्य मन्दाकिनीस्यन्दनिदानकन्दरनीहारस्य[2] [3]रमणसहचरखेचरीसुरतपरिमलमत्त[4]सालिमण्डलीविलिख्यमान[5]मरकतमणिमेखलस्य प्रालेयाचलस्य [6]वृक्षोत्पलखण्डमण्डितशिखण्डस्य रत्नशिखण्डनाम्नः शिखरस्याभ्यासे[7] निःशेषशकुन्तसंभवावहा गुहा समस्ति। यस्यां [8]जटायु-वैनतेय-वैशम्पायन-प्रभृतयः शकुन्तयः प्रादुरासन्। [9]तस्यामेव [10]तस्योत्पत्तिः। तां च गुहामहं पुण्यश्चानेकशो नन्दाभगवतीयात्रानुसारित्वात्साधु जानीवः। प्रतिकृतिश्चास्या[11]नेकवर्णा मनुष्यसवर्णा[12] च।

भूपालः—(संजातकुतूहलः।) अमात्य, कथं तद्दर्शनोत्कण्ठा ममाकुण्ठा[13] स्यात्।

अमात्यः—देव, मयि, पुण्ये वा गते सति।

राजा—अमात्य, भवानतीव प्रवयाः[14]। तत्पुण्यः प्रयातु।

अमात्यः—देव, तर्हि दीयतामस्मै सरत्नालंकारप्रबेकं[15] पारितोषिकम्, [16]अगणेयं पाथेयं च।

राजा—बाढम्।

स्वामिचिन्ताचारचक्षुष्यः[17] पुण्यस्तदादिष्टो[18] गेहमागत्य 'आवेशं न विकल्पयेत्' इति मतानुसारी प्रयाणसामग्रीं कुर्वाणस्तया सतीव्रतपविश्रितसध्यया पश्चया पृष्टः—'भद्र, किमकाण्डे प्रयाणाडम्बरः।

मन्त्री—'देव ! भगवान् शङ्कर के श्वसुर हिमालय पर्वत को, जिसकी गुफाओं का हिम गङ्गा के प्रवाह का कारण है, और जिसकी मरकत मणियों की मेखला (मध्यभाग या करधनी) भर्ताओं के साथ गमन करने वालीं विद्याधरी कामिनियों के रतिविलास की सुगन्धि में मत्त (लम्पट) हुई भ्रमर-श्रेणी द्वारा विलक्ष्मी (शोभा-हीन) की जा रही है, कर्णिकार वृक्षों के समूह से अलङ्कृत चोटीवाले रत्नशिखण्ड नामकी शिखर के समीप समस्त पक्षियों को उत्पन्न करनेवाली गुफा है, जिसमें जटायु, गरुड़ व वैशम्पायन-आदि पक्षी उत्पन्न हुए थे। उसी में ही किञ्जल्क नाम के पक्षी की उत्पत्ति है। उस गुफा को हम दोनों (मैं और पुण्य) भलीभाँति जानते हैं, क्योंकि हम दोनों ने अनेक वार पार्वती परमेश्वरी के दर्शन के लिए वहाँ की यात्रा का अनुसरण किया था। इसकी आकृति अनेक वर्ण (श्वेत व पीतादि) वाली व मनुष्य-सी है।'

उत्पन्न हुए कौतुक वाला राजा—'मन्त्री ! उसके दर्शन की मेरी तीव्र अभिलाषा किस प्रकार पूर्ण होगी ?'

मन्त्री—'देव ! मेरे और पुण्य के वहाँ जाने पर ही आपकी तीव्र अभिलाषा पूर्ण हो सकती है।'

राजा—'मंत्री ! आप विशेष वृद्ध हो, अतः पुण्य जाय।'

मन्त्री—'देव ! तो पुण्य के लिए रत्न-जड़ित कङ्कण वाला पारितोषिक दीजिए और मार्ग में हित कारक प्रचुर सामग्री भी।'

राजा—'बहुत अच्छा।'

स्वामी की चिन्ता के अनुकूल प्रवृत्ति करने से मनोज्ञ और राजा द्वारा आज्ञा दिया हुआ पुण्य घर

---

१. हिमाचलस्य। २ हिमं गलित्वा, जलं भूत्वा गङ्गा वहति। ३. भर्तृसहगमन। ४. भ्रमरश्रेणी। ५. विलक्ष्मीक्रियमाण। ६. कर्णिकारः। ७. समीपे। ८. पक्षिविशेष। ९. गुहायां। १०. किंजल्पपक्षिणः। ११. पक्षिणः। १२. समाना। १३. अमन्दा। १४. वृद्धः। १५. कङ्कणं। १६. प्रचुरं। १७. प्रवृत्तिसुभगः। १८. राज्ञा आदिष्टः पुण्यः।

पुष्यः—प्रस्तुतमाचष्टे ।

भट्टिनी—भट्ट, सर्वमेतत्सचिवस्य कूटकपटचेष्टितम् ।

भट्टः—'भट्टिनी, किं नु खल्वेतच्चेष्टितस्यायतनम्[1] ।

भट्टिनी—[2]प्रक्रान्तमभाषिष्ट ।

भट्टः—किमत्र कार्यम् ।

भट्टिनी—कार्यमेतदेव । दिवा[3] प्रकाशमेतस्मात्पुरात्प्रस्थाय निशि निभृतं च प्रत्यावृत्य अत्रैव महावकाशे निजनिवासनिवेशे[4] सुखेन वस्तव्यम् । [5]उत्तरत्राहं जानामि ।

भट्टः—तथास्तु[6] ।

ततोऽन्यदा तया [7]परनिकृतिपात्र्या धात्र्या स [8]दुराचाराभिषङ्गः कडारपिङ्गः [9]सुप्तजनसमये समानीतः 'समभ्यसतु तावदिहैवेयमयं च[10] महीमूलं यियासुः पातालावासदुःखम्' इत्यनुध्याय तया पद्मया [11]महावर्तस्य गर्तस्योपरि कल्पितायामवाना[12]यां*खट्वायां क्रमेणोपवेशितवपुषौ तौ द्वावपि[13] दुरातङ्कावंध्ये श्वभ्रमध्ये विनिपेततुः । अनुब-

---

आया। वह 'आज्ञा में संकल्प-विकल्प नहीं करना चाहिए' इस नैतिक सिद्धान्त को मानने वाला था। अतः वह प्रस्थान की सामग्री का संचय करने लगा।

उसी समय पातिव्रत्य धर्म से गृह को पवित्र करने वाली उसकी पत्नी पद्मा ने उससे पूँछा—'स्वामी ! आप असमय में यह देशान्तर में गमन करने का प्रपञ्च क्यों कर रहे हैं ?'

पुष्य ने उससे प्रस्तुत बात कह दी।

पद्मा—'स्वामी ! यह सब मन्त्री के कूटकपट की चेष्टा (व्यवहार) है।'

पुष्य—'प्रिये ! निस्सन्देह इस कूटकपट-पूर्ण व्यवहार का क्या कारण है ?'

पद्मा ने प्रस्तुत पूर्व वृत्तान्त कह दिया।

पुष्य—'इस अवसर पर मुझे क्या करना चाहिए ?'

पद्मा—'कर्तव्य इतना ही है, कि आप दिन में समस्त जनों के सामने इस नगर से प्रस्थान कर दो और रात्रि में चुपचाप लौटकर बड़ो जगह वाले अपने निवास स्थान (गृह) में सुखपूर्वक निवास करो। पूर्वोक्त वृत्तान्त के विषय का कर्तव्य मैं जानती हूँ।'

पुष्य ने वैसा ही किया।

इसके उपरान्त एक दिन रात्रि की मध्यवेला में दूसरों को धोखा देने की पात्र-भूत यह धाय, दुराचार से संबंध रखने वाले (परस्त्री-लम्पट) कडारपिङ्ग को लाई। उधर पद्मा ने यह सोचकर कि 'ये दोनों इसी जन्म में नरक में गमन करने के इच्छुक होकर नरक-निवास का दुःख भोगें' ऐसा सोचकर उसने खूब गहरे गड्ढे के ऊपर विना बुनी खाट बिछा दी, जो कि कपड़े की चादर मात्र से सजी हुई थी, उसपर उन दोनों को बैठाया, जिससे वे दोनों (धाय और कडारपिङ्ग) महाव्यथा वाले उस नरक-कुण्ड-सरीखे गड्ढे में

---

१. कारणं । २. प्रस्तुतं पूर्वं वृत्तान्तं । ३. दिवसे । ४. स्थाने । ५. पूर्वोक्तवृत्तान्ते । ६. तथैव कृतवान् । ७. माया । ८. दुराचारेण सह संबंधो यस्य । ९. सुप्तजनः रात्रिमध्यः । १०. धात्रीकडारपिङ्गौ । ११. विस्तारेण गम्भीरस्य । १२. अणवुणीखट्वायां । *. 'अवानायां प्रच्छदमात्रप्रसाधनायां खट्वायां' इति क०, ख०, घ० च० । विमर्शः— 'अयं पाठः साधुरिति ममाभिप्रायः'—सम्पादकः । १३. धात्रीकडारपिङ्गौ ।

पूबतुश्च निखिलपरिजनोच्छिष्टसिक्थजीवनौ कुम्भीपाकोपक्रमं[1] षड्[2]समामासान्मुःखकमम्[3] ।

पुनरेकदा 'स्वाम्यादेशविशेषविदुष्यः पुष्यः तथाविधपक्षिप्रसवसमर्थपक्षिणीसहितं[4] कृतपञ्जरपरिकल्पं किंजल्पमादाय आगच्छंस्त्रिचतुरेषु वासरेष्वस्यां पुरि प्रविशति' *इति प्रसिद्धम् । तत्प्रवर्तिनी भट्टिनी विविधवर्णविडम्बित-कायेन चटकचकोरचाषचातकादिच्छदच्छादित[5]प्रतीकनिकायेन पञ्जरालयेन तद्द्वयेन सह[6] चिरप्रवासोचितवेषयोग्यं[7] पुष्यं पुरोपवने विनिवेश्य भट्टोद्भूतारम्भसंभाषणसनाथसखीजनसंकल्पा धृतप्रोषितभर्तृकाकल्पा[8]भिमुखमयासीत्[9] ।

अपरेद्युः स निखिलगुणविशेष्यः पुष्यः पृथिवीपतिभवनमनुगम्य 'देव, अयं स किंजल्पः पक्षी, इयं च तत्प्रसवित्री[10] पतत्रिणी च' इत्याचरत् ।

राजा—(चिरं निर्वर्ण्य निर्णीय च स्वरेण ।) पुरोहित, नैव खलु किंजल्पः पक्षी, किंतु कडारपिङ्गोऽयम् । एषापि विहङ्गी न भवति, किं तु तडिल्लतेयं कुट्टिनी ।

पुष्यः—देव, एतत्परिज्ञाने प्रगल्भमतिप्रसवः सचिवः ।

राज्ञा सचिवस्तथा पृष्टः क्ष्मातलं प्रविविक्षुरिव क्षोणीतलमवालोकत ।

जा गिरे और समस्त कुटुम्बी जनों के जूँठे भात को खाकर जीवित रहने वाले उन दोनों ने छह माह तक नरक के आरम्भ-सरीखा भयानक दुःख भोगा।

इसके पश्चात् पद्मा ने एक समय राज्य में ऐसी प्रसिद्धि की, कि 'स्वामी की आज्ञा-पालन में विशेष निपुण पुष्य एक पिञ्जरे में बन्द किंजल्प पक्षी को और इस प्रकार के पक्षी को जन्म देने में समर्थ पक्षिणी को लेकर आ रहा है और वह तीन चार दिन में इस नगरी में प्रविष्ट हो रहा है।' इसके उपरान्त उसने चिरकालीन प्रयाण के योग्य वेष धारण करने वाले अपने पति पुष्य को ऐसे उन दोनों (कडारपिङ्ग व धाय) के साथ पहले ही नगर के बगीचे में ठहराया, जिनका शरीर नाना प्रकार के वर्णों (पीत व रक्तादि) द्वारा विचित्र किया गया था और जिनके शारीरिक अवयव-(हस्त व पाद-आदि) समूह चिड़िया, चकोर, नीलकण्ठ व चातक-आदि पक्षियों के पंखों द्वारा आच्छादित किये गए थे और जो पिंजरारूपी गृहवाले थे। और वह (पद्मा), जो ऐसे सखीजनों से भूषित थी, जो कि पुष्य के कारण से उत्पन्न हुए आरम्भवाले संभाषण से युक्त था, जिसने प्रवास में गये हुए पतिवाली स्त्री का वेष धारण किया था, पति के सन्मुख गई।

दूसरे दिन समस्त गुणों में उत्कृष्ट पुष्य राज-भवन में जाकर बोला—'देव! यह वही किंजल्प पक्षी है और यह उसकी माता पक्षिणी है।'

राजा—(बहुत देर तक देखकर व शब्द सुनने से पहचान कर) 'पुरोहित! यह किंजल्प पक्षी नहीं है, यह तो कडारपिङ्ग है। यह भी पक्षिणी नहीं है, किन्तु तडिल्लता नामकी कुट्टिनी है'।

पुष्य—'किंजल्प पक्षी के ज्ञान में प्रौढ़ बुद्धि उत्पन्न करने वाले उग्रसेन मन्त्री हैं।'

राजा ने मन्त्री से उन्हें पहचानने के लिए पूँछा, तो मन्त्री पृथिवी-तल की ओर देखता रह गया, मानों—पृथिवी-तल में प्रवेश करने का इच्छुक ही है।

---

१. उपज्ञा ज्ञानमाद्यं स्यात् ज्ञात्वारंभ उपक्रमः। २. षण्मासान्। ३. अनुबभूवतुः। ४. धात्रीसहितं। *. 'इति प्रसिद्धिवर्तिनी भट्टिनी' क०। ५. प्रतीकाः अवयवाः। ६. सह पुष्यं निवेश्य। ७. सेवनीयं। ८. वेषा। ९. सन्मुखं गता। १०. माता।

राजा—पुष्य, समास्ताम् । अयं भवानेतद्व्यतिकरं कथयितुमर्हति ।

पुष्यः—स्वामिन्, [1]कुलपालिकात्र प्रगल्भते[2] ।

भूपतिः भट्टिनीमाहूय 'अम्ब, कोऽयं व्यतिकरः' इत्यपृच्छत् । भट्टिनी गतमुदन्तमाख्यत्—काश्यपीश्वरः शैलूष[3] इव हर्षामर्षोत्कर्षस्थामवस्थामनुभवन्निखिलान्तःपुरपुरंध्रीजनवन्द्यमानपादपद्मां पद्मां तैस्तैः सतीजनप्रह्लादनवचनैः संमानसंनिधानैरलंकारदानैश्चोपचर्य, प्रवेश्य च वेदविद्द्विजोह्यमान[4]कर्णीरथारूढां वेश्म[5], पुनः 'अरे निहीन, किमिह नगरे न सन्ति सकललोकसाधारणभोगाः सुभगाः सीमन्तिन्यः, येनैवमाचरः । कथं न दुराचार, एवमाचरन्नत्र विलयं[6] विलीनोऽसि । तदिदानीमेव यदि भवन्तं तृणाङ्कुरमिव तृणेह्मि[7] तदा न बहुकृतमपकृतं स्यात्' इति निर्भरं[8] निर्भर्त्स्य दुर्नयगरलभुजङ्गं कडारपिङ्गं कुट्टिनीमनोरथातिथिसत्रिण[9]मुग्रसेनमन्त्रिणं च निखिलजनसमक्षमा[10]क्षारणापूर्वकं [11]प्रावासयत् । दु[12]ष्प्रवृत्तानङ्गमातङ्गः कडारपिङ्गस्तथा प्रजाप्रत्यक्षमाक्षारितः सुचिरमेतदेनःफलमनुभूय वशमीस्थ[13] सन् श्वभ्रप्रभवभाजनं[14] जनमभजत ।

भवति चात्र श्लोकः—

राजा—'पुष्य ! मन्त्री को रहने दो, तुम सब समाचार कहने के योग्य हो ।'

पुष्य—'स्वामी ! मेरी पत्नी ही प्रस्तुत घटना के कथन करने में समर्थ है ।'

राजा ने पद्मा को बुलाकर कहा—'माता ! यह क्या घटना है ?'

पद्मा ने सब बीता हुआ वृत्तान्त कह दिया ।

वृत्तान्त सुनकर राजा नट-सरीखा उत्कट हर्ष की और विशेष क्रोध की दशा का अनुभव कर रहा था । उसने समस्त अन्तःपुर की सौभाग्यवती स्त्रीजनों द्वारा नमस्कार किये गए चरण-कमल वाली पद्मा की पतिव्रता स्त्री जनों के हृदयों में आनन्द उत्पन्न करने वाले वचनों द्वारा और सन्मान के समीपवर्ती वस्त्र व आभूषणों के प्रदान द्वारा सन्मानित करके उसे वेदार्थ जानने वाले ब्राह्मणों द्वारा स्कन्ध से वहन किये जाने वाले रथ में बैठाकर उसके गृह में प्रविष्ट कराया । पश्चात् कुट्टिनी धाय का और कडारपिङ्ग का अत्यन्त तिरस्कार करते हुए बोला—'अरे नीच ! क्या इस नगर में समस्त जनों द्वारा सार्वजनिक रूप से सम्भोगवालीं सुन्दर वेश्याएँ नहीं हैं ? जिसके कारण तूने ऐसा अनैतिक आचरण किया । अरे दुराचारी ! ऐसा आचरण करता हुआ तू यहाँ मरण प्राप्त कर क्यों नहीं मरता ? अतः यदि इस समय मैं तुझे तृणाङ्कुर-सरीखा नष्ट करता हूँ, तो यह तेरा विशेष अपकार नहीं होगा ।'

इस प्रकार अत्यन्त तीक्ष्ण तिरस्कार करके अनीति रूपी जहरीले साँप-सरीखे कडारपिङ्ग को और कुट्टिनी धाय के मनोरथरूपी अतिथि के यजमान उग्रसेन मन्त्री को समस्त लोक के समक्ष विशेष आक्रोश-पूर्वक देश से निर्वासित कर दिया—निकाल दिया । इस प्रकार कडारपिङ्ग, जिसका कामदेवरूप चाण्डाल निन्द्य कार्य में संलग्न है, व्यभिचार के कारण प्रजाजनों के समक्ष तिरस्कृत होकर चिरकाल तक इस पाप का फल भोगता रहा फिर मरकर नरक लोक में गया ।

इस विषय में एक श्लोक है, उसका अर्थ यह है—

---

१. भट्टिनी । २. समर्था भवति । ३. नटाचार्यवत् । ४. स्कन्धेनोह्यमानो रथः विमानाख्यः । उक्तं च—कर्णीरथः प्रवहणं डयनं च समं त्रयम् । ५. गृहं प्रवेश्य । ६. विनाशं गत्वा किं न विनष्टोऽसि ? । ७. हिनस्मि । ८. अतिखरं । ९. सत्री यजमानः, यजमानं । १०. 'आक्रोशः' टि० ख०, यश० पं० तु आक्षारणा परिभवः । ११. निर्द्धाटितः । १२. दुष्टप्रवृत्तः अनङ्ग एव मातङ्गो यस्य । १३. मृतः सन् । १४. स्थानं नरकलोकं श्रितः इत्यर्थः ।

मन्मथोन्माथितस्वान्तः परस्त्रीरतिजातधीः । कडारपिङ्गः संकल्पान्निपपात रसातले ॥१६२॥

इत्युपासकाध्ययनेऽब्रह्मफलस्फारणो नामैकत्रिंशत्तमः कल्पः ।

ममेदमिति संकल्पो बाह्याभ्यन्तरवस्तुषु । *परिग्रहो मतस्तत्र कुर्याच्चेतोनिकुञ्चनम्[1] ॥१६३॥

*क्षेत्रं धान्यं धनं वास्तु [2]कुप्यं शयनमासनम् । द्विपदाः पशवो [3]भाण्डं बाह्या दश परिग्रहाः ॥१६४॥

समिथ्यात्वास्त्रयो वेदा[4] हास्यप्रभृतयो[5]ऽपि षट् । चत्वारश्च कषायाः स्युरन्तर्ग्रन्थाश्चतुर्दश ॥१६५॥

अथवा चेतनाचेतनासङ्गाद्द्विधा बाह्यपरिग्रहः । अन्तः स एक एव स्याद्भवहेत्वाशयाश्रयः[6] ॥१६६॥

[7]धनायाविद्धबुद्धीनामधनाः[8] स्युर्मनोरथाः । न ह्यनर्थक्रियारम्भा[9] धीस्तदर्थिषु कामधुक्[10] ॥१६७॥

सहसंभूतिरप्येष देहो यत्र न शाश्वतः । द्रव्यदारकदारेषु तत्र कास्था[11] महात्मनाम् ॥१६८॥

स श्रीमानपि निःश्रीकः स नरश्च नराधमः । यो न धर्माय भोगाय विनयेत[12] धनागमम् ॥१६९॥

काम से पीड़ित चित्तवाला और परस्त्री के साथ रति-विलास करने के लिए उत्पन्न हुई बुद्धिवाला कडारपिङ्ग परस्त्री-गमन के संकल्पमात्र से नरक भूमि में गिरा ॥१६२॥

इस प्रकार उपासकाध्ययन में कुशील के कटुक फल की प्रचुरतावाला यह इकतीसवाँ कल्प समाप्त हुआ ।

[अब परिग्रहपरिमाणाणुव्रत का निरूपण करते हैं]

वाह्य (धन व धान्य-आदि) और आभ्यन्तर (मिथ्यात्व-आदि) पदार्थों में 'यह मेरा है' इस प्रकार के संकल्प को परिग्रह कहते हैं, उसके विषय में मनोवृत्ति को संकुचित करनी चाहिए ॥१६३॥ खेत, धान्य, धन, गृह, कुप्य (वस्त्र व कम्बल-आदि), शय्या, आसन, द्विपद (दासी-दास), पशु, और भाजन ये दश वाह्य परिग्रह हैं ॥१६४॥ मिथ्यात्व, पुँवेद, स्त्रीवेद, नपुंसकवेद, हास्य, रति, अरति, शोक, भय, जुगुप्सा, क्रोध, मान, माया व लोभ ये चौदह अन्तरङ्ग परिग्रह हैं ॥१६५॥ अथवा—चेतन व अचेतन के भेद से वाह्य परिग्रह दो प्रकार का है और संसार के कारणों के आश्रयवाला परिणाम अन्तरङ्ग परिग्रह है, जो कि एक ही प्रकार का है। अर्थात्—संसार के कारण मिथ्यात्वादि चैतन्यरूप परिणाम ही हैं आधार जिसके वह अन्तरङ्ग परिग्रह एक ही प्रकार का है ॥१६६॥ धन की तृष्णा से व्याकुलित बुद्धिवालों के मनोरथ निष्फल (धन-हीन) होते हैं; क्योंकि धन चाहनेवालों को निरर्थक वाञ्छावाली बुद्धि वाञ्छित (अभिलषित—मनचाही) वस्तु देनेवाली नहीं होती। अर्थात्–इच्छामात्र से धन प्राप्त नहीं होता, क्योंकि आचार्यों ने धन-प्राप्ति का कारण लाभान्तराय का क्षयोपशम बतलाया है; अतः धन-प्राप्ति के विषय में आर्तध्यान नहीं करना चाहिए ॥१६७॥ जिस संसार में साथ उत्पन्न हुआ यह शरीर भी स्थायी (नित्य रहनेवाला) नहीं है वहाँपर शरीर से भिन्न धन, पुत्र व स्त्रियों में महात्माओं की आस्था (श्रद्धा) कैसे हो सकती है ? ॥१६८॥

जो मानव दान व पुण्य-आदि धर्म की प्राप्ति के लिए और न्याय-प्राप्त भोगों के भोगने के लिए संचित

---

*. 'मूर्च्छा परिग्रहः'—मोक्षशास्त्र अ० ७-१७ । १. संकोचः । *. 'वास्तु क्षेत्रं धनं धान्यं दासी दासं चतुष्पदं भाण्डम् । परिमेयं कर्तव्यं सर्वं सन्तोषकुशलेन ॥ ७३ ॥ —अमि० श्रा० ६ । २. 'वस्त्रादि' टि० ख०, 'वस्त्रकम्बलादि' टि० च० एवं यश० पं० । ३. लोहकर्पूरतैलादि । ४. स्त्रीपुंनपुंसकभावाः । ५. हास्यरत्यरतिशोकभयजुगुप्साः । ६. संसाराश्रयपरिणामः । ७. 'धनगर्द्धवाञ्छा' टि० ख०, यश० पं० तु 'धनायाविद्धः गर्द्धः । ८. निष्फलाः । ९. वाञ्छामात्रा । १०. वाञ्छितप्रदा मतिर्न स्यात् । ११. वाञ्छा । १२. न उपयोगी कुर्यात् ।

प्राप्तेऽर्थे ये न माद्यन्ति नाऽप्राप्ते स्पृहयालवः । लोकद्वयाश्रितां श्रीणां त एव परमेश्वराः ॥१७०॥

*वित्तस्य [1]वित्तचिन्तायां न फलं परमेनसः[2] । अस्थाने क्लिश्यमानस्य न हि क्लेशात्परं फलम् ॥१७१॥

अन्तर्बहिर्गते सङ्गे निःसङ्गं यस्य मानसम् । सोऽगण्यपुण्यसंपन्नः सर्वत्र सुखमश्नुते ॥१७२॥

बाह्यसङ्गरते पुंसि कुतश्चित्तविशुद्धता । सतुषे हि बहिर्धान्ये दुर्लभान्तर्विशुद्धता ॥१७३॥

सत्पात्रविनियोगेन[3] योऽर्थसंग्रहतत्परः । लुब्धेषु स परं लुब्धः सहामुत्र धनं नयन्[4] ॥१७४॥

कृतप्रमाणाल्लोभेन धनादधिकसंग्रहः । पञ्चमाणुव्रतज्यानिं[5] करोति गृहमेधिनाम् ॥१७५॥

यस्य [6]द्वन्द्वद्वयेऽप्यस्मिन्निस्पृहं देहिनो मनः । स्वर्गापवर्गलक्ष्मीणां क्षणात्पक्षे स दक्षते[7] ॥१७६॥

अत्यर्थमर्थकाङ्क्षायामवश्यं जायते नृणाम् । अघसंघचितं चेतः संसारावर्तगर्तगम् ॥१७७॥

श्रूयतामत्र परिग्रहाग्रहस्योपाख्यानम्—

धन का उपयोग नहीं करता, वह धनाढ्य होकर के भी दरिद्र है और मनुष्य होकर के भी मनुष्यों में नीच है ॥ १६९ ॥ प्राप्त हुए धन में अभिमान न करने वाले व अप्राप्त धन की वाञ्छा न करने वाले मानव ही दोनों लोकों में प्राप्त होने वाली लक्ष्मियों के उत्कृष्ट स्वामी होते हैं ॥ १७० ॥ जब मानव का चित्त धन-प्राप्ति के लिए चिन्तित होता है तब उसे पापबन्ध के सिवाय दूसरा फल प्राप्त नहीं होता; क्योंकि निस्सन्देह अयोग्य स्थान में क्लेशित होने वाले व्यक्ति को कष्ट के सिवा दूसरा फल प्राप्त नहीं होता ॥ १७१ ॥ जिसका विशुद्ध मन वाह्य व आभ्यन्तर परिग्रह में अनासक्त या मूर्च्छा-रहित है, वह अगण्य (अनगिनती) पुण्य-राशि से युक्त हुआ सर्वत्र (इस लोक व परलोक में) सुख प्राप्त करता है ॥ १७२ ॥ जिस प्रकार निस्सन्देह छिलका-सहित वाहिरी धान्य में भीतरी निर्मलता दुर्लभ होती है उसी प्रकार वाह्य परिग्रह में आसक्त हुए मानव में चित्त की विशुद्धि किस प्रकार हो सकती है ? ॥ १७३ ॥ जो सत्पात्रों के लिए दान देकर धन के संचय करने में तत्पर है, वह उस धन को अपने साथ परलोक में ले जाता है अतः वह लोभियों में महा लोभी है।

भावार्थ—प्रस्तुत आचार्यश्री ने अपने 'नीतिवाक्यामृत' के धर्म समुद्देश में भी लिखा है—'स खलु लुब्धो यः सत्सु विनियोगादात्मना सह जन्मान्तरेषु नयत्यर्थम्' ॥ १८ ॥ अर्थात्—जो मनुष्य सज्जनों के लिए दान देकर अपने साथ परलोक में धन ले जाता है, वही निश्चय से सच्चा लोभी है, अभिप्राय यह है, कि धन का लोभी लोभी नहीं है, किन्तु जो उदार है, उसे सच्चा लोभी कहा गया है; क्योंकि पात्रदान के प्रभाव से उसकी सम्पत्ति अक्षय होकर उसे जन्मान्तर में मिल जाती है ॥१७४॥

लोभ में आकर परिमाण किये हुए धन से अधिक धन का संचय करने वाला मानव श्रावकों के परिग्रह परिमाण नाम के अणुव्रत की हानि करता है ॥ १७५ ॥ जिस मानव का चित्त अन्तरङ्ग और वहिरङ्ग परिग्रहों में निस्पृह (लालसा-शून्य) है, वह क्षणभर में स्वर्गश्री व मुक्तिश्री के पक्ष (स्वीकार करने) में दक्ष (चतुर) होता है ॥ १७६ ॥ धन की अत्यधिक तृष्णा होने पर मनुष्यों का मन अवश्य ही पाप-समूह का संचय करता हुआ उन्हें संसाररूपी भँवर के गड्ढे में गिरा देता है ॥ १७७ ॥

अब परिग्रह की तृष्णा वाली कथा श्रवण कीजिए—

---

*. वित्तार्थचित्तचिन्तायां न फलं परमेनसः । अतीवोद्योगिनोऽस्थाने न हि क्लेशात् परं फलम् ॥ ६३ ॥ —धर्मरत्ना० पृ० ९६ । १. धन । २. पापात् भिन्नं फलं न, किन्तु पापमेव भवति । ३. दानयोगेन । ४. 'स खलु लुब्धो यः सत्सु विनियोगादात्मना सह जन्मान्तरेषु नयत्यर्थम् ॥ १८ ॥—नीतिवाक्यामृत, धर्म, सूत्र १८ पृ० २६. । ५. हानिं । ६. परिग्रहद्वये । ७. दक्षः स्यात् ।

पञ्चालदेशेषु त्रिदशनिवेशानुकूलोपशल्ये[1] काम्पिल्ये निजमतिमाहात्म्योपहसितामराचार्यप्रतिभो[2] रत्नप्रभो नाम नृपतिः। आत्मीयकपोलकान्तिविजितामृतमरीचिमण्डला मणिकुण्डला नामास्य महादेवी। कुलक्रमागतात्मोपार्जितामितवित्तः सागरदत्तो नाम श्रेष्ठी। गृहस्य श्रीरिव धनश्रीर्नामास्य भार्या। सूनुरनयोर्न्याय्यार्थोपार्जनैकचित्तः सुदत्तो नाम। स महालोभविभावसुज्वलच्चित्तभित्तिः सागरदत्तः पुरुषपरम्परायातायाः काञ्चनकोटेरेकस्याः *. स्वयमुपार्जितार्धकोटेः पतिर्भवन्नपि शालीयादिभक्तभोजने[3] हितयतुषापनीति[4]र्धावना[5]स्रावणकृतिश्च, शाकपाकविधाने संभाराविक्षतिः[6] [7]प्रसभान्यबहुतिश्च,[8]घार्तपूरपू[9]रिमावेष्टिमादिभक्ष्योपक्षेपे महती स्नेहापहृतिरिन्धनविरतिश्च, दुग्धदधिघोलरसाद्युपयोगे, न विक्रयाय घृतं न च तक्रं [10]कडङ्करायेति च मन्यमानः स्वयमेव प्रतिदिवसवृद्धि[11]ग्रहणाय [12]ध्वजलोकपाटके विहरमाणः [13]प्रतिपितृप्रिय[14]यन्त्रमुपसृत्य 'आः[15], सुरभिः खल्वेष खलः संजातः' इति सस्मेरं व्याहरन्, गृहीतपिण्डखण्डः[16] [17]प्रत्यवसानसमये तद्गन्धमाजिघ्रन्सन्, सर्वलोकपरिहृत[18]मनवधिकालोचित[19]मतिसमर्घतां गतमकण्डितमेव[20] च स्थालीविलीयं भवति[21] तत्केवला[22]म्लिसोमसहायमाहरति। अत एवास्य[23] महामोहानुबन्धस्य[24] पिण्याकगन्ध इति

१७. लोभी पिण्याकगन्ध की कथा

पञ्चालदेश के स्वर्ग की अनुकूलता के निकटवर्ती काम्पिल्य नगर में अपनी बुद्धि के माहात्म्य से बृहस्पति की प्रतिभा को तिरस्कृत करने वाला 'रत्नप्रभ' नामका राजा था। अपने गालों की मनोज्ञ कान्ति द्वारा चन्द्रमण्डल को जीतने वाली 'मणिकुण्डला' नाम की उसकी पट्टरानी थी। वहाँ पर वंशपरम्परा से प्राप्त हुई व स्वयं कमाई हुई अपरिमित लक्ष्मी का स्वामी 'सागरदत्त' नामका नगरसेठ था। उसकी गृहलक्ष्मी-सी 'धनश्री' नामकी पत्नी थी। इनके न्यायपूर्वक धन कमाने में एकाग्रचित्त वाला 'सुदत्त' नामक पुत्र था।

महालोभरूपी अग्नि में अपनी चित्तरूपी भित्ति को प्रज्वलित करनेवाला सागरदत्त सेठ यद्यपि वंश परम्परा से प्राप्त हुई एक करोड़ सुवर्णमुद्राओं का और स्वयं कमाई हुई अर्धकरोड़ सुवर्णमुद्राओं का स्वामी था, तथापि वह सोचता था, कि धान्य-आदि का भात खाने में उसके छिलके दूर करने होंगे और प्रक्षालन और पसावण करना पड़ता है। यदि शाक पकाया जाय तो तैल व मिर्च-मसाला-आदि में खर्च होता है और उसके साथ अधिक अन्न भी खाया जायगा और घेवर, पुड़ी व जलेबी-आदि भक्षण-योग्य वस्तुओं के आक्षेप में प्रचुर घी नष्ट होता है और ईंधन का व्यय होता है। इसी प्रकार दूध, दही, तक्र (मट्ठा) के उपयोग (भक्षण) करने से न तो बेंचने के लिए घी रहेगा और न धान्य की भूसी के लिए छाँछ ही रहेगी।

अतः जब वह स्वयं प्रतिदिन व्याज वसूल करने के लिए तेलियों के समूह के मुहुल्ले में पर्यटन करता था तो उनके कोल्हू के समीप जाकर जरा हँसकर कहता 'वाह निस्सन्देह यह खली तो सुगन्धित निकली है' ऐसा कहकर वह तिल की खली का एक टुकड़ा उठा लेता था और भोजन-वेला में उसकी गंध सूँघता हुआ और ऐसी धान काँजी के साथ खाता था, जो कि समस्त लोगों द्वारा छोड़ी हुई, अतिजीर्ण, स्वल्प मूल्य वाली

१. समीपे। २. बृहस्पतिबुद्धिः। *. 'स्वयमुपार्जितस्य च तदर्धस्य च पतिर्भवन्नपि' क०। ३. सति वह्नौ हानिर्भवतीति मन्यमानः। ४. प्रक्षालन। ५. पसावण। ६. तैलमरीचादीनां व्ययः स्यात्। ७. 'प्रचुरान्नस्य भुक्तिः' टि० ख०, यश० पं० तु 'गृद्धिभोजनं'। ८. घेवर। ९. पूड़ी। १०. धान्यत्वगृनिमित्तं। ११. व्याज। १२. तिलंतुद, तैलिकाः। १३. पितृप्रियाः तिलाः। १४. यन्त्रं तिलपीलनयन्त्रं भाण्डं (घाणी)। १५. अत्र आः इति कोपेऽर्थे व्याजग्रहणार्थी। १६. खलः। १७. भोजनवेलायां। १८. अतिजीर्णं। १९. स्वल्पमूल्यं। २०. खंडनरहितं। २१. स्थालीविलीयं अर्हति। २२. काञ्जिकेन सहितं। २३. सागरदत्तस्य। २४. आसक्तेः।

अगति नाम पप्रथे। 'मुखामोदमात्रेण च प्रयोजनम्। तदलं ताम्बूलार्थमर्थव्ययेन' इति विचिन्त्य [1]विष्णुतरुत्वचः [2]कालवल्लीदलोत्तरास्वादरुचः कवलयति। [3]'अर्धप्राणोदरः परिवारः कदाचिदपि देहे हृदये वा न मनागपि विकुरुते' इति मत्वा न कमप्यूर्णपूरं पूरयति। [4]प्रतिचारकांश्चैवं शिक्षयति—'न तैलार्थं लवणार्थं वित्तं व्ययितव्यम्[5], किं तु [6]कार्षापणं मानं चादाय [7]आपणमुपढौक्य तदुभयं गृहीत्वा पुनरिदं [8]साधु न भवतीति प्रतिसमर्पयंस्तत्र मापे किंचिल्लग्नमायाति तेन शारीरो विधिर्विधातव्यः।' परिजनार्भकान् स्वकीयांश्चैवमुपजपति[9]—'न भवद्भिरङ्गाभ्यङ्गार्थं भवनमुपप्रोतव्यम्, किं तु सस्नेहदेहैः [10]प्रातिवेशिकशिशुसंदोहैः सहातिसंबाधं योद्धव्यम्। अतो भवतामनुपायसंनिधिः स्नानविधिः। क्षपायां च [11]प्रतिवेशवेश्मप्रदीपप्रभाप्रज्वलितेन [12]वलीकान्तावलम्बितेन [13]काचमुकुरेण गृहाङ्गणे ★प्रदीपकार्यं [14]निकाय्यमध्ये च सणसरण्ड[15]प्रोतं[16]विषमरुचिदीप्तं[17]रुबूकबीजैः करोति। सकलजनसाधारणाद्य [18]नवीनसङ्गा एव [19]युगाः सपरिच्छदः परिदधाति। मनाग्मलीमसरागाश्च विक्रीणीते। ततोऽस्य [20]वसनधावनार्थमपि न [21]कपर्दकोपक्षयः

और बिना कूटी काटी व थाली में स्थापित करते ही बिखरने वाली थी, अतएव तीव्र लोभ में आसक्त हुए इसका 'पिण्याकगन्ध' (खल सूँघने वाला) यह नाम लोक में प्रसिद्ध हुआ।

'मुख को सुगन्धित करने मात्र से ही तो प्रयोजन है; अतः ताम्बूल के लिए धन खर्च करना निरर्थक है' ऐसा सोचकर वह पीपल की छालों को भक्षण करता था, जिनकी रुचि बैर के या वावची के पत्तों के पश्चात् खाने से होती है।

'आधे पेट खाने वाला कुटुम्ब कभी भी [गृह-स्वामी से] शरीर व मन द्वारा जरा भी विकृत (वैर विरोध करने वाला) नहीं होता' ऐसा मानकर वह किसी कुटुम्बी को भरपेट भोजन नहीं देता था। वह अपने सेवकों के लिए इस प्रकार की शिक्षा देता था कि 'तैल व नमक-आदि साधारण वस्तुओं के लिए धन नष्ट नहीं करना चाहिए, पैसा व वर्तन लेकर बाजार में जाना चाहिए और तैल व नमक लेकर बाद में यह अच्छा नहीं है, यह कहकर वापिस लौटा देना चाहिए जिससे वर्तन में कुछ तैल व नमक लगा रह जाता है, उससे मालिश वगैरह शारीरिक कार्य करना चाहिए।' वह अपने और कुटुम्ब के बच्चों से यह कहता था कि 'आप लोगों के लिए शरीर में मालिश करने के लिए मेरे गृह पर नहीं आना चाहिए किन्तु तैल की मालिश किये हुए पड़ोसियों के बालक-समूह के साथ आपस की विशेष रगड़पूर्वक कुश्ती लड़नी चाहिए, जिससे आपकी तैल-स्नान-विधि विना यत्न किए हो जायगी।

वह रात्रि में पड़ोसी के गृह के दीपकों की कान्ति से प्रकाशित हुए व गृह के उपरितन भाग पर लटके हुए काँच के दर्पण द्वारा अपने घर के आंगन में दीपक का कार्य करता था और पोचीलकड़ी-सन-शलाका-में पिरोये हुए व अग्नि द्वारा प्रदीप्त किये हुए एरण्ड के बीजों से घर के अन्दर प्रकाश करता था। वह सर्वसाधारण के उपयोग में आनेवाला नया (कोरा) वस्त्र-जोड़ा (टि० के अभिप्राय से सेला-जोड़ा)

---

१. पिप्पलछली। २. 'वावचीपत्र, पत्राणां पश्चाद्भोजनेन रुक् रुचिर्यासां ताः विष्णुतरुत्वचः' टि० ख०, पञ्जिकाकारस्तु 'कालवल्ली वदरी' इत्याह। ३. अर्द्धाहारेण। ४. उत्तरसाधकान्। ५. तैललवणादि सामान्यवस्तु-निमित्तं समीचीनं धनं कथं विनाश्यते ?। ६. मानं। ७. हट्टं गत्वा। ८. समीचीनं। ९. शिक्षयति। १०. पड़ोसी। ११. पड़ोसी-गृह। १२. गृहस्योपरितनभागे। १३. काच-दर्पणेन। ★. प्रदीपकार्यं सागरदत्तः श्रेष्ठी करोति। १४. गृहमध्ये। १५. भींडीदंड—पोचीलाकड़ी। १६. अग्नि। १७. एरण्डबीजैः। १८-१९. कोरावस्त्र-सेलाद्वय। २०. वस्त्रप्रक्षालनार्थं। २१. कौड़ी।

[1]पर्वाणि च [2]पुराणपल्लवकचवरापनयनकणोत्करेणातपतप्त[3]संघाटस्नेहद्रवेण [4]गुडगोणीक्षालनकषायेण च निर्वर्तयति[5]। प्रत्यामन्त्रणेन प्रविणव्ययात्[6]परागारभोजनावलोकनेनाखिलजनमनोविनाशभयाच्चामन्त्रितो न कस्यापि निकेतने [7]प्साति।

एवमतीवतर्षोत्कर्षरसहार्ये सकलकदर्याचार्ये[8] तस्मिञ्जीवत्यपि मृतकल्पमनसि वसति सति एकदा स लक्ष्मीकमलिनीपरिमलनकलभो रत्नप्रभो राजसिन्धुरप्रधावसंदर्शनप्रासादसंपादनाय [9]श्रवणाश्रयवृत्तस्य ब्रह्मदत्तस्य महीपतेः कालेन स्थण्डिलतालुप्तावकाशे भवनप्रदेशे भूशोधनं विधापयन्नेतदास्थानमण्डपाभोगबन्धबुधः[10] प्रकामोषरदोषकलुषवपुषः संपूर्णविस्तारपुषः[11] प्रथिमगुणविशिष्टकाः[12] सुवर्णेष्टकाः समालोक्य बहिर्निकामं कलङ्कमलिनत्वादितरेष्टकाविशिष्टत्वमाकलयन् 'एताः खलु चैत्यालयनिर्माणाय योग्याः' इति[13] चेतसंकत्र स्तूपतामानाययामास।

अत्रान्तरे समस्त[14]मितंपचपुरोगमसगन्धः[15] पिण्याकगन्धः सरभसमापततामिष्टकावहतां[16]वैवधिकनिवहानां सायंसमये[17] मार्गविषये पतितामेकामिष्टकामवाप्य चलनक्षालनदेशे[18] न्यधात्। तत्र च[19] प्रतिघस्रमङ्घ्रिसंघर्षाद-

परिवार-सहित पहनता था और जैसे ही वे थोड़े मलिन होते थे, उन्हें बेंच देता था, जिससे कपड़े धोने में उसकी कोड़ी भी खर्च नहीं होती थी। वह दीपोत्सव-आदि पर्व, पुराने पत्तों को कूट कर और उनके रेशे निकालने से उत्पन्न हुई चूर्ण-राशि से और सूर्य की गर्मी से तप्त हुए संघाट—गुड़ांश—के तरल तैल द्वारा एवं गुड़ की फट्टी धोने से उत्पन्न हुए मधुर रस द्वारा व्यतीत करता था। बदले में दूसरों का निमन्त्रण करने से धन खर्च होगा एवं दूसरों के गृह का भोजन देखने से मेरे सेवकजनों के मन मुझ से टूट जाँयगे, इस भय से निमन्त्रण आने पर भी वह किसी के घर पर नहीं जीमता था। इस प्रकार अत्यन्त बढ़ी हुई तृष्णा से प्रेम करने वाला और सब कंजूसों का आचार्य वह पिण्याकगन्ध जीवित रहने पर भी मरे हुए-सरीखे मनवाला होकर निवास कर रहा था।

एक समय लक्ष्मीरूपी कमलिनी के मर्दन करने के लिए हाथी के बच्चा-सरीखे रत्नप्रभ राजा ने श्रेष्ठ हाथियों की दौड़ देखने के लिए एक राज-महल के निर्माण के लिए विचार किया और उसके लिए स्वर्गीय ब्रह्मदत्त राजा के महल-प्रदेश में, जिसकी जगह समय पाकर ढेर हो जाने से लुप्तप्राय हो गई थी, भूमि-शोधन कराई तब उसने ऐसी सुवर्ण की ईंटें देखीं, जो कि इसके विस्तृत सभागृह में लगीं हुईं थीं। जो अत्यन्त जमीन के ऊषर दोष से काली हो गईं थी। जो समस्त विस्तार को पुष्ट करने वाली थीं और जो पृथु गुण से विशिष्ट थीं (चौड़ी थीं), परन्तु वे बाहर से अत्यन्त मैल से मलिन थीं, इसलिए उसने दूसरी ईंटों की विशेषता निश्चय करते हुए 'निस्सन्देह ये ईंटें मन्दिर के निर्माण के लिए योग्य हैं' इस प्रकार मन में विचार कर एक स्थान पर उनका ढेर लगवा दिया।

इसी बीच में समस्त लोभियों में अग्रेसर-सरीखा पिण्याकगन्ध वेगपूर्वक आने वाले, ईंटों का भार-वहन करने वाले वँहगी उठाने वालों (कावड़िक) के समूहों की संध्या की वेला में मार्ग-प्रदेश पर गिरी हुई एक ईंट उठा लाया और उसे पैर-धोने के स्थान पर रख दी। वहाँ पर प्रत्येक दिन पैरों की रगड़ से जब उस

१. दीपोत्सवादीनि करोति। २. कड़वक्कलकणगणि ?। ३. सीधड़ा। ४. कोथली। ५. पर्वाणि करोति। ६. अन्यलोकगृहे भोजनं यद्येभिर्दृष्टं तदा मद्गृहे एते न स्थास्यन्ति इति भयात्। ७. न भुङ्क्ते। ८. लुब्धे। ९. मृतस्य। १०. ईदृशाः इष्टकाः। ११. विस्तारं पुष्णन्ति याः। १२. पृथु। १३. मनसि कृत्वा। १४. लुब्ध। १५. सदृशः। १६. 'भारवाहानां' टि० च०, 'वार्तावहो वैवधिकः, विविधः भारः पर्याहारो वा तं वहतीति वैवधिकः' टि० ख०, पञ्जिकायां तु 'वैवधिकाः परिस्कन्दाः काचवहाश्च एकार्थाः।' इति प्रोक्तं। १७. संध्यायां। १८. पादप्रक्षालनदेशे। १९. प्रतिदिनं।

शेषकालुष्यमोषे[1] भर्मनिर्मितत्वमवेत्य तैस्तैः प्रलोभनवस्तुभिः [2]कायवहानां विहितोपचारस्ताः[3] संगृह्णन् [4]सुतस्वस्रीयापायोदन्तः [5]स्फायमानमनोमन्युकृतान्तः[6] पिण्याकगन्धः 'पुत्र, निखिलकलावदातचित्त सुदत्त, भवत्पितृस्वसुः सुतशोकशङ्कुशमनाय मयावश्यं तत्र गन्तव्यमपस्नातव्यं[7] च। ततस्त्वयाप्येताः [8]परिस्कन्दलोकप्रलोभनेन साधु संगृहीतव्याः' इत्युपह्वरे[9] व्याहृत्य सकलजगद्व्यवहारावतारत्रिवेद्यां काकन्द्यां तोकशोकभूयिष्ठायास्तूर्णं कनिष्ठाया दर्शनार्थमगच्छत्। [10]असद्व्यवहारव्यावृत्तः सुदत्तः तातोपदेशमनिश्रेय[11] [11]समवस्यन्[12] यतो★ राजपरिगृहीतं तृणमपि गृहीतं काञ्चनीभवति संपद्यते च पूर्वोपार्जितस्याप्यर्थस्यापहाराय प्राणसंहाराय चेति जातमतिर्नैकामपीष्टकां समग्रहीत्।

महालोभलोलतान्धः पिण्याकगन्धस्तस्याः पुरोऽपस्नायाऽऽगतः सुतमप्राक्षीत्—'वत्स, कियतीः खलु त्वमिष्टकाततीः पर्यग्रहीः।'

स्तेययोगविनिवृत्तः सुदत्तः—'तात, नैकामपि।'

प्रादुर्भवद्दीर्घदुर्गतिदुरितबन्धः पिण्याकगन्धः समर्थे सदाचारकृतार्थे पुण्यभाजि तुजि परमुत्तरमपश्यन्, 'यदीमौ क्रमौ परिक्रमणक्षमौ मम नाभविष्यतां तदा [13]कथंकारमहं मन्मनोरथवन्ध्यां[14] काकन्द्यामगमिष्यम्। अतः [15]एताबे-

---

ईंट की समस्त मलिनता नष्ट हुई तब उसने उसे सुवर्ण की ईंट निश्चय की। फिर तो यह उन उन प्रलोभन वस्तुओं के प्रदान द्वारा उन वँहगी उठानेवालों की सेवा करके उनसे ईंटों का संग्रह करने लगा।

एक दिन पिण्याकगन्ध ने अपने भानेज की मृत्यु का समाचार सुना और इससे उसका मानसिक शोकरूपी यमराज बढ़ा, अतः उसने अपने पुत्र को एकान्त में बुलाकर कहा—

'समस्त कलाओं के अभ्यास से विशुद्ध चित्तवाले पुत्र सुदत्त! आपकी बुआ का पुत्र-वियोग संबंधी शोकरूपी कीला उखाड़ने के लिए मुझे वहाँ अवश्य जाना चाहिए और मृत-स्नान भी करना चाहिए। अतः तुम्हें इस कावड़िक-(वँहगी उठानेवाले) समूह के लिए प्रलोभन वस्तु के प्रदान द्वारा सोने की ईंटें; अच्छी तरह संग्रह करली चाहिए।' इस तरह एकान्त में कहकर पिण्याकगन्ध पुत्र के वियोग का प्रचुर शोक करनेवाली सबसे छोटी बहिन के दर्शनार्थ शीघ्र काकन्दी नगरी में गया, जो कि समस्त लोक-व्यवहार की उत्पत्ति में त्रिवेदी (प्रवीण) है।

यहाँ पर सुदत्त अन्याय से पराङ्मुख-दूरवर्ती-रहता था; अतः उसने अपने पिता का उपदेश संसार का कारण निश्चय करते हुए एक भी ईंट ग्रहण नहीं की; क्योंकि उसे ऐसी नैतिक बुद्धि उत्पन्न हो गई थी— 'जो मानव राजा का तृण भी चुरा लेता है, उसे उसके बदले में सुवर्ण देना पड़ता है; क्योंकि राजकीय साधारण वस्तु की चोरी तीक्ष्ण राज-दण्डवाली होने से पूर्व-संचित समस्त धन नष्ट कराने में व प्राणघात कराने में कारण होती है।'

महालोभ की तृष्णा से अन्धे पिण्याकगन्ध ने मृत-स्नान करके उस नगरी से आकर पुत्र से पूँछा— 'पुत्र! निस्सन्देह तुमने कितनी ईंटों का समूह संग्रह किया?'

चोरी के संबंध से पराङ्मुख हुए सुदत्त ने उत्तर दिया—'पिताजी! एक भी नहीं।'

घोर दुर्गति के कारण पाप का बंध करनेवाले पिण्याकगन्ध ने, कुटुम्ब-पालन में समर्थ, सदाचार से

---

१. विनाशे सति। २. भारवाहानां। ३. इष्टकाः। ४. भागिनेयमरण। ५. वृद्धिं जायमान। ६. शोकयमः। ७. मृतस्नानं कर्तव्यं। ८. कावड़िक। ९. एकान्ते। १०. अन्यायपराङ्मुखः। ११. संसारकारणं। १२. जानन्। ★. देखिए—'नीतिवाक्यामृत' व्यसन समुद्देश सूत्र २८ पृ० २४४। (हमारी भाषाटीका)—सम्पादक। १३. केन कारणेन। १४. कारायां। १५. पादौ।

यात्र श्रीविरामावहौ प्रोहौ' इति विचिन्त्योद्वर्तनं वर्तयन्त्याः स्ववासिन्याः कराद्गृहीतशरीरेण[1] शिलापुत्रकेण[2] तौ जर्जरितावजीजनत् ।

एतच्च [3]वैदेहिकव्यञ्जनपरिजनात्प्रा[4]चीनबर्हिर्निभः क्षितिरमणीकरिणीभः रत्नप्रभः श्रुत्वा [5]वासीवक्त्रेण शिल्पिभिर्वि[6]घापितेष्टकातक्षणः[7] सुवर्णत्वं निर्णीय विहित[8]सर्वस्वापहारं सनिकारं[9] नगरजनोच्चार्यमाणदुरपवादप्रबन्धं पिण्याकगन्धं [10]निरवासयत् । 'इन्द्रयमस्थानं हि गुणदोषयोर्महीपतयः' इति नीतिवाक्यमनुस्मृत्य मूलधनप्रदानेनान्वयागत[11]निवासनिवेदनेन च परद्रव्यादाननिवृत्तं सुदत्तं साधु समाश्वासयत् । स तथा निर्वासितः संजातनरकनिपात[12]निबन्धः कृतप्रकामलोभसंबन्धश्चिरायोपार्जितदुरन्तदुष्कर्मस्कन्धः पिण्याकगन्धः प्रेत्य[13] पातालमगात् ।

भवति चात्र श्लोकः—

षष्ठ्याः क्षितेस्तृतीये[14]ऽस्मिल्लल्लके दुःखमल्लके । पेते पिण्याकगन्धेन धनायाविद्धचेतसा ॥१७८॥

इत्युपासकाध्ययने परिग्रहाग्रहफलफुल्लनो नाम द्वात्रिंशः कल्पः ।

सफल जन्मवाले एवं पुण्यवान् पुत्र के कहने पर जब कोई सन्तोषजनक उत्तर नहीं जाना तब 'यदि ये मेरे दोनों पैर चलने में समर्थ न होते, तो मैं मेरे मनोरथ की बन्दीगृह (जेलखाना) काकन्दी नगरी में किस प्रकार से जाता ? इसलिए ये दोनों पैर ही लक्ष्मी रोकनेवाले व पापी हैं' ऐसा सोचकर उसने उबटन पीसनेवाली अपनी पत्नी के हाथ से ग्रहण की हुई पीसने की सिल द्वारा अपने दोनों पैर तोड़ डाले।

इन्द्र-सरीखे व पृथिवीरूपी स्त्री को प्रमुदित करने के लिए हथिनी को हाथी-जैसे रत्नप्रभ राजा ने वणिक् वेषी गुप्तचर के मुख से उक्त घटना सुनकर टाँकी के अग्रभाग से शिल्पियों द्वारा उन ईंटों को कटवाया तो उसने उन्हें सोने की निश्चय कीं। तब उसने पिण्याकगन्ध का समस्त धन जब्त कर लिया और उसे नागरिकजनों द्वारा कथन किये गए निन्द्य अपकीर्ति के प्रबन्ध वाला करके बेइज्जतपूर्वक देश से निकाल दिया।

राजालोग गुणवान् के लिए इन्द्र हैं और दुष्ट के लिए यमराज हैं।' इस नीति-वाक्य का स्मरण करके राजा रत्नप्रभ ने चोरी से पराङ्मुख हुए उसके सुदत्त पुत्र के लिए मूलधन के प्रदान द्वारा और वंश परम्परा से चले आनेवाले आवास की अनुमति द्वारा अच्छी तरह आश्वासन दिया।

देश से निकाला जाकर पिण्याकगन्ध अत्यन्त लोभ का संबंध करने के कारण नरक-पतन का बंध करके और चिरकाल तक दारुण दुःखदायक पाप-समूह का संचय करके मरकर नरक गया।

प्रस्तुत विषय के समर्थक श्लोक का अर्थ यह है—

धन के लिए भ्रान्त चित्तवाला पिण्याकगन्ध षष्ठम नरक के तीसरे लल्लक नामके पाथड़े में, जो कि भयानक और दुःख का पात्र है, गिरा ॥ १७८ ॥

इस प्रकार उपासकाध्ययन में परिग्रह में आसक्ति का फल विस्तृत करनेवाला
यह बत्तीसवाँ कल्प समाप्त हुआ।

---

१. गृहीत। २. 'नीसात्रेण' टि० ख० 'पेषणपाषाणेन' इति पं०। ३. 'वणिक्प्रौढमुखात्' टि० ख०, 'वैदेहिकव्यञ्जनः वणिग्वेषः राजप्रणिधिः' इति यश० पं०। ४. इन्द्रसमानः। ५. टाँकी। ६. कारित। ७. तनूकरणं। ८. धन। ९. निकारो विप्रकारः स्यात् विरूपकविधिनेत्यर्थः। १०. निर्धाटितवान्। ११. आवासानुमतेन। १२. पतन। १३. मृत्वा। १४. षष्ठमनरकस्य तृतीये प्रस्तारे।

*दिग्देशानर्थदण्डानां विरतिस्त्रितयाश्रयम् । गुणव्रतत्रयं सद्भिः सागारयतिषु स्मृतम् ॥१७९॥
[1]दिक्षु सर्वास्वधःप्रोर्ध्वदेशेषु निखिलेषु च । एतस्यां दिशि देशेऽस्मिन्नियत्येवं[2] गतिर्मम ॥१८०॥
[3]दिग्देशनियमादेवं ततो बाह्येषु वस्तुषु । हिंसालोभोपभोगादिनिवृत्तेश्चित्तयन्त्रणा ॥१८१॥
रक्षन्निदं प्रयत्नेन गुणव्रतत्रयं गृही । आज्ञैश्वर्यं लभेतैष यत्र यत्रोपजायते ॥१८२॥
[4]आशादेशप्रमाणस्य गृहीतस्य व्यतिक्रमात्[5] । देशव्रती प्रजायेत प्रायश्चित्तसमाश्रयः ॥१८३॥
[6]शिखण्डिकुक्कुटश्येनबिडालव्यालबभ्रवः[7] । विषकण्टकशस्त्राग्निकशापाशकरज्जवः ॥१८४॥
[8]पापाख्यानाशुभाध्यान[9]हिंसाक्रीडावृथाक्रियाः[10] । परोपतापपैशून्यशोकाक्र[11]न्दनकारिता ॥१८५॥
वधबन्धनसंरोधहेतवोऽन्येऽपि चेदृशाः । भवन्त्यनर्थदण्डाख्याः सांप[12]रायप्रवर्धनात् ॥१८६॥

[अब गुणव्रतों का वर्णन करते हैं]

सज्जन आचार्यों ने दिग्व्रत, देशव्रत व अनर्थदण्डव्रत के भेद से गृहस्थ व्रतियों के तीन गुणव्रत निरूपण किये हैं ॥ १७९ ॥

दिग्व्रत व देशव्रत का लक्षण—

पूर्व व पश्चिम-आदि समस्त दशों दिशाओं में से अमुक दिशा में नियमित गमन करना, अर्थात्—अमुक दिशा में जन्मपर्यन्त इतने योजन या इतने कोश तक ही जाऊँगा, उससे बाहर न जाना दिग्व्रत है और (दिग्विरति के भीतर कुछ समय के लिए) अधः व ऊर्ध्व-आदि समस्त देशों में से अमुक देश में ही मेरा नियमित गमन होगा, इससे बाहर नहीं जाऊँगा, यह देशव्रत है ॥ १८० ॥

इन व्रतों से लाभ—

इस प्रकार दिशा और देश का नियम करने के कारण अवधि से बाहर की भोगोपभोग वस्तुओं में हिंसा, लोभ व उपभोग-आदि का त्याग हो जाने से चित्त काबू में होता है या मनोनिग्रह होता है ॥ १८१ ॥ तीनों गुणव्रतों की प्रयत्नपूर्वक रक्षा करता हुआ यह व्रती श्रावक जहाँ जहाँ जन्म लेता है वहाँ वहाँ आज्ञा व ऐश्वर्य प्राप्त करता है ॥ १८२ ॥ दिशा और देश के किये हुए प्रमाण का उल्लंघन करने से (उससे बाहर चले जाने से) दिग्व्रती व देशव्रती को प्रायश्चित्त लेना पड़ता है ॥ १८३ ॥

अब अनर्थदण्ड व्रत का निरूपण करते हैं—मयूर, मुर्गा, बाज, बिलाव, सर्प और नेवला-आदि हिंसक जन्तुओं का पालना, विष, काँटा, शस्त्र, अग्नि, चाबुक, जाल व रस्सी-आदि हिंसा के साधनों को दूसरों को देना, पाप का उपदेश देना, आर्त व रौद्रध्यान करना, हिंसा-प्रधान क्रीड़ा करना, निष्प्रयोजन पृथिवी-खोदना-आदि, दूसरों को कष्ट देना, चुगली करना, शोक करना व दूसरों को रुलाना एवं इसी प्रकार के दूसरे कार्य करना, जो कि प्राणियों का बध, बंधन करनेवाले हैं और दूसरे के रोक रखने में कारण हैं, उन्हें अनर्थ दण्ड कहते हैं, क्योंकि

---

*, 'दिग्देशानर्थदण्डविरति—' । मोक्षशास्त्र ७–२१ । १. 'दिग्वलयं परिगणितं कृत्वातोऽहं बहिर्न यास्यामि । इति संकल्पो दिग्व्रतमामृत्यणुपापविनिवृत्त्यै ॥ ६८ ॥'—रत्नकरण्ड श्रा० । २. इयती—नियमिता । ३. 'अवधेर्बहिरणुपापप्रतिविरतेर्दिग्व्रतानि धारयताम् । पञ्चमहाव्रतपरिणतिमणुव्रतानि प्रपद्यन्ते ॥ ७० ॥'—रत्न० । ४. दिशा । ५. लंघनात् । ६. 'मण्डलविडालकुक्कुट—इत्यादि ॥ ८१ ॥ अमितगति० ६-८१ । 'विषकण्टकशस्त्राग्निरज्जुकशादण्डादि हिंसोपकरणप्रदानं हिंसाप्रदानम् ।—सर्वार्थसिद्धि ७-२२ । ७. नकुल । ८. पापोपदेश । ९. आखेटकादि । १०. वृथाक्रियाः निष्प्रयोजनं भूखननं, जलस्फालनं, अनलसमेन्धनं, पवनकरणमेकेन्द्रियहिंसनं च । ११. क्रन्दितं रुदितं—क्रुष्टं । १२. संसार ।

पोषणं क्रूरसत्त्वानां हिंसोपकरणक्रियाम् । देशव्रती न कुर्वीत स्वकीयाचारचारुधीः ॥१८७॥
अनर्थदण्डनिर्मोक्षादवश्यं देशतो यतिः । [1]सुहृत्तां सर्वभूतेषु स्वामित्वं च प्रपद्यते ॥१८८॥
वञ्चनारम्भहिंसानामुपदेशात्प्रवर्तनम् । भाराधिक्याधिकक्लेशौ तृतीयगुणहानये ॥१८९॥

इत्युपासकाध्ययने गुणव्रतत्रयसूत्रणो नाम त्रयस्त्रिंशत्तमः कल्पः ।

इति सकलतार्किकलोकचूडामणेः श्रीमन्नेमिदेवभगवतः शिष्येण सद्योनवद्यगद्यपद्यविद्याधरचक्रचक्रवर्तिशिखण्डमण्डनीभवच्चरणकमलेन श्रीसोमदेवसूरिणा विरचिते यशोधरमहाराजचरिते यशस्तिलकापरनाम्नि महाकाव्ये सच्चरित्रचिन्तामणिर्नाम सप्तम आश्वासः ।

उनसे संसार की वृद्धि होती है ॥ १८४-१८६ ॥ अपना आचार उत्तम बनाने की बुद्धि-युक्त हुए देशव्रती श्रावक को हिंसक जीवों का पोषण नहीं करना चाहिए एवं हिंसा के उपकरणों को किसी के लिए नहीं देना चाहिए ॥ १८७ ॥

अणुव्रती श्रावक अनर्थ दण्डों का त्याग करने से अवश्य ही समस्त प्राणियों की मित्रता व उनका स्वामित्व प्राप्त करता है ॥ १८८ ॥ खोटा उपदेश देकर दूसरों को धोखा देना, आरम्भ और हिंसा का प्रवर्तन करना, शक्ति से अधिक बोझा लादना और अधिक कष्ट देना ये पाँच कर्म अनर्थदंड व्रत को हानि पहुँचाते हैं, अर्थात्—इनसे अनर्थ दण्डव्रत सदोष हो जाता है, अतः अणुव्रती श्रावक को इन कामों से दूर रहना चाहिए ॥ १८९ ॥

इस प्रकार उपासकाध्ययन में तीन गुणव्रतों का निरूपण करनेवाला यह तेतीसवाँ कल्प पूर्ण हुआ ।

इस प्रकार समस्त तार्किक-चक्रवर्तियों में चूडामणि (शिरोरत्न या सर्वश्रेष्ठ) श्रीमदाचार्य 'नेमिदेव' के शिष्य 'श्रीमत्सोमदेवसूरि' द्वारा, जिसके चरणकमल तत्काल निर्दोष गद्य-पद्यविद्याधर-समूह के चक्रवर्तियों के मस्तकों के आभूषण हुए हैं, रचे हुए 'यशोधर महाराज-चरित' में, जिसका दूसरा नाम 'यशस्तिलकचम्पू महाकाव्य' है, 'सच्चरित्र चिन्तामणि' नामका सप्तम आश्वास पूर्ण हुआ ।

---

१. सुहृत्ता मैत्री ।

अष्टम आश्वासः

आदौ सामायिकं कर्म प्रोषधोपासनक्रिया । [1]सेव्यार्थनियमो दानं शिक्षाव्रतचतुष्टयम् ॥ १ ॥
आप्तसेवोपदेशः स्यात्समयः समयार्थिनाम् । नियुक्तं तत्र यत्कर्म त[2]त्सामायिकमूचिरे ॥ २ ॥
[3]आप्तस्यासन्निधानेऽपि पुण्यायाकृतिपूजनम् । [4]तार्क्ष्यमुद्रा न किं कुर्याद्विषसामर्थ्यसूदनम्[5] ॥ ३ ॥
अन्तःशुद्धिं बहिःशुद्धिं विदध्याद्देवतार्चनम् । [6]आद्या [7]दौश्चित्यनिर्मोक्षादन्या[8] स्नानाद्यथाविधि ॥ ४ ॥
संभोगाय विशुद्ध्यर्थं स्नानं धर्माय च स्मृतम् । धर्माय तद्भवेत्स्नानं यत्रामुत्रोचितो विधिः ॥ ५ ॥
नित्यंस्नानं गृहस्थस्य देवार्चनपरिग्रहे । यतेस्तु [9]दुर्जनस्पर्शात्स्नानमन्यद्विगर्हितम् ॥ ६ ॥

इस प्रकार दार्शनिक-चूड़ामणि श्रीमदम्बादास शास्त्री, श्रीमत्पूज्य आध्यात्मिक सन्त श्री १०५ क्षुल्लक गणेशप्रसाद वर्णी न्यायाचार्य एवं वाराणसेय संस्कृत विश्वविद्यालय वाराणसी के भूतपूर्व साहित्य विभाग के अध्यक्ष 'न्यायाचार्य' 'साहित्याचार्य व कवि चक्रवर्ती श्रीमत्मुकुन्द शास्त्री खिस्ते के प्रधान शिष्य, नीतिवाक्यामृत के भाषाटीकाकार, सम्पादक व प्रकाशक, 'जैन न्यायतीर्थ, प्राचीन न्यायतीर्थ, काव्यतीर्थ, आयुर्वेद विशारद एवं महोपदेशक-आदि अनेक उपाधि-विभूषित, सागर-निवासी व परवार जैनजातीय श्रीमत्सुन्दरलाल शास्त्री द्वारा रची हुई श्रीमत्सोमदेवसूरि के 'यशस्तिलकचम्पू' महाकाव्य की 'यशस्तिलक दीपिका' नाम की भाषाटीका में 'सच्चरित्र चिन्तामणि' नामका सप्तम आश्वास पूर्ण हुआ।

[अब शिक्षाव्रतों को कहते हैं—]

सामायिक, प्रोषधोपवास, भोगोपभोग परिमाण और पात्रदान ये चार शिक्षाव्रत हैं ॥ १ ॥ सामायिक का स्वरूप-अर्हत्परमेष्ठी की पूजा करने का जो उपदेश है, उसे 'समय' कहते हैं एवं उसमें निर्धारित क्रियाकाण्डों (जिन-स्नपन, पूजा, स्तुति व जप-आदि) को शास्त्रकारों ने उसके इच्छुक श्रावकों का सामायिक व्रत कहा है ॥ २ ॥

मूर्तिपूजा का विधान—जिनेन्द्र भगवान् के न होने पर भी उनकी मूर्ति की पूजा पुण्यबंध के लिए होती है। गरुड़ के न होने पर भी क्या उसकी मुद्रा विष की शक्ति को नष्ट नहीं करती ? ॥ ३ ॥ विवेकी पुरुष को अन्तरङ्ग शुद्धि व वहिरङ्ग शुद्धि करके देवपूजा करनी चाहिए। चित्त से दुष्परिणामों के त्याग करने से अन्तरङ्ग शुद्धि होती है और विधिपूर्वक स्नान करने से वहिरङ्ग शुद्धि होती है ॥ ४ ॥ स्नान-विधि का निरूपण—भोजन के लिए, विशुद्धि के लिए और धर्म के लिए आचार्यों ने स्नान करना कहा है। जिसमें परलोक (स्वर्गादि) के योग्य कर्तव्य (दान, व्रत, पूजा व अभिषेक- आदि) किये जाते हैं, वह स्नान धर्म के लिए कहा गया है ॥ ५ ॥ देव-पूजा को स्वीकार करने के लिए गृहस्थ को सदा स्नान करना चाहिए और मुनि को

---

१. भोगोपभोगसंख्या। २. 'आसमयमुक्तिमुक्तं'—इत्यादि ॥ ९७ ॥ रत्नकरण्ड श्रा०। 'रागद्वेषत्यागान्निखिलद्रव्येषु साम्यमवलम्ब्य। तत्त्वोपलब्धिमूलं बहुशः सामायिकं कार्यम् ॥१४८॥'—पुरुषार्थ०। ३. तीर्थेशासन्निधानेऽपि प्रतिमा धर्महेतवे। वैनतेयस्य मुद्राऽपि विषं हन्ति न संशयः ॥२२२॥—प्रबोधसार। ४. गरुड़ः। ५. अपनोदनम्। ६. अन्तः शुद्धिः। 'मध्यशुद्धिं बहिः शुद्धिं विदध्यात्तदुपासने। पूर्वा स्यात् स्वान्तनैर्मल्यात् परा स्नानाद्यथाविधिः ॥२२३॥' —प्रबोध०७. 'दुष्परिणामपरिहारात्' टि० ख०, घ०, च०। पञ्जिकाकारस्तु 'दौश्चित्यमार्तरौद्रध्याने' इत्याह। ८. बहिः शुद्धिः। ९. दुर्जनश्चाण्डालरजःस्वलादिः।

वातातपादि*संसृष्टे भूरितोये जलाशये[1] । अवगाह्याचरेत्स्नानमतोऽन्यद्गालितं भवेत् ॥ ७ ॥
पादजानुकटिग्रीवाशिरःपर्यन्तसंश्रयम् । स्नानं पञ्चविधं ज्ञेयं यथादोषं शरीरिणाम् ॥ ८ ॥
ब्रह्मचर्योपपन्नस्य निवृत्तारम्भकर्मणः । यद्वा तद्वा भवेत्स्नानम[2]न्त्यमन्यस्य तद्द्वयम्[3] ॥ ९ ॥
*सर्वारम्भविजृम्भस्य[4] ब्रह्मजिह्मस्य[5] देहिनः । अविधाय बहिः शुद्धिं नाप्तोपास्त्यधिकारिता ॥ १० ॥
अद्भिः शुद्धिं निराकुर्वन्मन्त्रमात्रपरायणः । स मन्त्रैः शुद्धिभाग्नूनं भुक्त्वा [6]हत्वा *विहृत्य च ॥ ११ ॥
[7]मृत्स्नयेष्टकया वापि भस्मना गोमयेन च । शौचं तावत्प्रकुर्वीत यावन्निर्मलता[8] भवेत् ॥ १२ ॥
[9]बहिर्विहृत्य संप्राप्तो नानाचाम्य गृहं विशेत् । स्थानान्तरात्समायातं [10]सर्वं [11]प्रोक्षितमाचरेत् ॥ १३ ॥
[12]आप्लुतः [13]संप्लुतस्वान्तः शुचिवासोविभूषितः । [14]मौनसंयमसंपन्नः कुर्याद्देवार्चनाविधिम् ॥ १४ ॥

दुर्जन (कापालिक, रजस्वला व चाण्डालादि) से छू जाने पर ही स्नान करना चाहिए। यदि मुनि को दुर्जन का स्पर्श नहीं हुआ है, तो उसका स्नान निन्द्य है ॥ ६ ॥ प्रचुर जलराशिवाले व वहती हुई वायु से स्पर्श किये हुए और सूर्य की किरणों से सर्वरूप से स्पर्श किये हुए तालाब-आदि जलाशय में अवगाहन करके स्नान करना उचित है, किन्तु जिस जलाशय व कुआ-आदि का पानी धूप व वायु से स्पर्श किया हुआ नहीं है, उसे छानकर ही स्नान में प्रयोग करना चाहिए ॥ ७ ॥ स्नान पाँच प्रकार का जानना चाहिए। पैरों तक, घुटनों तक, कमर पर्यन्त, गर्दन तक और सिर तक। इनमें से मनुष्यों को उनके दोष के अनुसार स्नान करना चाहिए ॥ ८ ॥ जो ब्रह्मचारी है और सब प्रकार के आरम्भों (कृषि व व्यापारादि) का त्यागी है, उसे इनमें से कोई भी स्नान कर लेना चाहिए, किन्तु दूसरे गृहस्थों को तो कण्ठ पर्यन्त या मस्तक पर्यन्त स्नान करना चाहिए। अर्थात्—आरम्भ करने पर कण्ठ-स्नान और ब्रह्मचर्य के भङ्ग होने पर मस्तक-पर्यन्त स्नान करना चाहिए ॥९॥ जो समस्त प्रकार के आरम्भों (कृषि व व्यापार-आदि) में प्रवृत्त है और ब्रह्मचर्य के पालन में कुटिल है, उसे कण्ठ पर्यन्त व मस्तक पर्यन्त स्नान द्वारा वाह्यशुद्धि किये बिना देवोपासना का अधिकार नहीं है ॥ १० ॥

स्नान-हीन साधु की शुद्धि—

जल-स्नान से शुद्धि को निराकरण करता हुआ (जल-स्नान न करनेवाला) साधु केवल मन्त्र-मात्र के जप में तत्पर होता है; क्योंकि वह आहार, विहार व मल-मूत्रादि क्षेपण व दहन करके उनसे उत्पन्न हुए दोषों के निवारण करने के लिए निस्सन्देह मन्त्रों द्वारा शुद्ध हो जाता है, उसे जल-स्नान द्वारा वाह्य शुद्धि की आवश्यकता नहीं रहती ॥ ११ ॥ अतः प्रासुक व प्रशस्त मिट्टी से अथवा ईंट के चूर्ण से अथवा राख या गोवर से तब तक हस्तादि की शुद्धि करनी चाहिए, जब तक उनमें निर्मलता (शुद्धि) न आजाय ॥ १२ ॥ बाहर से घूम करके गृह पर आए हुए मानव को आचमन (कुल्ला) किये विना गृह में प्रवेश नहीं करना चाहिए। एवं अन्य स्थान से आई हुई समस्त वस्तुओं को जल-सिञ्चन से पवित्र करके व्यवहार में लानी चाहिए ॥ १३ ॥ गृही श्रावक को

*. 'संस्पृष्टे' इति मु० व क०। १. तड़ागादौ। २-३. क्रमेण ग्रीवा शिरः, कण्ठ शिरो वा स्नानं गृहस्थस्य, आरंभे सति कण्ठस्नानं, ब्रह्मभङ्गे सति मस्तकस्नानं। *. 'सर्वारम्भप्रवृत्तस्य' इति क०। ४. आरंभे प्रवृत्तस्य। ५. 'वक्रस्य' टि० ख०, पञ्जिकायां तु 'ब्रह्मचर्य-मन्दस्य' इति प्रोक्तं। ६. दहनं कृत्वा। *. 'विशुद्धय च' इति क०। ७. 'मृत्स्ना अजन्तुका भूमिः' पं०, 'प्रशस्तमृत्तिकया' टि० घ० च०। ८. गन्धलेपहानिः। ९. आचमेद्धौतहस्ताङ्घ्रिः पीते वारिणि सर्वदा। चतुराहारमुक्तौ च कृतायामुदकं पिवेत् ॥ १ ॥ १०. सर्वं वस्तु। ११. अभ्युक्षित्वा। १२. स्नातः। १३. संस्कृतचित्तः अथवा अव्यग्रचित्तः। १४. मौनसंयमसम्पन्नैर्देवोपास्तिर्विधीयताम्। दन्तधावनशुद्धास्यैर्धौतवस्त्रपवित्रितैः ॥२२६॥—प्रबोधसार।

दन्तधावनशुद्धास्यो मुखवासोचिताननः । असंजातान्यसंसर्गः सुधीर्देवानुपाचरेत् ॥ १५ ॥
[1]होमभूत[2]बली पूर्वैरुक्तौ *भक्तविशुद्धये । भुक्त्यादौ सलिलं [3]सर्पिरौदस्यं[4] च [5]रसायनम् ॥१६॥
एतद्विधिर्न धर्माय नाधर्माय तदक्रिया । दर्भपुष्पाक्षतश्रोत्रवन्दनादिविधानवत्[6] ॥ १७ ॥
द्वौ हि धर्मौ गृहस्थानां लौकिकः पारलौकिकः । लोकाश्रयो भवेदाद्यः [7]परः स्यादागमाश्रयः ॥ १८ ॥
जातयोऽनादयः सर्वास्तत्क्रियापि तथाविधा । श्रुतिः शास्त्रान्तरं वास्तु प्रमाणं कात्र नः क्षतिः ॥ १९ ॥
स्वजात्यैव विशुद्धानां वर्णानामिह रत्नवत् । तत्क्रियाविनियोगाय [8]जैनागमविधिः परम् ॥ २० ॥
[9]यद्भवभ्रान्तिनिर्मुक्तिहेतुधीस्तत्र[10] दुर्लभा । संसारव्यवहारे तु स्वतःसिद्धे वृथागमः ॥ २१ ॥

शुद्ध जल से स्नान किया हुआ, अव्यग्रचित्त-युक्त होकर, पवित्र वस्त्रों से सुशोभित एवं मौन व संयम से युक्त होकर देवपूजा की विधि करनी चाहिए ॥ १४ ॥ विवेकी पुरुष को दातोन से मुख शुद्ध करके अपना मुख, मुख-पर वस्त्र लगाकार आच्छादित करके तथा विना स्नान किये हुए दूसरे मनुष्यों का स्पर्श न करके जिन-पूजा करनी चाहिए ॥ १५ ॥

पूर्वाचार्यों ने भोजन की शुद्धि के लिए भोजन करने से पहले होम (अग्नि में भोज्यांश का हवन करना) और भूतवलि (पक्षी-आदि जीवों के लिए प्राङ्गण में कुछ अन्न का प्रक्षेपण करना) का विधान कहा है। अर्थात्—शिष्ट पुरुषों को भोजन के अवसर पर कुछ अन्न अग्नि में होम करना चाहिए और कुछ अन्न आँगन में प्रक्षेपण करना चाहिए, जिससे उनका भोज्य पदार्थ विशुद्ध हो जाता है। एवं भोजन में जल, घी, दूध व तक्र का सेवन रसायन-सरीखा वल व वीर्यवर्धक कहा है ॥ १६ ॥ उक्त विधि (भोजन के शुरु में होम-आदि) करना पुण्य-निमित्त नहीं है और उसका न करना अधर्म-निमित्त भी नहीं है। उक्त विधि-विधान तो केवल उस प्रकार माङ्गलिक (शकुन-निमित्त) है जिस प्रकार विवाह-आदि लौकिक शुभ कार्यों के प्रारम्भ में डाभ का स्थापन, पुष्प व अक्षतों का प्रक्षेपण एवं शास्त्र-स्थापन और वन्दनवार बाँधना-आदि विधि-विधान माङ्गलिक (शकुन-निमित्त) होता है ॥ १७ ॥

निश्चय से गृहस्थों का धर्म दो प्रकार का है। एक लौकिक और दूसरा पारलौकिक। इनमें से लौकिक धर्म लोक के आधार वाला है। अर्थात्—लोक को रीति के अनुसार होता है और दूसरा पारलौकिक धर्म आगमाश्रय है। अर्थात्—पूर्वापर के विरोध से रहित प्रामाणिक द्वादशाङ्ग शास्त्रों का आधार लेकर होता है—उनके अनुसार होता है ॥ १८ ॥ ब्राह्मण-आदि वर्णों की समस्त जातियाँ अनादि (बीज-वृक्ष की तरह प्रवाह रूप से चली आनेवाली) हैं और उनकी क्रियाएँ भी अनादि हैं, उसमें वेद व स्मृति ग्रन्थ प्रमाण हों इसमें हमारी (आर्हतों—जैनों की) कोई हानि नहीं है ॥ १९ ॥

जिसप्रकार रत्नों की, खानि से निकले हुए रत्नों के लिए संस्कार-विधि (शाणोल्लेखन-आदि) महत्त्वपूर्ण होती है उसीप्रकार जाति (मातृ-पक्ष) से विशुद्ध ब्राह्मण-आदि वर्णवाले मानवों की क्रियाओं

१-२. भोजनावसरे किंचिदग्नौ किंचित्प्राङ्गणेऽन्नं क्षिप्यते । 'अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्' ॥७०॥ —मनुस्मृति ३ अ० । *. 'भुक्तिविशुद्धये' इति क० । ३. 'सर्पिरुधस्यं' इति क० । 'घृताधरोत्तरभुञ्जानोऽग्निं दृष्टिं च लभते' ॥३४॥ —नीतिवाक्यामृत हमारी भाषा टीका पृ० ३२८, अर्थात्—घृत-पानपूर्वक भोजन करनेवाले मनुष्य की जठराग्नि प्रदीप्त होती है और नेत्रों की रोशनी भी बढ़ जाती हैं ॥३४॥ ४. दुग्धं । ५. मथितं । ६. शकुनार्थं बंद्यते । ७. पारलौकिकः । ८. निश्चयाय । ९. संसारभ्रमणमोचनमति-दुर्लभा । १०. लौकिकव्यवहारे ।

तथा च। सर्व एव हि जैनानां प्रमाणं [1]लौकिको विधिः। यत्र सम्यक्त्वहानिर्न यत्र न व्रतदूषणम् ॥ २२ ॥

इत्युपासकाध्ययने स्नानविधिर्नाम चतुस्त्रिंशत्तमः कल्पः।

[2]द्वये देवसेवाधिकृताः [3]संकल्पिताप्तपूज्यपरिग्रहाः कृतप्रतिमापरिग्रहाश्च, *संकल्पोऽपि [4]दलफलोपलादिष्विव न समयान्तरप्रतिमासु विधेयः। यतः—

[5]शुद्धे वस्तुनि संकल्पः कन्याजन इवोचितः। [6]नाकारान्तरसंक्रान्ते यथा [7]परपरिग्रहे ॥२३॥

तत्र[8] प्रथमान्प्रति [9]समयसमाचारविधिमभिधास्यामः। तथा हि!

(गर्भान्वय, दीक्षान्वय व कर्त्रन्वय क्रियाओं) के निश्चय करने के लिए जैनशास्त्रों का विधि-विधान ही उत्कृष्ट है ॥ २० ॥ क्योंकि शास्त्रान्तरों में संसार के भ्रमण से छुड़ानेवाला सम्यग्ज्ञान दुर्लभ है और लौकिक व्यवहार तो स्वतः सिद्ध है, उसमें आगम की अपेक्षा करना निरर्थक है ॥ २१ ॥ निस्सन्देह जैनधर्मानुयायिओं को वे समस्त लौकिक विधि-विधान (विवाह-आदि) प्रमाण है, जिनमें उनका सम्यक्त्व नष्ट नहीं होता और चारित्र (अहिंसा-आदि) दूषित नहीं होता। अर्थात्—ऊपर कहे हुए होम, भूतवलि व अतिथि-सत्कार-आदि लौकिक विधि विधान में सम्यक्त्व नष्ट नहीं होता और अहिंसादि व्रत की क्षति नहीं होती, अतः प्रमाण है, परन्तु वेद और स्मृति ग्रन्थों में यज्ञ में किये हुए प्राणिवध को अहिंसा माना है, उसका आचरण अहिंसाव्रत का घातक है और सम्यक्त्व को नष्ट करता है अतः जैनों को प्रमाण नहीं है ॥ २२ ॥

इस प्रकार उपासकाध्ययन में 'स्नान-विधि' नाम का चौतीसवाँ कल्प समाप्त हुआ।

देवपूजा की विधि

देवपूजा के अधिकारी मानव दो प्रकार के हैं—

१. जिन्होंने पत्र व पुष्प-वगैरह शुद्ध पदार्थों में जिनेन्द्र भगवान् की स्थापना करके, उन्हें पूज्य स्वीकार किया है और २. जिन्होंने जिन-बिम्बों में जिनेन्द्र भगवान् की स्थापना करके उन्हें पूज्य स्वीकार किया है, परन्तु विवेकी पुरुष जिसप्रकार पत्र, फल व पाषाण-आदि शुद्ध वस्तुओं में जिनेन्द्र भगवान्-आदि की स्थापना करता है उस प्रकार उसे दूसरे मतों की ब्रह्मा व विष्णु-आदि की मूर्तियों में ऋषभदेव-आदि तीर्थङ्करों का संकल्प कदापि नहीं करना चाहिए।

क्योंकि अविरुद्ध या शुद्ध पदार्थ में जिनेन्द्र भगवान् की स्थापना उसप्रकार उचित है जिस प्रकार शुद्ध कन्या में पत्नी का संकल्प करना उचित होता है। जिस प्रकार दूसरे से विवाहित कन्या में पत्नी का संकल्प उचित नहीं है। उसी प्रकार अन्य देवाकार को प्राप्त हुए विष्णु-आदि की प्रतिमाओं में जिनेन्द्र भगवान् की स्थापना अयोग्य (आगम से विरुद्ध) है ॥ २३ ॥

अब हम पत्र व पुष्प-आदि में जिनेन्द्र भगवान् की स्थापना करके देव-पूजा करनेवाले श्रावकों के प्रति पूजा-विधि के विषय में धर्मोपदेश देंगे—

---

१. लौकिको विधिः विवाहः। २. द्विप्रकाराः पुरुषाः। ३. 'संकल्पिताप्तपूजिताः' इति क०। *. 'संकल्पितोऽपि' इति क०। ४. 'यथा दलफलादिषु संकल्पो जिनस्य क्रियते तथा अन्यदेवप्रतिमायां जिनसंकल्पो न क्रियते इत्यर्थः' टि० घ०, 'न कर्तव्यः क्व समयान्तरप्रतिमासु केष्विव दलादिषु इव। अन्यदेवहरहिरण्यगर्भप्रतिमाविषये जिनसंकल्पो न क्रियते' इति टि० ख०। ५. अविरुद्धे। ६. न अन्यदेवाकारसंक्रान्ते उपलादौ। ७. यथा परपरिग्रहे परिणीतकन्यायां संकल्पोऽनुचितः अयोग्यः। ८-९. संकल्पिताप्तपूज्यपरिग्रहान् प्रति धर्मोपदेशं दास्यामः।

अर्हन्न[1]तनुमध्ये दक्षिणतो [2]गणधरस्तथा पश्चात् । [3]श्रुतगीः साधुस्तदनु च पुरोऽपि [4]दृगवगमवृत्तानि ॥२४॥
भूर्जे फलके [5]सिचये शिलातले [6]सैकते क्षितौ व्योम्नि ।
हृदये चेति स्थाप्याः समयसमाचारवेदिभिर्नित्यम् ॥२५॥
रत्नत्रयपुरस्काराः पञ्चापि परमेष्ठिनः । भव्यरत्नाकरानन्दं कुर्वन्तु भुवनेन्दवः ॥२६॥

ॐ निखिलभुवनपतिविहितनिरतिशयसपर्यापरम्परस्य [7]परानपेक्षापर्यायप्रवृत्तसमस्तार्थावलोकलोचनकेवलज्ञानसाम्राज्यलाञ्छनपञ्चमहाकल्याणाष्टमहाप्रातिहार्यचतुस्त्रिंशदतिशयविशेषविराजितस्य षोडशार्धलक्षणसहस्राङ्कितदिव्यदेहमाहात्म्यस्य द्वादशगणप्रमुखमहामुनिमनःप्रणिधान[8]संनिधीयमानपरमेश्वरपरमसर्वज्ञादिनामसहस्रस्य विरहितारिरजोरहःकुहकभावस्य[9] समवसरणसरोवतीर्णजगत्त्रयपुण्डरीकखण्डमार्तण्डमण्डलस्य दुष्पारा[10]जवञ्जवीभावजलनिधिनिमज्जज्जन्तुजातहस्तावलम्बपरमागमस्य भक्तिभरविनतविष्टपत्रयीपालमौलिमणिप्रभा[11]भोगनभोविजृम्भमाणचरणनखनक्षत्रनिकुरम्बस्य सरस्वतीवरप्रसादचिन्तामणेर्लक्ष्मीलतानिकेत[12]कल्पानोकुहस्य कीर्ति[13]पोतिकाप्रवर्धनकामधेनोः, [14]अवीचिपरिचयव्यलीकारकारणाभिधानपात्रमन्त्रप्रभावस्य सौभाग्यसौरभसंपादनपारिजातप्रसवस्तवकस्य सौरूप्योत्पत्तिमणि[15]मकरि-

पूजा-विधि के वेत्ताओं को सदा अर्हन्त और सिद्ध को पत्र व पुष्पादि के मध्य में, आचार्य को दक्षिण में, उपाध्याय को पश्चिम में, साधु को उत्तर में और पूर्व में सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्र को क्रम से भोजपत्र पर, लकड़ी के पटिये पर, वस्त्र पर, शिलातल पर, बालुकामय प्रदेश पर, पृथ्वी पर, आकाश में और हृदय में स्थापित करना चाहिए ॥२४-२५॥ सम्यग्दर्शन-आदि रत्नत्रय से पूजनीय और तीन लोक के लिए चन्द्रमा-सरीखे पाँचों परमेष्ठी भव्य जीवरूपी समुद्र को प्रमुदित करें ॥ २६ ॥

अर्हन्त पूजा

मैं ऐसे भगवान् अर्हन्त परमेष्ठी की आठ द्रव्यों से पूजा करता हूँ, जिनकी विशेष माहात्म्यवाली पूजा परम्परा समस्त लोक के स्वामियों (इन्द्र-आदि) द्वारा की गई है। जो दूसरे (चक्षुरादि इन्द्रिय) की अपेक्षा से रहित परमात्म-पर्याय से उत्पन्न हुए समस्त पदार्थों के अवलोकनरूप केवलदर्शन व केवलज्ञानरूप साम्राज्य के चिह्नरूप पंचकल्याणकों, आठ प्रातिहार्यों एवं चौंतोस अतिशयों से विशेषरूप से सुशोभित हैं। जिनके दिव्य परमौदारिक शरीर का प्रभाव एक हजार आठ शुभ लक्षणों से युक्त है। जिनके परमेश्वर व परमसर्वज्ञ-आदि एकहजार नाम बारह गण (शिक्षक, वादी व विक्रियर्द्धि-आदि) के मुनियों में प्रमुख महामुनियों (गणधरों) के मन में चित्त की एकाग्रता द्वारा आरोपण किये जा रहे हैं। जो मोहनीय, ज्ञानावरण, दर्शनावरण एवं अन्तराय इन घातिया कर्मरूप इन्द्रजाल से रहित हैं। जो समवसरणरूपी सरोवर में आये हुए तीनलोक के प्राणीरूप कमल-समूह को विकसित करने के लिए सूर्य-मण्डल-सरीखे हैं। जिनका उत्कृष्ट द्वादशाङ्ग शास्त्र दुःख से भी पार करने के लिए अशक्य संसाररूप समुद्र में डूबे हुए प्राणी-समूह के लिए हस्तावलम्बन-सरीखा है। जिनके चरणों के नखरूपी नक्षत्र-समूह, भक्ति के भार से नम्रीभूत हुए तीनलोक के स्वामियों (इन्द्र-आदि) के मुकुटों में जड़े हुए मणियों की कान्ति के विस्तार-रूप आकाश में विस्तृत हो रहा है। जो सरस्वती को वर का प्रसाद देने के लिए चिन्तामणि हैं। जो लक्ष्मीरूपी लता के आश्रय के लिए कल्पवृक्ष-से हैं। जो कीर्तिरूपी

१. सिद्धः । २. आचार्यः । ३. उपाध्यायः । ४. सम्यग्दर्शनज्ञानचारित्राणि । ५. वस्त्रे । ६. पुलिने । ७. परस्य अनपेक्षा या पर्यायसंगतिः, अनुक्रमो वा । ८. आरोप्यमाण । ९. अरिर्मोहः, रजो ज्ञानदर्शनावरणद्वयं, रहः अन्तरायः, कुहकमिन्द्रजालं । १०. आजवंजवीभावः संसारः । ११. विस्तार एव नभः । १२. स्थान । १३. बालिका । १४. अवीचिर्नरकविशेषस्तस्य परिचयः संगतिः । १५. 'मकरी' टि० ख०, पञ्जिकाकारस्तु 'मणिमकरिका पुत्तलिका' इत्याह ।

काञ्चनविकटाकारस्य[1] रत्नत्रयपुरःसरस्य भगवतोऽर्हत्परमेष्ठिनोऽष्टतयीमिष्टिं करोमीति स्वाहा । अपि च ।

नरोरगसुराम्भोजविरोचनरुचिश्रियम्[2] । आरोग्याय जिनाधीशं करोम्यर्चनगोचरम् ॥ २७ ॥

ॐ [3]सहचरसमीचीनचा[4]र्वीत्रयविचारगोचरोचितहिताहितप्रविभागस्य अत एव परनिरपेक्षतया स्वयंभुवः सलिलान्मुक्ताफलमिव उपलादिव काञ्चनम[5]स्मादेवात्मनः [6]कारणविशेषोप[7]सर्पणवशादाविर्भूतमखिलमलविलयलब्धात्मस्वभावमसममसहायमक्रममवधीरितान्य[8]संनिधिव्यवधानमनवधिमयत्नसाध्यमवसितातिशयसीमानमात्मस्वरूपैकनिबन्धनम[9]न्तःप्रकाशम[10]ध्यासितवन्तमनन्तदर्शनवैशद्य[11]विशेषसाक्षात्कृतसकलवस्तुसर्वस्वमन[12]वसानसुख[13]स्रोतसमपर्यन्तवीर्यमचाक्षुषसूक्ष्मावभासमसदृशा[14]भिनिवेशावगाहमलघुगुरुव्यपदेशमपगतबाधापराकारसंक्रममतिविशुद्धस्वभावतया निवृत्ताशेषशारीर-

---

बछिया की वृद्धि के लिए कामधेनु हैं। जिनके नामरूपी मन्त्र का प्रभाव नरक विशेष की संगति को नष्ट करने में कारण है। जो सौभाग्यरूपी सुगन्धि की प्राप्ति में कल्पवृक्ष के पुष्पों का गुच्छा-सरीखे हैं। जो अनोखे सौन्दर्य की उत्पत्तिरूपी मणि-जड़ित पुतली की रचना के लिए स्वर्णकार-जैसे हैं एवं जो सम्यग्दर्शन सम्यग्ज्ञान व सम्यक् चारित्र रूप रत्नत्रय से अलंकृत हैं।

मैं जन्म-जरा-मरणरूपी रोग की निवृत्ति के लिए मनुष्य, नागासुर व देवरूपी कमलों के विकसित करने के लिए सूर्य की कान्ति को धारण करनेवाले जिनेन्द्रदेव की पूजा करता हूँ॥ २७॥

सिद्ध-पूजा

मैं ऐसे सिद्ध परमेष्ठी की आठ द्रव्यों से पूजा करता हूँ। जिनका हिताहित का प्रकृष्ट ज्ञान पूर्वजन्म से आये हुए मति, श्रुत व अवधिज्ञान के विचार के विषय के योग्य है, इसीलिए गुरु-आदि दूसरे की अपेक्षा न करने के कारण जो स्वयंभू हैं। जिसने ऐसे केवलज्ञान से अधिष्ठित ऐसे परमात्मा को प्राप्त किया है, जो कि (केवलज्ञान) इसी पूर्व संसारी आत्मा से ही घातिया कर्मों को क्षय करनेवाली कारण सामग्री (द्रव्य, क्षेत्र, काल व भाव-आदि एवं सम्यग्दर्शन-आदि) के सन्निधान से उस प्रकार उत्पन्न हुआ है, जिसप्रकार कारण-सामग्री (स्वाति नक्षत्र का उदय-आदि) के सन्निधान से जल से [सीप में] मोती उत्पन्न होता है और जिस-प्रकार कारणसामग्री (अग्निपुट-पाक व छेदन, भेदन-आदि) के सन्निधान से सुवर्णपाषाण से सुवर्ण उत्पन्न होता है। जिसकी उत्पत्ति समस्त मलों (घातिया कर्म व उनके उदय से होनेवाले अज्ञानादि दोषों) के क्षय से हुई है, जो अनोखा और चक्षुरादि इन्द्रियों की सहायता से शून्य है। जो क्रम-रहित है, अर्थात्—समस्त पदार्थों को युगपत् जानने वाला है। जिसने दूसरे पदार्थों की निकटता व दूरी तिरस्कृत की है। जो सीमा को उल्लंघन करने वाला व इन्द्रियों के व्यापार-आदि प्रयत्नों के विना उत्पन्न होनेवाला एवं जो अतिशय की सीमा का अन्त करने वाला है और जिसकी उत्पत्ति में केवल विशुद्ध आत्मस्वरूप ही कारण है। जिसमें (परमात्मा में) अनन्त दर्शन की विशेष निर्मलता के कारण समस्त पदार्थों का सार प्रत्यक्ष किया गया है। जो अनन्त सुख का झरना है। जो अनन्तवीर्य-शाली है। जिसमें चक्षुरिन्द्रिय से अगोचर सूक्ष्मत्व प्रति जीवी गुण की प्रतीति है। जिसमें अनोखे परमावगाढ़ सम्यक्त्व के साथ अवगाह गुण वर्तमान है। जो अगुरु लघु गुण

---

१. 'जड़िया—स्वर्णकार' टि० ख०, पञ्जिकायां तु 'विकटाकारः टंकः' इति प्रोक्तम्। २. विरोचनो रविः। ३. पूर्वजन्मागत। ४. चार्वीत्रयं मतिः श्रुतमवधिश्च। ५. पूर्वसंसारिणः एव। ६. द्रव्यक्षेत्रकालभावादि, खय उवसमो विसोही देसण पाउग्गकरणलद्धीए चत्तारि विसामण्णा करणे पुण होई सम्मत्तं॥ १॥ ७. आगमनं। ८. सामीप्य। ९. केवलज्ञानं। १०. प्राप्तवन्तं। ११. निर्मलता। १२-१३. ईदृशं परमात्मानं। १४. अभिनिवेशः सम्यक्त्वं।

द्वारतया च मनाङ्मुक्तपूर्वावस्थान्तरमरूपरसगन्धशब्दस्पर्शमशेषभुवनशिरःशेखरायमाणप[1]विश्वंभरमुपशान्तसकलसंसार-दोषप्रसरं परमात्मानमुपेयुषो [2]गुरुणापि प्रतिपन्नगुरुभावस्य रत्नत्रयपुरःसरस्य भगवतः सिद्धपरमेष्ठिनोऽष्टतयीमिष्टिं करोमीति स्वाहा। अपि च।

[3]प्रत्नकर्मविनिर्मुक्तान्नू[4]त्नकर्मविवर्जितान्। यत्नतः संस्तुवे सिद्धान्रत्नत्रयमहीयसः ॥ २८ ॥

ॐ पूज्यतमस्य [5]उचितोचितकुलशीलगुरुपरम्परोपात्तसमस्तैतिह्यरहस्यसारस्य [6]अध्ययनाध्यापन[7]वि[8]नि-योगविनयनियमोप[9]नयनादिक्रियाकाण्डनिःस्नात[10]चित्तस्य चातुर्वर्ण्यसंघप्रवर्धनधुरंधरस्य द्विविधात्मकधर्मावबोधनविधूतैहिकव्यपेक्षासंबन्धस्य सकलवर्णाश्रमसमयसमाचारविचारोचितवचनप्रपञ्चमरीचिविचलितनिखिलजनतारविन्दिनीमिथ्यात्व-महामोहान्धकारपटलस्य ज्ञानतपःप्रभावप्रकाशितजिनशासनस्य शिष्यप्रशिष्यसंपदाशेषमिव भुवनमुद्धर्तुमुद्यतस्य भगवतो रत्नत्रयपुरःसरस्याचार्यपरमेष्ठिनोऽष्टतयीमिष्टिं करोमीति स्वाहा।

अपि च। विचार्य सर्वमैतिह्यमाचार्यकमुपेयुषः। आचार्यवर्यानर्चामि संचार्य हृदयाम्बुजे ॥ २९ ॥

से युक्त है। जो बाधा और पर के आकाररूप संक्रमण से रहित है। विशेष विशुद्ध स्वभाव के कारण और समस्त शारीरिक द्वारों के हट जाने से जो पूर्व अवस्था से कुछ छुटकारा पा चुका है, अर्थात्—जो पूर्व-अवस्था से कुछ ऊँन है। जिसमें रूप, रस, गन्ध, शब्द व स्पर्श नहीं हैं व जो समस्त लोक के शिर पर मुकुट के समान आचरण करनेवाले स्थान से जगत् का पालन करनेवाला है एवं जिसमें समस्त सांसारिक अज्ञानादि दोषों का विस्तार नष्ट हो चुका है। जो (सिद्ध परमेष्ठी) तीर्थङ्कर परमदेव द्वारा भी गुरु माने गये हैं और जो सम्यग्दर्शन, सम्यग्ज्ञान व सम्यक्चारित्र रूप रत्नत्रय से अलंकृत हैं।

पुराने कर्मों के बन्धन से छुटे हुए और नवीन कर्मों से रहित तथा रत्नत्रय से महान् उन सिद्धों का मैं यत्नपूर्वक स्तवन करता हूं ॥ २८ ॥

आचार्य-पूजा

मैं विशेष पूज्य ऐसे भगवान् आचार्य परमेष्ठी की आठ द्रव्यों से पूजा करता हूँ, जिन्होंने जाति व आचरण से शुद्ध कुल व सदाचार से विभूषित हुई गुरु-परम्परा द्वारा समस्त आगम के गोप्यतत्त्व का सार ग्रहण किया है। जिनका चित्त स्वयं शास्त्रों का पठन-पाठन, अधिकार, विनय, नियम (व्रत व तप का पालन) व दीक्षा व व्रतारोपण विधि-आदि क्रिया-काण्डों से पवित्र है। जो चार वर्ण (ऋषि, यति, मुनि व अनगार) के साधु-संघ की वृद्धि का भार वहन करनेवाले हैं। जिन्होंने मुनि व श्रावक धर्म के ज्ञापन में इस लोक संबंधी सुख की अपेक्षा का संबंध त्याग दिया है। जिन्होंने समस्त वर्णों व आश्रमों की आगमानुकूल क्रिया-पद्धति के विचार के योग्य वचन-समूहरूपी किरणों द्वारा समस्त जनतारूपी कमलिनी का मिथ्यात्व व विशिष्ट अज्ञानरूप अन्धकार-पटल नष्ट कर दिया है। जिन्होंने ज्ञान व तप के प्रभाव से जिन-शासन को उद्दीपित किया है और जो अपनी शिष्य-प्रशिष्य सम्पत्ति द्वारा समस्त लोक के उद्धार करने में प्रयत्नशील-से रहते हैं एवं जो सम्यग्दर्शन, सम्यग्ज्ञान व सम्यक्चारित्ररूप रत्नत्रय से अलंकृत है।

मैं समस्त आगम को विचार करके आचार्यपद प्राप्त करनेवाले पूज्य आचार्यों को अपने हृदयकमल में स्थापित करके उनकी पूजा करता हूँ ॥ २९ ॥

---

१. स्थान। २. तीर्थङ्करपरमदेवेन 'नमः सिद्धेभ्यः' इति वचनात्। ३. पुराणं। ४. नवं। ५. जात्याचरणशुद्धं। ६. स्वयं पठन। ७. पाठन। ८. अधिकार। ९. दीक्षाव्रतारोपणादिविधि। १०. पवित्र।

ॐ श्रीमद्भगवदर्हद्वदनारविन्दविनिर्गतद्वादशाङ्गचतुर्दशपूर्वप्रकीर्णविस्तीर्णश्रुतपारावारपारंगमस्य अपार[1]संपरायारण्यविनिर्गमानुपसर्गमार्गमार्गण[2]निरतविनेयजनशरण्यस्य दुरन्तैकान्तवादमदमषीमलिनपरवादिकरिकण्ठीरवोत्कण्ठकण्ठार[3]वायमाण[4]प्रमाणनय[5]निक्षेपा[6]नुयोग[7]वाग्व्यतिकरस्य श्रवणग्रहणावगाहना[8]वधारण[9]प्रयोग[10]वाग्मित्वकवित्वगमक[11]शक्तिविस्मापितविनतनरामरविद्याधरचक्रवर्तिसीमन्तप्रान्त[12]पर्यस्तोत्तंसप्रसूनसौरभाधिवासितपादपीठोपकण्ठस्य व्रतविद्यानवद्यहृदयस्य भगवतो रत्नत्रयपुरःसरस्य उपाध्यायपरमेष्ठिनोऽष्टतयीमिष्टिं करोमीति स्वाहा ।

अपि च । अपास्तैकान्तवादीन्द्रानपारागमपारगान् । उपाध्यायानुपासेऽहमुपायाय[13] श्रुताप्तये ॥३०॥

ॐ [14]विदितवेदितव्यस्य बाह्याभ्यन्तराचरण[15]करणत्रयविशुद्धित्रिपथगा[16]पगाप्रवाहनिर्मूलितमनोजकुज-

उपाध्याय-पूजा

मैं ऐसे भगवान् उपाध्याय परमेष्ठी की आठ द्रव्यों से पूजा करता हूँ, जो श्रीमान् भगवान् अर्हन्त देव के मुखकमल से निकले हुए बारह अङ्गों (आचार-आदि), चौदह पूर्वों (उत्पादपूर्व-आदि) तथा चौदह प्रकीर्णकों (सामायिक-आदि) के रूप में विस्तीर्ण श्रुतरूपी समुद्र के पारगामी हैं। जो अपार संसाररूपी अटवी से निकलने के लिए बाधा-रहित मार्ग के अन्वेषण करने में तत्पर हुए शिष्यजनों के लिए शरणभूत हैं। दुरन्त एकान्तवाद के मदरूपी कालिमा से मलिन हुए अन्यमतावलम्बीरूपी हाथियों के लिए प्रमाण, नय, निक्षेप व अनुयोग से युक्त जिनका वचन-समूह सिंह के दहाड़ने के समान आचरण करता है। श्रवण, ग्रहण, अवगाहन (विचार करना), अवधारण, प्रयोग (शास्त्र के अर्थ को ज्ञापन करनेवाला वचन), वक्तृत्व-कला (शास्त्र के अर्थ को मुख द्वारा सूचित करना), कवित्व व तार्किक शक्ति द्वारा आश्चर्य-युक्त किये गए नम्रीभूत हुए मनुष्यों, देवों व विद्याधरों के स्वामियों के केशप्रान्त से नीचे गिरी हुई मुकुट माला के पुष्पों की सुगन्धि से, जिनके चरणों के आसन का निकट भाग सुगन्धित किया गया है और जिनका हृदय चारित्र व श्रुतज्ञान से पवित्र है एवं जो पूज्य हैं तथा सम्यग्दर्शन, सम्यग्ज्ञान व सम्यक्चारित्ररूप रत्नत्रय से अलंकृत हैं।

मैं पुण्य व श्रुतज्ञान की प्राप्ति के लिए श्रेष्ठ एकान्तवादियों को परास्त करनेवाले और अपार द्वादशाङ्ग आगम के पारगामी उपाध्याय परमेष्ठियों की पूजा करता हूँ ॥ ३० ॥

साधु-पूजा

मैं विशेष पूज्य और ऐसे सर्वसाधु परमेष्ठी की आठ द्रव्यों से पूजा करता हूँ, जो मोक्षोपयोगी जीवादि तत्त्वों के ज्ञाता हैं। जिन्होंने बाह्य और आभ्यन्तर चारित्र-पालनरूपी एवं मन, वचन व काय की विशुद्धिरूपी गङ्गानदी के प्रवाह द्वारा कामदेवरूपी वृक्ष के कुटुम्ब का विस्तार जड़मूल से उखाड़कर फैंक दिया है। जिन्होंने

१. संसाराटवी । २. अवलोकन । ३. शब्दायमान । ४. वस्तुयाथात्म्यप्रतिपत्तिहेतु प्रमाणं । ५. प्रमाणपरिगृहीतार्थैकदेशनिरूपणप्रवणो नयः । ६. शब्दसंकल्पयोग्यतास्वरूपैर्वस्तुव्यवस्थापनहेतुर्निक्षेपः । ७. सामान्यविशेषाभ्यामवशेषपदार्थावगमप्रश्नः अनुयोगः । ८. अवगाहनं विमर्शनम् । ९. प्रयोगः शास्त्रार्थज्ञापनं वचनं । १०. 'वाचोयुक्तिः पटुर्वाग्मी' इति टि० ख०, यश० पञ्जिकाकारस्तु 'शास्त्रपरिज्ञानस्य मुखसूचितत्वं वाग्मित्वं । तदुक्तं—पुरतः प्रशमितमिवालिखितमिव मनोनिषिक्तमिव हृदये गृष्टं ? (प्रविष्टं) यस्य शास्त्रं स भवेत् ज्ञाता तदर्थस्य पातु वो निकषग्रावो' इत्यचीकथत् । ११. तार्किकः सिद्धान्तज्ञाता । १२. अधः पतित । १३. उप समीपे अयः शुभावहो विधिर्यस्य सः उपायः पुण्यमित्यर्थः पुण्यार्थं श्रुतार्थं च । १४. ज्ञाततत्त्वस्य । १५. मनोवाक्काय । १६. गंगा ।

कुटुम्बाडम्बरस्य अमराम्बरचरनरनितम्बिनी[1]कदम्बनवप्रादुर्भूतमदन[2]मदमकरन्ददुर्दिन*विनोदारविन्द[3]चन्द्रायमाणोदितो-दितव्रतव्राता[4]पहसिता[5]र्वाचीनचरित्रच्युतविरञ्च[6]विरो[7]चनादि[8]ध्यानसरसस्य[9] अनेकशस्त्रिभुवनक्षोभविधायिभिर्ध्यान-धैर्यावधूतविश्वप्रत्यू[10]हव्यूहैरनन्यजनसामान्यवृत्तिभिर्मनोगोचराति[11]चरैराश्चर्यप्रभावभूमिभिरनवधारितविश्रामैस्तैस्तैर्मूलो-त्तरगुणग्रामणीभिस्तपःप्रारम्भैः सकलैहिकसुखसाम्राज्यवरप्रदानावहिता[12]यातावधीरित*विस्मितोपनतवनदेवतालकालि कुलविलुप्यमानचरणसरसिरुहपरागस्य निर्वाणपथनिष्ठितात्मनो रत्नत्रयपुरःसरस्य भगवतःसर्वसाधुपरमेष्ठिनोऽष्टतयीमिष्टिं करोमीति स्वाहा ।

अपि च । बोधापगाप्रवाहेण विध्यातानङ्गवह्नयः । *विध्याराध्याङ्घ्रयः सन्तु साध्यबोध्याय[13]साधवः ॥३१॥

ॐ जिनजिनागमजिनधर्मजिनोक्तजीवादितत्त्वा[14]वधारणद्वयविजृम्भित[15]निरतिशयाभिनिवेशाधिष्ठानासु[16]-प्रकाशितशङ्का[17]प्राकाम्या[18]वह्लादन[19]कु[20]मतार्तिशल्योद्धारासु[21] प्रशमसंवेगानुकम्पास्तिक्यस्तम्भसंभृतासु

ऐसे विशुद्ध चारित्र-समूह द्वारा नवीन चारित्र से च्युत हुए ब्रह्मा व विरोचन (तपस्वी विशेष) आदि तपस्वियों का ध्यान तिरस्कृत किया है, जो कि (चारित्र-समूह) देवाङ्गना, विद्याधरी व मानवों की कमनीय कामिनी-समूहरूपी तड़ाग में उत्पन्न हुए काममदरूपी मकरन्दवाले दुर्दिन (मेघाच्छन्न दिन) की क्रीड़ारूपी कमलों को चन्द्र-सा आचरण करनेवाला है, अर्थात्—संकुचित करनेवाला है। अनेक बार तीनों लोकों को क्षोभित कर देनेवाले, धर्मध्यान की निश्चलता से समस्त विघ्नों के समूह को नष्ट करनेवाले, सर्व साधारण मानवों द्वारा अशक्य प्रवृत्तिवाले, मन से चिन्तवन के लिए अशक्य, आश्चर्य व प्रभाव उत्पन्न करने के लिए पृथिवी-सरीखे, मूलगुण व उत्तरगुणों की प्रमुखतावाले नानाप्रकार के तपों के अभ्यासों से (क्षुभित—सन्तुष्ट होकर) समस्त इस लोक संबंधी सुख-साम्राज्यरूप वर देने के लिए सावधान होकर आये हुए, परन्तु तिरस्कृत होनेपर आश्चर्यान्वित व नम्रीभूत हुए वन-देवताओं के केश-समूह-रूपी भ्रमर-समूह द्वारा, जिनके चरणकमलों का पराग विलुप्त कर दिया गया है और जिनकी आत्मा मोक्ष-मार्ग में श्रद्धालु है और जो सम्यग्दर्शनादि रत्नत्रय से विभूषित हैं।

जिन्होंने सम्यग्ज्ञानरूपी नदी के प्रवाह द्वारा कामरूपी अग्नि बुझा दी है, और जिनके चरण पूजा विधि से पूजनीय हैं, वे साधु केवलज्ञान की प्राप्ति के लिए होवें ॥ ३१ ॥

सम्यग्दर्शन-पूजा

मैं संसाररूपी वृक्ष को काटने में प्रथम कारण, समस्त कल्याणों के कर्ता व पंचपरमेष्ठी को अग्रेसर करनेवाले भगवान् सम्यग्दर्शनरूपीरत्न की अष्ट द्रव्यों से पूजा करता हूँ। जिसने (सम्यग्दर्शन ने) पुण्यशाली

१. स्त्रीसमूहह्रद तत्रोत्पन्न । २. काम । *. आच्छादित, क्रीडा एव कमलं । ३. कमलसंकोचकारकः कामविध्वंसकः इति भावः । ४. व्रातः समूहः । ५. तिरस्कृतब्रह्मादयः । *. अर्वाग्भवं । ६. ब्रह्मा । ७. ऋषिनाम । ८. तापस । ९. ध्यानान्यस्य । १०. प्रत्यूहो विघ्नः । ११. अगम्यैः । १२. सावधान । *. 'अवधारित' ग० । विमर्श—मु० प्रति का 'अवधीरित' पाठ सही प्रतीत होता है—सम्पादक । *. पूजाविधिना आराध्याः अङ्घ्रयश्चरणाः येषां । १३. साध्यो बोध्यः आत्मा यस्य तत् साध्यबोध्यं केवलज्ञानं तस्मै । १४. अवधारणद्वयमयोगव्यवच्छेदान्ययोगव्यवच्छेदः, जिनो देव एव, जिन एव देवः इत्यादि । १५. सर्वेषां सम्यग्दृष्टीनामभिप्रायाः परिणामाः समानाः सदृशा एव भवन्ति न तु न्यूनाधिकाः । १६-१७. प्रकटित-निष्कासितशल्यासु, प्रासादभूमिशोधनेऽपि अस्थ्यादि निष्काश्यते, निःशङ्कितगुण । १८. प्राकाम्यमाकाङ्क्षा । १९. अवह्लादनं विचिकित्सा । २०. मूढदृष्टिः एतानि शल्यानि । २१. प्रायः भूमिशोधने अस्थ्यादिकं निष्काश्यते ।

स्थितिकरणोपगूहनवात्सल्यप्रभावनोपरचितोत्सवसपर्यासु[1] [2]अनेकत्रिदशविशेषनिर्मापितभूमिकासु सुकृतिचेत:प्रासादपरम्परासु कृतक्रीडाविहारमपि च यन्निसर्गान्महामुनिमनःपयोधिपरिचितं[3] अशेषभरतैरावतविदेहजं[4] धरचक्रवर्तिचूडामणि[5] कुलदैवतं अमरेश्वरमतिदेवतावतं[6] सकल्पवल्लीपल्लवं अम्बरचरलोकहृदयैकमण्डनं अपवर्गपुरप्रवेशागण्यपुण्यपण्यात्मसात्करणसत्यंकारं[7] अनुल्लङ्घ्यदुरघघनघटादुर्दिनेष्वपि जन्तुषु ज्योतिर्लोकादिगतिगर्तपातनतमस्काण्डभेदनमामनन्ति मनीषिणः, तस्य संसारपादपोच्छेदप्रथमकारणस्य सकलमङ्गलविधायिनः पञ्चपरमेष्ठिपुरःसरस्य भगवतः सम्यग्दर्शनरत्नस्याष्टतयीमिष्टिं करोमीति स्वाहा ।

अपि च । मुक्तिलक्ष्मीलतामूलं युक्तिश्रीवल्लरीवनम्[8] । भक्तितोऽर्हामि सम्यक्त्वं [9]भुक्तिचिन्तामणिप्रदम् ॥३२॥

मानवों की ऐसी चित्तरूपी महलों की पङ्क्तियों में क्रीड़ा के लिए विहार किया है, जो कि जिन, जिनागम, जिनधर्म और जिनेन्द्र भगवान् द्वारा कहे हुए जीवादि सात तत्वों के अयोग व्यवच्छेद व अन्ययोग व्यवच्छेद (जिनेन्द्र देव ही हैं व जिनेन्द्र ही देव है, इत्यादि क्रमशः अन्य विशेषणों की व्यावृत्ति व अन्य विशेष्यों की व्यावृत्ति) की आस्था से वृद्धिगत हुई सदृश परिणाम-स्थानरूपी आधार (भूमि या नींव) वाली हैं। जिनमें से शङ्का, आकांक्षा, विचिकित्सा (ग्लानि) व मूढ़ दृष्टिरूपी शल्यें (कीले) निकाल कर फेंक दी गई हैं। अर्थात्—जिसप्रकार महल की भूमि-शोधन में हड्डी-आदि निकालकर फेंक दी जाती हैं उसीप्रकार सम्यग्दृष्टियों द्वारा भी चित्त के शोधन में उक्त शल्यें निकाल कर फेंक दी जाती हैं। जो प्रशम, संवेग, अनुकम्पा, व आस्तिक्य रूपी स्तम्भों द्वारा धारण की गई है। स्थितिकरण, उपगूहन, वात्सल्य व प्रभावना द्वारा जिनमें उत्सवों की पूजा की गई है। अर्थात्—जिसप्रकार महल-रचना में मध्य मध्यमें पूजा की जाती है उसीप्रकार सम्यक्त्व की भी उक्त अङ्गों द्वारा पूजा की जाती है और जिनकी भूमिकाएँ (अवस्थाएँ व पक्षान्तर में तल) दो प्रकार (निसर्गज व अधिगमज), तीन प्रकार (औपशमिक, क्षायोपशमिक व क्षायिक) व दश-प्रकार (आज्ञा व मार्ग-आदि) से निर्माण कराई गई हैं, ऐसा होकर के भी जो स्वभावतः महामुनियों के मनरूपी समुद्र में प्रसिद्ध हैं। जो समस्त भरत, ऐरावत व विदेहक्षेत्रों व कुलाचलों के चक्रवर्तियों का चूड़ामणि (शिरोरत्न) और कुल देवता है। जो देवेन्द्रों की बुद्धिरूपी देवी के कर्ण-आभूषण के लिए कल्पलता का पल्लव है। जो विद्याधर-समूह के हृदय का अद्वितीय आभूषण है। मोक्षनगर में प्रवेश करने के लिए असंख्यात पुण्यरूपी पण्य (खरीदने लायक वस्तु) को अधीन करने के लिए जो सत्यंकार (व्यवस्था का अनुल्लङ्घन-बयाने का धन) है। अर्थात्—जिस प्रकार पेशगी दिये हुए धन से खरीदने लायक वस्तु खरीदी जाती है उसी प्रकार सम्यक्त्व रूपी बयाने के धन से भी मोक्षनगर में प्रवेश करानेवाला असंख्यात पुण्य खरीदा जा सकता है। जिसे शास्त्र-वेत्ता विद्वान् अटल (अवश्य भोगने योग्य) महापाप रूपी मेघों की घटा से दुर्दिन-सरीखे (ग्रस्त हुए) जीवों के भी ज्योतिर्लोक-आदि गतिरूपी गड्ढों में गिरानेवाले मिथ्यात्वरूपी अन्धकार के पटल का भेदन करनेवाला मानते हैं, अर्थात्—पापी से पापी जीव को भी सम्यक्त्व की प्राप्ति हो जाने पर प्रथम नरक के सिवाय शेष नरकों में और भवनत्रिक व व्यन्तर-आदि में जन्म लेना नहीं पड़ता।

मैं ऐसे सम्यग्दर्शन की भक्तिपूर्वक पूजा करता हूँ, जो मुक्तिलक्ष्मी रूपी लता की जड़ है और जो

---

१. प्रासादे क्रियमाणे मध्ये मध्ये पूजा क्रियते। २. अनेको विशेषो द्विविधतया, त्रयोविशेषाः त्रिविधतया, दश विशेषाः दशविधतया भूमिका अवस्था तलं च। ३. प्रसिद्धं। ४. कुलपर्वत। ५. शिरोरत्नानामुपरि स्थितं। ६. कर्णावतंस (कर्णपूर)। ७. सत्यंकारं व्यवस्थानुल्लङ्घनम्, धनसार्थ इति लोकभाषा। ८. जलं। ९. भुक्तिरेव चिन्तामणिः।

ॐ यन्निखिलभुवन[1]तार्तीयलोचनम्, आत्महिताहितविवेकयाथात्म्यावबोधसमासादितसमीचीनभावम्, अधिगमजसम्यक्त्वरत्नोत्पत्तिस्थानम्, [2]अखिलास्वपि दशासु क्षेत्रज्ञस्वभावसाम्राज्यपरमलाञ्छनम्, अपि च [3]यस्मिन्निदानीमपि[4] [5]नदीस्नातचेतोभिः [6]सम्यगुपाहितोपयोगसंमार्जने [7]द्युमणिमणिदर्पण इव साक्षाद्भवन्ति [8]ते ते [9]भावकसंप्रत्ययाः [10]स्वभावक्षेत्रसमयविप्रकर्षिणोऽपि भावास्तस्यात्मलाभनिबन्धनो[11]भयहेतुविहितविचित्रपरिणतिभिर्मतिश्रुतावधिमनःपर्ययकेवलैः पञ्चतयीमवस्थामवगाहमानस्य सकलमङ्गलविधायिनः पञ्चपरमेष्ठिपुरःसरस्य भगवतः सम्यग्ज्ञानरत्नस्याष्टतयीमिष्टिं करोमीति स्वाहा ।

अपि च । नेत्रं हिताहितालोके सूत्रं धीसौधसाधने । पात्रं पूजाविधेः कुर्वे क्षेत्रं लक्ष्म्याः समागमे ॥३३॥

युक्ति (दर्शनशास्त्र) लक्ष्मीरूपी लता को वृद्धिगत करने के लिए जल है एवं जो सांसारिक भोगरूपी चिन्तामणि को देनेवाला है ॥ ३२ ॥

सम्यग्ज्ञान-पूजा

जो समस्त लोक को जानने के लिए तीसरा नेत्र है । आत्मा के हिताहित के विवेक के यथार्थ जानने से ही जिसे समीचीनता प्राप्त हुई है, जो अधिगमज सम्यग्दर्शनरूप रत्न की उत्पत्ति का स्थान है; क्योंकि अधिगमज सम्यक्त्व में परोपदेश की अपेक्षा होती है । जो आत्मा की समस्त पर्यायों (नरक व एकेन्द्रियादि) में भी आत्मा के स्वभाव रूप साम्राज्य का प्रदर्शन चिह्न है, अर्थात्—अनेक नर व नरक-आदि पर्यायों को धारण करता हुआ यह आत्मा जिस प्रधान चिह्न के कारण अपने ज्ञान स्वभावरूप साम्राज्य वाला कहा जाता है । इसकी महत्वपूर्ण विशेषता यह है कि केवल केवलियों के तीर्थ में ही नहीं, अपितु इस समय में भी सरस्वतीरूपी नदी में स्नान करने से जिनके चित्त निर्मल हो गए हैं ऐसे विद्वानों द्वारा आरोपित अभ्यास से अपने उपयोग को विशुद्ध कर लेने पर उनके केवलज्ञान में सूर्यकान्तमणि के दर्पण की तरह स्वभाव से सूक्ष्म परमाणुआदि व क्षेत्र से दूरवर्ती-सुमेरु-आदि और काल से दूरवर्ती राम-रावण-आदि स्वात्मा द्वारा अनुभव करने-योग्य पदार्थ प्रत्यक्षगोचर प्रतीत होते हैं । वह ज्ञान यद्यपि एक है, किन्तु अपनी उत्पत्ति के अन्तरङ्ग और बहिरङ्ग-कारणों से होनेवाली विचित्र परिणति के द्वारा मति, श्रुत, अवधि, मनः पर्यय व केवलज्ञान के भेद से उसकी पाँच अवस्थाएँ (भेद) हो गई हैं, उस समस्त कल्याणों का कर्ता और पंच परमेष्ठी को अग्रेसर करनेवाले (क्योंकि पंचपरमेष्ठी का स्वरूप जाने बिना सम्यग्ज्ञान उदित नहीं होता) भगवान् (पूज्य) सम्यग्ज्ञान की आठ द्रव्यों से पूजा करता हूँ ।

मैं ऐसे सम्यग्ज्ञान को पूजाविधि का पात्र करता हूँ, अर्थात्—उसकी पूजा करता हूँ, जो कि आत्मिक हित और अहित को प्रकाशित करने के लिए तीसरा नेत्र है और जो बुद्धिरूपी महल के निर्माण करने के लिए बढ़ई है एवं जो लक्ष्मी के समागम कराने का स्थान है ॥ ३३ ॥

---

१. तृतीय । २. नरक, एकेन्द्रियादिषु । ३. ज्ञाने । ४. न केवलं केवलिनां तीर्थे । ५. सरस्वत्यां स्नातचित्तैः विद्वद्भिः । ६. आरोपिताभ्यासेन कृतोज्वले कैर्नदीस्नातचित्तैर्नरैः । ७. सूर्यकान्तमुकुरे । ८. जीवादिपदार्थाः । ९. स्वात्मानुभवनीयाः । १०. केचन भावाःस्वभावेन दूराः, केचन क्षेत्रापेक्षया दूराः, केचन कालापेक्षया दूरतराः तस्य सम्यग्ज्ञानस्य । ११. 'मतेरन्तरङ्गो हेतुः क्षयोपशमः, वाह्यं तदिन्द्रियानिन्द्रियं । श्रुतस्यान्तरङ्गं क्षयोपशमः वाह्यमनिन्द्रियं । अवधेर्वाह्यं भवप्रत्ययः, मनःपर्ययस्य वाह्यं क्षेत्रादिकं, अन्तरङ्गं क्षयोपशमः, अवधेश्चापि क्षयोपशममन्तरङ्गं । केवलज्ञानस्य वाह्यं मानुष्यं, अन्तरङ्गं कर्मणां क्षयः' । इति टि० ख० च० ।

ॐ यत्सकललोकालोकावलोकनप्रतिबन्धकान्धकारविध्वंसनम्, [1]अनवद्यविद्यामन्दाकिनीनिदान[2]मेदिनीधरम्[3], अशेषसत्त्वोत्सवानन्दचन्द्रोदयम्, अखिलव्रतगुप्तिसमितिलतारामपुण्याकरसमयम्[4], अनल्पफलप्रदायितपःकल्पद्रुमप्रसवभूमिम[5]स्मयोपशमसौमनस्यवृत्तिधैर्यप्रधानैरनुष्ठीयमानमुशन्ति सद्धीधनाः परमपदप्राप्तेः प्रथममिव सोपानम्, तस्य [6]पञ्चतयात्मनः [7]सर्वक्रियोपशमातिशयावसानस्य सकलमङ्गलविधायिनः पञ्चपरमेष्ठिपुरःसरस्य भगवतः सम्यक्चारित्ररत्नस्याष्टतयीमिष्टिं करोमीति स्वाहा ।

अपि च । *धर्मं [8]योगिनरेन्द्रस्य कर्मवैरिजयार्जने । शर्मकृत्सर्वसत्त्वानां धर्मधीर्वृ समाश्रये ॥ ३४ ॥

जिनसिद्धसूरिदेशकसाधुश्रद्धानबोधवृत्तानाम् । कृत्वाष्टतयीमिष्टिं विदधामि ततः स्तवं युक्त्या ॥ ३५ ॥

तत्त्वेषु प्रणयः परोऽस्य मनसः श्रद्धानमुक्तं जिनै[9]रेतद्द्वित्रिदशप्रभेदविषयं व्यक्तं [10]चतुर्भिर्गुणैः ।

अष्टाङ्गं भुवनत्रयार्चितमिदं मूढैरपोढं त्रिभिश्चित्ते देव दधामि संसृतिलतोल्लासावसानोत्सवम् ॥ ३६ ॥

सम्यक्चारित्र-पूजा

जो समस्त लोक और अलोक के देखने व जानने में रुकावट डालनेवाले अज्ञानरूपी अन्धकार को विध्वंस करनेवाला है, जो केवलज्ञानरूपी गङ्गा का उत्पादक कारण हिमाचल है। अर्थात्—जैसे हिमाचल से गङ्गा निकलती है वैसे ही चारित्र की आराधना से केवलज्ञान प्रकट होता है। जो समस्त प्राणियों के उत्सवों (आनन्दों) की वृद्धि के लिए चन्द्र के उदय-सा है। अर्थात्—जिस प्रकार चन्द्र के उदय से समुद्र वृद्धिगत होता है उसी प्रकार चारित्र की आराधना से समस्त प्राणियों के आनन्द की वृद्धि होती है। जो समस्त व्रत, गुप्ति व समितिरूपी लताओं के बगीचे के लिए वसन्त ऋतु के समान है। जो प्रचुर फलदायक तपरूपी कल्पवृक्ष की उत्पत्ति भूमि है। जो गर्व का अभाव, कषायों का क्षय, विशुद्ध चित्तवृत्ति व धीरता की प्रमुखतावाले महात्माओं द्वारा धारण किया जाता है। प्रशस्त बुद्धिरूपी धनवाले महात्मा ऐसे चारित्र को मोक्षपद की प्राप्ति का प्रथम सोपान-(सीढ़ी) सरीखा कहते हैं। जो सामायिक, छेदोपस्थापना, परिहार विशुद्धि, सूक्ष्मसाम्पराय व यथाख्यात चारित्र के भेद से अथवा ज्ञान, दर्शन. चारित्र, तप व वीर्याचार के भेद से पाँच प्रकार का है। और जिसके अन्त में मन, वचन व काय के व्यापार का क्षय वर्तमान है, उस समस्त कल्याणों के कर्ता और पंचपरमेष्ठी की प्रमुखतावाले भगवान् सम्यक्चारित्र की आठ द्रव्यों से पूजा करता हूँ।

धर्म में बुद्धि रखनेवाला मैं ऐसे सम्यक्चारित्र का आश्रय ग्रहण करता हूँ; जो कि कर्मरूपी शत्रुओं पर विजयश्री प्राप्त करने में महामुनिरूपी राजा का धनुष है एवं जो समस्त प्राणियों के लिए सुखदायक है ॥ ३४ ॥

इसप्रकार अर्हन्त, सिद्ध, आचार्य, उपाध्याय, साधु, सम्यग्दर्शन, सम्यग्ज्ञान व सम्यक्चारित्रकी अष्ट द्रव्य से पूजन करके मैं इनका युक्तिपूर्वक स्तवन करता हूँ ॥ ३५ ॥

सम्यग्दर्शन की भक्ति

हे जिनेन्द्र ! मै संसाररूपी लता की वृद्धि को समाप्त करने का उत्सववाले व तीन लोक द्वारा पूजित

---

१. केवलज्ञानं। २. कारणं। ३. हिमाचलं धोधनाः उशन्ति कथयन्ति। ४. वसन्तं। ५. अगर्व। ६. पंचतयाऽत्मनः सामायिकछेदोपस्थापनापरिहारविशुद्धिसूक्ष्मसाम्पराययथाख्यातचारित्रभेदेन। ज्ञानदर्शनचारित्रतपोवीर्याचारभेदेन। ७. मनोवचःकायव्यापारक्षयपर्यन्तस्य। *. 'वर्म' इति घ०। ८. महामुनि। ९. निसर्गाधिगम, उपशम-क्षायिक-मिश्र, आज्ञामार्गादि। १०. उपशम, संवेग, अनुकम्पा, आस्तिक्य।

ते कुर्वन्तु तपांसि दुर्धरधियो ज्ञानानि संचिन्वतां । वित्तं वा वितरन्तु देव तदपि प्रायो न जन्मच्छिदः ।
एषा येषु न विद्यते तव वचःश्रद्धावधानोद्धुरा दुष्कर्माङ्कुरकुञ्ज[1]वज्रदहनद्योतावदाता रुचिः ॥ ३७ ॥
संसाराम्बुधिसेतुबन्धमसमप्रारम्भलक्ष्मीवन प्रोल्लासामृतवारिवाहमखिलत्रैलोक्यचिन्तामणिम् ।
कल्याणाम्बुजखण्डसंभवसरः सम्यक्त्वरत्नं कृती यो धत्ते हृदि तस्य नाथ सुलभाः स्वर्गापवर्गश्रियः ॥ ३८ ॥

(इति दर्शनभक्तिः)

[2]अत्यल्पायतिरक्षजा मतिरियं बोधोऽवधिः सावधिः[3] साश्चर्यः क्वचिदेव योगिनि स च स्वल्पो मनः पर्ययः ।
दुष्प्रापं पुनरद्य केवलमिदं ज्योतिः कथागोचरं माहात्म्यं निखिलार्थगे तु सुलभे किं वर्णयामः श्रुते ॥ ३९ ॥
यद्देवैः शिरसा धृतं गणधरैः कर्णावतंसीकृतं न्यस्तं चेतसि योगिभिर्नृपवरैराघ्रातसारं पुनः ।
हस्ते दृष्टिपथे मुखे च निहितं विद्याधराधीश्वरैस्तत्स्याद्वादसरोरुहं मम मनोहंसस्य भूयान्मुदे ॥ ४० ॥

सम्यग्दर्शन को चित्त में धारण करता हूँ। जिनेन्द्रों ने जीवादि सात तत्वों में इस विशुद्ध मन की उत्कृष्ट रुचि को सम्यग्दर्शन कहा है, जिसके निसर्गज व अधिगमज दो भेद हैं एवं औपशमिक क्षायिक व क्षायोपशमिक ये तीन भेद हैं तथा आज्ञा व मार्ग-आदि दशभेद हैं। जो प्रशम, संवेग, अनुकम्पा व आस्तिक्य इन चारों गुणों से पहचाना जाता है। जो निःशङ्कित-आदि आठ अङ्गोंवाला है और जो तीन प्रकार की मूढ़ता से रहित है ॥३६॥ हे जिनेन्द्र ! जिनकी आपके वचनों में गाढ़ मनोयोग से उत्कट श्रद्धापूर्ण निर्मल रुचि नहीं है, जो कि (रुचि) पाप कर्मरूपी अङ्कुरों के लतागृहों को भस्म करने के लिए वज्राग्नि की कान्तिसरीखी शुभ्र है, वे चञ्चल बुद्धिवाले चाहे कितना ही तप करें और चाहे कितना ही प्रचुर ज्ञान संचय करें अथवा धन वितरण करें, फिर भी प्रायः जन्म-परम्परा का छेदन करनेवाले नहीं हो सकते ॥ ३७ ॥

हे प्रभो ! जो पुण्यवान् पुरुष ऐसे सम्यग्दर्शनरूपी रत्न को अपने हृदय में धारण करता है, उसे स्वर्ग और मुक्तिरूपी लक्ष्मी की प्राप्ति सुलभ है, जो कि संसाररूपी समुद्र को पार करने के लिए पुल के बन्धन-सरीखा है। जो क्रम से उत्पन्न होनेवाले लक्ष्मी के उपवन को विकसित करने के लिए अमृत भरे मेघों-सरीखा है और जो समस्त तीन लोक के प्राणियों को चिन्तामणि-सा है एवं जो कल्याणरूपी कमल-समूह की उत्पत्ति के लिए तड़ाग-सरीखा है ॥ ३८ ॥

सम्यग्ज्ञान की भक्ति

इन्द्रियों से उत्पन्न होनेवाला मतिज्ञान स्वल्प व्यापारवाला है, अर्थात्—बहुत थोड़े पदार्थों को विषय करता है। अवधिज्ञान भी मर्यादा-सहित है, अर्थात्—द्रव्य, क्षेत्र, काल और भाव की मर्यादा को लेकर केवल रूपी पदार्थों को ही विषय करने के कारण सीमित है। मनः पर्यय का भी विषय थोड़ा है और वह भी किसी विशिष्ट योगी में ही उत्पन्न होता है, अतः आश्चर्यजनक है। केवलज्ञान महान् है, किन्तु उसकी प्राप्ति इस पंचमकाल में दुर्लभ है। वह तो पूज्य महापुरुषों के कथानकों का विषय रह गया है। एक श्रुतज्ञान ही ऐसा है, जो समस्त पदार्थों को विषय करता है और सुलभ भी है, उसकी हम क्या प्रशंसा करें ॥ ३९ ॥ ऐसा स्याद्वाद (अनेकान्त) श्रुतरूपी कमल मेरे मनरूपी हंस की प्रसन्नता के लिए हो, जिसे जिनेन्द्रदेव ने शिर पर धारण किया था, गणधरों द्वारा जो कर्णाभूषण किया गया, जो महामुनियों द्वारा अपने चित्त में स्थापित किया गया और राजाओं में श्रेष्ठों के द्वारा जिसका सार सूँघा गया है एवं विद्याधरों के स्वामियों ने जिसे अपने हाथों पर स्थापित किया एवं नेत्र गोचर किया तथा मुख में स्थापित किया ॥ ४० ॥

१. वज्राग्निः। २. 'अल्पदैर्घ्या' टि० ख०, पञ्जिकाकारस्तु 'अत्यल्पायति स्वल्पव्यापारा' इत्याह। ३. समयदिः।

मिथ्यातमःप[1]टलभेदनकारणाय स्वर्गापवर्गपुरमार्गनिबोधनाय ।
तत्तत्त्वभावनमना: प्रणमामि नित्यं त्रैलोक्यमङ्गलकराय जिनागमाय ॥ ४१ ॥ (इति ज्ञानभक्तिः)

ज्ञानं दुर्भगदेहमण्डनमिव स्यात्स्वस्य खेदावहं यस्मै साधु न त[2]त्फलश्रियमयं सम्यक्त्वरत्नाङ्कुरः ।
कामं देव [3]यदन्तरेण विफलास्तास्तास्तपोभूमयस्तस्मै स्वच्चरिताय संयमदमध्यानाविधाम्ने नमः ॥ ४२ ॥
यच्चिन्तामणिरीप्सितेषु वसतिः सौरूप्यसौभाग्ययोः श्रीपाणिग्रहकौतुकं[4] कुलबलारोग्यागमे संगमः ।
यत्पूर्वैश्चरितं समाधिनिधिभिर्मोक्षाय पञ्चात्मकं तच्चारित्रमहं नमामि विविधं स्वर्गापवर्गाप्तये ॥ ४३ ॥
हस्ते स्वर्गसुखान्यतर्कितभवास्ताश्चक्रवर्तिश्रियो देवाः पादतले लुठन्ति फलति द्यौः कामितं सर्वतः ।
कल्याणोत्सवसंपदः पुनरिमास्तस्यावतारालये प्रागेवावतरन्ति यस्य चरितैर्जैनैः पवित्रं मनः ॥ ४४ ॥

(इति चारित्रभक्तिः)

बोधोऽवधिः[5] श्रुतमशेषनिरूपितार्थमन्तर्बहिःकरणजा सहजा मतिस्ते ।
इत्थं स्वतः सकलवस्तुविवेकबुद्धेः का स्याज्जिनेन्द्र भवतः परतो[6] व्यपेक्षा[7] ॥ ४५ ॥

आगम में कहे हुए तत्त्वों की भावना से युक्त चित्तवाला मैं ऐसे जिनागम के लिए सदा नमस्कार करता हूँ, जो मिथ्यात्वरूपी अन्धकार समूह को नष्ट करने में कारण है, जो स्वर्ग व मोक्षरूपी नगर के मार्ग का ज्ञान करानेवाला है एवं जो तीन लोक का कल्याण करनेवाला है ॥ ४१ ॥

चारित्र-भक्ति

जिस चारित्र के बिना विद्वान् का ज्ञान उस प्रकार उसके लिए खेदजनक होता है जिस प्रकार भाग्य-हीन मानव का शरीर पर आभूषण धारण करना खेदजनक होता है और जिसके बिना यह सम्यग्दर्शनरूपी रत्नाङ्कुर सम्यग्ज्ञानरूपी फल सम्पत्ति को भली प्रकार धारण नहीं करता एवं जिसके बिना समस्त तपो-भूमियाँ अत्यन्त निष्फल हुईं, हे भगवन् ! आपके उस सम्यक्चारित्र के लिए नमस्कार हो; जो कि संयम, इन्द्रिय-दमन व धर्मध्यान और शुक्लध्यान-आदि का स्थान है ॥ ४२ ॥ ऐसे उस अनेक प्रकार के सम्यक्चारित्र के लिए मैं स्वर्ग व मोक्ष की प्राप्ति के लिए नमस्कार करता हूँ, जो अभिलषित वस्तुओं के प्रदान करने के लिए चिन्तामणि है। जो सौन्दर्य व उत्तम भाग्य का निवास है, जो मुक्तिरूपी लक्ष्मी के साथ पाणि-ग्रहण करने में कङ्कण-बन्धन है। जो उत्तमकुल, शक्ति व निरोगता का संगमस्थान है। जिसे धर्मध्यान की निधिवाले पूर्वचार्यों ने मोक्ष की प्राप्ति के लिए धारण किया था और जो सामायिक व छेदोपस्थापना-आदि के भेद से पाँच प्रकार का है ॥ ४३ ॥

जिनेन्द्र के चारित्र-धारण से पवित्र मनवाले मानव के लिए स्वर्ग-सुख हस्त-गत हो जाते हैं। चक्रवर्ती की विभूतियाँ विना विचारे प्राप्त होनेवाली होती हैं, । देवतालोग उसके चरणतल पर लोटते हैं, समस्त दिशाएँ उसके मनोरथ को पूर्ण करती हैं और उस चरित्रवान् की जन्मभूमि में जन्म से पूर्व ही ये गर्भकल्याणक-आदि उत्सव सम्पत्तियाँ प्राप्त हो जाती हैं ॥ ४४ ॥

अर्हन्त-भक्ति

हे जिनेन्द्र ! आपको जन्म से ही अन्तरङ्ग (मन) व बहिरङ्ग (स्पर्शनादि) इन्द्रियों से होनेवाला मतिज्ञान, समस्त जीवादि तत्त्वों को जाननेवाला श्रुतज्ञान और अवधिज्ञान होता है। इस प्रकार स्वतः ही

---

१. छर्दिनेत्ररुजो क्लीबे समूहे पटलं न ना । २. ज्ञान । ३. चारित्रेण विना । ४. कङ्कणं । ५. हे जिन तव वर्तते । ६. अन्यतः । ७. वाञ्छा ।

ध्यानावलोकविगलत्तिमिरप्रताने तां देव केवलमयीं श्रियमादधाने ।
आसीत्त्वयि त्रिभुवनं मुहुरुत्सवाय व्यापारमन्थर[1]मिवैकपुरं महाय[2] ॥ ४६ ॥
छत्रं दधामि किमु चामरमुत्क्षिपामि हेमाम्बुजान्यथ जिनस्य पदेऽर्पयामि ।
इत्थं मुदामरपतिः स्वयमेव यत्र सेवापरः परमहं किमु वच्मि तत्र ॥ ४७ ॥
त्वं सर्वदोषरहितः सुनयं वचस्ते सत्त्वानुकम्पनपरः सकलो विधिश्च ।
लोकस्तथापि यदि तुष्यति न त्वयीश कर्मास्य तन्ननु रवाविव कौशिकस्य ॥ ४८ ॥
पुष्पं त्वदीयचरणार्चन[3]पीठसङ्गाच्चूडामणी भवति देव जगत्त्रयस्य ।
अस्पृश्यमन्यशिरसि स्थितमप्यतस्ते को नाम साम्यमनुशास्तु[4] रवीश्वराद्यैः[5] ॥ ४९ ॥
मिथ्यामहान्धतमसावृतमप्रबोधमेतत्पुरा जगदभूद्भवगर्तपाति ।
तद्देव[6] दृष्टिहृदयाब्जविकासकान्तैः स्याद्वादरश्मि[7]भिरथोद्धृतवांस्त्वमेव ॥ ५० ॥
पादाम्बुजद्वयमिदं तव देव यस्य स्वच्छे मनःसरसि संनिहितं समास्ते ।
तं श्रीः स्वयं भजति तं नियतं वृणीते स्वर्गापवर्गजननी च सरस्वतीयम् ॥ ५१ ॥　　(इत्यर्हद्भक्तिः)

समस्त पदार्थों की विवेक बुद्धिवाले आपको पर की (गुरु-आदि की) सहायता की वाञ्छा ही क्या है ? अर्थात्—आपको ज्ञानोत्पत्ति में गुरु-आदि सहायकों की अपेक्षा नहीं होती ॥ ४५ ॥ हे प्रभो ! जब आप शुक्लध्यानरूपी प्रकाश द्वारा अज्ञानरूपी अन्धकार-समूह को नष्ट करनेवाले होने से उत्पन्न हुई उस केवलज्ञानरूपी लक्ष्मी को धारण करनेवाले हुए तब तीन लोक ने आपको बार-बार पूजा के लिए अपने व्यापार में मन्द होकर (अपना कार्य रोककर) एकनगर-सरीखे होकर महान् उत्सव किया। अर्थात्—भगवान् को केवलज्ञान होनेपर उनके समवसरण में नर, सुर व पशु-आदि धर्म-श्रवण के लिए आते हैं ॥ ४६ ॥

'मैं प्रभु के मस्तक पर छत्र धारण करूँ या चमर ढोरूँ अथवा जिनेन्द्र के चरणों में स्वर्ण-कमल अर्पित करूँ' इस प्रकार जहाँ सौधर्मेन्द्र स्वयं ही प्रमुदित होकर प्रभु की आराधना में तत्पर है, वहाँ मैं क्या कहूँ ॥ ४७ ॥ हे स्वामिन् ! तुम समस्त दोषों (क्षुधा-तृषा-आदि अठारह दोषों) से रहित हो। तुम्हारे वचन स्याद्वाद (अपेक्षावाद) रूप हैं (विविध दृष्टिकोणों से वस्तु का निश्चय करनेवाले हैं)। तथा तुम्हारे द्वारा कही हुई समस्त विधि सभी प्राणियों की रक्षा में तत्पर है, तथापि लोक आपसे सन्तुष्ट नहीं होते, इसका कारण उनका मिथ्यात्व कर्म ही है न कि आप। जिस प्रकार सूर्य के उदित होनेपर उसे उल्लू नहीं देखता, इसमें उल्लू का दृष्टि-दोष ही कारण है, न कि सूर्य ॥ ४८ ॥ हे प्रभो ! तुम्हारे चरणों की पूजा का पुष्प-प्रक्षेप के आधारभूत आसन (पीढ़ा) के संसर्गमात्र से पुष्प, तीनों लोकों के मस्तक का आभूषण हो जाता है, अर्थात्—उस पुष्प को सब अपने शिर पर धारण करते हैं। परन्तु दूसरों के शिर पर स्थित हुआ भी पुष्प अस्पृश्य माना जाता है। अतः दूसरे सूर्य व रुद्र-आदि देवताओं से तुम्हारी तुलना को कौन कहे ? ॥ ४९ ॥ हे देव ! पहले मिथ्यात्वरूपी निविड़ अन्धकार से आच्छादित होने के कारण प्रकृष्ट कर्तव्य-ज्ञान से विमुख हुआ यह जगत् संसाररूपी गड्ढे में पड़ा हुआ था, उसका तुमने ही नेत्र-कमल व हृदय-कमल को विकसित करने के कारण मनोज्ञ स्याद्वाद (अनेकान्त) रूपी रश्मियों (किरणों अथवा आकर्षण की अपेक्षा से रज्जुओं) से उद्धार किया ॥५०॥ हे देव ! जिसके विशुद्ध मनरूपी स्वच्छ तड़ाग में तुम्हारे दोनों चरणकमल समीप में विराजमान हैं, उसकी

---

१. मन्दं । २. पूजायै । ३. चरणायतः यदर्चनपीठं पुष्पप्रक्षेपस्याधारभूतमन्यत् पीठं च वर्तते तस्य संसर्गात् ।
४. कथयतु । ५. सूर्यरुद्राद्यैः । ६. नेत्रकमलं हृत्कमलं च । ७. किरणैः आकर्षणापेक्षया रज्जुभिः ।

सम्यग्ज्ञानत्रयेण[1] प्रविदितनिखिलज्ञेयतत्त्वप्रपञ्चाः प्रोद्धूय ध्यानवातैः सकलमघरजः प्राप्तकैवल्यरूपाः ।
कृत्वा सत्त्वोपकारं त्रिभुवनपतिभिर्दत्तयात्रोत्सवा ये ते सिद्धाः सन्तु लोकत्रयशिखरपुरीवासिनः सिद्धये वः ॥५२॥
दानज्ञानचरित्रसंयमनयप्रारम्भगर्भं मनः कृत्वान्तर्बहिरिन्द्रियाणि मरुतः[2] संयम्य पञ्चापि च ।
पश्चाद्गीतविकल्पजालमखिलं ध्वस्यत्तमःसंतति ध्यानं तत्प्रविधाय ये च मुमुचुस्तेभ्योऽपि बद्धोऽञ्जलिः ॥ ५३ ॥
इत्थं येऽत्र समुद्रकन्दरसरःस्रोतस्विनीभूनभोद्वीपाद्रिद्रुमकाननादिषु धृतध्यानावधानर्द्धयः[3] ।
कालेषु त्रिषु मुक्तिसंगमबुधस्तुत्यास्त्रिभिर्विष्टपैस्ते रत्नत्रयमङ्गलानि ददतां भव्येषु रत्नाकराः ॥ ५४ ॥

(इति सिद्धभक्तिः)

[4]भौमव्यन्तरमर्त्यभास्करसुरश्रेणीविमानाश्रिताः स्वर्ज्योतिः कुलपर्वतान्तरचरार[5]ण्यप्रबन्धस्थितीः ।
वन्दे तत्सुरपालमौलिविलसद्रत्नप्रदीपार्चिताः साम्राज्याय जिनेन्द्रसिद्धगणभृत्स्वा[6]ध्यायिसाध्वाकृतीः ॥ ५५ ॥

(इति चैत्यभक्तिः)

लक्ष्मी स्वयं सेवा करती है और स्वर्ग-मोक्ष उत्पन्न करनेवाली यह सरस्वती निश्चित रूप से उसे वरण करती है ॥ ५१ ॥

सिद्ध-भक्ति

ऐसे वे सिद्ध परमेष्ठी तुम्हारी सिद्धि (मुक्ति) के लिए हों, जिन्होंने छद्मस्थ अवस्था में मति, श्रुत व अवधिज्ञान द्वारा समस्त जानने योग्य तत्त्वों को विस्तारपूर्वक जाना। पुनः शुक्लध्यान रूपी वायु के द्वारा समस्त पापरूपी धूलि को उड़ाकर केवलज्ञान प्राप्त किया। पश्चात् जिन्होंने प्राणियों का उपकार किया। पुनः तीन लोक के स्वामियों (इन्द्र-आदि) द्वारा जिनका निर्वाण-कल्याणक उत्सव किया गया और जो तीन लोक के अग्रभागरूपी सिद्धपुरी में निवास करनेवाले हैं। अभिप्राय यह है कि इस पद्य में जो तीर्थङ्कर होकर सिद्ध हुए हैं, उन्हें नमस्कार किया गया है ॥ ५२ ॥ ऐसे उन सिद्ध परमेष्ठियों के लिए भी मैं अञ्जलि (हस्त-संपुट) जोड़ता हूँ, जिन्होंने अपना मन, दान, ज्ञान, चारित्र, संयम व नयों के प्रारम्भ में स्थापित करके मन व स्पर्शनादि बाह्य इन्द्रियों का तथा पाँच वायुओं (प्राण, अपान, समान, उदान और व्यान) का निरोध किया। फिर ऐसा शुक्लध्यान प्राप्त करके मुक्त हुए, जिसमें राग, द्वेष व मोहादि समस्त विकल्प समूह नष्ट हो चुके हैं और जो अज्ञानरूपी अन्धकार-परम्परा का विध्वंस करनेवाला है। भावार्थ—प्रस्तुत पद्य में जो सामान्य जन सिद्ध हुए हैं, उन्हें नमस्कार किया गया है ॥ ५३ ॥

इसप्रकार समुद्र, गुफा, तडाग, नदी, पृथिवी, आकाश, द्वीप, पर्वत वृक्ष व वन-आदि में लगाये हुए ध्यान की संलग्नतारूपी ऋद्धिवाले होकर जिन्होंने तीनों कालों (भूत भविष्यत व वर्तमान) में मुक्तिश्री के साथ प्रीतिपूर्वक संगम सेवन किया है, जो तीनों लोकों द्वारा स्तुति करने योग्य हैं और जो सम्यग्दर्शन-आदि रत्नों की खानि हैं, वे सिद्ध परमेष्ठी भव्य प्राणियों के लिए सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक् चारित्ररूपी मङ्गल समर्पण करें ॥ ५४ ॥

चैत्यभक्ति

मैं ऐसी अर्हन्त, सिद्ध, आचार्य, उपाध्याय व सर्वसाधुओं की प्रतिमाओं को स्वर्ग-आदि के साम्राज्य की प्राप्ति के लिए नमस्कार करता हूँ, जो कि भवनवासी व व्यन्तरों के भवनों में, मानवों के भवनों में, सूर्य-

---

१. छद्मस्थावस्थायां। २. वातात्—प्राणापानव्यानोदानसमानान्। ३. ध्यानावधानमेव ऋद्धिर्येषां।
४. भौमाः भवनवासिनः। ५. गिरणारादिषु पर्वततलेषु नयनेषु ?। ६. उपाध्याय।

[1]समवसरणवासान्मुक्तिलक्ष्मीविलासा[2]न्स[3]कलसमयनाथा[4]न्व्याकरणविद्यासनाथान्[5] ।
भवनिगल[6]विनाशोद्योगयोगप्रकाशा[7]न्निरुपमगुणभावान्संस्तुवेऽहं क्रियावान्[8] ॥ ५६ ॥
भवदुःखानलशान्ति[9]र्धर्मामृतवर्षजनितजनशान्तिः[10] ।
शिवशर्मास्रवशान्तिः[11] शान्तिकरः[12] स्ताज्जिनः शान्तिः ॥ ५७ ॥ (इति शान्तिभक्तिः)
मनोमात्रोचितायापि यः पुण्याय न चेष्टते । हताशस्य कथं तस्य कृतार्थाः स्युर्मनोरथाः ॥ ५८ ॥
येषां तृष्णातिमिरभिदुरस्त[13]त्त्वालोकावलोकात्पारेऽवारे [14]प्रशमजलधेः सङ्गवार्धेः परेऽस्मिन् ।
बाह्यव्याप्तिप्रसरविधु[15]रश्चित्तवृत्तिप्रचार[16] स्तेषामर्चाविधिषु भवताद्वारिपूरः[17] श्रिये वः ॥ ५९ ॥
[18]दूरारूढे [19]प्रणिधितरणावन्तरात्माम्बरेऽस्मिन्नास्ते येषां हृदयकमलं मोदनिस्पन्दवृत्ति ।
तत्त्वालोकावगमगलित[20]ध्वान्तबन्धस्थितीना[21]मिष्टिं तेषामहमुपनये[22] पादयोश्चन्दनेन ॥ ६० ॥

और देवों के श्रेणी विमानों में स्थित हैं, जिनका निवास स्वर्ग, ज्योतिषी देव, कुलाचल, पाताललोक, गुफाएँ व गिरनार-आदि पर्वत-तलों में है और जो उन नगर-स्वामियों के मुकुटों पर जड़े हुए रत्नरूपी दीपकों से पूजी गई हैं ॥ ५५ ॥

पञ्चगुरु-भक्ति

क्रिया में उद्यत हुआ मैं, समवसरण में स्थित हुए अर्हन्तों की, मुक्तिरूपी लक्ष्मी के साथ क्रीडा करनेवाले सिद्धों की, समस्त आगम के स्वामी आचार्यों को व व्याकरण-आदि विद्याओं से सहित उपाध्यायों की तथा ऐसे सर्वसाधुओं की स्तुति करता हूँ, जिनका ध्यानरूप प्रकाश संसाररूपी शृङ्खला को छिन्न-भिन्न करने के उद्योगवाला है एवं जिनमें अनोखे सम्यग्दर्शन-आदि गुण वर्तमान हैं ॥ ५६ ॥

शान्ति-भक्ति

ऐसे श्रीशान्तिनाथ भगवान् शान्ति (विघ्न-हरण) करनेवाले हों, जो सांसारिक दुःखरूपी अग्नि को शान्त करनेवाले (बुझाने वाले) हैं, जिन्होंने धर्मरूपी अमृत की वृष्टि द्वारा जनता में शान्ति (शैत्य) उत्पन्न की है व जो मोक्ष-सुख में बाधक कर्मों (ज्ञानावरण-आदि) के आस्रव की शान्ति (क्षय) करनेवाले हैं ॥ ५७ ॥ जो ऐसे पुण्य-संचय के लिए प्रयत्न नहीं करता, जिसकी प्राप्ति में केवल मन की विशुद्धि मात्र ही योग्य है, उस हताश (दीन) मानव के मनोरथ कैसे सफल हो सकते हैं ? ॥ ५८ ॥

आचार्य-भक्ति

उन आचार्यों को पूजाविधि में अर्पित किया गया जल-समूह तुम लोगों को लक्ष्मी की प्राप्ति के लिए होवे, जिनका चित्तवृत्ति-प्रचार (आत्मा, इन्द्रिय और मन को केन्द्रित करने में कारणीभूत व्यापार—ध्यानादि) तत्व-समूह के यथार्थ प्रकाश से तृष्णारूपी अन्धकार को नष्ट करनेवाला है और प्रशमरूपी समुद्र के उस पार (तट) व इस पार में वर्तमान है, अर्थात्—प्रशमरूपी समुद्र के मध्य में ही वर्तमान है एवं जो परिग्रह रूपी समुद्र से उत्तीर्ण (पार) हो चुका है तथा जो बाह्य पदार्थों में प्रवृत्ति के प्रसार से रहित है ॥ ५९ ॥

१. अर्हतः । २. सिद्धान् । ३. परिपूर्ण । ४. सूरीन् । ५. उपाध्यायान् । ६. शृङ्खला । ७. साधून् । ८. क्रियासूद्यतः । ९. विध्यापनं विध्याति—विदधातीत्यर्थः । १०. शैत्यं । ११. क्षय । १२. विघ्नहरः । १३-१४. येषां चित्तवृत्तिप्रचारः प्रशमजलधेः पारे परकूले, अवारे अवाक्कूले च वर्तते, प्रशमसमुद्रमध्ये एव वर्तते इत्यर्थः । सङ्गवार्धेः परिग्रहसमुद्रस्य परे पारे वर्तते तस्मादुत्तीर्ण इत्यर्थः । १५. प्रविश्लेषे च विकले विधुरं सुधियो विदुः । १६. आत्मेन्द्रियमनसां व्यासङ्गहेतुर्व्यापारः । १७. समूहः । १८. प्रकर्षे प्राप्ते सति । १९. ध्यानसूर्ये, प्रणिधिः प्रार्थने चरे अवधानेऽपि । २०. ध्वान्तस्याज्ञानस्य प्रबंधः समूहः तस्य स्थितिः । २१. पूजां । २२. परिकल्पयामि ।

येषामन्तस्तत्त्वामृतरसास्वादमन्दप्रचारे[1] क्षेत्राधीशे विगतनिखिलारम्भसंभोगभावः ।
ग्रामोऽक्षाणामुद्वसित[2] इवाभाति योगीश्वराणां कुर्मस्तेषां कलमसदकैः[3] पूजनं निर्ममाणाम्[4] ॥ ६१ ॥
[5]देहारा*मेऽप्युपरतधियः सर्वसंकल्पशान्तेर्येषा[6]मूर्मिस्म[7]यविरहिता ब्रह्मधामामृताप्तेः ।
आत्मात्मीयानुगमविगमाद्वृत्तयः शुद्धबोधास्तेषां पुष्पैश्चरणकमलान्यर्चयेयं शिवाय ॥ ६२ ॥
येषामङ्गे मलयजरसैः संगमः कर्दमैर्वा स्त्रीबिब्बोकैः[8] पितृवनचिताभस्मभिर्वा समानः ।
मित्रे शत्रावपि च विषये[9] निस्तरङ्गो[10]ऽनुषङ्ग[11]स्तेषां पूजाव्यतिकरविधावस्तु भूत्यै हविर्वः[12] ॥६३॥
योगाभोगाचरणचतुरे [13]दीर्णकन्दर्पदर्पे स्वान्ते ध्वान्तोद्धरणसवि[14]धे ज्योतिरुन्मेष[15]भाजि ।
[16]संमोदेतामृतभृत इव क्षेत्रनाथोऽन्तरुच्चैर्येषां तेषु क्रमपरिचयात्स्याच्छ्रिये वः प्रदीपः ॥६४॥

विशुद्ध आत्मारूपी आकाश में धर्मध्यानरूपी सूर्य प्रकर्ष को प्राप्त हो जाने पर जिनका हृदय कमल हर्ष से निश्चलता प्राप्त करता है, अर्थात्—आनन्द से प्रफुल्लित हो जाता है और तत्वदर्शन व तत्वज्ञान से जिनके अज्ञानरूपी अन्धकार-समूह को स्थिति नष्ट हो चुकी है, उनके चरणों की चन्दन से पूजा करता हूँ ॥ ६० ॥

हम ममत्व-रहित ऐसे आचार्यों की अक्षतों (धान्य तण्डुलों) से पूजा करते हैं, जिनकी आत्माज, अध्यात्मरूपी अमृतरस के पान करने से वाह्य अनात्मीय पदार्थों में मन्द गतिवाली हो जाने पर जिनका इन्द्रिय-समूह, जिससे समस्त आरम्भ व काम-क्रीड़ा नष्ट हो चुकी है, ऊजड़ हुआ-सरीखा शोभायमान हो रहा है ॥ ६१ ॥ मैं ऐसे आचार्यों के चरणकमलों को मोक्ष प्राप्ति के लिए पुष्पों से पूजा करता हूँ, समस्त संकल्पों (कामनाओं) के शान्त हो जाने से जो शरीररूपी परिग्रह में भी विरक्त बुद्धिवाले हैं, मोक्षस्थानरूपी अमृत की प्राप्ति हो जाने से जिनकी क्षुधा व तृषा-आदि की पोड़ा का सहन गर्व-रहित है और आत्मा में भी अपनेपन की भावना की उत्पत्ति के नष्ट हो जाने से जिनकी वृत्तियां शुद्ध बुद्धि वालीं हो गईं हैं ॥ ६२ ॥ ऐसे उन आचार्यों की पूजा की उत्सव विधि में अर्पण किया हुआ नैवेद्य तुम्हारी विभूति के लिए हो, जिन्हें अपने शरीर पर लगाया गया मलयागिर चन्दन का लेप अथवा कीचड़ों का लेप एक सरीखा है, अर्थात्—क्रम से हर्ष व विषाद के लिए नहीं है व जिन्हें स्त्रियों के विलास या श्मशान भूमि को चिंता की राख समान है एवं मित्र व शत्रु के दृष्टिगोचर होने पर जिनका आशय कल्लोल-रहित (राग-द्वेष-शून्य) है, अर्थात्—जो मित्र से अनुराग व शत्रु से द्वेष नहीं करते ॥ ६३ ॥

जिनका मन जब ऐसा विशुद्ध हो जाता है, जो कि विस्तृत योगों (ध्यानों) के पालन करने में प्रवीण है और कामदेव का गर्व विदीर्ण करनेवाला है एवं अज्ञानरूपी अन्धकार को नष्ट करने में तत्पर है; क्योंकि उसमें ज्ञानरूपी ज्योति उत्पन्न हो चुकी है, तब जिनकी अन्तरात्मा अमृतरस से भरी हुई-सी या चन्द्र-सी विशेष आनन्दित होती है, उनके चरणों की पूजा के लिए अर्पित किया गया दीप तुम्हारी श्री-वृद्धि के लिए हो ॥ ६४ ॥

---

१. क्षेत्राधीशे। २. उद्वस इव । ३. 'अक्षतैः' टि० ख० 'सदकास्तण्डुलाः' इति पं० । ४. ममत्वरहितानां । ५. आरामः परिग्रहः । *. 'देहारम्भे' इति ग० । ६. 'ऊर्मिः पीड़ाजवोत्कण्ठा भङ्गप्रकाशवीचिषु क्षुत्पिपासादिपीड़ा' टि० ख०, पञ्जिकाकारस्तु 'ऊर्म्मयः क्षुत्पिपासादयः' इत्याह । ७. गर्व । ८. विलासैः । ९. इन्द्रियगोचरे । १०. निष्कल्लोलः । ११. 'संगतिः' इति टि० ख०, पञ्जिकायां तु 'अनुषङ्गः आशयः' इति प्रोक्तं । १२. नैवेद्यं । १३. विदारित । १४. समीपे । १५. प्रादुर्भाव । १६. हर्षेत ।

येषां [1]श्रेयाशयकुवलयानन्दचन्द्रोदयानां बोधाम्भोधिः [2]प्रमदसलिलैर्माति नात्मावकाशे ।
लब्ध्वाप्येतामखिलभुवनैश्वर्यलक्ष्मीं निरीहं चेतस्तेषामयमपचितौ[3] श्रेयसे वोऽस्तु धूपः ॥६५॥
[4]चित्ते चित्ते विशति करणेष्वन्तरात्मस्थितेषु [5]स्रोतः स्यूते[6] बहिरखिलतो व्याप्तिशून्ये[7] च पुंसि ।
येषां ज्योतिः किमपि परमानन्दसंदर्भ[8]गर्भं जन्मच्छेदि प्रभवति[9] फलैस्तेषु कुर्मः सपर्याम् ॥६६॥
वाग्देवतावर इवायमुपासकानामागामि[10]तत्फलविधाविव पुण्यपुञ्जः ।
लक्ष्मीकटाक्ष[11]मधुपागमनैकहेतुः पुष्पाञ्जलिर्भवतु तच्चरणार्चनेन ॥६७॥ (इत्याचार्यभक्तिः)

इत्युपासकाध्ययने समयसमाचारविधिर्नाम पञ्चत्रिंशत्तमः कल्पः ।

इदानीं ये [12]कृतप्रतिमापरिग्रहास्तान्प्रति स्नापनार्चनस्तवजपध्यानश्रुतदेवताराधनविधीन् षट् प्रोवाहरिष्यामः ।

तथाहि—

श्रीकेतनं वाग्वनितानिवासं पुण्यार्जनक्षेत्रमुपासकानाम् । स्वर्गापवर्गागमनैकहेतुं जिनाभिषकाश्रयमाश्रयामि ॥६८॥
भावामृतेन मनसि प्रतिलब्धशुद्धिः [13]पुण्यामृतेन च तनौ नितरां पवित्रः ।
श्रीमण्डपे विविधवस्तुविभूषितायां वेद्यां जिनस्य [14]सवनं विधिवत्तनोमि ॥६९॥

ऐसे उन आचार्यों को पूजा में अर्पण किया हुआ धूप आप लोगों के कल्याण के लिए हो, जो भव्यजनरूपी कुवलय (नीलकमल व पक्षान्तर में पृथिवी-मण्डल) को आनन्दित या विकसित करने के लिए चन्द्रमा के उदय सरीखे हैं, जिनका ज्ञानरूपी समुद्र हर्षरूपी जल राशि से आत्मारूपी स्थान में नहीं समाता एवं समस्त लोक को ऐश्वर्य लक्ष्मी प्राप्त करके भी जिनका चित्त निस्पृह (लालसा-शून्य) है ॥६५॥ हम ऐसे उन आचार्यों की फलों से पूजा करते हैं, जिनकी चित्तवृत्ति, जब चैतन्यस्वरूप आत्मा में लीन हो जाती है और जिनकी समस्त इन्द्रियाँ जब अन्तरात्मा में लीन हो जाती हैं एवं इन्द्रियों के प्रवाह वाली आत्मा जब अविच्छिन्नता से समस्त बाह्य प्रपंचों से रहित हो जाती है तब जिन्हें ऐसी कोई अनिर्वचनीय ज्ञानज्योति उत्पन्न होती है, जिसके मध्य में उत्कृष्ट आनन्द की सृष्टि है, और जो जन्म-परम्परा के छेदन करने में समर्थ होती है ॥ ६६ ॥ ऐसी यह पुष्पाञ्जलि उस आचार्य के चरणों की पूजा करने से ऐसी मालूम पड़ती है—मानों—यह सरस्वती देवी का वरदान ही है और मानों—यह भविष्य में प्राप्त होनेवाले पूजा के फल के लिए पुण्य-समूह ही है, श्रावकों की लक्ष्मी के कटाक्षरूपी भ्रमरों के आगमन का कारण हो ॥ ६७ ॥

इस प्रकार उपासकाध्ययन में पूजा विधि का बतलानेवाला पैंतीसवाँ कल्प पूर्ण हुआ ।

अब हम जिनबिम्ब की पूजा की प्रतिज्ञा करनेवाले श्रावकों को उद्देश्य करके अभिषेक, पूजन, स्तुति, जप, ध्यान व श्रुतदेवता की आराधना इन छह विधियों को कहेंगे—

अभिषेक विधि

मैं ऐसे जिनेन्द्रदेव के अभिषेक के गृह (जिनमन्दिर) में प्रविष्ट होता हूँ, जो लक्ष्मी देवी का गृह है, श्रुतदेवता का निवास-स्थान है व देवपूजादि करनेवाले श्रावकों के पुण्यार्जन का खेत है तथा स्वर्ग व मोक्षप्राप्ति का मुख्य कारण है ॥ ६८ ॥ मैं विशुद्ध परिणामरूपी जल से अपनी मानसिक शुद्धि प्राप्त करके और पवित्र जल

---

१. श्रेयाशयः भव्यजनः । २. हर्ष । ३. पूजायां । ४. आत्मनि चैतन्यरूपे । ५–७. स्रोतः प्रवाहेन्द्रिययोः अविच्छिन्नतया बाह्यप्रपञ्चरहिते पुंसि । ८. रचना । ९. उत्पद्यते ज्योतिः । १०. पूजा । ११. कटाक्षाः एव भ्रमराः । १२. जिनबिम्ब । १३. पवित्रजलेन । १४. 'सवः अभिषेकः' इति पञ्जिकाकारः ।

[1]उदङ्मुखः स्वयं तिष्ठेत्प्राङ्मुखं स्थापयेज्जिनम् । पूजाक्षण भवेन्नित्यं यमी वाचंयमक्रियः ॥७०॥
[2]प्रस्तावना पुराकर्म स्थापना संनिधापनम् । पूजा पूजाफलं चेति षड्विधं देवसेवनम् ॥७१॥
यः श्रीजन्मपयोनिधिर्मनसि च ध्यायन्ति यं योगिनो येनेदं भुवनं सनाथममरा यस्मै नमस्कुर्वते ।
यस्मात्प्रादुरभूच्छ्रुतिः सुकृतिनो यस्य प्रसादाज्जना यस्मिन्नैष भवाश्रयो व्यतिकरस्तस्यारभे स्नापनम् ॥७२॥
[3]वीतोपलेपवपुषो न मलानुषङ्गस्त्रैलोक्यपूज्यचरणस्य कुतः [4]परोऽर्घ्यः[5] ।
मोक्षामृते धृतधियस्तव नैव[6] कामः स्नानं ततः [7]कमुपकारमिदं तनोतु ॥७३॥
तथापि स्वस्य पुण्यार्थं प्रस्तुवेऽभिषवं तव । को नाम सूपकारार्थं फलार्थी विहतोद्यमः ॥७४॥

(इति प्रस्तावना)

[8]रत्नाम्बुभिः [9]कुशकृशानुभिरात्त[10]शुद्धौ भूमौ भुजङ्गमपतीनमृतैरुपास्य[11] ।
कुर्मः [12]प्रजापतिनिकेतनदिङ्मुखानि दूर्वाक्षतप्रसवदर्भविदर्भितानि[13] ॥७५॥

द्वारा शरीर में अत्यन्त पवित्र होकर अर्थात्—सकलीकरण व अङ्गन्यास करके श्रीमण्डप में अष्ट मङ्गल द्रव्यों (छत्र व चमर-आदि) से अलंकृत हुई वेदी पर श्री जिनेन्द्र भगवान् का अभिषेक यथाविधि विस्तारित करता हूँ ॥ ६९ ॥ ऐसी प्रतिज्ञा करके पूजा करनेवाला श्रावक स्वयं उत्तर दिशा की ओर मुँह करके खड़ा हो और जिनबिम्ब का मुख पूर्व दिशा की ओर करके स्थापित करे एवं पूजा के समय सदा संयमी (प्राणि-रक्षा करने वाला और इन्द्रियों को काबू में करनेवाला) और मौन रखनेवाला, अर्थात्—पूजा-मन्त्रों के उच्चारण के सिवा दूसरों से भाषण न करनेवाला होवे ॥ ७० ॥

देवपूजा के छह विधि-विधान हैं—प्रस्तावना, पुराकर्म, स्थापना, सन्निधापन, पूजा और पूजाफल ॥७१॥

प्रस्तावना

